चौखम्बा-संस्कृत-ग्रन्थमाला।
(ग्रन्थसंख्या १२)

विभक्त्यर्थनिर्णयः ।

न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः ।

नैयायिकाग्रणीमहामहोपाध्यायझोपाख्य-
श्रीगिरिधरोपाध्यायविरचितः ।

तर्कतीर्थन्यायरत्नश्रीजीवनाथमिश्रेण परिशोधितः

काश्याम्

विद्याविलासनाम्नि यन्त्रालये श्रीयुत बाबू
हरिदासगुप्तेन मुद्रयित्वा प्रकाशितः ।

सन् १९०२ ईस्वी
वैक्रमसंवत् १९५८
शुभम् ।



भूमिका ।



विदितमस्त्वेतत्खलु सर्वेषामेवात्रभवतां कारकार्थानधिजिगमिषूणां व्युत्पित्सतां च तत्र, तत्रापि न्यायधोरणीपरिष्कृतमनसां प्रेक्षावतां संमदावहकार्य्यम् ।

यत्किल जागरूकेष्वपि प्रथमादिनिखिलविभक्तिव्युत्पादनचणायोग्यताकेषु नैयायिकमतानुसारिषु व्युत्पत्तिवादशब्दशक्तिप्रकाशिकापदवाक्यरत्नाकरशब्दार्थरत्नादिषु बहुषु निबन्धेषु यथाऽयं मुद्रयित्वा प्रकाशनायोपक्रान्तः पुरातनोऽप्यधुनैव प्रकाशनान्नव्यतामिव दधानोऽन्वर्थाभाख्यां बिभ्रद् विभक्त्यर्थनिर्णयनामा ऽनतिदुरूहतया, विस्तृततया, परिपूर्णप्रतिपाद्यविषयतया, परोक्तिनिराकृतिसद्युक्त्यादिगर्भिततया चेदानीन्तनप्रचारशालीहशग्रन्थापेक्षया ऽवश्यं स्वकीयविषयबुभुत्सुजनमानसेभ्यो ऽधिकं रोचिष्यते निबन्धो न तथा निबन्धान्तरम् इति संभाव्यते । अत्र च क्रमेण प्रथमादिसप्तविभक्तिविचारो भगवत्पाणिनिकृतसुब्विभक्तिविधायकसूत्रविवरणव्याजान्न्यायमतमनुरुन्धानेन ग्रन्थकर्त्रा विहितः । अस्य प्रणेता मिथिलादेशीयो मगरोलीग्रामवास्तव्यः फणदहकुलजन्मा झोपाख्यो गिरिधरोपाध्यायः । अयं च महोपाध्यायवागीशशर्मतो जयन्तीदेव्याऽलम्भि, पदवाक्यरत्नाकरामृतोदयादिविविधनिबन्धनिबन्धुरशेषशास्त्राम्बुधिपारदृश्वनः श्रीनगरनृपालफतेहसाहगुरोः स्वकीयपैतृव्यभ्रातुः श्रीगोकुलनाथोपाध्यायात् समधिगतविद्यश्च संपन्नः । गोकुलनाथोपाध्यायः पञ्चदशाधिकषोडशशततमशकाब्दे मिथिलामभूषयदिति तदीयग्रन्थादितो निश्चीयतेऽतोऽर्थात्तच्छिष्यस्यास्य ग्रन्थकर्त्तुरपि तत्समकालतेति निर्विचिकित्सम् । तच्छिष्यता तु स्वयमेवानेन विभक्त्यर्थनिर्णये तत्र तत्र " इति पदवाक्यरत्नाकरेऽस्मद्गुरुचरणा " इत्यादिलेखेन प्रकाशिता । पदवाक्यरत्नाकरस्य गोकुलनाथोपाध्यायकर्त्तृत्वे च तत्कृतग्रन्थान्तिमलेख एव प्रामाण्यपदवीमधिरोहति । अस्य च विभक्त्यर्थनिर्णयस्यैकमेव पुस्तकमधिगतं तदेवाश्रित्य श्रीयुतबाबूहरिदासगुप्तविज्ञप्त्यनुरोधादेतद्ग्रन्थरत्नं सं-

शोध्य तदीयविद्याविलासनामके यन्त्रालये प्राचीकशम् । एतद्ग्रन्थकर्त्तृसमयाद्यवधारणे मामकः श्रमस्तु दरभङ्गाभूपाश्रितमहामहोपाध्यायचित्रधरमिश्रैः स्वयमेव तत्सूचयित्वा परिहृत इति भृशमेतदीयोपकारं कलयामि, अस्य च कृतेऽपि श्रमपुरस्सरे शोधने शरीरिमात्रसाधारणभ्रान्त्यादिजनितं दोषं सौजन्यधुरीणैः सारस्पृहयालुभिः परिशीलितमरालचातुरीकै र्विपश्चिद्भिरुपेक्ष्यमाणमाशासानः, सकलाध्येत्रध्यापकादिसौकर्यमेतद्ग्रन्थात्संभावयन् निबन्धुरपि तादृशबुधैकजनवेदनीयश्रमसाफल्यमधुनैवावधारयन् शोधनप्रकाशनादीनां चापि गुणिदृक्पथगामितयैव सार्थकतां मन्यमानो गुणिजनाविर्भूतिमेवैतद्व्यापारात्प्रीयमाणः परमेश्वरो विदधात्विति कामयते ।

१९५९ वर्षान्ते

तर्कतीर्थन्यायरत्नोपाधिकः
श्रीजीवनाथमिश्रः

शुभम् ।



शुद्धिपत्रम् ।

पृ०	पं०	अशुद्धम्	शुद्धम्
३	८	यत्किंचिद्	यत्किंचिद्
३	२३	अनवच्छदकत्व	अनवच्छेदकत्व
४	१	रूपान्तःरस्य	रूपान्तरस्य
४	५	रम्भसंगच्छ	रम्भःसंगच्छ
५	२०	वच्छिनत्वं	वच्छिन्नत्वं
६	१४	न्वयेनामार्थ	न्वये नामार्थ
७	२४	तिङ्र्थस्य	तिङर्थस्य
८	४	स्यतीत्यादो	स्यतीत्यादौ
८	२१	योगित्वेना	योगित्वेना
८	२४	तद्वारण	तद्वारण
९	२५	स्वार्थकसव्	स्वार्थकसुब्
११	७	करणत्वेनाऽव्या	करणत्वे नाऽव्या
११	१९	द्वितीयाथता	द्वितीयाऽर्थता
११	२०	मवछिन्ना	मवच्छिन्ना
१५	१८	द्वानुत्पत्त्यान्वय	द्वानुत्पत्त्यान्वय
२०	१९	ङन्यरत्वस्यै	ङन्यतरत्वस्यै
२५	६	निभादिशकल	निभादिसकल
२५	९	स्वार्थप्रसिध्या	स्वार्थाप्रसिध्या
३०	६	बहुज घटित	बहुज्घटित
३०	१६	विशेषणाया	विशेषणतया
३२	२३	नागकालयो	नागतकालयो
३४	१७	तावच्छदक	तावच्छेदक
३९	३	प्रवशनीय	प्रवेशनीय
३९	९	धिकरण्य	धिकरण्य
४७	१४	पात्पर्थ	तात्पर्य
४८	२४	वचनाबहुश	वचनाद् बहुश
५१	१०	सिाध्यपुनर्वसू	सिध्यपुनर्वसू

५४	१०	सबोधनम्	सम्बोधनम्
५५	१२	ममुपपन्नम्	मनुपपन्नम्
५६	१	सम्बोधस्य	सम्बोध्यस्य
६१	१०	च्छब्दस्यन्यत्रा	च्छब्दस्यान्यत्रा
७१	१२	क्रिय	क्रिया
७१	१९	त	तू
७१	२२	पप	नुपप
७२	१०	प्यति	प्यति
७२	११	फव्य	फलव्य
७२	२३	विरोग	वियोग
७६	३	इयं	इयां
७७	१२	ससर्ग	संसर्ग
७८	१५	धिकर	धिकरण
७९	३	पारास्या	पारस्या
८०	१६	रैक्यं	रैक्यं
८१	२२	धेयव०	धेयत्व०
८२	१७	पवत्यपि	पचत्यपि
८२	२२	कर्मणां कर्मता	कर्मणां शराणां कर्मता
८३	१०	प्रतयो	प्रतियो
८४	१३	रमत्या	नमत्या
८४	१९	कर्तृत्वं	कर्तृत्वं
८६	१५	म्याद्	म्यादि
८७	१	दिती	द्विती
८७	११	प्रकृत्यार्थो	प्रकृत्यर्थो
८७	१३	याच्छिन्न	यावच्छिन्न
८७	१७	दिती	द्विती
८८	७	स्यैव	स्थैव
८८	८	ममवे	समवे
८८	१०	तत्रबोध	नत्रा बोध
८८	२५	यतत्रो	यतश्चैत्रो
९०	६	स्वन्दो	स्यन्दो
९१	४	दति	दिति

९३	५	धवात्	धत्वात्
९३	६	निषध	निषेध
९३	२४	मल्ला	मल्लो
९४	१३	त्म्येन	त्म्येन
९५	२३	मित्यत्र	मित्यत्र
९६	८	क	का
९७	१३	प	प्र
९७	१०	भेस्य	भेदस्य
९९	१८	ख्यातर्थ	ख्यार्थ
१०२	६	कण्टः	कण्ठः
१०२	१७	मि	भि
१०२	१९	य	म
१०३	१७	वो	यो
१०९	२४	क्रिवा	क्रिया
११३	२०	नाया	नामा
११४	१०	विशेष	निवेश
११४	१७	ख्यावा	ख्यातवा
११८	२१	षतया	षयतया
१२३	२	त्यत्ति	त्पत्ति
११५	१३	क्रिया ना	क्रिया यस्य क्रिया ना
१२३	८	ज्ञानस्वरूप	ज्ञानस्वरूपक्रियाप्रयोज्यत्वा-भावात् क्रियते घटः स्वयमे-वेत्यत्र तु तिङ्प्रत्ययार्थस्योत्प-त्तेः कृतिस्वरूपक्रिया
१२७	२	त्यत्ति	त्पत्ति
१३८	२४	पञ्च	पञ्च
१३९	१३	पया	पयो
१४२	३	त्वर्थः	त्वमर्थः
१४२	७	इया	इत्या
१४२	१८	विषत	विषयत
१४३	१२	पत्त	पत्ति
१४४	१२	व्यारा	व्यापारा

१४५	१८	खल्य	खल्प
१४६	२०	भिद्दा	चिदा
१४७	१०	तो	नो
१५०	२	तण्डला	तण्डुला
१५०	१५	तादश	तादश
१५१	१७	यज्	पज्
१५७	११	दोग्धा	दोग्धी
१५९	२०	त्वात	त्वात्
१६३	३	यात्ता	यान्ता
१६६	१६	रायन्ता	ण्यन्तः
१६८	८	त्यध	त्यर्ध
१८३	२३	फलवा	फलावा
१८६	२५	पार्थ	यार्थ
१८४	२	वाक	वाचक
१८४	८	द्वितीययोश्च द्वयं	द्वितीययोश्च परत्वान्वयिसम्बेतत्वमवधिश्च द्वयं
१८६	१७	पन्थ	पन्थं
१८७	११	तथ	तथा
१८७	१६	देवदे	देवंदे
१८७	२५	ज्ञाफा	ज्ञाफ
१८८	२	सूत्र	सूत्रे
१८८	४	सूत्र	सूत्रं
१८९	१९	णेचा	णेच्छाचा
१९०	१८	व्दन	व्देन
१९०	२५	कार्या	कां
१९१	२३	वच्छेदक	वच्छेदकताऽवच्छेदक
१९२	१०	मामा	माना
१९६	१२	प्रतिधात	प्रतिघात
१८६	१४	दीप्यते रर्थ	दीप्यतेरर्थ
२०४	१७	द्वितीयवा	द्वितीयावा
२११	२१	प्रकत्या	प्रकृत्या
२१२	१	द्रेणैः	द्रोणैः

२१२	५	मर्ध्यादिना	मर्ध्यादिना
२१२	९	मतुवर्थता	मतुबर्थता
२१८	७	दर्शित	दर्शित
२२१	८	पत्यामह	पत्न्या सह
२२२	१८	च्छेदकसवन्धा	च्छेदकसंबन्धा
२२२	२१	विशष्यतया	विशेष्पतया
२२२	२१	विशषणतया	विशेषणतया
२२२	२२	चाधयत्व	चाधेयत्व
२२३	५	कन्याभिन्न	कन्याऽभिन्न
२२३	१२	विशेष्येऽवाधे	विशेष्ये बोध
२२४	२४	सहार्थः एवं	सहार्थः समानकालिकत्वं स- हार्थे कालिकं विशेषणतया दैशिकं विशेष्यतया दीर्घत्व- मन्वेति श्वासदण्डा इत्यस्य दण्डसहशाः श्वासा इत्यर्थः एवं
२२४	२४	दिवसवृत्तेर्वा	दिवसवृत्तेर्निशावृत्तेर्वा
२२५	१	स्तद्धतः	स्तद्धन्तः
२२८	२२	कालिकत्वविशे	कालिकत्वे विशेष
२३१	२५	निगमकाले	निर्गमकाले
२३२	८	विधयाऽर्थस्तेन	विधयाऽर्थस्तेन
२३७	२४	यत्र द्वितीया	यत्र तु पय इति द्वितीया
२४३	१२	युक्तऽप्रधाने	सहयुक्तेऽप्रधाने
२४३	२५	चाशुप्रयोज	चाक्षुषप्रयोज
२४९	२	कार्यभाव	कार्याभाव
२५३	६	व्यावृत्तः प्रतीते	व्यावृत्तेः प्रतीते
२५३	२४	भावद्यावर्त	भाववद्यावर्त
२६०	१५	धमपदं	धूमपदं
२६३	५	पदेस्यं	पदस्य
२६६	१८	प्रतियोगिता	प्रतियोगिता
२६८	४	तृतीयाथ	तृतीयार्थ
२६८	१४	कर्मतिङ्योगात्	कर्मतिङ्योगात्
२७१	२	कामनया गवि	कामनया दीयमानायां गवि

२७४	१	त्वत्राहन्यमानः	त्यत्राहन्यमानः
२७५	१७	संभवेवा	संभवेन
२७९	१२	न्हुतिस्तिष्ठतिः	न्हुविस्तिष्ठतिः
२८०	१	भावे वा फले	भावे ज्ञानसामान्यविषयत्वा- भावे वा फले
२८०	२०	तत्रेच्छायांउत्कर्ष	तत्रेच्छायां चतुर्थ्यर्थे उत्कर्ष
२८१	१	निरूपितावच्छेदकतायाः प्रतियोगित्वेनसम्बन्धेनचा	... ...
२८९	६	धेयत्वं वा भार्याकर्म	धेयत्वं वा भार्याविशेषितम- न्वेति भार्याकर्म
२९०	१८	प्रयोगानुपपतेः	प्रयोगे चतुर्थीप्रयोगानुपपतेः
३१२	१९	सम्बन्धस्य घटके	सम्बन्धस्य संयोगसमवाय- स्वरूपस्य घटके
३२२	९	पत्राात्पतपितङ्गे	पत्राात्पतति पतङ्गे
३२३	२	श्रान्ताःरचना	श्रान्ताःसंसर्गरचना
३२५	१५	बन्धस्यप्रतियोगि	बन्धेन पत्रान्तरनिष्ठभेदस्या- पि पतने सत्त्वात् वृत्त्यनिया- मकसंबन्धस्य प्रतियोगि
३३९	११	प्रयोजकोनिश्चयस्त्वर्था- त्कर्तव्यत्वप्र	प्रयोजको निश्चयाभाव इति वाक्यार्थः निश्चयस्त्वर्थात्क- र्तव्यत्वप्र
३५२	२३	ज्ञानस्यचरणा	ज्ञानमन्धस्य चरणा
३५४	११	न्वयोवाध्यः	न्वयोबोध्यः
३५४	१२	शेषेषष्ठ्यव	शेषे षष्ठ्येव
३५४	१५	न्वयबाधः	न्वयबोधः
३५४	१८	पपत्तः त्यगा	पपत्तिः त्यागा
३५४	२०	यवेभ्या	यवेभ्यो
३५५	२२	शब्दना	शब्देना
३६०	१	त्रीणि पितृत	त्रीणि मातृतः त्रीणि पितृतः
३६०	२	मज्ञानः इति	मज्ञानः पितृत इति
३६३	९	दर्शितः प्रभवत्यर्थ	दर्शितः प्रकाशःप्रभवत्यर्थः
३६३	१२	न्नस्यचाक्षुषस्यवा	न्नस्य लौकिकस्य चाक्षुषस्य- प्रत्यक्षस्य वा

३७८	९	शादेश्यस्यवाअभाव	शादेश्यस्य संयोगस्य वा अभावश्च
३७९	२२	भेदस्याप्रसिद्धावपि	भेदस्याऽव्यावर्त्तकत्वेपि तद्वत्सामान्याभेदस्य प्रसिद्धावपि
४०२	१	त्रप्राति	त्र विभक्त्यर्थाधेयत्वद्वारैवान्वयः यत्र तु नान्वयस्तत्र प्राति
४०६	१	प्रतियोगिक	प्रतियोगिताक
४०६	२५	ष्टत्वं	रूप्यत्वं
४०८	६	निरूपकत्वा	निरूपकस्वामित्वा
४०८	२०	धात्वथ	धात्वर्थ
४०९	२३	नदीकूलानि	नदी कूलानि
४१८	३	चन्द्रमसः	चन्द्रमः
४२१	१७	पक्कपूर्वी वेदा	पक्कपूर्वी सूपान् अधीतपूर्वी वेदान्
४२५	८	मिति कृत	मिति कृतपूर्वीकटमित्यत्र कृत्
४२७	१७	प्रमाण वस्य	प्रमाणत्वस्य
४२७	२५	तर्क	कर्त्तृ
४२९	७	कट	कट
४२९	८	वाराणासी	वाराणसी
४३१	२०	तस्यति	तस्येति
४४१	११	वार्देन्धन	वार्द्रेन्धन
४४६	१४	त्वशदेन	त्वशब्देन
४५१	१०	तिवस्य	तित्वस्य
४५४	१८	न्तिड	न्तिङ
४५४	१९	रता	रया
४५८		करणत	करणता
४५९	१२	भदस्य	भेदस्य
४५९	१३	रात्तर	रोत्तर
४५९	२४	त्वात् नच	त्वात् न युक्तमेतद् नच
४६१	९	पत्तः	पत्तेः
४६७	२४	त्वेऽभ्यु	त्वाभ्यु
४६९	६	तादि	त्यादि
४६९	२४	नराणां मध्ये	नराणां मध्ये क्षत्रियः शूर इत्यादौ मध्ये
४७५	५	पञ्चमी	सप्तमी



विषयसूची ।

पृ०	पं०	
१	४	ग्रन्थारम्भः
”	११	विभक्त्यर्थद्वैविध्यम्
”	१२	कारकत्वानुगमपूर्वपक्षः
९	२३	कारकत्वानुगमपरिष्कारः
१०	३	कारकलक्षणपदकृत्यम्
२०	९	विभक्तित्वानुगमपूर्वपक्षः
२२	२३	विभक्तिलक्षणम्
२४	५	प्रत्ययत्वानुगमपूर्वपक्षः
२६	८	प्रत्ययलक्षणसिद्धान्तः
”	१५	प्रत्ययलक्षणपदकृत्यम्
३१	४	तिङ्प्रत्ययशक्त्यादिविचारः
३४	१	सुबर्थनिरूपणारम्भः
”	२	प्रातिपदिकार्थेतिसूत्रार्थः
३७	१९	उक्तसूत्रार्थे पदवाक्यरत्नाकरकृन्मतम्
५१	२२	भावाख्यातस्थलीयबहुवचने फणिभाष्यकृन्मतम्
५४	७	संबोधनेतरप्रथमार्थविचारसमाप्तिः
”	९	संबोधनप्रथमार्थारम्भः
”	१०	संबोधने चेतिसूत्रार्थः
५६	२४	अत्रैव पदवाक्यरत्नाकरकृन्मतम्
५८	७	संबोधनप्रथमार्थः
६३	२३	दार्शनिकरीतितोऽचेतनसंबोध्यत्वासंगतिनिराकरणम्
६४	४	आलंकारिकरीतितस्तन्निराकृतिः
”	१५	वार्त्तिककृन्मतेन वाक्यलक्षणम्
६७	१४	महाभाष्यमतेन तल्लक्षणम्
”	१७	पदवाक्यप्रमाणविदां नयैर्धात्वर्थतिङन्तार्थप्रथमान्तार्थ-प्राधान्यबोधनम्
६८	३	संबोधनप्रथमार्थविचारसमाप्तिः
६९	२	द्वितीयार्थारम्भः
”	९	कर्त्तुरीप्सिततमसूत्रार्थः
१३८	१	तथायुक्तमितिसूत्रार्थः
”	१२	अकथितं चेतिसूत्रार्थः
१५३	२१	अकर्मकधातुभिरितिवार्त्तिकार्थः
१५५	४	गतिबुद्धिरितिसूत्रार्थः

१६४	२५	जल्पतिभ्रुग्रहेतिवार्त्तिकार्थः
१६८	२१	दृशेश्चेतिवार्त्तिकार्थः
१६९	२५	अभिवादिदृशोरितिवार्त्तिकार्थः
१७१	२४	हृक्रोरितिसूत्रार्थः
१७३	१९	नीवह्योरितिवार्त्तिकार्थः
”	२२	वहेरनियन्तृकर्त्तृकेतिवार्त्तिकार्थः
१७४	२	आदिखाद्योरितिवार्त्तिकार्थः
”	६	भक्षेरहिंसेतिवार्त्तिकार्थः
”	१५	शब्दायतेरितिवार्त्तिकार्थः
”	१८	अधिशीङ्स्थितिसूत्रार्थः
१७५	६	अभिनिविशश्चेतिसूत्रार्थः
१७६	७	उपान्वेतिसूत्रार्थः
”	१२	अभुक्त्यर्थेतिवार्त्तिकार्थः
१७७	१	क्रुधद्रुहोरुपेतिसूत्रार्थः
”	११	कारकाद्द्वितीयाऽर्थविचारसमाप्तिः
”	१३	कारकेतरद्द्वितीयाऽर्थारम्भः
१८०	१८	उभसर्वतसोरित्यस्यार्थः
१८३	९	अभित इत्यस्यार्थः
१८४	५	अन्तरान्तरेणेतिसूत्रार्थः
१८५	१०	अनुर्लक्षण इतिसूत्रार्थः
“	११	कर्मप्रवचनीययुक्त इतिसूत्रार्थः
”	१९	तृतीयाऽर्थ इतिसूत्रार्थः
”	२२	हीन इतिसूत्रार्थः
”	२५	उपोऽधिके चेतिसूत्रार्थः
१८६	५	लक्षणेत्थंभूतेतिसूत्रार्थः
१८७	१६	अभिरभाग इतिसूत्रार्थः
”	२३	अधिपरी इतिसूत्रार्थः
१८८	४	सुः पूजेतिसूत्रार्थः
”	७	अतिरतीतिसूत्रार्थः
”	२४	अपिः पदेतिसूत्रार्थः
१९१	४	कालाध्वनोरितिसूत्रार्थः
१९३	३	कारकेतरद्द्वितीयाऽर्थविचारसमाप्तिः
१९४	१	तृतीयाऽर्थविचारारम्भः
”	६	कर्त्तृकरणयोरितिसूत्रार्थः

"	१४	स्वतन्त्रः कर्त्तेतिसूत्रार्थः
२००	१३	साधकतममितिसूत्रार्थः
२०३	८	दिवः कर्म चेतिसूत्रार्थः
२०४	१७	संज्ञोऽन्यतरेतिसूत्रार्थः
२०५	११	तृतीया च होश्छन्दसीतिसूत्रार्थः
"	१८	अशिष्टव्यवहार इतिवार्त्तिकार्थः
२०६	९	अपवर्ग इतिसूत्रार्थः
२०७	१४	कारकतृतीयाऽर्थविचारसमाप्तिः
"	१६	अकारकतृतीयाऽर्थविचारारम्भः
"	१८	प्रकृत्यादिभ्य इतिवार्त्तिकार्थः
२२०	१४	सहयुक्तेऽप्रेतिसूत्रार्थः
२४३	१६	येनाङ्गेतिसूत्रार्थः
२५०	१५	इत्थंभूतेतिसूत्रार्थः
२६०	६	हेताविति सूत्रार्थः
२६३	११	षष्ठी हेत्विति सूत्रार्थः
"	२५	सर्वनाम्नस्तृतीया चेतिसूत्रार्थः
२६४	१८	निमित्तेतिवार्त्तिकार्थः
"	२५	प्रसितेतिसूत्रार्थः
२६५	१२	नक्षत्रे चेतिसूत्रार्थः
२६६	११	तुल्यार्थैरितिसूत्रार्थः
२६८	२०	तृतीयाविचारसमाप्तिः
२६९	२	चतुर्थीविचारारम्भः
"	७	चतुर्थी संप्रदान इतिसूत्रार्थः
"	१०	कर्मणा यमभीतिसूत्रार्थः
"	१५	क्रियाग्रहणमितिवार्त्तिकार्थः
२७८	१०	रुच्यर्थेतिसूत्रार्थः
२७९	१२	श्लाघन्हुङ्ङितिसूत्रार्थः
२८३	१४	धारेरुत्तमेतिसूत्रार्थः
२८५	३	स्पृहेरितिसूत्रार्थः
२८७	८	क्रुधद्रुहेर्ष्येतिसूत्रार्थः
२९१	१७	राधीक्ष्योरितिसूत्रार्थः
२९२	२३	प्रत्याङ्भ्यामितिसूत्रार्थः
२९५	२५	अनुप्रतीतिसूत्रार्थः
२९७	१४	परिक्रयण इतिसूत्रार्थः

२९९ १४ कर्मणः करणसंज्ञेतिवार्त्तिकार्थः
३०० १३ गत्यर्थकर्मणीतिसूत्रार्थः
३०१ ८ क्रियार्थोपपदस्येतिसूत्रार्थः
३०२ २० तुमर्थाच्चेतिसूत्रार्थः
३०४ १५ मन्यकर्मेतिसूत्रार्थः
३०७ ५ कारकचतुर्थीविचारसमाप्तिः
" ७ अकारकचतुर्थीविचारारम्भः
" ९ तादर्थ्यं इतिवार्त्तिकार्थः
३०८ ६ क्रिपि संपेतिवार्त्तिकार्थः
३०९ २ उत्पातेनेतिवार्त्तिकार्थः
" १७ हितयोगे चेतिवार्त्तिकार्थः
३१० ५ चतुर्थी चाशिष्येतिसूत्रार्थः
" ९ नमःस्वस्तीतिसूत्रार्थः
३१८ ८ चतुर्थीविचारसमाप्तिः
३१९ २ पञ्चमीविभक्तिविचारारम्भः
" ७ अपादाने पञ्चेतिसूत्रार्थः
" १२ ध्रुवमपेतिसूत्रार्थः
३३७ १७ जुगुप्साविरामेतिवार्त्तिकार्थः
३३९ १८ भीत्रेतिसूत्रार्थः
३४५ २४ पराजेरितिसूत्रार्थः
३४७ १७ वारणार्थेतिसूत्रार्थः
३५५ ८ अन्तर्धौतिसूत्रार्थः
३५७ ५ आख्यातोपयोगेतिसूत्रार्थः
३५९ ६ जनिकर्त्तुरितिसूत्रार्थः
३६१ २५ भुव इतिसूत्रार्थः
३६४ २५ करणे चेतिसूत्रार्थः
३६५ १४ ल्यब्लोप इतिवार्त्तिकार्थः
३६६ १४ कारकपञ्चमीविचारसमाप्तिः
" १६ अकारकपञ्चमीविचारारम्भः
" १९ यतश्चाध्वेतिवार्त्तिकार्थः
३६८ १४ अन्यारादीतिसूत्रार्थः
३७६ २५ अपपरी इतिसूत्रार्थः
३७७ ३ आङ्मर्यादेतिसूत्रार्थः
" १० पञ्चम्यपेतिसूत्रार्थः

३८७ २५ प्रतिः प्रतीतिसूत्रार्थः
३८८ ३ प्रतिनिधीतिसूत्रार्थः
३८९ २० अकर्त्तेतिसूत्रार्थः
३९० १ विभाषा गुण इतिसूत्रार्थः
३९९ १६ पृथगितिसूत्रार्थः
४०१ ३ दूरान्तिकार्थैरितिसूत्रार्थः
" १४ दूरान्तिकार्थेभ्य इतिसूत्रार्थः
४०२ ५ पञ्चमी विभक्त इतिसूत्रार्थः
४०४ २४ अकारकपञ्चमीविचारसमाप्तिः
४०५ २ षष्ठीविभक्तिविचारारम्भः
" ७ षष्ठी शेष इतिसूत्रार्थः
४०७ २ ज्ञोऽविदेतिसूत्रार्थः
" १८ अधीगेतिसूत्रार्थः
४०८ ९ कृत्रः प्रतीतिसूत्रार्थः
४०९ १४ रुजार्थेतिसूत्रार्थः
४१० २ अज्वरीतिवार्त्तिकार्थः
" ८ आशिषि नाथ इतिसूत्रार्थः
" १७ जासिनिप्रेतिसूत्रार्थः
४११ ७ व्यवहृपणोरितिसूत्रार्थः
४१२ ४ कृत्वोऽर्थैतिसूत्रार्थः
४१६ ३ दिवस्तदेतिसूत्रार्थः
" १२ विभाषोपेतिसूत्रार्थः
" २० द्वितीया ब्राह्मणइतिसूत्रार्थः
४१७ ४ प्रेष्यब्रुवोरितिसूत्रार्थः
" २४ चतुर्थ्यर्थ इतिसूत्रार्थः
४१८ ९ यजेश्चेतिसूत्रार्थः
" २० कर्त्तृकर्मेतिसूत्रार्थः
४२५ १८ उभयप्राप्ताविति सूत्रार्थः
४२६ ५ अककारयोरितिवार्त्तिकार्थः
४२७ १२ क्तस्य चेतिसूत्रार्थः
४२८ ५ अधिकरणेतिसूत्रार्थः
" १६ न लोकेतिसूत्रार्थः
४२९ १० कर्मेरनिषेध इतिवार्त्तिकार्थः
४३० १ द्विषः शेतिवार्त्तिकार्थः

”	७	अकेनोरितिसूत्रार्थः
४३२	८	कृत्यानामितिसूत्रार्थः
”	१९	गुणकर्मणीतिवार्त्तिकार्थः
”	२१	कारकषष्ठीविचारसमाप्तिः
४३३	१	अकारकषष्ठीविचारारम्भः
”	८	चतुर्थी चेतिसूत्रार्थः
”	२४	षष्ठ्यर्थे चतुर्थीतिवार्त्तिकार्थः
४३४	५	षष्ठ्यतसेतिसूत्रार्थः
”	२०	एनपेतिसूत्रार्थः
४३५	५	षष्ठीविचारसमाप्तिः
४३६	२	सप्तमीविधक्तिविचारारम्भः
”	७	सप्तम्यधीतिसूत्रार्थः
”	१२	आधारोऽधीतिसूत्रार्थः
४३९	१७	कर्म्येनितिवार्त्तिकार्थः
४४०	४	कारकसप्तमीविचारसमाप्तिः
”	६	अकारकसप्तमीविचारारम्भः
४४७	१०	साध्वसाध्वितिवार्त्तिकार्थः
”	२२	अर्हाणामितिवार्त्तिकार्थः
४४८	२१	निमित्तादितिवार्त्तिकार्थः
४५०	२३	यस्य च भावेनेतिसूत्रार्थः
४५५	१	षष्ठी चानेतिसूत्रार्थः
४५६	९	स्वामीश्वरेतिसूत्रार्थः
४५७	१०	आयुक्तेतिसूत्रार्थः
४५८	२	यतश्चेतिसूत्रार्थः
४७०	११	साधुनिपुणेतिसूत्रार्थः
४७१	१२	अप्रत्येतिवार्त्तिकार्थः
”	१७	सप्तमीपञ्चम्यावितिसूत्रार्थः
४७५	२	अधिरीतिसूत्रार्थः
”	६	यस्मादधिकमितिसूत्रार्थः
४७६	७	विभाषा कृञीतिसूत्रार्थः
४७७	१२	अकारकसप्तमीविचारसमाप्तिः
”	१५	ग्रन्थसमाप्तिः
”	१६	ग्रन्थकृत्पित्राद्युल्लेखः

इति ।

शुभम् ।

સરસ્વતી પુસ્તકભંડાર
રતનપોળ હાથીખાના
અમદાવાદ

विभक्त्यर्थनिर्णयः ।

क्रमांक ५०८

श्रीगणेशाय नमः ।

बहुविधरूपपरिग्रहजगदभिनाटनमिहाकाङ्क्षन् ।
स्वयमपि नटति सुकृतुकी यस्तस्मै शंभवेऽस्तु नमः ॥१॥
ध्रुवोऽपाये कर्मेप्सितफलरहितः साधकतमः
सदाधारोऽभीष्टः परफलकभावेन जगताम् ॥
स्वतन्त्रः कर्तासि स्फुटवलयशेषः प्रथमया
सुलिङ्ख्यातस्त्वं विशदय विभक्तौ गिरिश ताः ॥२॥

इह खलु सर्वेषां विभक्त्यर्थानां भगवत्यन्वय इति विभक्त्यर्थो निरूप्यते । तत्र कारकाकारकभेदात्स द्वेधा । ननु कारकत्वस्यानुगतत्वाभावेन न तेन रूपेण विभक्त्यर्थता कारकाणां प्रातिस्विकरूपेण तदर्थत्वे द्वेधा विभागो ऽनुपपन्नः । न च क्रियान्वयित्वरूपं कारकत्वं नाननुगतमिति वाच्यम् । कुमार्य इव कान्तस्य लस्यन्ति स्पृहयन्ति चेत्यादौ षष्ठ्यर्थशेषस्यापि क्रियान्वयित्वात्तत्रातिव्याप्तेः । न च षष्ठ्यर्थभिन्नत्वमपि विशेषणमिति वाच्यम् । तथा सति तण्डुलस्य पाक इत्यादौ षष्ठ्यर्थस्याकारकत्वापत्तेः । अथ कर्तृकर्मणोः कृतीति सूत्रविहितषष्ठ्याः कारकार्थकत्वेन तण्डुलस्य पाक इत्यादौ षष्ठ्यर्थस्य कार-

पं.श्री चंद्रसागरजी गणिवर ।

कत्वेऽपि नाव्याप्तिः कृदुक्तान्यषष्ठ्यर्थभिन्नत्वे सति क्रियान्वयित्वस्वरूपस्य कारकत्वस्य कारकलक्षणत्वेनाभ्युपगमाद्दर्शितषष्ठ्याः कृदुक्तत्वेन तदर्थस्य निरुक्तकारकत्वानपायादिति चेन्न । सुराणां पातासावित्यादौ कृदुक्तशेषषष्ठ्या अर्थेऽतिव्याप्तेस्तव निरुक्तकारकत्वस्य सत्वात् । न च धात्वर्थेतरान्वययोग्यत्वमस्तु विशेषणं तथा च शेषषष्ठ्यर्थस्य धात्वर्थेतरस्मिन् राज्ञः पुरुष इत्यादौ पुरुषादावन्वयान्नातिव्याप्तिरिति वाच्यम् । एवं सति द्वितीयाद्यर्थकारकेऽव्याप्तेः । दण्डं दधातीत्यादौ यादृशोऽधिकरणादिर्द्वितीयार्थो धारणान्वयी तादृशस्यैवाधिकरणादेर्द्वितीयार्थस्यानुदण्डं जातिरित्यादौ जात्यन्वयात् । किञ्च धात्वर्थेतरान्वययोग्यत्वं धात्वर्थेतरान्वययोग्यत्वमविज्ञाय दुर्ग्रहं तच्च कारकान्यत्वमेव तथा सत्यन्योन्याश्रयः स्यात् तादृशान्वययोग्यत्वस्वरूपकारकत्वज्ञानस्य तादृशान्वययोग्यत्वस्वरूपकारकान्यत्वज्ञानस्य च परस्पराधीनत्वात् । एतेन धात्वर्थान्वययोग्यत्वं शेषत्वं शेषभिन्नत्वं कारकत्वमित्यपि परास्तम् । धात्वर्थान्वययोग्यत्वस्य कारकत्वस्वरूपाग्रहे दुर्ग्रहत्वेनान्योन्याश्रयप्रसङ्गात् । किं च शेषत्वमपि नेदृशं भवति मम प्रतिभाति कान्तस्य वस्यतीत्यादौ शेषस्य धात्वर्थान्वयित्वात् । एतेन धात्वर्थान्वितसुबर्थत्वं कारकत्वं विभक्त्यर्थस्य विभक्त्यर्थद्वारकक्रियान्वयित्वं कारकत्वं विभक्तिप्रकृत्यर्थस्येत्यपि परास्तम् । दर्शितषष्ठ्या अर्थे प्रकृत्यर्थे चातिव्याप्तेः । यच्चापादानाद्यन्यतमत्वं कारकत्वं नातः क्त्वाप्यव्याप्तिरिति तन्न अपादानत्वादेरपि क्वचित्षष्ठ्यर्थत्वात् । किं चापादानत्वादिकमपि नैकं ध्रुवत्वासोढत्वादिभेदेन बहुविधत्वात् इति

कथमुक्तान्यतमत्वं कारकत्वमिति । न च ध्रुवाद्यन्यतमत्वेनापादानादिं निरूप्य तावदन्यतमत्वं कारकत्वं निर्वाच्यमिति वाच्यम् । कतिपयापादानादिकं जानतां सकलापादानादिकमजानतां ध्रुवादौ कारकत्वग्रहानापत्तेः । प्रतियोगिज्ञानं विना यावदपादानादिभेदस्यैव दुर्ग्रहत्वेन तदन्यतमत्वस्य नितरां दुर्ग्रहत्वात् । न च तावदपादानादिवृत्तिगगनाभावादिव्यक्तिरेवान्यतमत्वं तस्य यत्किंचिदपादानादिग्रहेऽपि ग्रहसंभवादिति वाच्यम् । गगनाभावादिव्यक्तेस्तावदपादानादिवृत्तित्ववैशिष्ट्योक्तौ बीजाभावात् सर्वेषामेव कदाचित्कचित्कारकत्वेन तावद्वृत्तिगगनाभावादेरव्यावर्तकत्वात् व्याघ्राद्बिभेतीत्यादौ यादृशस्य हेतुत्वादेरपादानत्वं तादृशहेतुत्वादेर्व्याघ्रस्य भयमित्यादौ षष्ठ्यर्थत्वात् । एतेन तावदन्यतमत्वं कारकपदप्रवृत्तिनिमित्तमिति कारकपदवाच्यत्वमेव कारकत्वमिति निरस्तम् तावदन्यतमत्वस्य निर्वक्तुमशक्यत्वादिति चेत् । उच्यते । नामार्थान्वयप्रयोजकतानवच्छेदकीभूतक्रियान्वयितावच्छेदकधर्मवत्त्वे सति पदान्तरासमभिव्याहृतसुबर्थत्वं कारकत्वं कान्यस्य लस्यतीत्यादौ षष्ठ्यर्थवारणाय भूतान्तं धर्मविशेषणम् । न च नामार्थान्वयाप्रयोजकत्वमेव तद्वारणार्थमस्तु किमनवच्छेदकत्वविवक्षयेति वाच्यम् व्याघ्राद्बिभेतीत्यादौ हेतुतादेः कारकस्याव्यापनात् व्याघ्रस्य भयमित्यादौ नामार्थान्वयित्वात् अनवच्छेदकत्वविवक्षणे तु तादृशस्य हेतुतात्वादेः सत्त्वान्नाव्याप्तिः तावतापि दर्शितषष्ठ्यर्थे ऽतिव्याप्तिः तत्र हेतुतादेः संबन्धत्वेन रूपेणान्वयात् संबन्धत्वस्य निरुक्तानवच्छेदकत्वविरहेऽपि तादृशस्य रूपान्तरस्य सत्त्वा-

दित्यवच्छेदकान्तं विशेषणं तेन भयहेतुतात्वादेरुपान्तः रस्य प्रकृते क्रियान्वयितानवच्छेदकत्वात् शेषत्वेन भयहेतुतादेः कारकस्यान्वयेऽपि हेतुतात्वादिना ऽनन्वयात् अत एव कर्तृत्वादिकारकस्य कृदन्तार्थं कर्तृत्वत्वादिना ऽन्वयार्थं कर्तृकर्मणोःकृतीत्यादिपृथक्सूचारम्भसंगच्छते अन्यथा शेषत्वेन कारकस्य सर्वस्यान्वयसंभवे पृथक्सूत्रप्रणयनस्य वैयर्थ्यापत्तेः शेषत्वं तु संबन्धत्वं सप्रतियोगिकत्वं वेत्यन्यदेतदित्यादिकं षष्ठीविवरणे व्यक्तीभविष्यति कर्मादिपदोपात्तानां कर्मादीनां कारकत्ववारणाय सुबर्थत्वमुक्तम् तचापि दण्डं दधातीत्यादौ दण्डवृत्तित्वादिस्वरूपकर्मत्वस्यानुदण्डं जातिरित्यादौ नामार्थजातावन्वयात् कर्मकारके ऽव्याप्तिः स्यात्तद्वारणाय पदान्तरासमभिव्याहृतत्वं सुपो विशेषणम् दर्शितकर्मत्वादेर्नामार्थान्वये कर्मप्रवचनीयान्वादिपदसमभिव्याहारस्य तत्र सत्वात् अन्यथा दण्डं जातिरित्यादावपि तादृशान्वयबोधप्रसङ्गात् । नन्वेवमपि गेहे पचतीत्यादौ गेहवृत्तित्वस्य पाकान्वयित्वेन कारकत्वं तस्य गेहे घट इत्यादौ घटादिनामार्थे ऽन्वयान्निरुक्तकारकत्वविरहात्सप्तम्यर्थकारके ऽव्याप्तिः । न च कर्तृकर्मान्यतरघटितपरंपरासंसर्गावच्छिन्नवृत्तित्वस्यैव सप्तम्यर्थतया कारकत्वं तादृशवृत्तित्वस्य नामार्थेऽन्वयासंभवात् कथमव्याप्तिरिति वाच्यम् सप्तम्यधिकरणे चेति सूत्रेणाऽऽधेयत्वसामान्यस्यैव सप्तम्यर्थत्वेन प्रतिपादनाद्दर्शितपरंपराघटितवृत्तित्वस्य सप्तम्यर्थत्वेन प्रतिपादने गेहे घट इत्यादावाधेयत्वसामान्यस्यानानुशासनिकत्वापत्तेरिति चेद् । मैवम् । दर्शितसूत्रेणाधेयत्वसामान्यस्य दर्शितपरंपरासंसर्गाव-

च्छिन्नाधेयत्वस्य च द्वयोर्योगविभागेन सप्तम्यर्थत्वप्रतिपादनात्। यद्वा यादृशसंसर्गेण क्रियायामन्वयस्तादृशसंसर्गेणैव नामार्थेऽन्वयो विवक्षितः एवमाधेयत्वसामान्यस्य सप्तम्यर्थत्वेऽपि न क्षतिस्तस्य दर्शितपरम्पराघटिताधेयत्वीयस्वरूपसम्बन्धेन क्रियायामन्वयात् नामार्थे तु संयोगाद्यवच्छिनाधेयत्वीयस्वरूपसम्बन्धेनेति दर्शितपरम्पराघटिताधेयत्वीयस्वरूपसम्बन्धेनान्वयसम्भवात्सप्तम्यर्थाधेयत्वकारके नाव्याप्तिः। नामार्थान्वयस्तु नामार्थविशेष्यकशाब्दबोधे बोध्यः अन्यथा सुपां लिङ्गसङ्ख्यातिरिक्तस्वार्थे प्रकृतिभूतनामार्थविशेषणाकशाब्दजनकत्वनियमादसम्भवापत्तेः। तथापि गगनं न पश्यतीत्यादौ द्वितीयादेः स्वार्थविशेषणकनञर्थविशेष्यकबोधजनकत्वाद्व्याप्तिरिति नाम्नि निपातातिरिक्तत्वविशेषणम्। यदि तिङर्थकर्तृकर्मणोरपि कारकत्वं तदा न्यायमते तत्राव्याप्तेः तिङः प्रथमान्तार्थविशेष्यकशाब्दप्रयोजकत्वादिति विभाव्यते तदा नामार्थान्वयप्रयोजकतावच्छेदके तिङर्थतानवच्छेदकत्वं विशेषणम्। सुप्यदस्थाने विभक्तिपदं च बोध्यम्। शाब्दिकमते च नाव्याप्तिरतो न तद्विशेषणम्। ननु यदि क्रियायां नामार्थे चान्वये एकसंबन्धावच्छिन्नत्वं विशेषणम् तदा सप्तम्यर्थकारके ऽव्याप्तिर्दर्शितपरंपराघटिताधेयत्वीयसंसर्गेणाधेयत्वविषयकनामार्थविशेष्यकशब्दाप्रसिद्धेः तादृशसंसर्गकाधेयत्वविषयकशाब्दबोधौपयिकाकाङ्क्षाया नाम्नि विरहात् तथा च तादृशशाब्दप्रयोजकतानवच्छेदकत्वघटितलक्षणाप्रसिद्धा सर्वत्रैवासंभवः। षष्ठीं विना पदान्तरासमभिव्याहृतविभक्तीनामर्थस्य क्रियान्व-

यघटकसंबन्धेन नामार्थेऽनन्वयादिति चेन्न । द्विविधार्थेयत्वस्य सप्तम्यर्थत्वाभ्युपगमेन संबन्धविशेषानवच्छिन्नान्वयस्य लक्षणेऽप्रवेशात् । एकसंबन्धावच्छिन्नान्वयविवक्षणे तु क्रियानिरूपितसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकस्य नामार्थनिष्ठस्य शाब्दाभावस्य प्रयोजकतावच्छेदकत्वमेव नामार्थान्वयप्रयोजकतानवच्छेदकत्वं बोध्यम् । तादृशशाब्दाभावप्रयोजकतावच्छेदकत्वं विभक्त्यर्थतावच्छेदकापादानत्वत्वादौ संभवति । तथा हि । क्रियानिरूपितत्वोपलक्षिततत्संबन्धावच्छिन्नविभक्त्यर्थप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दं प्रति नामजन्योपस्थितिर्विशेष्यतासंबन्धेन प्रतिबन्धकत्वं वक्तव्यम् । न च वृक्षात्पततीत्यादौ विभागासमवायिजनकत्वस्य पञ्चम्यर्थस्य पतनक्रियान्वयिनोऽन्वयेनामार्थस्यायोग्यत्वादेव वृक्षात्पर्णमित्यादौ शाब्दबोधो न भवति नामजन्योपस्थितेः प्रतिबन्धकत्वमयुक्तमिति वाच्यम् । क्वचिदयोग्यत्वेऽपि नामार्थस्य सर्वत्र तथात्वविरहात् वृक्षात्कर्मेत्यादौ योग्यतायाः सत्वाच्छाब्दापत्तिवारणाय दर्शितप्रतिबध्यप्रतिबन्धकभावावश्यकत्वात् । एवं क्रियान्वितापादानत्वाद्यर्थकतत्तद्विभक्तीर्नाम्ना सममनाकाङ्क्षत्वेन तादृशशाब्दाभावप्रयोजकनामनिराकाङ्क्षत्वाश्रयविभक्तिजन्योपस्थितिप्रकारकत्वात्मकतादृशशाब्दाभावप्रयोजकतावच्छेदकत्वस्वरूपनामार्थान्वयप्रयोजकतानवच्छेदकत्वं विभक्त्यर्थतावच्छेदकेस्पष्टम् । एवं धातुसाकाङ्क्षविभक्तिजन्योपस्थितिप्रकारत्वस्वरूपं क्रियान्वयितावच्छेदकत्वमपि स्पष्टम् । तादृशसंबन्धावच्छिन्नविभक्त्यर्थप्रकारतानिरूपितविशेष्यतासं-

बन्धेन शाब्दं प्रति धातुजन्योपस्थितेर्विशेष्यतासंबन्धेन हेतुत्वात् । ईदृशहेतुहेतुमद्भावग्रहार्थमेव नामार्थोपस्थितेः प्रतिबन्धकत्वं प्रदर्शितम् न तु वास्तवम् धातुजन्योपस्थितेर्हेतुतयैवातिप्रसङ्गवारणसंभवात् । अत एव तण्डुलस्य पाक इत्यादौ नामजन्योपस्थितिसत्वेऽपि धातुजन्योपस्थितिबलात्तण्डुलकर्मताकः पाक इति शाब्दबोध उपपद्यते । न्यायमते दर्शितहेतुहेतुमद्भावे विभक्तौ तिङन्यत्वमपि विशेषणम् । एवं धातुभिन्ननिराकाङ्क्षताप्रयोजकार्थवद्भिन्ना तिङन्या या विभक्तिस्तद्भिन्नायाः पदान्तरासमभिव्याहृताया विभक्तेरर्थः कारकम् । अत्र पदान्तरासमभिव्याहारोऽपि विभक्तिस्वरूपशब्दधर्मतया धातुभिन्ननिराकाङ्क्षताप्रयोजको बोध्यः । अत्रार्थस्य निराकाङ्क्षताप्रयोजकत्वं विभक्त्यर्थतावच्छेदकरूपेण क्रियान्वयनिरूपकसंबन्धप्रतियोगित्वेन च बोध्यमतो न पूर्वोक्तो व्याघस्य दरम् भूतले घट इत्यादौ नामसाकाङ्क्षत्वेऽपि दोषः यदि पततीतिविनाकृताया दृचादिति पञ्चम्या अर्थो न कारकमिति मन्यते तदा धातुसमभिव्याहृतत्वं चरमविभक्तौ विशेषणं बोध्यम् । एवं कान्तस्य ब्रस्यतीत्यादौ षष्ठ्यर्थशेषस्य नामनिराकाङ्क्षत्वप्रयोजकत्वान्न तत्र कर्मत्वेऽव्याप्तिः तिङन्यत्वविशेषणात्तिङर्थकर्तृत्वादौ नाव्याप्तिः पदान्तरासमभिव्याहृतत्वविशेषणाद्दण्डमनुजातिरित्यादौ द्वितीयार्थाधेयत्वे नातिव्याप्तिः । एवमीदृशसुप्तिङ्विभक्त्यर्थद्वारा नामार्थस्यापि कारकत्वं मन्तव्यम् । यदि च तिङर्थस्य न कारकत्वं मन्यते तदा धातुभिन्ननिराकाङ्क्षत्वप्रयोजकः पदान्तरासमभिव्याहृतस्य धातुसमभिव्याहृतसुप्रोऽर्थः कारकम् । अत्र धातुभिन्ननिराका-

ङ्क्त्वप्रयोजकत्वं धातुभिन्नपदव्यतिरेकप्रयुक्तव्यतिरेकाप्रतियोगिस्वप्रकारकशाब्दसामान्यकत्वं तथाभूतसुवर्थस्य बोध्यम् । सामान्यपदोपादानात्कान्तस्य क्त्वस्यतीत्यादौ षष्ठ्यर्थस्य शेषस्य तादृशशाब्दप्रकारत्वेऽपि न तत्वातिव्याप्तिः । शेषप्रकारकशाब्दसामान्ये तादृशव्यतिरेकाप्रतियोगित्वविरहात् । कान्तस्य केश इत्यादौ धातुभिन्नपदेनापि शेषप्रकारकशाब्दजननात् । तण्डुलस्य पाक इत्यादौ षष्ठ्यर्थकर्मत्वादौ नाव्याप्तिः । कर्मत्वप्रकारकशाब्दसामान्यस्य तादृशव्यतिरेकाप्रतियोगित्वात् । धातुभिन्नपदेनकर्मत्वप्रकारकशाब्दाजननात् एवं स्वप्रकारता स्वार्थकसुवर्थतावच्छेदकरूपेण क्रियानिरूपितसंबन्धेन चावच्छिन्ना बोध्या तेन व्याघ्राद्बिभेतीत्यादौ पञ्चम्यर्थहेतुत्वस्य गेहे पचतीत्यादौ सप्तम्यर्थाधेयत्वस्य व्याघ्रस्य दरमित्यादौ भूतले घट इत्यादौ शेषत्वेन क्रियानिरूपकान्वयसम्बन्धेन शाब्दप्रकारत्वेऽपि नाव्याप्तिः पञ्चम्यर्थतावच्छेदकहेतुतात्वेन क्रियानिरूपककर्तृकर्मान्यतरघटितपरम्परासंबन्धेन च दर्शितस्थले शाब्दप्रकारताया अनवच्छिन्नत्वात् । एवं सति तण्डुलं पचतीत्यादौ तण्डुलीया कर्मतेत्यवान्तरवाक्यार्थबोधस्य द्वितीयाप्रकृतिभूतधातुभिन्नतण्डुलादिपदव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वेनासम्भवः स्यात् तद्वारणार्थं सुपात्तस्य स्वप्रकारकेत्यत्र प्रकारकत्वस्य निवेशो निष्प्रयोजन एव स्वविषयताकत्वनिवेशेनापि तद्वारणसम्भवात् विषयतायाः क्रियानिरूपकत्वोपलक्षितत्तत्तत्संबन्धावच्छिन्नत्वविशेषणात् । तण्डुलीया कर्मतेत्यत्र कर्मताया विशेष्यत्वेऽपि तस्य दर्शितसम्बन्धानव-

च्छिन्नत्वात् । न चैवं पश्य मृगो धावतीत्यादौ दृशिक्रियायां शाब्दिकमते धावनक्रियाया न्यायमते धावनकर्तृमृगादेर्वाक्यार्थस्य कर्मतासंसर्गेणान्वयात् तादृशवाक्यार्थबोधस्य निरुक्तव्यतिरेकाप्रतियोगित्वेन तद्विषयसंसर्गीभूतकर्मत्वेऽतिव्याप्तिरिति वाच्यम् । संसर्गीभूतकर्मत्वस्य सुबर्थत्वाभावात् । यदि च कर्मत्वादिकं न द्वितीयार्थः कर्मत्वादिसंसर्गकशाब्दे द्वितीयादिसमभिव्याहारत्वमिति मतमाश्रीयते तदा पश्य मृगो धावतीत्यत्र कर्मत्वस्य कारकत्वमिष्टमेव । यदि तु नेष्यते तदा स्वविषयताकशाब्देसुप्समभिव्याहारप्रयोज्यत्वं विशेषणमित्यन्यदेतत् । एवं पदान्तरासमभिव्याहृतत्वं निरर्थकपदासमभिव्याहृतत्वं बोध्यम् । दण्डमनु जातिरित्यादावन्वादिपदस्य निरर्थकताया वक्ष्यमाणत्वात् । सुबर्थत्वावच्छेदकत्वमपि सुबज्ञन्योपस्थितिप्रकारत्वं बोध्यम् । तथा च निरर्थकपदसमभिव्याहारज्ञानाभावविशिष्टसुबज्ञानजन्योपस्थितिप्रकारीभवद्धर्मावच्छिन्नदर्शितसम्बन्धावच्छिन्नप्रकारताकशाब्दसामान्ये निरुक्तव्यतिरेकाप्रतियोगित्वोपपत्तये पदान्तरासमभिव्याहृतसुबर्थत्वमुपात्तम् । एवं च धातुविनाकृतसुबर्थस्य कारकत्ववारणाय धातुसमभिव्याहृतत्वं साकाङ्क्षत्वार्थकमुपात्तम् । इत्थं च धातुपदव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वमेव निरुक्तशाब्दसामान्ये विशेषणं बोध्यम् । एतावतैव षष्ठ्यर्थशेषातिप्रसङ्गवारणसम्भवात् । तदयं समुदायार्थः धातुपदव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगिनिरर्थकपदसमभिव्याहारज्ञानाभावविशिष्टस्वार्थकसबज्ञानजन्योपस्थितिप्रका-

रीभवद्धर्मावच्छिन्नक्रियानिरूपकत्वोपलक्षितसम्बन्धावच्छिन्नस्वप्रकारताकशाब्दसामान्यनिरूपकमुद्देश्यत्वं कारकत्वमिति । क्रान्तस्य वेगः इत्यादौ षष्ठ्यर्थशेषेऽतिव्याप्तिवारणाय प्रतियोग्यन्तं शाब्दविशेषणम् । तावतापि क्रान्तस्य वस्त्रतीत्यादौ षष्ठ्यर्थशेषेऽतिव्याप्तिताद्वस्थ्यमिति सामान्यपदम् । शाब्दसामान्ये निरुक्तप्रतियोगित्वासम्भवस्यादिति शाब्दे स्वप्रकारताकत्वं विशेषणं तावतापि व्याघ्राद्भिभेतीत्यादौ पञ्चम्यर्थभयहेतुत्वादेर्व्याघ्रस्य दरमित्यादौ षष्ठ्यर्थशेषत्वेन शाब्दप्रकारतयाऽव्याप्तिरसम्भवो वा स्यादिति धर्मावच्छिन्नान्तं प्रकारताविशेषणम् । तावतापि शेषत्वस्य सुबजन्योपस्थितिप्रकारतया तद्दोषतादवस्थ्यमिति स्वार्थकत्वं सुपो विशेषणम् । तत्रापि तादृशोपस्थितिप्रकारकरणत्वस्य शत्य इत्यादौ शाब्दप्रकारतावच्छेदकतया करणत्वेऽतिव्याप्तिरिति प्रकारपदं विहाय प्रकारीभवदित्युक्तम् । तदर्थस्तु सुबन्यज्ञानजन्योपस्थितिप्रकारत्वाभावविशिष्टं तादृशोपस्थितिप्रकारत्वमापन्नो बोध्यस्तादृशप्रकारत्वाभावस्तु सामानाधिकरण्यकालिकविशेषणतास्यामवच्छिन्नप्रतियोगिताको बोध्यस्तेनशत्य इत्यादौ करणतात्वप्रकारतायाः सुबन्यतद्धितज्ञानजन्योपस्थितिप्रकारत्वेन स्वेनैव दर्शितोभयसम्बन्धेन विशिष्टत्वात् तदभाववैशिष्ट्यविरहान्नाव्याप्तिरिति । न च सुबज्ञानजन्योपस्थितिप्रकारत्वावच्छिन्न एव प्रकारीभवदित्यन्तेनोच्यतां तावतैव शत्य इत्यादौ शाब्दसम्भवेऽपि करणत्वे नाव्याप्तिस्तत्र करणतात्वप्रकारतायास्तद्धितप्रयोज्यत्वात् किं तादृशप्रकारतायां निरुक्तप्रकारत्वा-

भाववैशिष्ट्यनिवेशेनेति वाच्यम् । यत्र शत्य इत्यादौ शतेनेति निराकाङ्क्षं केन चिदुक्तं तत्र तृतीयाजन्योपस्थितिप्रकारत्वापन्नकरणतात्वस्य शाब्दप्रकारतावच्छेदकत्वेनाव्याप्तिताद्वस्थ्यान्निरुक्तप्रकारत्वाभाववैशिष्ट्यनिवेशे तु तृतीयाप्रयोज्यप्रकारतायास्तद्धितप्रयोज्यप्रकारत्वेन दर्शितोभयसंबन्धविशिष्टत्वात् निरुक्तप्रकारत्वाभाववैशिष्ट्यविरहादर्शितस्थले शाब्दसम्भवेऽपि करणत्वेनाव्याप्तिरिति निरुक्तप्रकारत्वाभावप्रतियोगितायाः सामानाधिकरण्यमात्रावच्छिन्नत्वोक्तौ शतेन क्रीणातीत्यादौ करणत्वेऽव्याप्तिरतत्र करणतात्वप्रकारतायाः सामानाधिकरण्येन तद्धितप्रयोज्यप्रकारताविशिष्टत्वात् अतः कालिकविशेषणतावच्छिन्नत्वमपि तत्प्रतियोगितायामुक्तमेतावन्मात्रोक्तौ प्रकृत्यर्थतावच्छेदकप्रकारतया कालिकसंबन्धेन विशिष्टायाः सुप्प्रयोज्यतायाः सर्वत्रैव करणतात्वादौ सत्वान्निरुक्तप्रकारत्वाभावविशिष्टप्रकारताविरहादसम्भवः स्यादिति सामानाधिकरण्यावच्छिन्नत्वमपि प्रतियोगितायां निवेशितमिति। दण्डं दधातीत्यादौ दृष्टस्य दण्डकर्मत्वस्यानुदण्डं जातिरित्यादौ द्वितीयाथतावच्छेदकाधेयतात्वेन शाब्दप्रकारत्वेन तत्राव्याप्तिरिति विशिष्टान्तं सुबज्ञानस्य विशेषणम् । न च निरर्थकपदासमभिव्याहृततया सुब्विशेष्यतां तावतैव दर्शिताव्याप्तिवारणसम्भवात् किं तादृशसमभिव्याहारज्ञानाभावस्य सुबज्ञाने वैशिष्ट्यनिवेशनेनेति वाच्यम् । दण्डं जातिरित्यादौ तादृशसमभिव्याहारज्ञानबलात् शाब्दसम्भवेनोक्ताव्याप्त्यनुद्धारात् । न चैवमपि तादृशसमभि-

व्याहारज्ञानाविषयत्वं सुपो विशेषणमस्तु । दर्भितस्थलि द्वितीयायास्तादृशसमभिव्याहारज्ञानविषयत्वात् । शाब्दसम्भवेऽप्यव्याप्तिसम्भवात् किं सुबज्ञाने तादृशज्ञानाभाववैशिष्ट्यनिवेशवैयर्थ्यमिति वाच्यम् । यत्र दण्डो जातिरित्यादौ प्रथमायां तादृशसमभिव्याहृतद्वितीयात्वभ्रमस्तत्र शाब्दसम्भवेनोक्ताऽव्याप्तिसम्भवात्तत्र प्रथमायास्तादृशसमभिव्याहारज्ञानाविषयत्वात् । सुबज्ञाने तु तादृशसमभिव्याहारज्ञानाभाववैशिष्ट्यनिवेशनेऽव्याप्तिर्न भवति स्वविषयतावच्छेदकप्रकारकत्वसम्बन्धावच्छिन्नप्रतियोगिताकस्य तादृशसमभिव्याहारज्ञानाभावस्य सुबज्ञाने वैशिष्ट्यनिवेशात् । दण्डो जातिरित्यादौ प्रथमाज्ञाने तादृशसमभिव्याहारज्ञानस्य स्वविषयतावच्छेदकद्वितीयात्वप्रकारकत्वेन सम्बन्धेन तत्र तदभाववैशिष्ट्यविरहात् । एवं सति दण्डं दधातीत्यादौ द्वितीयाज्ञाने स्वविषयतावच्छेदकप्रकारकत्वसबन्धेन कालान्तरीयस्य पुरुषान्तरीयस्य तादृशसमभिव्याहारज्ञानाभावस्य सत्वेन तादृशज्ञानाभावाविशिष्टस्वार्थकसुबज्ञानाप्रसिध्या दण्डकर्मत्वेऽव्याप्तिः स्यादिति तादृशसमभिव्याहारज्ञानाभावप्रतियोगिता कालिकविशेषणतासामानाधिकरण्याभ्यां सम्बन्धाभ्यामवच्छिन्ना बोध्या । अत एव शत्य इत्यादौ शाब्दसम्भवेनाव्याप्तेर्वारणार्थं सुबन्यज्ञानजन्योपस्थितिप्रकारत्वाभावविशिष्टत्वं धर्मे विशेषणमस्तु तावतैवाव्याप्तिवारणसम्भवात् स्वार्थकेत्यादि प्रकारीभवदित्यन्तं व्यर्थमिति परास्तम् । स्वार्थकेत्यादावनुक्तौ तादृशसमभिव्याहारज्ञानाभावस्य सुबज्ञानं-

विना निवेशयितुमशक्यत्वात् । अनुदण्डं जातिरित्यादौ शाब्दप्रकारतया दण्डकर्मत्वेऽव्याप्त्यनुद्धारात् । न चास्तु स्वार्थकेत्यादिकं धर्मविशेषणं तथापि सुबन्यजन्योपस्थितिप्रकारत्वाभावस्य वैशिष्ट्यं धर्मे धर्मविशेषणीभूततादृशोपस्थितिप्रकारत्वे वा निवेशनीयमित्यत्र विनिगमकाभाव इति वाच्यम् । पुरुषान्तरीयतद्धितजन्योपस्थितेः सार्वदिकत्वसम्भवनेन शतकरणत्वेऽव्याप्तिसम्भावनात् सुबन्यजन्योपस्थितौ शाब्दे च तत्पुरुषीयत्वं निवेश्याव्याप्तिसम्भावननिरासेऽपि पुरुषभेदेन कारकभेदापत्तेः तादृशोपस्थितिप्रकारतायां तु सुबन्यजन्योपस्थितिप्रकारत्वाभावस्य वैशिष्ट्यनिवेशे तत्प्रतियोगितायां स्वनिरूपकज्ञानसमानाधिकरणज्ञानीयत्वसम्बन्धेनाप्यवच्छिन्नत्वप्रवेशात् पुरुषान्तरीयतद्धितजन्योपस्थितेः सार्वदिकत्वसम्भावनेऽप्यव्याप्तिसम्भावननिरासात् तत्पुरुषीयत्वानिवेशेन विनिगमकसम्भवात् । एवं गेहे पचतीत्यादौ सप्तम्यर्थाधेयत्वस्य गेहे घट इत्यादौ शाब्दप्रकारतया तत्राव्याप्तिः स्यात्तद्वारणाय क्रियानिरूपकत्वोपलक्षितसम्बन्धावच्छिन्नत्वं स्वप्रकारताविशेषणम् । तेन गेहे घट इत्यादौ सप्तम्यर्थाधेयत्वस्याधेयत्वीयस्वरूपसम्बन्धेन शाब्दप्रकारत्वेऽपि क्रियानिरूपकेण कर्तृकर्मान्यतरघटितपरम्परासम्बन्धावच्छिन्नाधेयत्वीयस्वरूपसंबन्धेन तत्र शाब्दप्रकारत्वविरहान्नाव्याप्तिरिति । तत्र हि क्रियानिरूपकत्वविशिष्टसम्बन्धावच्छिन्नत्वोक्तौ कान्तस्य त्रस्यतीत्यादौ षष्ठ्यर्थशेषस्य त्रासनिरूपकत्वविशिष्टस्वरूपसम्बन्धेन कान्तस्य चेष्टा इत्यादौ चेष्टान्वयविषयकशाब्दप्रकारत्ववि-

रहात् षष्ठ्यर्थशेषेऽतिव्याप्तिः स्यादिति क्रियानिरूपकत्वो-पलक्षितत्वेन सम्बन्धो विवक्षितस्तेन तथोपलक्षितेन स्व-रूपसम्बन्धेन षष्ठ्यर्थशेषस्य चैष्टान्वयविषयकशाब्दप्रका-रत्वान्न तत्रातिव्याप्तिः । यदि च सप्तम्या द्विविधमाधे-यत्वमर्थलभ्यं तदा तण्डुलन्न पचतीत्यादाविव तण्डुलं नेत्यादौ तण्डुलकर्मत्वस्य नञर्थान्वयविषयकशाब्दप्रकारकर्म-त्वादावव्याप्तिरसम्भवो वा स्यात् तद्वारणाय नि-रुक्तसम्बन्धावच्छिन्नत्वं स्वप्रकारताविशेषणं बोध्यम् । यदि च धातुविनाकृतात् तण्डुलं नेत्यादिवाक्यात्कर्म-त्वादेर्नञर्थान्वयविषयकशाब्दबोधो नाभ्युपेयते नञर्थे कर्मत्वादेरन्वयबोधे नञो धातुसमभिव्याहारस्य तन्त्र-त्वादिति । तदा निरुक्तसम्बन्धावच्छिन्नत्वं न स्वप्रकार-ताविशेषणं तण्डुलं न पचतीत्यादौ कर्मत्वस्य नञ-र्थान्वयविषयकशाब्दप्रकारत्वेऽपि तादृशशाब्दस्य धा-तुपदव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वान्न तत्राव्या-प्तिरिति । एवं निरुक्तशाब्दसामान्यस्य लक्षणत्वे श्रो-तरि निरुक्तशाब्दसामान्यस्य समवायेन सत्वात्तत्रातिव्याप्तिः स्यादनिरूपकत्वमुक्तं निरूपकत्वं प्रकारत्वं बोध्यम् । तावतापि धात्वर्थतावच्छेदकादावतिव्याप्ति-रिति सुबर्थत्वमुक्तं सुबर्थत्वं तु सुब्जन्योपस्थितिप्रका-रीभवद्धर्मत्वं बोध्यमिति । अत्रेयमुपपत्तिर्निरर्थकपदास-मभिव्याहृतद्वितीयार्थकर्मत्वप्रकारतानिरूपितविशेष्य-तासम्बन्धेन शाब्दं प्रति भावप्रत्ययान्यप्रत्ययप्रकृतिधातु-जन्योपस्थितेर्विशेष्यतासम्बन्धेन हेतुत्वं तेन घटादिप-देन लक्षणया पाकोपस्थितौ योग्यतासत्वेऽपि तण्डुलं-

घट इत्यादौ न तथा शाब्दबोधः। भावाख्यातस्थले द्वितीयान्तपदत्वेऽपि तण्डुलं पच्यत इत्यादौ न शाब्दबोध इत्यन्वयव्यभिचारवारणाय प्रकृत्यन्तं धातुविशेषणम्। न चोक्तव्यभिचारवारणाय भावप्रत्ययाप्रकृतित्वमेव धातुविशेषणमस्तु किं द्वितीयप्रत्ययपदप्रवेशेनेति वाच्यम्। तथा सति तण्डुलं पच् इत्यादौ शाब्दापत्तेः। इत्थमेव निर्विभक्तिकस्य शब्दस्य शाब्दाप्रयोजकत्वरूपमसाधुत्वमुपपद्यते। इदमेवासाधुत्व"ं लः कर्मणि च भावे चाकर्मकेभ्य" इति सूत्रेऽकर्मकेभ्य इति पदं भावप्रत्ययान्तधातोः कर्मत्वप्रकारकशाब्दाप्रयोजकत्वलक्षणं ज्ञापयति। एवं षष्ठ्यर्थस्य कर्मत्वस्य कर्तृत्वस्य च प्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दं प्रति कृदन्तधातुजन्योपस्थितेर्विशेष्यतासम्बन्धेन हेतुत्वन्तेन तण्डुलस्य पाकः पाचको मैत्रस्य पाकः पाच्यो वेत्यादौ तण्डुलकर्मत्वमैत्रकर्तृत्वप्रकारकपाकविशेष्यकशाब्दबोधस्य नानुपपत्तिरिति षष्ठ्यर्थयोः कर्मत्वकर्तृत्वयोर्न कारकत्वानुपपत्तेः। एवं लादेशादियोगे"न लोके" तिसूत्रेण षष्ठ्या निषेधेनासाधुतया तण्डुलस्य पचनं मैत्रस्य पच्यमानो वेत्यादौ कर्मत्वकर्तृत्वप्रकारकशाब्दानुत्पत्त्याऽन्वयव्यभिचारः स्यात्। तद्वारणाय लादेशादिभिन्नत्वं कृतिविशेषणं देयमिति। यदि तण्डुलं पाचक इत्यादौ द्वितीयार्थकर्मत्वस्य धात्वर्थेनान्वयः"कर्तृकर्मणोः कृती"ति सूत्रेण षष्ठीविधायकेन द्वितीयाया अपवादादिति। तदा लादेशादिभिन्नकृदन्यत्वमपि भावप्रत्ययान्यप्रत्यये विशेषणं देयमिति। एवं पच्यत इत्यादौ कर्माख्यातस्थले द्वितीयार्थकर्मत्वस्य न-

धात्वर्थेऽन्वय इति कर्मप्रत्ययान्यत्वमपि तत्र विशेषणं बोध्यम् । अथ कर्मकर्मतान्यतरबोधकशब्दासमभिव्याहृतत्वं धातोरेव विशेषणं बोध्यम् । तेन छेत्तुं सांप्रतं इक्षु इत्यादौ नारद इत्यबोधि स इत्यादौ निपातेन कर्मकर्मत्वयोर्बोधने धात्वर्थेद्वितीयार्थस्य नान्वय इति इदमेवासाधुत्वं कर्मप्रत्ययनिष्कृतसमभिव्याहृतधातोरर्थे स्वार्थान्वयबोधाप्रयोजकत्वलक्षणं द्वितीयाया "मनभिहिते" इति सूत्रं ज्ञापयति। एवं तृतीयार्थकर्तृत्वकरणत्वप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दं प्रति कर्तृबोधकपदासमभिव्याहृतकरणबोधकपदासमभिव्याहृतसप्रत्ययधातुजन्योपस्थितेर्विशेष्यतासंबन्धेन यथायोग्यं हेतुत्वं तेन घटादिपदेन लक्षणया पाकोपस्थितावपि चैत्रेण घटः चैत्रेण काष्ठेन घट इत्यादौ न तथा शाब्दबोधः । न वा पचनं पचति वा इत्यादौ चैत्रेणेति तृतीयार्थकर्तृत्वस्य धात्वर्थेऽन्वयबोधः । न वा पचनमित्यादौ काष्ठेनेति तृतीयार्थकरणत्वस्य धात्वर्थेऽन्वयबोध इति । न्यायमते एवं कार्यकारणभावाः शाब्दिकमतेऽप्येते कार्यकारणभावाः । परं तु कर्मत्वकर्तृत्वकरणत्वानि न विभक्तीनामर्थाः किं तु कर्मकर्तृकरणानि । ते कर्मत्वकर्तृत्वकरणत्वान्यनिर्देश्यकार्यकारणभावा यथोक्ता बोध्याः। एवं पञ्चम्यर्थविभागजनकत्वाद्यपादानत्वादिप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दं प्रति प्रत्ययान्तधातुजन्योपस्थितेर्विशेष्यतासंबन्धेन हेतुत्वं तेन घटादिपदेन लक्षणया पतनोपस्थितावपि न तथा वृक्षाद्वट इत्यादौ शाब्दबोधः । वृक्षात्पतति पत्यते पतनमित्यादौ

तु तथा शाब्दबोधः । चोराद्बिभेतीत्यादौ हेतुतासामान्यविलक्षणस्य भयहेतुत्वस्य पञ्चम्यर्थस्य बिभेत्याद्यर्थ एवान्वयात् । चौराद्धनलाभ इत्यादावनन्वयात् न भयहेतुत्वेऽव्याप्तिशङ्का "भीत्रार्थानां भयहेतुरि"ति सूत्रे भयपदोपादानमेतदर्थमेवेत्यादिकं वक्ष्यते । अत्र कृत्तद्धितयोरपादानबोधकत्वं न दृश्यते समासे तु चौरभीत इत्यादौ चौरपदस्य चौरभीते लक्षणा भीतशब्दस्य तात्पर्यग्राहकत्वम् । तथा च धातुजन्योपस्थितिविरहात्पञ्चम्यर्थान्वयसम्भवादपादानबोधकपदासमभिव्याहृतत्वम् धातोर्न विशेषणं न्यायमते प्रयोजनविरहादिति । शाब्दिकमते कृत्तद्धितसमासेषु वृत्तिस्वीकारात् धातुजन्योपस्थितिसम्भवाच्च तद्विशेषणमेव । यदि च व्याघ्र इति बिभेति भेत्तुं सांप्रतं व्याघ्र इत्यादिप्रयोगानुरोधात् निपातोभयापादानमभिधत्ते तदा न्यायमतेऽपि तद्विशेषणं बोध्यमिति । एवं चतुर्थ्यर्थस्वत्वनिरूपकत्वादिप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दं प्रति संप्रदानबोधकपदासमभिव्याहृतसप्रत्ययधातुजन्योपस्थितेर्विशेष्यतासंबन्धेन हेतुत्वं तेन घटादिपदेन लक्षणाया दानोपस्थितावपि न तथाशाब्दबोधः । न वा दानीयो ब्राह्मणायेत्यादौ चतुर्थ्यर्थसंप्रदानत्वस्य धात्वर्थेऽन्वयबोधः । भवति च ब्राह्मणाय ददाति दीयते दानमित्यादौ तथाशाब्दबोधः । एवं सप्तम्यर्थस्य कर्तृकर्मान्यतरघटितपरम्परासंबन्धावच्छिन्नाधेयत्वस्य प्रकारतया ऽऽधेयत्वसामान्यस्य निरुक्तसंबन्धावच्छिन्नप्रकारतया वा निरूपितं यद्विशेष्यत्वं तेन संबन्धेन शाब्दं प्रति विशेष्यतासंबन्धेनाधिकरणबोधकप-

दासमभिव्याहृतधातुजन्योपस्थितेर्हेतुत्वम् । तेन घटादिपदेन पाकोपस्थितावपि न तथाशाब्दबोधः । न वा पचनौ स्याल्यामित्यादौ सप्तम्यर्थाधेयत्वस्य धात्वर्थान्वयबोधः । भवति च स्याल्यां पचति पच्यते पाक इत्यादौ तथाशाब्दबोधः । एवं कारकलक्षणे समुपपन्ने कर्तृत्वादीनां धात्वर्थविशेष्यकनिरुक्तसुबज्ञानजन्योपस्थितिप्रकारीभवद्धर्मावच्छिन्नप्रकारताकशाब्दकालावच्छेदेनैव कारकत्वं यथा धूमादीनां व्याप्तिपक्षधर्मताज्ञानकालावच्छेदेनैव वह्निगमकत्वस्वरूपं वह्निलिङ्गत्वमिति । इत्थं च क्रियान्वयित्वमित्यपि प्राचीनलक्षणं संगच्छते । तथा हि । अन्वयित्वमाचोक्तौ नामार्थान्वयिनि षष्ठ्यर्थशेषादावतिव्याप्तिस्तद्वारणार्थमुपात्तेऽपि क्रियापदे कान्तस्य वस्यतीत्यादौ सा तदवस्थैवेति क्रियामात्रान्वयित्वं तद्वाच्यम् । तदर्थस्तु धातुं विना स्वविशेषणताकान्वयबोधाजनकसुबर्थत्वमिति तिङर्थस्य कारकत्वमते सुप्पदस्थाने विभक्तिपदं बोध्यमिति विभक्तिज्ञानजन्योपस्थितिविषयो विभक्त्यर्थस्तत्र तादृशोपस्थितौ निरुक्तान्वयबोधस्याजनकत्वमनुपधानं बोध्यमिति । एवं धातुं विना स्वविशेषणताकान्वयबोधानुपहितस्य विभक्तिज्ञानजन्योपस्थितिसामान्यस्य विषयः नामार्थान्वययोग्यः कारकइति । अत्र स्वविशेषणतायां सुप्पदस्थाने विभक्तिपदं प्रक्षिप्य पूर्वोक्तं विशेषणं बोध्यमिति षष्ठ्यर्थशेषेऽतिव्याप्तिवारणायानुपहितस्येत्यन्तं सामान्यविशेषणं तत्राप्यसम्भववारणाय धातुं विनेत्युक्तं कान्तस्य वस्यतीत्यादौ षष्ठ्यर्थशेषेऽतिव्याप्तिवारणाय सामान्यपदमिति । इष्टसा-

धनत्वादावतिव्याप्तिवारणाय नामार्थान्वययोग्यत्वं विशेषणं स्वविशेषणतावच्छेदकत्वं पूर्वोक्तं बोध्यमिति इयाँस्तु विशेषः। प्रथमान्तार्थविशेष्यताकतिङर्थकर्तृत्वकर्मत्वद्वृत्तिप्रकारतया शाब्दं प्रति धातुसमभिव्याहृततिङ्जन्योपस्थितेर्विशेष्यतया हेतुत्वमिति शाब्दिकमतेऽप्ययं हेतुहेतुमद्भावः। परं तु प्रथमान्तार्थविशेषणताकर्तृकर्मविशेष्यतया शाब्दं प्रतीति विशेषः। तेन तिङ्देवदत्तइत्यादौ न तथाशाब्दबोध इति। एवं निरर्थकपदसमभिव्याहारज्ञानाभावविशिष्टद्वितीयादिज्ञानजन्योपस्थितिविशेष्यतापन्नं कर्मत्वम्। तच्चाद्विभक्तिजन्योपस्थितिविशेष्यतापन्नं कर्तृत्वं करणत्वं संप्रदानत्वमपादानत्वमधिकरणत्वं नानाविधं कारकपदस्य शक्यम्। नानार्थमेव कारकपदं तथा च कर्मत्वादिसकलसाधारणं कारकपदवाच्यत्वमेव कारकत्वमिति। यथा गोपदादिसकलसाधारणं गोपदवाच्यत्वं गोत्वमिति। ननु नानार्थत्वाभ्युपगमेऽपि कारकपदस्य कारकपदवाच्यत्वं कारकत्वं न भवति कारकपदाधुनिकसङ्केतविषये द्रव्यादावतिव्याप्तेः। न च नित्यसंकेतेन कारकपदवत्वं तत् आधुनिकसंकेतविषये द्रव्यादौ नित्यसंकेताभावान्नातिव्याप्तिरिति वाच्यम्। तथा सति कर्मत्वादीनामतथात्वादसंभवापत्तेः तेषां शाब्दिकसंकेतेन कारकपदवत्वादिति चेन्न। कर्मत्वादौ कारकपदस्य नित्यसङ्केतात्। व्याकरणे कुत्रापि कारकसंज्ञाया अभावात् शाब्दिकसङ्केताप्रसक्तेः। अत एव "कारक" इत्यधिकारसूत्रसुक्त्वा व्याकरणे "ध्रुवमपायेऽपादानमि" त्यादिना का-

रकगणाभिधानं सङ्गच्छते । कारकपदस्यानित्यसङ्केतभावे कारकसंज्ञाग्राहकसूत्रं विनाऽधिकारसूत्राभिधानस्यासङ्गत्यापत्तेरिति कारकपदवाच्यत्वमपि निष्प्रत्यूहमित्यास्तां विस्तरः ॥

ईदृशकारकत्वस्य विभक्त्यर्थतावच्छेदकत्वविरहेऽपीदृशकारकत्वावलीढस्य रूपान्तरेण विभक्त्यर्थत्वमक्षतमेव । एवमीदृशकारकत्वशून्योऽकारकोऽस्यापि तथैव विभक्त्यर्थत्वमिति ॥

ननु कारकाऽकारकौ कथं विभक्त्यर्थौ स्यातां विभक्तित्वस्यैव दुर्निरूपत्वात् । तथा हि । विभक्तित्वं न सुब्निराकाङ्क्षप्रत्ययत्वम् पाचयति पिपक्षतीत्यादौ णिच्सनोरतिव्याप्तेः न च सुप्तिङोरन्यतरनिराकाङ्क्षत्वं प्रवेशनीयमिति णिच्सनोर्नातिव्याप्तिस्तयोस्तिङाकाङ्क्षत्वादिति वाच्यम् । चैत्रः पचति फूत्कारविशेषादित्यादौ पञ्चमीतिपोः परस्परसाकाङ्क्षत्वेनोभयोरव्याप्तेः । तार्तीयीक इत्यादौ तीयादितद्धितेऽतिव्याप्तेश्च । ईकक्प्रकृतेस्तीयस्य सुप्तिङ्निराकाङ्क्षत्वात् । अत एव सुप्तिङोरप्रकृतित्वं तन्निराकाङ्क्षमिति दर्शितयोः पञ्चमीतिपोर्नाव्याप्तिरिति परास्तम् । सुप्तिङन्यरत्वस्यैव सम्यक्त्वे तदन्यतराप्रकृतित्वे व्यर्थविशेष्यत्वाच्च । यत्तु प्रकृत्यर्थविधेयतानिरूपितस्वीयोद्देश्यताकशाब्दजनकशब्दत्वम् सुप्तिङोरेव तथाभूतशाब्दजनकत्वमिति लक्षणसंगमः कृत्तद्धितादेरर्थे प्रकृत्यर्थस्य न विधेयतयान्वय इति न तत्रातिव्याप्तिरिति । तदसत् । सुप्तिङोरर्थे प्रकृत्यर्थस्य विधेयत्वेनान्वयेऽननुभवात् मानाभावाच्च । किं च

तण्डुलं पचतीत्यादौ तण्डुलीया कर्मतेत्यवान्तरवाक्यार्थबोधे तण्डुलस्य विधेयत्वं कर्मत्वस्योद्देश्यत्वं यदि भवति तदा तण्डुलमोदनीयत्वादिति द्वितीयार्थकर्मतापक्षकन्यायप्रयोगः स्यात्। यदि प्रकृत्यर्थविशेषणतानिरूपितस्वार्थविशेष्यताकबोधजनकत्वमेवाभ्युपेयते तदा प्रत्ययान्तरसाधारण्यान्नेदं लक्षणम्। अपि च दात्रिरित्यादौ तद्धितार्थेऽपत्ये दात्रादेः प्रकृत्यर्थस्य तुल्ययुक्त्या विधेयतयाऽन्वये बाधकाभावात्तद्धितेऽतिव्याप्तिः। एवं पिपक्षेत्यादौ सनोऽर्थे इच्छायां पाकस्य तथान्वयात्सन्प्रत्यये कर्तेत्यादौ कृदर्थे आश्रये कृतेस्तथान्वयात्कृत्प्रत्यये चातिव्याप्तिः। न च दर्शितस्थलेषु प्रकृत्यर्थस्य विधेयतया न प्रत्ययार्थेऽन्वयस्तथासत्यपत्यं दत्तस्य चैत्रस्य च इच्छा पाकस्य भोजनस्य च आश्रयः कृतिर्ज्ञानस्य चेत्यादौ दत्तचैत्रयोः पाकभोजनयोः कृतिज्ञानयोर्युगपद्विधेयताद्वयशाल्यन्वयबोध इव दात्रिश्चैत्रस्य पिपक्षा भोजनस्य कर्ता ज्ञानस्येत्यादौ दत्तचैत्रयोः पाकभोजनयोः कृतिज्ञानयोर्युगपद्विधेयताद्वयशाल्यन्वयबोधस्स्यादिति वाच्यम्। प्रत्ययार्थे प्रकृत्यन्वयस्य व्युत्पन्नत्वेन प्रकृत्यर्थान्यस्य चैत्रादेस्तद्धितार्थे विधेयतयान्वयबोधस्यानुपपत्तेः। अन्यथा तवापि तण्डुलमोदनस्येत्यादौ तण्डुलौदनोभयविधेयताकान्वयबोधः स्यात् न चेयमिष्टापत्तिस्तथासति सर्वदर्शनसिद्धान्तविरोधमदूषणमभ्युपगच्छतो भवतः प्रदर्शितस्थले तद्धितार्थे चैत्रादेरन्वये कुतो नेष्टापत्तिः। न चैवं दात्रिः सुन्दर इत्यादौ सुन्दरतादात्म्यस्य प्रकृत्यर्थान्यस्य तद्धितार्थेऽन्वयो न स्यादिति वाच्यम्। दत्तापत्यं

त्यस्वरूपविशिष्टस्य तद्धितान्तवाक्यार्थस्याप्रत्ययार्थतया तत्र सुन्दरतादात्म्यात्वयस्य निष्प्रत्यूहत्वात् । तद्धितार्थे कैवलापत्ये सुन्दरतादात्म्यान्वयस्य कैनाप्यनभ्युपगमात् न चैवं तण्डुलमोदनस्येत्यादौ तण्डुलकर्मत्वे वाक्यार्थे ओदनादेरन्वयः स्यादिति वाच्यम् । प्रकृत्यर्थविशेषितप्रत्ययार्थस्वरूपवाक्यार्थस्य विशेष्यतयाऽन्वये कृत्तद्धितान्तर्थस्यैव प्रयोजकत्वात् । तण्डुलकर्मत्वादिरूपवाक्यार्थस्य विशेषणतयाऽन्वये धात्वर्थस्य प्रयोजकत्वात्तण्डुलमोदनस्येत्यादावोदनादेरन्वयासम्भवात् । यत्र प्रकृत्यर्थस्य प्रत्ययार्थे नान्वययोग्यता पारिमाण्डल्यादौ तत्र नञ्समभिव्याहारेऽन्वयबोधस्य प्रामाणिकत्वे तु तत्रैव प्रकृत्यर्थविशेषितनञर्थस्याप्रकृत्यर्थस्य प्रकृतिलक्ष्यस्य वान्वयइति वक्ष्यते । एतेन प्रथमोक्तपदार्थस्यैवोद्देश्यत्वं भवति "यच्छब्दयोगः प्राथम्यं भवेदुद्देश्यलक्षणमि"ति व्युत्पत्तेरत एव "न्यक्कारो ह्ययमेव मे" इत्यादावविसृष्टविधेयांशकत्वं दोषमाचक्षते काव्यविदः । तथा च तण्डुलमित्यादौ तण्डुलीया कर्मतेति बोधे तण्डुलस्य विधेयत्वं न भवति । किं तु पर्वते वह्निरित्यादौ विशेषणीभूतपर्वतादेरिव तण्डुलस्योद्देश्यत्वमेव । तथा च प्रकृत्यर्थोद्देश्यतानिरूपितसुबर्थविधेयताकशाब्दजनकशब्दत्वं विभक्तित्वमिति परास्तम् । तद्धितादिप्रकृत्यर्थस्योद्देश्यतयाऽन्वये बाधकाभावात् । तद्धितादावतिव्याप्तिरिति चेत् । उच्यते । संख्यावाचकप्रत्ययत्वं विभक्तित्वमिति प्रत्ययत्वमात्रोक्तौ कृत्तद्धितादावतिव्याप्तिरिति संख्यावाचकत्वमुक्तम् । यद्यपि संख्यात्वविशिष्टस्य वाचकत्वं न विभ-

स्तीनां किं तु एकत्वत्वविशिष्टस्य द्वित्वत्वविशिष्टस्य बहुत्वत्वविशिष्टस्य चेति संख्यात्वव्याप्यजातिविशिष्टवाचकत्वं वक्तुमुचितं तथापि लाघवेन संख्यामात्रविशेष्यताकबोधोद्देश्यकसंकेतवत्वं निवेशनीयं तावतैव समीहितसिद्धेः पार्थिवमित्यादितद्धितस्य सम्बन्धित्वेन संख्याबोधकत्वोपगमे तत्रातिव्याप्तिवारणाय मात्रपदमुक्तम्। तदर्थस्तु संख्येतराटत्तित्वं तथा च संख्येतराटत्तिविशेष्यताकबोधोद्देश्यकसङ्केतवत्वं संख्यावाचकत्वं बोध्यमिति। ननु चैत्रौ मैत्रश्च पचतइत्यादौ द्वित्वस्य चैत्रौ मैत्रौ जैत्रश्च पचन्तीत्यादौ बहुत्वस्य बोधाद्द्विवचनबहुवचनतिङोः संख्यावाचकत्वमस्तु तिङेकवचनस्य संख्यावाचकत्वे न मानमस्तीति तिङेकवचनेऽव्याप्तिरिति चेन्न। तथा सति पुरुषौ पचतीति प्रयोगप्रसङ्गात्। मम तु तिङुपस्थाप्यैकत्वस्य द्वित्वविशिष्टपुरुषेऽन्वयायोग्यत्वमिति वह्निनासिञ्चतीतिवत् न तादृशप्रयोगः सम्भवति। न च द्विवचनप्रथमान्ते द्विवचनतिङन्तस्य समभिव्याहारस्थयोः परस्परार्थान्वयानुभवे तत्त्वमिति न तथाप्रयोगः सम्भवतीति वाच्यम्। पुरुषौ स्त्री च पचन्तीत्यादौ बहुवचनतिङन्तसमभिव्याहारेऽपि तथाप्रथमान्तार्थेऽन्वयदर्शनेन तथातिङन्तसमभिव्याहारस्यातन्त्रत्वात्। न च तथाप्रथमान्तबहुवचनतिङन्तस्यापि समभिव्याहारस्तन्त्रमिति न दृश्यतसमभिव्याहारस्यातन्त्रत्वमिति वाच्यम्। तथापि तथाप्रथमान्ते बहुवचनान्तस्यैव एकवचनान्तस्य तिङन्तस्य समभिव्याहारः कुतो न तन्त्रमिति वौजानुयोगे

संख्यान्वयायोग्यत्वस्यैव बीजत्वेन प्रदर्शनीयत्वात् । अत
एव पचतीत्यादौ तृतीयाप्रसङ्गवारणाय कर्तृसंख्यानभि
धानं तृतीयाप्रयोजकमित्याख्यातवादे दीधितिकृद्भिः प्र-
माणीकृतमिति । इत्थं च संख्यावाचकत्वं शतादिशब्दे-
ऽतिव्याप्तमिति प्रत्ययत्वमुपात्तम् । ननु प्रत्ययत्वं दुर्निरूप-
मिति विभक्तित्वं दुर्निरूपमेव । तथा हि । प्रत्ययत्वं न
तावत्पदार्थान्वितस्वार्थकत्वं नामधात्वादावतिव्याप्तेः ।
नापि पूर्वपदार्थान्वितस्वार्थकत्वम् । राजपुरुष इत्यादि-
समासेऽतिव्याप्तेः अत एव पूर्वपदार्थान्वितप्रधानीभूत-
स्वार्थकत्वमिति परास्तम् । यत्तु शब्दान्तरार्थाविशेषिते
यादृशे स्वार्थे धर्मिणि तिङर्थस्यान्वयबोधने स्वरूपायो-
ग्यः स निभतुल्यसदृशप्रतियोग्यनुयोग्यधिकरणाधेयादि-
शब्देभ्यो निपातेभ्यश्च भिन्नः शब्दस्तादृशार्थे प्रत्यय इति
कृत्तद्धितादीनां स्वार्थे तिङर्थान्वयस्वरूपयोग्यत्वात्तेष्व-
व्याप्तिरिति शब्दान्तरार्थाविशेषितत्वं स्वार्थस्य विशेषणं
तस्या अङ्गकमित्यादौ कादिप्रत्ययस्य कमस्तीत्यादौ
शिरःप्रभृतिस्वार्थे तिङर्थान्वयस्वरूपयोग्यत्वात् तत्रा-
व्याप्तिरिति यादृशत्वं विशेषणम् । तेन कादिप्रत्ययस्या-
ल्पादिस्वरूपस्वार्थे तिङर्थान्वयस्वरूपयोग्यत्वान्न तत्रा-
तिव्याप्तिरिति । अस्तीन्द्राणीत्यादाविन्द्रशब्दार्थावि-
शेषिते स्त्रीत्वे तिङर्थान्वयस्वरूपायोग्ये आनुगा-
गमेऽतिव्याप्तिरिति स्वार्थइत्युक्तम् । प्रत्ययमात्रस्य स्वार्थ
प्रकृत्यर्थान्वयस्वरूपयोग्यादसम्भवः स्यादिति तिङर्थ-
स्येत्युक्तम् । चन्द्रनिभोऽस्तीत्यादौ निभादिशब्दानां पूर्व-
पदार्थचन्द्राद्यविशेषिते स्वार्थे सदृशादौ तिङर्थान्वयस्व-

रूपायोग्यत्वात्तत्वातिव्याप्तिरिति निभादिभिन्नत्वं शब्दस्य विशेषणम् । समुच्चयविकल्पार्थकानां चवादिनिपातानां स्वार्थे तिङर्थान्वयस्वरूपायोग्यत्वात्तत्वातिव्याप्तिरिति निपातभिन्नत्वं विशेषणम् । कादिशब्दस्य शिरःप्रभृत्यर्थे प्रत्ययत्ववारणाय तादृशार्थे इत्युक्तमिति मतम् । तदपि न सम्यक् । निभादिशकलशब्दस्य प्रतियोगिनोऽवगमस्याशक्यतया तावद्भिन्नत्वस्य दुर्ग्रहत्वात् । किं च संबन्धीत्यादाविन्प्रत्ययार्थस्य संबन्धिनः शब्दान्तरसंबन्धेन विशेषितत्वात्तदविशेषितस्वार्थप्रसिध्या तत्राव्याप्तिः । यदि चाविशेषितत्वमनन्वितत्वमित्युच्यते तदाऽपि खले कपोतन्यायेन शाब्दमते दाचिरस्ति पाचकोऽस्तीत्यादौ प्रकृत्यर्थेन समं तिङर्थस्य तद्धितकृत्प्रत्ययार्थे युगपदन्वयेन तयोरव्याप्तिः । अपि च संबोधनान्तस्य निर्विभक्तिकस्य च चैत्रादिप्रातिपदिकस्य स्वार्थे तिङर्थान्वययोग्यत्वात्तादृशतादृशचैत्रादिपदेऽतिव्याप्तिः । न च चैत्रोऽस्तीत्यादावन्वयदर्शनेन चैत्रादिपदानां न तिङर्थान्वययोग्यत्वमिति दर्शितस्थलेषु संबन्धीतरप्रथमासमभिव्याहारस्य सहकारिणो विरहान्नान्वयबोध इति वाच्यम् । एवं सति हि कृत्तद्धितस्थलेऽपि प्रकृतिसमभिव्याहारस्य सहकारित्वान्न तिङर्थान्वययोग्यत्वमिति तत्राव्याप्तिः । न च कृत्तद्धितस्थले प्रकृतिसमभिव्याहारो न तिङर्थान्वये तन्त्रं किं तु प्रकृत्यर्थान्वय एवेति वाच्यम् । प्रत्यये प्रकृतिसमभिव्याहारस्य प्रत्ययार्थान्वयमात्रे तन्त्रत्वात्प्रकृतिविनाकृतस्य कुत्वाप्यननुभावकत्वात् । एवं च पाकोऽस्तीत्यादौ घञ्प्रत्यये ऽव्याप्तिश्च पदान्तरार्थानन्विते धातुघ-

अभयोपस्थापिते पाके तिङर्थान्वयस्य सर्वजनसिद्धतय
घञस्तिङर्थान्वययोग्यत्वादिति तदपि शब्दान्तरार्थी
विशेषितस्य स्वार्थस्य विशेषणतया ऽन्वयबोधनायोग्य
शब्दः प्रत्यय इति तदपि तादृशयोर्लिङ्गसंख्ययोर्विशेष
णतया ऽन्वययोग्ये सुपि पाकमित्यादौ तादृशस्य पाक
स्य कर्मत्वे विशेषणतया ऽन्वययोग्ये घञ्प्रत्यये चाव्या
प्त्या नादरणीयमिति । तस्मात्प्रत्ययत्वं दुर्वचमिति चे
दुच्यते । सार्थकशब्दोत्तरत्वज्ञानाविषयो यः शब्दः शाब्द
बोधं नार्जयति स प्रत्ययः प्रकृतीनां नामधातूनां सार्थ
कशब्दोत्तरत्वज्ञानाविषयाणामपि शाब्दबोधार्जकत्वं प्र-
त्ययानां तु सार्थकशब्दोत्तरत्वज्ञानविषयाणामेव तथा-
त्वमिति तथा च स्वार्थविषयकशाब्दसामान्योयाभाव-
प्रयोजकाभावप्रतियोगिसार्थकशब्दोत्तरत्वज्ञानीयोत्तर-
त्वप्रकारतानिरूपितविशेष्यतावत्त्वं सार्थकशब्दत्वं प्रत्यय-
त्वमिति । राज्ञः पुरुष इत्यादौ पुरुषपदे राजपदोत्तर-
त्वप्रकारकज्ञानविषयताया: सत्वादतिव्याप्तिरिति प्रति-
योग्यन्तं ज्ञानविशेषणम् । पुरुषपदे षष्ठ्यन्तराजपदोत्तर-
त्वज्ञानस्य निरुक्तप्रतियोगित्वविरहात् पुरुषो राज्ञ इत्य-
तोऽपि शाब्दोदयान्नातिव्याप्तिरिति असंभववारणा
स्वार्थविषयकत्वं शाब्दविशेषणं राजपुरुष इत्यादिसमा
सि पुरुषपदे राजपदोत्तरत्वज्ञानं राजपदार्थविशेषणत
कपुरुषपदार्थविशेष्यताकशाब्दबोधस्य जनकमतः पुरुष
राज इत्यादौ न तथा शाब्दबोधः । पुरुषो राजेत्यादौ
राजपदार्थान्वितविभक्त्यर्थतादात्म्यस्य पुरुषपदार्थे वि
शेषणतया ऽन्वयात् । राजपदार्थस्यानन्वयान्न व्यभिचा

इति राजपदार्थविशेषणताकपुरुषविशेष्यताकशाब्दाभा-
वप्रयोजकाभावप्रतियोगिनो राजपदोत्तरत्वज्ञानस्य विष-
ये पुरुषपदे ऽतिव्याप्तिरिति तद्वारणाय तादृशशाब्दसा-
मान्यीयत्वेनाभावो विशेषितस्तेन पुरुषपदार्थविषयकशा-
ब्दसामान्यं प्रति राजपदोत्तरज्ञानं न जनकं पुरुषस्तिष्ठ-
तीत्यादौ व्यभिचारात् न तादृशशाब्दसामान्यीयाभाव-
प्रयोजकाभावप्रतियोगिराजपदोत्तरत्वज्ञानमिति तद्विष-
ये पुरुषपदे नातिव्याप्तिरिति संयोगाद्युत्तरत्वज्ञानस्य
तादृशप्रतियोगित्वादसंभवः स्यादिति शब्दपदमुपात्तम्।
अध्युत्तरत्वेनेङो ज्ञानमध्ययनशाब्दं प्रति हेतुरिति ता-
दृशाभावप्रतियोगिनोऽध्युत्तरत्वज्ञानस्यविषये इङ्धाता-
वतिव्याप्तिरुद्धारणाय सार्थकत्वं शाब्दविशेषणम्। अ-
यादिशब्दस्य निरर्थकत्वान्न तत्रातिव्याप्तिः। सार्थकश-
दोत्तरत्वज्ञानस्य प्रकृतितावच्छेदकप्रकारतानिरूपित-
विशेष्यतावति प्रकृतिशब्दे ऽतिव्याप्तिरिति विशेष्यता-
यामुत्तरत्वप्रकारतानिरूपितत्वं विशेषणम्। न च सार्थ-
कशब्दोत्तरत्वप्रकारतानिरूपितज्ञानविशेष्यतावत्वं प्र-
वेश्यतां तावतैव समीहितसिद्धेस्तादृशोत्तरत्वज्ञानीयत्व-
स्योत्तरत्वप्रकारतायां निवेशो व्यर्थ इति वाच्यम्। यत्र
इन्द्राग्नीत्यादौ पचतीत्यादौ इन्द्रोत्तरानुयुक्तरत्वेन ङी-
पो ज्ञानं पचुत्तरशबुत्तरत्वेन तिङो ज्ञानं शाब्दजनकं
तत्र सार्थकशब्दोत्तरत्वप्रकारतानिरूपितविशेष्यताया
ङीपि तिङि चासत्वात्तयोरव्याप्तिप्रसङ्गात्। तादृशोत्त-
रत्वज्ञानीयोत्तरत्वप्रकारतायां निवेशे तु तादृशागमो-
त्तरत्वप्रकारतानिरूपितविशेष्यतायां ङीपि तिङि च

सत्वान्न तयोरव्याप्तिरिति । एवं शबानुगाद्यागमे ऽति
व्याप्तिवारणाय सार्थकपदं आगमस्यनिरर्थकत्वान्न तत्रा
तिव्याप्तिवारणाय सार्थकपदं आगमस्यनिरर्थकत्वाद्न
तत्रातिव्याप्तिः "स्वं रूपं शब्दस्याशब्दसंज्ञे"ति शबाद्या
गमानां स्वरूपार्थकत्वादतिव्याप्तितादवस्थ्यमिति श
बदपदं वृत्तिमदर्थकं तेन सार्थकपदं वृत्त्या स्वरूपेतरा
र्थकारकपरमिति । अत्र विशेष्यता तादृशाभावप्रतियो
गितावच्छेदिका बोध्या । तेनास्तिघट इत्यादावसुत्तरति
बुत्तरं घटपदमित्याकारकासुत्तरत्वज्ञानीयोत्तरत्वप्रका
रतानिरूपितविशेष्यताया घटपदे सत्वे ऽपि नातिव्या-
प्तिः । घटपदनिष्ठतादृशविशेष्यतायास्तादृशाभावप्रति-
योगितानवच्छेदकत्वात् । तादृशोत्तरत्वेन घटपदज्ञा-
नस्य शाब्दाहेतुत्वात् । असुत्तरस्तिप् घटपदं चेत्याकार-
कज्ञानादपि तथा शाब्दोदयात् । अत्र चैत्रोऽस्तीत्यादौ चै-
त्रपदार्थविशेष्यकसुबर्थलिङ्गसंख्याप्रकारकशाब्दं प्रति प्रा-
तिपदिकोत्तरः सुबिति चैत्रपदोत्तरः सुबिति वा ज्ञानं हेतुः
असमर्थसत्ताविशेषविशेषणाकतिङर्थाश्रयत्वविशेष्यकशाब्दं
प्रति धातूत्तरस्तिङ् इति असुत्तरस्तिप् इति वा ज्ञानं हेतुः
एवमिन्द्राणीत्यादाविन्द्रपदार्थप्रकारकस्वस्वामिभावसं
सर्गकङीबर्थस्त्रीविशेष्यकशाब्दं प्रति इन्द्रपदोत्तरानुपू
त्तरो ङीबिति ज्ञानं हेतुः पचतीत्यादौ पजर्थविशेषणक
तिङर्थयत्नविशेष्यकशाब्दं प्रति पजुत्तरशबुत्तरस्तिबिति
ज्ञानं हेतुः तेन स्वचैत्रेत्यादौ असित्यादौ आनीइन्द्रे
त्यादौ तिपचैत्यादौ न तथा शाब्दबोधः उत्तरत्वं
ध्वंसः तद्विशिष्ट उत्तरः तथा च चैत्र इत्यादौ चैत्रपदध्व

विशिष्टं सुपदमिति ज्ञानस्य चैत्रपदत्वावच्छिन्नप्रकार-
तानिरूपितध्वंसत्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारता-
निरूपितसकारत्वावच्छिन्नविशेष्यताकज्ञानत्वेन अस्ती-
त्यादावुत्तरत्वज्ञानस्य अस्त्वावच्छिन्नप्रकारतानिरूपित-
ध्वंसत्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपित-
तित्वावच्छिन्नविशेष्यताकज्ञानत्वेन इन्द्राणीत्यादावु-
त्तरत्वज्ञानस्य इन्द्रत्वावच्छिन्नप्रकारतानिरूपितध्वंस-
त्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपिताणत्वा-
वच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपितध्वंसत्वाव-
च्छिन्नविशेषत्वावच्छिन्नप्रकारतानिरूपिते कारक-
त्वावच्छिन्नविशेष्यताकज्ञानत्वेन पचतीत्यादावुत्तरत्व-
ज्ञानस्य पचत्वावच्छिन्नप्रकारतानिरूपितध्वंसत्वावच्छि-
न्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपितकारकत्वावच्छि-
न्नविशेषत्वावच्छिन्नप्रकारतानिरूपितध्वंसत्वावच्छि-
न्नविशेषत्वावच्छिन्नप्रकारतानिरूपितत्वावच्छिन्नवि-
शेष्यताकज्ञानत्वेन हेतुत्वमेवमन्यत्राप्यूह्यम्। शब्दानु
पूर्व्यामनुबन्धानामानुपूर्वी न ज्ञानहेतुतायां निविशते व्य-
र्थत्वात् गौरवप्रयोजकाच्च प्रयोगव्युत्पादनार्थमेव ते सूत्र-
कारेण निर्दिष्टाः एवमानुपूर्वीज्ञानहेतुत्वे सिद्धे तत्र पदा-
व्यवधानस्य निवेशनमफलं नितरान्तन्निर्वचनायासासा-
दनमिति व्यवहितेऽपीदृशविशिष्टवैशिष्ट्यज्ञानात् शाब्द-
बोधो निष्पत्यूह एव। एवं यत्पदध्वंसवैशिष्ट्यज्ञानं शा-
ब्दे हेतुस्तत्सार्थकं वञ्जजन्यत् पदं प्रकृतिरिति विशेष-
णकृत्यं दर्शितप्रायमिति। यदि वञ्जजपि प्रत्ययत्वेन
संग्राह्यस्तदा प्रत्ययलक्षणे तादृशनिरुक्तशब्दवञ्जजन्य-

तरत्वं निवेशनीयमिति । वस्तुतस्तु निपातादिवच्छेदान्व
ययोग्यं शब्दान्तरमेव बहुच् अन्यथा तद्धितत्वे बहुगु
डूत्यादौ बहुशब्दानन्तरं सुबुत्पत्तिप्रसङ्गात् कृत्तद्धित
तिसूत्रे तद्धितान्तस्यैवोपादानात् अन्यथा पचतकि भव
तकीत्यादौ सुबुत्पत्तिप्रसङ्गात् । तद्धितमूलमहचरितं ब
हुच्मूलं बहुजघटितसमुदायस्य तद्धितसाम्यं ज्ञापयति
तेन प्रातिपदिकत्वं तद्धितसुबादिकं च भवतीति । अत
एव यदि बहुच्प्रत्ययः स्यात्तदा प्रत्ययः परश्चेत्यनन्त
न बहुजिति मुनिः सूत्रयेत् । बहुच्मूले पुरस्तादित्यपि
च्चया मात्रालाघवात् तावतैव बहुचः प्रकृतिपूर्वत्वलाभ-
मम्भवादिति परास्तम् । एवं निभशब्दोऽपि सन्निभशब्द-
वत् न पदोत्तरत्वेन ज्ञातः शाब्दहेतुस्तादृशहेतुताग्रा-
हकाभावात् । प्रत्ययस्य तथाहेतुत्वे प्रत्ययः परश्चेत्यनु-
शासनस्यैव ग्राहकत्वात् । तथा च निभं कमलस्य मुख
मित्यादौ शाब्दोदयोऽभीष्ट एव । एवं शाब्दहेतोः पद
ध्वंसविशिष्टपदज्ञानस्य ध्वंसविशेषणया भातं सार्थ
पदं प्रकृतिः ध्वंसविशेषतया भातं सार्थकं पदं प्रत्ययः
तदुक्तं वाक्यपदीये भर्तृहरिणा ।

यः स्वेतरस्य यस्यार्थे स्वार्थस्यान्वयबोधने ।
यदपेक्षस्तयोः पूर्वा प्रकृतिः प्रत्ययः परः ॥

अपेक्षा पूर्वापरभावापन्नत्वेन ज्ञानं । तत्र प्रकृतेः प
र्वतया ज्ञानं शब्दाङ्गमित्यत्र न प्रमाणम् । उत्तरत्वे
प्रत्ययज्ञानस्य वाचकतावच्छेदकत्वविरहेऽपि विभक्ति
त्वावलीढस्य रूपान्तरेण वाचकत्वमक्षतमेव । विभक्तिर
पि द्विधा । सुप्तिङ्भेदात् । लिङ्गवाचिका विभक्तिः सु

दान्य लिङ्गवाचिका विभक्तिस्तिङ् ङीप्रत्यये कृदादौ चाति- हुगु व्याप्तिवारणायोभयत्र विभक्तिपदम्। सुपोऽपि प्रथमाद्वि- तद्धिते नीयातृतीयाचतुर्थीपञ्चमीषष्ठीसप्तमीभेदात्सप्तविधाः। भव तिङोऽपि प्रथममध्यमोत्तमपुरुषभेदात्त्रयः। विध्यादयस्ति- तं बा ङर्थाः। कुसुमाञ्जलिप्रभृतिमूलग्रन्थे विस्तृताः प्रसङ्गेना- यति त्रापि व्यक्तीभविष्यन्ति। तत्र विध्याद्यर्थेऽपि तिङा ति- । अत त्वादिना तेत्वादिना शक्तिः न त्वादेशीभूततत्तल्लकारा- नन्तर णां तिङि लादेशत्वज्ञानविरहिणोऽपि पुंसस्तत्तदर्थाव- त्यपे- गमात्। पचतीत्यादौ विध्याद्यर्थबोधो न भवति योग्य- लाभ- तायास्तात्पर्यस्य वा विरहात्। तात्पर्यग्राहकस्तु पचेदि- शब्द- त्यादौ तिङो विकार एवेति मन्तव्यम्। एवं वर्त्तमानातीत- ग्रा- नागतेषु कालेषु तिङां तित्वादिना तेत्वादिनैव श- त्यनु- क्तत्वापि तत्तद्विकाराविकारसमभिव्याहाराणां तात्प- ा मुख र्याग्राहकत्वात्पचेदित्यादौ तात्पर्यग्राहकविरहात् वर्तमा- : पद- नादे र्न बोधः वर्तमानादिकालस्तु तिङर्थकृतावन्वेतीति ार्थक न युक्तम्। तण्डुलः पच्यते इत्यादिकर्मख्यातेऽनन्वयप्र- यय: सङ्गात्। न च तत्र तिङर्थकर्मत्व एवान्वेतीति वाच्यम् तथापि फलस्योत्पत्तेः पूर्वं प्रयुक्ते पच्यते ओ न इत्यादा- वुत्पत्तिस्वरूपफलाधेयत्वे वर्तमानत्वस्यान्वेतुमयोग्यत्वे- नाऽनन्वयप्रसङ्गात्। ओदनस्याविद्यमानतया वर्तमानो- त्पत्त्याधेयत्वाऽनिरूपकत्वात्। अतः परिशेषाल्लावाख्या- ते: पु- तस्थले क्रियान्वयस्यावश्यकत्वाच्च तिङर्थः कालः क्रिया रत्वेन न्वयीति तत्र तिङ्प्रयोगाधिकरणं लवः काष्ठा वा व- क्तिर र्तमानः कालः ईदृशवर्तमानकालवृत्तिध्वंसप्रतियोगी- : सु कालोऽतीतकालः तादृशवर्तमानकालवृत्तिप्रागभावप्र-

तियोगी तादृशवर्तमानकालध्वंसाधिकरणं वा कालोऽनागतः कालः अत्र त्रयः काला स्वस्वाधेयत्वेन क्रियायामन्वियन्ति क्वचित् व्यापारे क्वचित्फले तत्र पचति अपचत् पक्ष्यतीत्यादौ व्यापारे कालस्यान्वयः । न च पचतीत्यत्र वर्तमानकाल आधेयत्वेनान्वेतु अपचदित्यत्र विद्यमाननाशप्रतियोगित्वमतीतत्वमन्वेति न त्वतीतकालवृत्तित्वं पक्ष्यतीत्यत्र विद्यमानप्रागभावप्रतियोगित्वादिरूपमनागतत्वमन्वेति न त्वनागतकालवृत्तित्वमिति वाच्यम् । "सदेव सोम्येदमग्र आसीत्" "एकमेवाद्वितीयं ब्रह्म" "तदैक्षत एकोऽहं बहु स्यामि" त्यादिश्रुतिवाक्ये भगवत्सत्तायां भगवदिच्छायां अतीतत्वस्य बाधेनानन्वयप्रसङ्गात् । एवं भगवान् प्रलयं करिष्यतीत्यादौ भगवत्कृतेर्भावित्वस्य बाधेनानन्वयप्रसङ्गात् । अतीतकालवृत्तित्वस्य भगवदिच्छायां भाविकालवृत्तित्वस्य भगवत्कृतौ निष्प्रत्यूहतयाऽन्वयसम्भवात् । एवं वर्तमानकालोऽनागतकालश्च क्वचित्स्ववृत्तिध्वंसप्रतियोग्यवृत्तित्वेन स्वाधेयत्वेन चोभाभ्यां संबन्धाभ्यामन्वेति यथा वियुज्यते वियोक्ष्यते संयुज्यते संयोक्ष्यते इत्यादौ तेन क्षणेन वियुज्यते वियोक्ष्यते व्रजमण्डलः गोवर्धनेन संयुज्यते संयोक्ष्यते वा इति नाधुनिकप्रयोगः । अन्यथा कृष्णवियोगगोवर्धनसंयोगयोर्वर्तमानानागतकालवृत्तित्वेन तथाप्रयोगो दुर्वारः स्यात् । एवं नष्ट अनश्यद्वा इत्यादावतीतकालवृत्तित्वं नाशेऽन्वेति नश्यति नङ्क्ष्यतीत्यादौ वर्तमानानागतकालयोर्दर्शिताभ्यां संबन्धाभ्यां नाशेऽन्वयः इत्यमेवप्रयोगातिप्रसङ्गे वारिते नङ्क्ष्यतिनश्यतिनष्टइत्यादौप्रत्ययस्यानागतव-

तमानातीतानामुत्पत्तीनां क्रमेण प्रत्यायकत्त्वकल्पनमफलमेवेति मन्तव्यम्। फले तु आस्ते इत्यादौ स्फिग्भूसंयोगानुकूलव्यापार आख्यर्थः। तत्र व्यापारस्याविद्यमानत्वेऽपि स्फिग्भूसंयोगफलस्य विद्यमानतायामास्त इति प्रयोगाद्वर्तमानकाल आधेयत्वेन स्फिग्भूतसंयोगे फलेऽन्वेति। एवं जागर्तीत्यादौ मिद्रामनोविभागानुकूलो व्यापारो धात्वर्थस्तत्रापि मिद्रामनोविभागरूपफले वर्तमानकालस्यान्वयः। एवं दण्डं दधातीत्यादौ धारणाख्यसंयोगानुकूलव्यापारो धात्वर्थः तत्रापि वर्तमानकालस्य धारणाख्यसंयोगरूपफलेऽन्वयः। अत्रासिष्यते जागरिष्यति दण्डं धास्यतीत्यादावनागतकालः स्वदृत्तिध्वंसप्रतियोग्यदृत्तित्वेन स्वाधेयत्वेन चोभाभ्यां संबन्धाभ्यां फलेऽन्वेतीति फलस्य विद्यमानतायां न तथाप्रयोगः। एवमास्त अजागरत् दण्डमधादित्यादावतीतकालः स्वध्वंसाधिकरणावृत्तित्वेन स्वाधेयत्वेन चोभाभ्यां संबन्धाभ्यां फलेऽन्वेतीति फलस्य विद्यमानतायां न तथाप्रयोगः। यदि चासेः स्फिग्भूसंयोग एवार्थ उपविशेः स तदनुकूलव्यापारश्चार्थ उपविशतीत्यत्र वर्तमानकालस्य व्यापार एवान्वयः। आस्ते इत्यत्र स्फिग्भूसंयोगस्वरूपव्यापार एव वर्तमानकालस्यान्वयः। एवं जागर्तेरपि मिद्रामनोविभागस्वरूपव्यापार एवार्थः तत्रैव कालस्यान्वय इति विभाव्यते तदापि दण्डं दधातीत्यादौ फले कालस्यान्वयोनिष्प्रत्यूह एवेति दिक्॥

कर्तृत्वादयस्तिङर्थाः सुबर्था अपीति न पृथक् तन्यन्ते। सुबर्थास्तु सुपां क्रमेणैव निरूपणीया इति क्रमेण सुपस्तदर्थाश्च निरूप्यन्ते।

तत्र सुऔजसिति त्रयः प्रत्यया: प्रथमा । तदर्था अनुशासनसिद्धा अनुशासनं तु "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमे"ति प्रातिपदिकार्थः सत्ता व्यक्तिरिति यावत् लिङ्गं पुमान् स्त्री क्लीवं च परिमाणं गुरुत्वं परिमितिश्च वचनमेकत्वं द्वित्वं बहुत्वं चेति । मात्रग्रहणं द्वितीयाद्यर्थकर्मत्वादिव्यवच्छेदार्थमिति । ननु रामो राजेत्यादौ व्यक्तेः प्रातिपदिकात्प्रतीत एव लाभात् कथं प्रथमार्थत्वम् । न चैकदानेकवृत्तिरामत्वादिजातिवाचिनो रामादिशब्दान्न व्यक्तिलाभ इति व्यक्तिभानार्थं प्रथमायास्तदर्थकत्वमिति वाच्यम् । जातिशक्तिवादिनामपि मते जात्या व्यक्त्याक्षेपसम्भवेन व्यक्तेरन्यलभ्यतया प्रत्ययार्थत्वाप्रसक्तेः । अत एव तेषां तिङो भावनावाचित्वे भावनयाऽऽक्षेपेण कर्तुर्बोधने पचतीत्यादावनभिहिताधिकारीयत्ततीयाया न प्रसक्तिरिति । यत्तु घटाद्यर्थेषु सुपां शक्तिः घटादिपदानामनन्तानां शक्तत्वे शक्तावच्छेदकानन्त्यसम्भवेन सुपामेकविंशतिसंख्याकानां शक्तावच्छेदकलाघवसम्भवेन तथात्वौचित्यादिति । तदपि न सम्यक् । घटादिपदानां निरर्थकत्वे प्रातिपदिकसंज्ञाविरहे तदनन्तरं सुबुत्पत्तेरप्रसक्तेः दधि भवतीत्यादौ सुपो लोपात्तत्र दध्यादिपदार्थानवगमप्रसङ्गात् । न च तत्रानुसन्धीयते विभक्तिरिति सांप्रतम् । तथापि राजपुरुष इत्यादिसमासे राजपदार्थावगमस्याशक्यत्वात् । न चात्राप्यनुसन्धीयते षष्ठीति वाच्यम् । तथा सति वृद्धस्य राज्ञ इत्यादाविव वृद्धस्य राजपुरुष इत्यत्रापि वृद्धादेः राजान्वयप्रसङ्गात् । दर्शितसमासे नैयायिकानां

राजपदलक्षणायाः शाब्दिकानां वृत्तेश्च वैयर्थ्येनाकल्पनापत्तेश्च। किं च चैत्र इत्यादौ सुवर्थचैत्रव्यक्तौ सुवर्थयोर्लिङ्गसंख्ययो र्भेदान्वयोऽवश्यमभ्युपेयस्तथासति रूपं घट इत्यादौ तन्तुपटाविति त्यादौ रूपघटयोस्तन्तुपटयो र्भेदान्वयबोधः स्यात्। अथ प्रातिपदिकानां घटादिपदानां घटत्वेन सकलघटवाचकत्वेऽपि घटोऽस्तीत्यादावस्तित्वान्वितत्तद्घटव्यक्तिबोधः प्रथमयेति चेत् न। घटपदेन घटोपस्थितावस्तिपदेनास्तित्वोपस्थितावबाधितत्वात्तद्घटव्यक्तेर्घटत्वेन शाब्दभानसम्भवात् तद्व्यक्तित्वेन भानस्याप्रामाणिकत्वादिति प्रातिपदिकार्थस्य न कथमपि प्रथमार्थत्वं सम्भवतीति चेत्। अत्राहुः। घटो नील इत्यादौ विशेषणविभक्तेर्नीलपदोत्तरप्रथमाया अभेदोऽर्थः स घटादौ विशेषणीभूयान्वेतीति। तत्राभेदो यदि भेदत्वावच्छिन्नप्रतियोगिताकाभावत्वेनरूपेणार्थस्तदाऽप्रसिद्धिः। भेदत्वावच्छिन्नप्रतियोगिताकाभावाऽप्रसिद्धेः। यदि च भेदप्रतियोगिकाभावत्वेन तदा नीलभेदगगनोभयत्वावच्छिन्नाभाववति पीते नीलाभेदावगमप्रसङ्गः। यदि च नीलप्रतियोगिकभेदत्वावच्छिन्नाभावत्वेन तदा यत्किंचिन्नीलभेदवति नीले नीलाभेदानवगमप्रसङ्गः। यदि च नीलत्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नाभावत्वेन तदा शक्त्यानन्त्यम्। नीलादेः पदार्थैकदेशे नीलत्वावच्छिन्नप्रतियोगिताकभेदे ऽनन्वयप्रसङ्गः नीलपटतात्पर्येण प्रयुक्तस्य घटो नील इति वाक्यस्य प्रामाण्यप्रसंगश्च। तस्माद्भेदो ऽत्यन्ताभावश्च द्वयमर्थस्तत्र भेदे नीलव्यक्तिः स्वरूपात्मिकया प्रतियोगितया भेदस्तु तद्भेदव्यक्ति-

स्वरूपावच्छिन्नया प्रतियोगितया अत्यन्ताभावेऽन्वेति । यदि निरवच्छिन्नप्रतियोगितया नीलादेः प्रतियोगिनो भेदादौ भानं भेदविशेषणतया भासमानस्य नीलादेर्भेद-व्यक्तिस्वरूपनिष्ठप्रतियोगितावच्छेदकतायाः अनवच्छेद-कत्वं च न सांप्रदायिकमित्युच्यते तदा तूभयावृत्तित्वो-पलक्षितधर्मावच्छिन्नप्रतियोगिताकान्योन्याभावेऽत्यन्ता-भावे च खण्डशक्तिस्तदादिपदवत् स्मरणं तूपलक्षणो-भयावृत्तित्वांशपरीहारेण प्रातिपदिकोपस्थापिततत्तद्व्य-क्तित्वावच्छिन्नप्रतियोगिताकभेदत्वेन भेदविषयकमत्य-न्ताभावत्वेनात्यन्ताभावविषयकं च भवति तत्र नी-लादिपदार्थस्य तत्तद्व्यक्तित्वेऽन्वयः नीलान्वितताद्दश-भेदत्वावच्छिन्नप्रतियोगितया भेदोऽत्यन्ताभावे ऽन्वेति ताद्दशात्यन्ताभावः समानविभक्तिकघटादिपदार्थेऽन्वे-ति । यदि नीलादेस्तद्व्यक्तित्वे पदार्थैकदेशेऽन्वयो न व्युत्पत्तिसिद्ध इत्युच्यते । तदा उभयावृत्तित्वोपल-क्षितधर्मावच्छिन्नप्रतियोगितायां भेदेऽत्यन्ताभावे च त्रिषु सुब्विभक्तेः शक्तिस्तत्रोभयावृत्तित्वांशमपहाय-प्रातिपदिकोपस्थापितव्यक्तीयतद्व्यक्तित्वावच्छिन्नप्रतियो-गितायाः स्मरणम् । ताद्दशप्रतियोगितायां नीलादेः प्रकृत्यर्थस्यान्वयः नीलाद्यन्विततादृशप्रतियोगितायां भेदे-ऽन्वयः तथाविधान्वितभेदत्वावच्छिन्नप्रतियोगितासंस-र्गेण भेदस्यात्यन्ताभावेऽन्वयस्तथाविधान्वितात्यन्ताभा-वस्य समानविभक्तिकघटादिपदार्थेऽन्वयः । एवमीदृश-भेदात्यन्ताभावः प्रतियोगिस्वरूप एव यत्र प्रतियोग्य-ननुगतस्तत्रैव सामान्यधर्मावच्छिन्नभेदस्यात्यन्ताभावः

प्रतियोगितावच्छेदकस्वरूप इति स्वरूपभेदाभावस्तन्नील-
लादिव्यक्तिस्वरूपो नीलपदादिप्रातिपदिकार्थो दर्शित-
रीत्या भवति प्रथमार्थ इति । न च भेदस्याभावः प्रति-
योगी न सम्भवति तेन सममविरोधात् । किं तु प्रति-
योगितावच्छेदकमिति वाच्यम् । प्रतियोगितावच्छेदक-
संबन्धेनैव प्रतियोगिनोऽभावविरोधित्वात् । तस्यावा-
प्यविकलत्वात्तद्व्यक्तित्वस्वरूपतादात्म्येन संबन्धेन तद्व्यक्तेः
प्रतियोगिन्या विरोधित्वात् । न च तद्व्यक्तित्वस्य धर्मवि-
धया प्रतियोगिताया अवच्छेदकत्वं संसर्गविधयेति कथं
तेन संबन्धेन विरोधित्वमिति वाच्यम् । भेदे संसर्गविधया
प्रतियोगिताया अवच्छेदकस्यैव धर्मविधया अवच्छेद-
कत्वात् । तादृशस्यैवावच्छेदकस्याभेदाभावत्वोपगमात् ।
तदभिसन्धानेन योग्यानुपलब्धिहेतुतावादे प्रत्यक्षालोके
मिश्रैर्नं हि यथा तादात्म्यमन्योन्याभावस्याभावस्तथा-
न्योन्याभावोऽपि तदभावरूपः घटाप्रतियोगित्वादित्युक्तं-
भेदप्रतियोगितायाः संसर्गविधयावच्छेदकस्य तादात्म्यस्य
धर्मविधयावच्छेदकात्मकान्योन्याभावविरहस्वरूपप्रद-
र्शनं संसर्गीभूतावच्छेदकधर्मीभूतावच्छेदकयोरैक्यं विना
नोपपद्यत इति । गुरुचरणास्तु भवतु स्वरूपभेदाभाव-
स्तद्व्यक्तिस्वरूपस्यापि स न प्रथमार्थो मानाभावात् ।
घटो नील इत्यादौ स्वरूपभेदाभावात्मकतादात्म्यसंसर्गे-
णैव शाब्दबोधोपपत्तेः । न चाभेदस्य संसर्गत्वोपगमे स्व-
न्तनीलपदेन स्वन्तघटपदस्य पौर्वापर्यरूपाया स्तद्व्याया
आकाङ्क्षायाः शाब्दप्रयोजकत्वे गौरवमधिकवर्णघटित-
त्वात् । अभेदस्य पदार्थत्वे नीलविशेषणकाभेदविशेष्य-

कबुद्धौ नीलपदस्य सुना सहाकाङ्क्षाया अभेदप्रकारक-घटविशेष्यकबुद्धौ तेनैव सुना सह स्वन्तघटपदस्याकाङ्क्षा-याः स्वप्रयोजकत्वस्वीकारे लाघवं नीलघटपदयोरेकवा-काङ्क्षायामप्रवेशेन तयोर्विशेष्यविशेषणभावव्यत्यासप्रयु-क्तस्याकाङ्क्षाधीहेतुताभेदस्य गुरुतरस्याप्रसक्तेरिति वा-च्यम्। नीलाभेदविधेयकघटोद्देश्यकबुद्धौ नीलघटपदयोः पौर्वापर्यस्वरूपाकाङ्क्षायाः प्रयोजकत्वस्य तवाप्यावश्यक-त्वात्। अन्यथा नीलो घट इत्यादितो नीलाभेदविधेयक-बोधापत्तेः। न च नीलो घटो जलपूर्ण इत्यादौ जलपू-र्णत्वविधेयत्वबोधस्थलेऽभेदस्य प्रथमार्थत्वपक्षे घटे नीला-भेदविशेषणकान्वयबोधो दर्शितरीत्याऽकाङ्क्षाद्वयस्य प्र-योजकत्वेनैवोपपद्यते। भेदस्य संसर्गतापक्षे स्वन्तनील-घटपदयोरेकवाकाङ्क्षाप्रवेशे विशेष्यविशेषणभावव्यत्या-सप्रयुक्तं गौरवं दुष्परिहरमिति वाच्यम्। यतोऽभेदस्य सुबर्थत्वपक्षेऽपि स्वन्तघटपदस्य पदोत्तरत्वाद्विशेषितेन सुना सहाकाङ्क्षा न तथाविधान्वयोपयोगिनी तथासति नीलः पटः घटो दण्ड इत्यादौ स्वन्तघटपदस्य दण्डो-त्तरसुना सहाकाङ्क्षाग्रहे घटे नीलाभेदान्वयबोधः स्या-दित्यवश्यं नीलपदोत्तरसुना सहाकाङ्क्षा वक्तव्या। त-थाचैकस्यामाकाङ्क्षायां नीलघटपदयोः प्रवेशे विशेष्यवि-शेषणभावव्यत्यासप्रयुक्तं गौरवं तवापि दुष्परिहरमिति। न च प्रथमान्तनीलपदप्रथमान्तघटपदयोराकाङ्क्षाज्ञा-नस्य नीलविशेषणकतादृशतादात्म्यसंसर्गकघटविशेष्य-कशाब्दं प्रति हेतुत्वे नीलघट इत्यादिकर्मधारयस्थले व्यभिचारस्तव स्वन्तनीलपदघटिताकाङ्क्षाज्ञानविरहा-

दिति वाच्यम्। कलशः कृष्ण इत्यादौ व्यभिचारवारणायेमव्यवहितोत्तरोत्पत्तिकत्वं जन्यतावच्छेदकेऽवश्यं प्रवेशनीयमत एव कर्मधारयस्थले व्यभिचाराप्रसक्तेः। न च शिखी विनष्टः क्षुदुपहन्तुं शक्या सुरभिचन्दनमाघ्रातमित्यादौ विनष्टशक्याघ्रातानां तादात्म्यसंसर्गेण शिखिनि क्षुधि सुरभिचन्दने चान्वयो बाधित इति सामानाधिकरण्यानुपपत्तिरभेदस्य सुबर्थत्वपक्षे तस्य स्वाश्रयशिखावत्त्वेन स्वाश्रयोपहननवत्त्वेन स्वाश्रयसौरभवत्त्वेन संसर्गेणान्वयसम्भवाद्भवति सामानाधिकरण्यमिति वाच्यम्। ततः परम्परासंसर्गावच्छिन्नशक्तिकर्मतावतोऽभिधानात्। क्षुधो न द्वितीया तादृशस्य कर्मणस्तादात्म्यसंसर्गेणान्वयः क्षुधि निष्प्रत्यूह एव। शिखाविशिष्टे विनष्टस्य सौरभविशिष्टेचन्दने आघ्रातस्य च तादात्म्यसंसर्गेणान्वयः। शिखासौरभं विशेषणमादाय पर्यवस्यति। अत्रैवार्थे "सविशेषणे हि विधिनिषेधौ सति विशेष्यबाधे विशेषणमुपसंक्रामत" इति प्रमाणयन्ति तान्त्रिकाः। एवं युक्त्याऽभेदस्य विभक्त्यर्थे प्रतिहते अनुशासनमपि विभक्तीनां साधुत्वमात्रं ज्ञापयति। तथा हि। "लुपि युक्तवद्व्यक्तिवचने" इत्येकं सूत्रं लुप्ते प्रत्यये प्रकृतिलिङ्गवचने प्रयोक्तव्ये न तु लवणा यवागूरित्यादौ लवणादिपदवद्विशेष्यनिघ्नतया लिङ्गवचनान्तरप्रयोगः। यथा पञ्चाला नाम क्षत्रियाः नियतबहुवचनान्तपुल्लिङ्गपञ्चालशब्दविषयास्तेषां निवासे जनपदे प्रवृत्तस्य तद्धिताणो लुपि सति पञ्चाला जनपद इति तथा विदेहाः कुरवो मगधा मत्स्या अङ्गा

बङ्गाः कलिङ्गाः सुह्माः पुण्ड्रा इत्यादौत्यर्थकं "विशेषणानां चाजातेरि" त्यपरं सूत्रं तद्विशेषणवाचिनां पदानां तद्बल्लिङ्गवचने स्यातां जातिवाचिपदं वर्जयित्वा तथा पञ्चाला रमणीयाः जातौ तु पञ्चाला जनपद एवं गोदयोर्निवासग्रामे गोदौ बहुक्षीरघृतौ जातौ तु गोदौ ग्राम इत्यर्थकं तदेतत्सूत्रद्वयं पूर्वाचार्याणामनूद्य "तदशिष्यं संज्ञाप्रमाणत्वादि" ति पाणिनिमुनिरसूत्रयत् । तत्प्रकृतिनियतलिङ्गवचनत्वं लुप्ततद्धितकानां पञ्चालादिशब्दानां तद्विशेषणपदानां च विशेष्यतुल्ययोगक्षेमं नियतलिङ्गवचनत्वं न शिष्यं न वक्तव्यम् । संज्ञा नियतव्यवहारस्तत्प्रमाणकत्वादिति सूत्रार्थस्तथा च यथा क्षत्रियविशेषे प्रवर्तमानानां पञ्चालादिशब्दानां नियतपुल्लिङ्गबहुवचनत्वं व्यवहारेणैव तथा लुप्ततद्धितेऽपि व्यवहारस्तु लिङ्गवचनादिनियतोऽपि न लिङ्गवचनार्थकः किं तु साधुत्वार्थः । अत एव नियतस्त्रीलिङ्गबहुवचनत्वेनाप्शब्दस्य तद्विशेषणपदस्य च नियतपुल्लिङ्गबहुवचनत्वेन दारशब्दस्य तद्विशेषणपदस्य व्यवहारो लिङ्गवचनस्वरूपमर्थं विशेष्ये विशेषणे वा न तु क्वापि बोधयति यथाऽप्रो रसमय्यः रामस्य दाराः पुण्यमया इति विशेषणविभक्तीनां साधुत्वार्थतयोपपत्तौ निरर्थकत्वे तदनुपपत्तिर्न भवतीति पदवाक्यरत्नाकरे प्राहुः । युज्यते चायमर्थः । स्वरूपभेदाभावस्य तद्व्यक्तिस्वरूपस्य प्रथमार्थत्वे नीलेऽपि यत्किञ्चिन्नीलव्यक्तिभेदसत्वान्नीलो न नील इति प्रयोगः स्यात् । न च तवापि तादृशाभेदसंसर्गावच्छिन्नप्रतियोगिताकभेदस्य नीले सत्वात्कथं न तथाप्र-

योग इति वाच्यम् । नञ्स्थलेऽन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्यैव भेदे भानोपगमात् । नीलत्वावच्छिन्नप्रतियोगिताकभेदस्य नीलेऽसत्वात् भवतु स्वरूपभेदाभावत्वस्य पदार्थतावच्छेदकतया तदवच्छिन्नप्रतियोगिताकभेदस्य नीले सत्वात्तथा प्रयोगो दुर्वार एवेति । यत्तु तिङ्निपाताभिहितकारकः प्रथमार्थश्चैत्रः पचति तण्डुलः पच्यते क्षेत्तुं सांप्रतं हन्त इत्यादौ कर्तृत्वं कर्मत्वं प्रथमयाऽप्यभिधीयते । अत एव प्रातिपदिकार्थविशेष्यकतिङर्थान्वयबोधे प्रातिपदिकस्य प्रथमान्ततानियमः । तेन ब्राह्मणस्य पक्तृत्वसंप्रदानत्वोभयविवक्षायां पचति ब्राह्मणाय देहीति न प्रयोगः तिङा प्रथमया च कर्तृतात्वेनैकाकर्तृता प्रतिपाद्यते । एकत्वेनैकत्वसंख्यैव । एवं प्रातिपदिकार्थविशेष्यकतिङर्थप्रकारकान्वयबोधे तिङ्जन्याया इव सुब्जन्याया अपि उपस्थितेः सहकारित्वमत एव चैत्रः पचत इति न प्रयोगः न वा पचति ब्राह्मणाय देहीत्यस्य शतृशानजाप्रत्या वारणेऽपि पच्यति देवदत्ताय देहीत्यादि प्रयोगो दुर्वारः । चतुर्थ्यास्तिङर्थकारकानभिधायित्वात् । न च चैत्रः सुन्दर इत्यादौ न कारकार्थोपपत्तिरिति वाच्यम् । तत्राप्यध्याहृतास्तिक्रियाकर्तृत्वस्य प्रथमयाऽभिधानात् । "अस्तिभवतिपरः प्रथमपुरुषोऽप्रयुज्यमानोऽस्ती"ति कात्यायनस्मरणात् । न च रामो रावणस्य कल्की म्लेच्छस्य हन्तेत्यादौ कथं क्रियापदाध्याहारः अस्तीत्यर्थस्यान्वेतुमयोग्यत्वादिति वाच्यम् । अत्र वाक्यभेदस्यावश्यकत्वे आसीदिति रामोभविष्यतीति कल्किन्यध्याहारसम्भवात् भवतिपर इत्य-

स्योपलक्षणत्वात् । न च भगवतो दशावताराः । मत्स्यः कूर्मो वाराहो नरसिंहो वामनो रामो बलभद्रो बुद्धः कल्की चेत्यादिविभागवाक्ये आसीदस्ति भविष्यतीत्येकतमस्याध्याहारासम्भवात् केषां चिदवताराणामतीतत्वात् कस्य चिद्विद्यमानत्वात् कस्य चिन्नित्यत्वादिति वाच्यम् । उद्देशवाक्यार्थे विभागवाक्यार्थस्यान्वयविवक्षणे सन्तीध्याहारसम्भवात् । विभागवाक्यार्थे उद्देशवाक्यार्थस्यान्वयविवक्षणे तु अस्तिसन्तीत्येवाध्याहारसम्भवात् तत्रैकवचनान्तबहुवचन्तयोस्तिङन्तयोरुभयोरपि साधुत्वात् । न चातीतानागतयोः कथं वर्त्तमानसत्ताया अध्याहृततिङन्तार्थस्यान्वय इति वाच्यम् । वर्तमानत्वाविवक्षणेऽपि धात्वर्थेऽस्य सम्बन्धे विवक्षिते लट्प्रयोगस्य साधुत्वात् । "वारिदः सुखमाप्नोति सुखमत्रव्यमन्नद" इत्यादिदर्शनात् । न च "हंसीव धवला कीर्ति" रित्यादौ धवलपदात्कीर्त्तिपदादध्याहृतास्तिपदार्थस्वरूपभवनकर्तृत्वार्थिका प्रथमोत्पद्यतां हंसीपदात्कथं सेति वाच्यम् । तत्राप्योवनिपातार्थभवनकर्तृत्वार्थकतया प्रथमाया उपपत्तेः । न चैवनिपातस्य कर्तृत्वार्थकत्वोपगमे करणकर्मत्वार्थकत्वोपगमः स्यात् । तथा च "शरैरुक्षैरिवोदीच्यानुदरिष्यन्नसानिवे" त्यादाविवनिपातेन करणकर्मत्वाभिधानात् तृतीयाद्वितीयानुपपत्तिरिति वाच्यम् । दर्शितस्थले इव निपातस्य सादृश्यमात्रार्थकत्वात् करणकर्मत्वाद्यर्थकत्वे मानाभावात् । उक्षे रसानित्यादौ समानलिङ्गवचनत्वेन साधुत्वार्थिका तृतीया द्वितीया । तेन उक्षसदृशैश्शरै रससदृशानुदीच्यानिति प्राथमिको बोधः ।

अत एवेवपदद्वयं सङ्गच्छते। ततो रविकर्तृकोस्रकर-णकरसकर्मकोद्धरणसदृशशरकरणकोदीच्यकर्मकोद्धर-णकर्ता रघुरिति विशिष्टवाक्यार्थबोधस्तत्र तृतीयाद्वि-तीयार्थयोः करणत्वकर्मत्वयोर्धात्वर्थेनान्वयात्। तृतीया-द्वितीययोर्नानुपपत्तिरिति कालापैरुक्तम्। तदसत्। घटो नास्तीत्यादौ घटात्यन्ताभावशाब्दे प्रथमया कर्तृत्वाभि-धानासम्भवात्। यदि च तत्रास्तिधात्वर्थान्विततिङ-र्थात्यन्ताभावविशेष्यतया घटः प्रतीयते तदाऽपि प्रथम-या कर्तृत्वाभिधानमसम्भवि प्रथमोक्तकर्तृत्वस्य नञ-र्थान्वयासम्भवात्। न च तिङ्प्रथमाभ्यामेकमेवकर्तृ-त्वमुपस्थाप्यते। तत् नञर्थे सघटे विशेषणतयाऽन्वेती-ति प्रथमया कर्तृत्वाभिधानं निराबाधमिति वाच्य-म्। प्रथमार्थाभावस्य प्रातिपदिकार्थेऽन्वयासम्भवा-त्। प्रकृत्यर्थे प्रत्ययार्थाभावान्वयस्याव्युत्पन्नत्वात्। न च तत्राश्रयत्वस्वरूपकर्तृत्वाभाव एव तिङ्प्रथमयोर-र्थस्तस्य घटेऽन्वयः नञ्पदं तात्पर्यग्राहकमत एव तिङ-र्थान्वयिनि प्रथमान्तार्थे तिङर्थसंख्यान्वयस्य व्युत्पन्नत्वाद् घटौ घटा वा नास्तीति न प्रयोग इति वाच्यम्। तथा-सति कर्तृत्वस्यैकदेशतया तत्र धात्वर्थानन्वयप्रसङ्गात्। धात्वर्थान्वितकर्तृत्वाभावस्य तिङर्थत्वाभ्युपगमे तण्डुलं पचति नेत्यादौ धात्वर्थस्यैकदेशतया तत्र तण्डुलकर्म-त्वानन्वयप्रसङ्गात्। धात्वर्थान्विततिङर्थान्वयिनि ता-दृशतिङर्थान्वितनञर्थान्वयिनि च प्रथमान्तार्थे तिङर्थ-संख्यान्वयस्य व्युत्पन्नत्वान्न घटौ घटा वा नास्तीति प्र-योग इति। वस्तुतस्तु कर्तृत्वस्य तिङर्थत्वमावश्यक-

मेव पचतीत्यादौ प्रथमां विना तिङा प्रतीयमानत्वात् । प्रथमार्थत्वं तु न युज्यते तिङं विना प्रथमया कुत्राप्यप्रतीयमानत्वादन्यलभ्यत्वाच्च । घटो न घट इत्यादौ घटघटभेदान्वयबुद्धौ जायमानायां घटपदोत्तरप्रथमायाः कथमपि कर्तृत्वप्रत्यायकत्वं न सम्भवतीति न कर्तृत्वं प्रथमार्थ इति पचतीत्यादौ तृतीयाया असाधुत्वात् षष्ठ्या असाधुत्वात्षष्ठ्यर्थस्याविवक्षणाद्वा द्वितीयादेरर्थस्यायोग्यत्वात् प्रयोगबाधे "न केवला प्रकृतिः प्रयोक्तव्ये"ति साधुत्वार्थं प्रथमोपात्ता प्रथमा चैत्रादिपदानन्तरं प्रयुज्यत इति । लिङ्गं पुंस्त्वं स्त्रीत्वं क्लीबत्वं च तत्र शोणिताधिकशुक्रसमवेतप्राणित्वं पुंस्त्वम् । शुक्राधिकशोणितसमवेतप्राणित्वं स्त्रीत्वम् । समशुक्रशोणितोभयसमवेतप्राणित्वं क्लीबत्वम् । तथा च निरुक्तम् । शुक्रातिरेके पुमान् भवति शोणितातिरेके स्त्री भवति द्वाभ्यां समेन षराढो भवतीति । चतुर्भुजो हलायुधो मकरध्वज इत्यादौ पुंस्त्वम् अदितिः द्यौर्धेनुरित्यादौ स्त्रीत्वम् मार्दङ्गिकं कुण्डलि गायनं बृहन्नलमित्यादौ क्लीबत्वं प्रथमाऽभिधत्त इति लिङ्गं प्रथमार्थोऽनन्यलभ्यत्वात् । घटादिशब्दे तु पुंस्त्ववाचकसुप्प्रकृतित्वं पुंस्त्वमौपचारिकमिति । एवं तटीत्यादौ तटशब्दे ङीत्वेन स्त्रीत्ववाचकस्य ङीप्रत्ययस्य प्रकृतित्वं स्त्रीत्वम् । भुजेत्यादौ भुजशब्दे आत्वेन स्त्रीत्ववाचकस्य टाप्रत्ययस्य प्रकृतित्वं स्त्रीत्वं दधीत्यादौ दधिशब्दे नपुंसकत्ववाचकस्य लोपस्मारितसुपः प्रकृतित्वं नपुंसकत्वं कुण्डमित्यादौ कुण्डशब्दे नपुंसकत्ववाचकस्यामस्मारितसुपः प्रकृतित्वं नपुंसकत्वं सर्वत्र शब्दे-

ष्यौपचारिकमिति । परिमाणं गुरुत्वं परिमितिश्च द्रोणो व्रीहिरित्यादौ गुरुत्वविशेषवाचिनो द्रोणशब्दात्प्रथमा गुरुत्वमभिधत्ते । प्रथमार्थगुरुत्वे द्रोणपदार्थस्याभेदेनान्वयस्तादृशगुरुत्वं व्रीहावन्वेति । एवं द्रोणाभिन्नगुरुत्ववान् व्रीहिरिति वाक्यार्थबोधः । वितस्तिः शङ्क इत्यादौ तादृशाङ्गुलपरिमाणवाचिनो वितस्तिशब्दात् प्रथमा परिमाणमभिधत्ते । प्रथमार्थपरिमाणे वितस्तिशब्दार्थस्याभेदेनान्वयस्तादृशपरिमाणस्य शङ्कौऽन्वयः एवं वितस्त्यभिन्नपरिमाणवान् शङ्कुः इति वाक्यार्थबोध इत्यनन्यलभ्यत्वाद् गुरुत्वत्वेन गुरुत्वं परिमाणत्वेन परिमाणं च प्रथमार्थ इति अत्र गुरुत्वविशेषविशिष्टवाचिनो द्रोणशब्दस्यार्थः व्रीहौ परिमाणविशेषविशिष्टवाचिनो वितस्तिशब्दस्यार्थः शङ्के तादात्म्येनान्वेति । तावतैव व्रीहौ गुरुत्वविशेषवैशिष्ट्यस्य शङ्के परिमाणविशेषवैशिष्ट्यस्यावगमसम्भवात् । गुरुत्वत्वेन गुरुत्वस्य परिमाणत्वेन परिमाणस्य भानमप्रामाणिकमेवेति गुरुत्वं परिमाणं च न प्रथमार्थ इति पदवाक्यरत्नाकरे गुरुचरणाः । युज्यते चायमर्थः । तथा हि । यदि परिमाणं प्रथमार्थस्तस्य प्रकृत्यर्थविशेषितस्य प्रातिपदिकान्तरार्थेऽन्वयस्तदा राज्ञः पुरुष इत्यादाविव द्रोणो व्रीहिरित्यादौ समानविभक्तिकतानियमो न स्यात् । तथा च द्रोणो व्रीहिं व्रीहिणा व्रीहे व्रीहौ वेत्यादिप्रयोगः स्यादिति । यदि च द्रोणो व्रीहिः वितस्तिः शङ्क इत्यादौ गुरुत्वत्वेन गुरुत्वं परिमाणत्वेन परिमाणं प्रतीयत एव तदा गुरुत्वं परिमाणं च प्रथमार्थ एवानन्यलभ्यत्वात् । यदि च प्रकृत्यर्थविशे-

षितयोस्तयोः प्रथमार्थयोः समानविभक्तिकपदान्तरार्थ-
एवान्वयस्तदा तादात्म्यान्वय इव गुरुत्वपरिमाणान्व
येऽपि समानविभक्तित्वं तन्त्रमभ्युपेयमिति । । वचनमे-
कत्वं द्वित्वं बहुत्वं च तत्रैकत्वं क्वचित्प्रकृत्यर्थतावच्छे-
दकव्यापकसंसर्गेण प्रकृत्यर्थेऽन्वेति यथा परमेश्वर इ-
त्यादौ समग्रैश्वर्यप्रकृत्यर्थतावच्छेदकव्यापकसमवायेनैक-
त्वं परमेश्वरेऽन्वेति । क्वचित्पदान्तरार्थव्यक्तिविशेषघटि-
तेन प्रकृत्यर्थतावच्छेदकव्यापकेन संसर्गेण प्रकृत्यर्थेऽन्वे-
ति यथा पशुना रुद्रं यजत इत्यादौ तद्यागव्यक्तिकर्म-
पशुत्वव्यापकसमवायेनैकत्वं पशावन्वेति । ईदृशसंसर्गे-
णैकत्ववैशिष्ट्यमेव सजातीयद्वितीयराहित्यं ज्ञापयति ।
एवं द्वित्वमपि आश्विनेयाविति यादावश्विनौपुत्रत्वप्रकृ-
त्यर्थतावच्छेदकव्यापकसंसर्गेण द्वित्वमाश्विनेययोरन्वेति ।
सारस्वतौ मेषौ भवत इत्यादौ मेषकर्तृकभावनाविशिष्टायां
यागभावनायां यस्यां सरस्वत्देवतयोर्मेषयोः कर्मतया-
न्वयस्तद्भावनाकर्ममेषनिष्ठान्योन्याभावप्रतियोगितानव-
च्छेदकपर्याप्तिसंसर्गेण द्वित्वं मेषयोरन्वेति । ईदृशसंसर्गेण
द्वित्ववैशिष्ट्यमेव सजातीयतृतीयराहित्यं ज्ञापयति । इत्थं
संसर्गवैचित्र्ये सैकत्वद्वित्वयोरन्वयसम्भवेन नाव्यावर्तक-
त्वं न वा द्विपशुको रुद्रयागः न च त्रिमेषकः सरस्वती-
यागः यागस्वर्गयोर्हेतुहेतुमद्भावे एकत्वद्वि वयोर्यागे कर्म-
तायां वा वैशिष्ट्यं प्रवेशनीयमित्यादिकं सुधीभिरूह्य-
मिति । बहुत्वं तु नेदृशसंसर्गेणान्वेति सजातीयराहित्य-
स्य ज्ञापयितुमशक्यत्वात् बहुत्वस्य सकलसंख्याव्यापक-
त्वात् । कपिञ्जलानालभेतेत्यादौ बहुत्वत्वेन द्वित्वस्य

बोधस्तात्पर्येणैव संसर्गवैचित्र्येण द्वित्वबोधनासम्भवात्। एवं यत्र प्रकृत्यर्थतावच्छेदकमेकं तत्र प्रकृत्यर्थतावच्छेदकव्याप्यसंसर्गेण द्वित्वबहुत्वयोरन्वयस्तेन घटाकाशयोर्द्वित्वस्य घटपटाकाशानां बहुत्वस्य च गगने सत्वादाकाशावाकाशा इति न प्रयोगः यत्र प्रकृत्यर्थतावच्छेदकं नाना धवखदिरादित्यादौ तत्र द्वन्द्वस्थले व्युत्पत्तिवैचित्र्येण धवत्वखदिरत्वनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकपर्याप्या द्वित्वं तयोः प्रकृत्यर्थतावच्छेदकयोरन्वेति तादृशपर्याप्या स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्वसम्बन्धेन प्रकृत्यर्थयोर्वाऽन्वेति। एवं बहुत्वमपि धवखदिरपलाशा इत्यादौ प्रकृत्यर्थतावच्छेदकेषु प्रकृत्यर्थेषु वा दर्शितरीत्याऽन्वेति। एवं वामे बहून् कुशान् कृत्वा दक्षिणे तु कुशत्रयमित्यादावपि तात्पर्यविशेषेण बहुशब्दार्थतावच्छेदके द्वित्वे तात्पर्यविशेषेण बहुवचनार्थद्वित्वस्यान्वयः किं वा वचनार्थबहुत्वात्मकद्वित्वविशिष्टेषु कुशेषु बहुशब्दार्थद्वित्वविशिष्टस्य तादात्म्येन निराकाङ्क्षत्वमिति बहुशब्दप्रयोगसार्थक्याय कुशविशेषणं द्वित्वे तथान्वयविशेष्ये योग्यताया इव निराकाङ्क्षतायाऽपि विशेषणान्वयप्रयोजकत्वात्। एवं वामे नव कुशधारणं सांप्रदायिकं युज्यते विशिष्टानामिति। एवं यदाऽऽदिशन्ति पूज्यपादा इत्यादौ पादविशेषणपूजायामनिर्धारितविशेषस्य बहुत्वस्य विवक्षितस्य बहुवचनार्थस्य सविशेषणे हीतिन्यायादन्वयः। एवं गोदौ ग्राम इत्यादौ द्वित्वस्य गोदयोर्निवासग्रामविशेषणीभूतयोरन्वयो निराबाध एव। गोदशब्दोऽपि नासत्यशब्द-

वन्नित्यद्विवचनान्तोऽपि न द्वित्वविशिष्टवाचकः येन निराकाङ्क्षतया नान्वयः प्रसज्येत । ननु गगनपदस्य शब्दविशिष्टवाचकतया गगनपदार्थैकदेशे शब्दे बहुत्वान्वयविवक्षायां गगनानीति प्रयोगः स्यात् । एकदेशेऽन्वयानभ्युपगमे पूज्यपादा इत्यत्रैकदेशे पूजायां बहुत्वान्वयो न स्यात् । एवं वेदाः प्रमाणमित्यत्र प्रमाणत्वेनैकत्वान्वयः स्यादिति चेत् । व्युत्पत्तिवैचित्र्येणान्वयोपगमेन समीहितसिद्धौ नैकदेशेऽन्वयोऽभ्युपेयते पूज्यपादा इत्यत्र पूजाविशिष्टपादे बहुत्वान्वयः पादे बाधात्पूजायां पर्यवस्यति शिखी विनष्ट इत्यादिवत् । एवं प्रमाणमित्यत्र प्रमाविशेषितल्युडर्थकरणे एकत्वान्वयः करणे बाधात्प्रमायां पर्यवस्यति । तत्रापि स्वाश्रयशाब्दत्ववत्त्वसम्बन्धेन प्रमायामन्वेति सविशेषणे हीतिन्यायात् तदेव विशेषणं यत्सामान्यधर्मवतः व्यावर्तयति यथा घटे नीलादिः नीलान्यघटात् स्वाश्रयघटं व्यावर्तयति । शब्दस्तु नेदृशं येन गगनानीति प्रयोगः स्यात् प्रज्ञा प्रमा चेदृशमेव विशेषणमिति सविशेषणे हीतिन्यायस्य विशेष्ये योग्यताया इव आकाङ्क्षाया अपि बाधः प्रापक एव सति विशेष्यबाधे इत्यस्य विशेष्यान्वयाभावे सतीत्यर्थः । एवं वामे बह्वनूकुशानित्यत्र बहुत्वविशिष्टकुशे बहुशब्दार्थस्य बहुत्वविशिष्टस्य तादात्म्येनान्वयो निराकाङ्क्ष इति कुशविशेषणबहुत्वेऽन्वयः पर्यवस्यति । बहुशब्दोत्तरबहुवचनं साधुत्वार्थमेव कुशशब्दोत्तरबहुवचनाबहुशब्दाच्च द्वित्वोपस्थितिस्तात्पर्यविशेषेणेति । क्वचिदेकत्वस्याप्येवं रीत्यान्वयः । यथा

वेदाः प्रमाणमित्यादौ प्रकृत्यर्थतावच्छेदकप्रमाणत्वे तद्द्वारा प्रमाणे वा एकत्वस्यान्वयः। यत्र तु "विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोरि"ति कोशेनानुशिष्टस्यैकवचनस्यार्थ एकत्वं विंशतित्वादिसंख्यायामन्वेति। यथा विंशति ब्राह्मणाः शतं धार्तराष्ट्राः सहस्रं भानोः करा इत्यादौ विंशतित्वादौ बहुत्वान्वयविवक्षणे तु बहुवचनमपि प्रमाणं यथा "यसंख्याताः सहस्राणि ये रुद्रा अधिभूम्यामि"ति श्रुतौ "तिस्रः कोट्यो ऽर्धकोटी च तीर्थानां वायुरब्रवीदि"ति पुराणे।

किमेकयैव विंशत्या बाहुभिस्त्वं विकत्थसे।
पश्य रावण नाराचैश्छिन्नस्ति कति विंशतीः॥

इत्यादौ लोके च तथा प्रयोगदर्शनात्। ते शतानि वयं पञ्चेत्यत्र बहुवचनान्तत्वच्छब्दविशेषणात्। संख्येयवाचिनः शतशब्दाद्बहुवचनं बहुवचनान्तात्त्वच्छब्दविशेषणात्यञ्शब्दाद्बहुवचनञ्च साधुत्वार्थमेव। एवं दशशतान्यस्मोजसंवर्तिका इत्यादौ संख्येयवाचिनो दशशब्दस्यार्थः संख्येयवाचिशतशब्दार्थे तादात्म्येनान्वेति। शिखी विनष्ट इत्यादाविव सविशेषणोहीति न्यायेन शतत्वसंख्यामादाय पर्यवसानं शतत्वे दशत्वविशिष्टतादात्म्यावगमे सहस्रत्वसंख्यालाभ इति। जातिगतैकत्वविवक्षायामेकवचनं बहुवचनं च प्रमाणम्। "जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यामि"त्यनुशासनात्। जातिरूपे एकस्मिन्नर्थे बहुवचनमेकवचनं च स्यादिति सूत्रार्थः। यथा सम्पन्नो व्रीहिः सम्पन्ना व्रीहय इत्यादौ व्रीहित्वजातावेकत्वमेकवचनबहुवचनाभ्यां प्र-

ख्याय्यते। तत्राप्येकजातिर्विवक्षिता तत्रैवायं वचनव्यवस्था एकजातिविवक्षणात् सम्पन्नौ व्रीहियवावित्यादौ नैकवचनबहुवचने। एको व्रीहिरित्यादौ न बहुवचनं "संख्यायोगे प्रतिषेधो वक्तव्य" इतिवार्तिकेन निषेधात्। एवं ब्राह्मणेन हतः पततीत्यादौ ब्राह्मणत्वजातावेकत्वमन्वेति ब्राह्मणत्वस्वरूपैकजातिमतः सामान्येन हननान्वयविवक्षणात् ब्राह्मणसामान्यकर्तृकस्यैव हननस्य पातित्यप्रयोजकत्वं न तु ब्राह्मणविशेषकर्तृकस्य। एवं गृहं संमार्ष्टीत्यादौ गृहत्व एवैकत्वमन्वेति गृहसामान्यकर्मत्वस्यैव संसर्गोऽन्वयान्न तु गृहविशेषकर्मत्वस्येति। "अस्मदो द्वयोश्च" त्यनुशासनेनाहं ब्रवीमि आवां ब्रूव इत्यर्थेऽन्यतरस्यां वयं ब्रूम इति बहुवचनमस्मदर्थान्वितमेकत्वं द्वित्वं चाभिधत्ते। "सविशेषणस्य प्रतिषेधो वक्तव्य"इति वार्तिकेन विशेषणयोगे बहुवचनस्य निषेधः यथा देवदत्तोऽहं ब्रवीमीत्यादौ। युष्मदि गुरावेकेषामित्यनुशासनेन त्वं गुरुरावां गुरू इत्यर्थेऽन्यतरस्यां बहुवचनं यूयं गुरव इत्यादौ युष्मदर्थान्वितमेकत्वं द्वित्वं चाभिधत्ते। "फल्गुनी प्रोष्ठपदानां च नक्षत्रे" इत्यनुशासनेन फल्गुनीप्रोष्ठपदाभ्यां शब्दाभ्यामुत्तरमन्यतरस्यां बहुवचनं फल्गुनीनक्षत्रगतं प्रोष्ठपदानक्षत्रगतं च द्वित्वमभिधत्ते। नक्षत्रग्रहणेन फल्गुन्यौ माणविके इत्यादौ न बहुवचनम्। "छन्दसि पुनर्वस्वोरेकवचनम्"इत्यनुशासनेन "विशाखयोश्च" इत्यनुशासनेन च पुनर्वसुशब्दाद्विशाखाशब्दाच्चोत्तरमन्यतरस्यामेकवचनं पुनर्वसुनक्षत्रगतं विशाखानक्षत्रगतं च द्वित्वमभिधत्ते छ-

न्दसि यथा पुनर्वसुनक्षत्रमदितिर्देवता पुनर्वसू नक्षत्रमदितिर्देवता यथा वा विशाखा नक्षत्रमिन्द्राग्नी देवता विशाखे नक्षत्रमिन्द्राग्नी देवता। लोके तु पुनर्वसूविशाखाशब्दौ नित्यद्विवचनान्तौ नासत्यशब्दवत्। तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्" इत्यनुशासनेन तिष्यश्च पुनर्वसू चेति विग्रहसमानार्थकात् तिष्यपुनर्वसू इति द्वन्द्वादुत्तरं द्विवचनं तिष्ये पुनर्वस्वोश्च वर्तमानं बहुत्वमभिधत्ते। फल्गुनीमूलान्नक्षत्रग्रहणेऽनुवर्तमानेऽस्मिन्सूत्रे पुनर्नक्षत्रग्रहणं पर्यायेणापि द्वन्द्वं सूचयति। तेन पुष्यपुनर्वसू सिंह्यपुनर्वसू इत्यादिद्वन्द्वेऽपि द्विवचनं तथा नित्यग्रहणं बहुवचनं निषेधति। बहुवचनस्येति विशेषोपादानं तिष्यपुनर्वस्विति क्लीवैकवचनान्तद्वन्द्वं सूचयति ज्ञापयति च सर्वो द्वन्द्वो विभाषैकवद्भवतीति क्लीवैकवचनान्तज्ञापनेन क्लीवद्विवचनान्तद्वन्द्वस्य निषेधोऽवगम्यते। तेन तिष्यपुनर्वसुनौ इति न द्वन्द्वः। जात्याख्यायामित्यादितिष्यपुनर्वस्वोरित्यन्तसूत्राणां तात्पर्यार्थाः काशिकासंमताः प्रदर्शिताः। एवं तिङर्थानामेकत्वादीनां प्रथमान्तार्थेऽन्वयः भावाख्यातस्थले तिङर्थभावनाया विरहात् तदन्वयिप्रथमान्तार्थासम्भवान्न तिङर्थसंख्यान्वयसम्भव इति चैतेन स्थीयते इति साधुत्वार्थमेकवचनं भावाख्यातस्थले न तु द्विवचनबहुवचने। फणिभाष्यकृतस्तु उष्ट्रासिका आस्यन्ते कृतशायिकाः शय्यन्ते इति भावाख्यातवद्बहुवचनं दर्शयन्ति स्म। तेषामयमाशयः। भावाख्यातस्थले एकत्वादिसंख्या धात्वर्थेऽन्वेति। न च पच्यते

चेत्येतेत्यादौ धात्वर्थव्यापाराणां बहुत्वात्कथमेकत्वान्वय इति वाच्यम् । व्यापाराणां बहुत्वेऽपि पूर्वापरीभूतानां तेषामेकबुद्धिविषयतयैक्यसम्भवात् । बुद्धिगतैकत्वस्य स्वाश्रयविषयत्वसंबन्धेन व्यापारेष्वन्वयसम्भवात् । तदुक्तम् ।

गुणभूतैरवयवैः समूहः क्रमजन्मनां ।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥

इति पूर्वापरीभूतं भावाख्यातमाचष्टे । यथा पचति व्रजतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तमिति निरुक्तमप्यसमर्थं संवदति । न चैकबुद्धिविषयतया व्यापाराणामैक्ये भावाख्याते कथं द्विवचनबहुवचनोपपत्तिरिति वाच्यम् । तादृशव्यापाराणां पुनः सम्भवे बुध्यन्तरविषयतया तथा द्वित्वान्वयसम्भवात् द्विवचनस्य पुनः पुनः सम्भवे पुनर्बुध्यन्तरविषयतया तथा बहुत्वान्वयसम्भवात् बहुवचनस्य चोपपत्तेः । एवमास्यन्ते इत्यादौ उपवेशनव्यापाराणां मुहुरन्तरोत्थाने त्रिचतुःकृत्वो जातानां बहुतया बहुवचनोपपत्तिः । शय्यन्ते इत्यत्रापि शयनव्यापाराणां मुहुरन्तराजागरणे त्रिचतुःकृत्वो जातानां बहुतया बहुवचनोपपत्तिः । इत्थं चोपवेशनक्रियाविशेषणस्य उष्ट्रासिकाशब्दस्य शयनक्रियाविशेषणस्य हतशायिकाशब्दस्य बहुवचनान्तत्वं बहुत्वविशिष्टव्यापारे बहुत्वान्यसंख्याविशिष्टस्य तादात्म्येनान्वयायोगात्समानवचनत्वं तन्त्रम् । उष्ट्रासनसदृश उष्ट्रासिकार्थः । हतशयनसदृशो हतशायिकार्थ इति उष्ट्रासनसदृशानि वर्तमानासनानि हतशयनसदृशानि वर्तमानशयनानीति वाक्यार्थबोधः । नन्वेवं धात्वर्थे संख्यान्वयोपगमे लिङ्गसंख्यान्वयायोग्यत्व-

मसत्वं व्याहन्येत । तत्रापि लिङ्गान्वयायोग्यत्वस्य घट-पटादिप्रातिपदिकादिसाधारणतया संख्यान्वयायोग्य-त्वस्यैवासत्वशब्दार्थत्वादिति चेत् । साक्षात्संख्यान्वया-योग्यत्वमसत्वं धात्वर्थस्य बुद्धिद्वारा संख्यान्वयित्वेऽपि निरुक्तासत्वमव्याहतमेव । न चैवं वेदाः प्रमाणमित्यादौ संख्यायाः प्रमितिकरणे साक्षादनन्वयादसत्वं स्यादिति वाच्यम् । प्रमाणानीत्यादौ प्रमाणे साक्षात्संख्यान्वया-दयोग्यताया विरहात् । अयोग्यतापर्यन्तधावनेन क्वचि-त्संख्याया अनन्वयेऽपि नासत्त्वमिति । यद्वा प्रातिपदि-कार्थत्वं सत्वं तदभावोऽसत्वं तच्च धात्वर्थे निराबाध-मेव । अत एव प्रातिपदिकार्थः सत्ता इति काशिकावृ-त्तिस्तत्र प्रातिपदिकार्थ इति भावप्रधानो निर्देशस्तेन प्रातिपदिकप्रतिपाद्यता सत्तेत्यवगम्यते । प्रातिपदिका-र्थोदाहरणसूत्रैर्नीचैरित्यपि तत्र वृत्तौ दृश्यते । अन्यथा-लिङ्गसंख्यान्वययोग्यत्वरूपसत्वस्योदाहरणमव्ययस्थलेऽ-लग्नं स्यादिति । तथा च सूत्रे प्रातिपदिकार्थोक्तिर्यत्र लिङ्गाद्यन्वययोग्यो नार्थस्तत्रापि साधुत्वार्थं प्रातिपदिक-संज्ञाबलात्प्रथमा भवतीति ज्ञापनार्थमिति । एवं सुधौ-जस् इत्यत्र उकारजकारावनुबन्धौ न वाचकताकुक्षिप्र-विष्टौ श्रीकृष्णस्त्राता इत्यत्र श्रूयमाणस्य कृष्णः पाल-यितेत्यादौ विसर्गभावं प्राप्तस्यापि सकारस्य रुत्वेन रू-पेण पुंस्त्वैकत्ववाचकत्वं सारस्वतौ मेषौ भवत इत्या-दौ श्रूयमाणस्यावौत्यादौ दीर्घैकारभावं प्राप्तस्याप्यौका-रस्यौत्वेन औटःसाधारणेन रूपेण पुंस्त्वद्वित्ववाचकत्वम्। एवं सुमनसस्त्रिदिवे इत्यादौ श्रूयमाणस्य सुमनसो ना-

के इत्यादावोकारभावं प्राप्तस्यापि अस अस्त्वेन शस्-साधारणेन रूपेण पुंस्त्वबहुत्ववाचकत्वं लिङ्गवाचकता तु असः जस्शस्ङसिङस्साधारणेनास्त्वेन रूपेण बोध्या । एवं सुबन्तस्यापि लिङ्गसंख्यावाचकतावच्छेदकं साधारणं रूपं सुधीभिरूह्यमिति द्वितीयादीनां लिङ्गसंख्यार्थकत्वम् । सूत्रे मात्रग्रहणं प्रथमायां कर्मत्वाद्यर्थकत्वव्यवच्छेदमुखेन प्रथमार्थस्य सर्वसुबर्थत्वं ज्ञापयत्सूचयति ।

इति विभक्त्यर्थनिर्णये सम्बोधनेतरप्रथमार्थनिर्णयः ।

सम्बोधनमपि प्रथमार्थस्तथा चानुशासनम् ॥

"सम्बोधने चे"ति । सबोधनं बोधोद्देश्यकेच्छा तत्र ज्ञानमिच्छा च खण्डशः प्रथमार्थः । तत्र प्रातिपदिकार्थः समवेतत्वसम्बन्धेन ज्ञानेऽन्वेति । प्रातिपदिकार्थान्विते ज्ञाने उद्देश्यतासम्बन्धेनेच्छा ऽन्वेति ज्ञानं च विशिष्टविषयतासम्बन्धेन वाक्यार्थे ऽन्वेति । एवं प्रातिपदिकार्थसमवेतज्ञानस्योद्देश्यतया ज्ञानसमवायितयोद्देश्यत्वस्वरूपं सम्बोध्यत्वमर्थतः प्रातिपदिकार्थस्य प्रतीयते एतदेव सम्बोध्यत्वं काशिकायामाभिमुख्यपदेनोक्तम् । एवं सति ब्रह्मन् पालयेत्यादौ ब्रह्मसमवेतेष्टज्ञानविषयैकत्वत्कर्तृकमाशंसाविषयपालनमिति शाब्दिकस्य ब्रह्मसमवेतेष्टज्ञानविषय आशंसाविषयपालनकर्तैकस्त्वमिति तार्किकस्य शाब्दबोधः । एवं यादृशरूपावच्छेदेन सम्बोध्यत्वं प्रथमया प्रत्याय्यते तादृशरूपविशिष्टमेव युष्मदा पराम्रश्यते सम्बोध्यतावच्छेदकोपलक्षितधर्मविशिष्ट एव युष्मत्पदशक्तेः । देव त्वं पुरुषोत्तमोऽसीत्यादौ पुंस्त्वैकत्वविशिष्टदेवत्वावच्छेदेन सम्बोध्यत्वमेकवचनप्र-

थमया प्रत्याय्यते। त्वंशब्देनापि पुंस्त्वैकत्वविशिष्टदेव-त्वविशिष्ट उच्यते। अत एव सर्वलिङ्गेऽपि युष्मदस्मदोः समानरूपता। इत्थं च हे ब्राह्मणास्त्वं प्रसीदेति न प्रयोगः सम्बोध्यतावच्छेदकतयोपलक्षितेन बहुत्वविशिष्ट-ब्राह्मणत्वेन विशिष्टस्य युष्मदा परामर्शे तत्रैकवचनस्यानन्वितार्थकत्वादसाधुत्वाच्च।

हे चण्ड हे मुण्ड बले बहुभिः परिवारितौ।
तत्र गच्छत गत्वा च सा समानीयतां लघु॥

इत्यादावेकत्वविशिष्टचण्डत्वे एकत्वविशिष्टमुण्डत्वस्वरूपधर्मद्वयावच्छेदेन प्रथमया संबोध्यत्वबोधनेऽपि तादृशचण्डत्वविशिष्टस्य तादृशमुण्डत्वविशिष्टस्य च युष्मदापरामर्शात्ततो न द्विवचनमुपपन्नम्। एकघटैकपटावित्यादिद्वन्द्वस्थले इव द्वित्वान्वयसम्भवात्।

हे सौमित्रे सखा यस्ते निर्विशेषस्त्वया गुहः।
युवां गत्वा नदीमेनां शीघ्रमानयतं पयः॥

इत्यादौ यच्छब्दाकाङ्क्षापूरणाच्चमेन तच्छब्देन युष्मदेकशेषे कृततच्छब्देन शक्त्या युष्मदा लक्षणया वोपस्थापितं गुहमादाय द्वित्वान्वयसम्भवात् युष्मदुत्तरं द्विवचनोपपत्तिरिति रीतिरियं भवच्छब्देऽपि बोध्या। तेन हे ब्राह्मणा भवान् प्रसीदत्वित्यादिको न प्रयोगः। यत्र अर्जुनार्जुन सात्यके सात्यके।

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं।
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः॥
नरकरिपुणा सार्धं तेषां समौमकिरीटिना-।
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम्॥

इत्यादौ सम्बोध्यस्य हित्वे भवच्छब्दो बहुवचनान्तस्तत्र न सम्बोध्यार्थको भवच्छब्दः किं तु शतन्तः तेन मनुजप्रभुभवनविशिष्टैरिति यैरित्यस्य विशेषणम् । यत्तु नाथ पालयेत्यादौ पालनकर्तृत्वस्य सम्बोधनप्रथमान्तार्थएवान्वय इति । तदसत् । गुणीभूते प्रथमान्तार्थे आख्यातार्थान्वयायोगात् । सम्बोधनप्रथमान्तार्थस्य सम्बोध्यत्वे गुणीभूतत्वात् । अन्यथा नारायण इव नरो गच्छतीत्यादौ नारायणोऽपि गमनकर्तृत्वान्वयप्रसङ्गात् । किं च युष्मदोऽसामानाधिकरण्ये मध्यमपुरुषो न स्यात् । न च युष्मत्पर्यायो यः सम्बोधनप्रथमान्त इति मध्यमपुरुषोपपत्तिरिति वाच्यम् । तथा सति भवच्छब्दसामानाधिकरण्येऽपि मध्यमपुरुषप्रसङ्गात् । नन्वेवम् ।

अकाण्डशक्तिनिर्भिन्ने वत्से जहति चेतनां ॥
हताश राम कस्यार्थे दग्धं जीवितमिच्छसि ।

इत्यादौ रामस्य वक्तुः सम्बोध्यत्वमनुपपन्नम् । तदा हि तस्य वाक्यार्थज्ञानासत्वे वाक्यप्रयोगोऽनुपपन्नः । वाक्यार्थज्ञानस्य सत्वे तु तस्य सिद्धतया तत्रेच्छाविरहवाक्यार्थसिद्धौ शाब्दबोधो न भवतीति चेन्न । मानान्तरजन्यवाक्यार्थज्ञानसत्वेऽपि वाक्यार्थगोचरशाब्दत्वावच्छेदेनेच्छासम्भवात् । श्रवणसिद्धौ मननेच्छावत् सिद्धेः शाब्दं प्रत्यप्रतिबन्धकत्वात् । प्रतिबन्धकत्वे वा शाब्देच्छाविरहविशिष्टायास्तस्यास्तथात्वाच्चेति वक्तुरपि स्ववाक्यजन्याभीष्टवाक्यार्थबुद्धिसमवायितया सम्बोध्यत्वमबाधितमिति संप्रदायः । ननु सम्बोध्यपुरुषवृत्तिवाक्यार्थज्ञानस्य सिद्धत्वनिश्चये करणापाटवेन प्रयुक्तस्य चैत्र त्वं गच्छेति वा-

क्यस्य प्रामाण्यापत्तिः। भाविभूतायाः पुरुषान्तरीयायाइच्छाया विषयत्वस्य चैत्रीयवाक्यार्थज्ञानेऽबाधितत्वात्। एवं सम्बोध्यपुरुषवृत्तिवाक्यार्थज्ञानस्य वाक्याजन्यत्वेऽपि अगृहीतपदसङ्केतं म्लेच्छमुद्दिश्याचार्यैः प्रयुज्यमानस्य शुङ्गापरेत्यादिवाक्यस्य प्रामाण्यसम्भवात् उपहास्यत्वाभावप्रसङ्गश्च म्लेच्छे मानान्तरजन्यवाक्यार्थज्ञानस्य म्लेच्छवाक्यार्थज्ञाने चार्थेच्छाविषयत्वस्याबाधितत्वात् म्लेच्छस्य सम्बोध्यत्वोपपत्तौ दर्शितवाक्यप्रामाण्यस्य निष्प्रत्यूहत्वात्। तत्तत्कालीनत्वेन तत्तत्पुरुषीयत्वेन चेच्छायां तत्तद्वाक्यजन्यत्वेन ज्ञानस्य च सम्बोधनप्रथमार्थत्वे शक्त्यानन्त्यमिति चेन्न। यतः स्वघटितवाक्यप्रयोगोपधायकत्वोपलक्षितेच्छायां स्वघटितवाक्यजन्यत्वोपलक्षिते ज्ञाने च सम्बोधनप्रथमायाः शक्तिः। यथा तदादिपदानां स्वप्रयोगोपधायकबुद्धिप्रकारत्वोपलक्षितधर्मविशिष्टे शक्तिः शक्तिग्रहस्तु सामान्योपलक्षितविशेषावगाही सर्वोपसंहारेण। तथा हि। तत्पदत्वावान्तरतत्तात्वोपलक्षितास्तत्तत्पदत्वव्यक्तीर्धर्मितावच्छेदकीकृत्य तत्पदप्रयोगोपधायकबुद्धिप्रकारत्वावान्तरतत्तात्वोपलक्षितधर्मविशिष्टबोधकत्वावगाही वृत्तिग्रहः। फलतस्तत्पदत्वावच्छेदेन तत्तद्धर्मविशिष्टवाचकतामेवावगाहते। तथा सम्बुद्धिप्रथमाया अपि प्रथमात्वावान्तरतत्तात्वोपलक्षिततत्तत्प्रथमात्वावच्छेदेन सम्बोधनप्रथमाप्रयोगोपधायकत्वावान्तरतत्तात्वोपलक्षितधर्मविशिष्टेच्छावाचकत्वं गृह्यते। इच्छायां तादृशोपलक्षितधर्मस्तद्यक्तित्वमेव। न च तद्यक्तित्वेनेच्छाऽवगमे वाचकतायामिच्छाप्रवेशो व्यर्थ इति वाच्यम्। इ-

च्छावृत्तितद्व्यक्तित्वलाभार्थमिच्छाप्रवेशात् । अथ वेच्छावृत्तित्वोपलक्षितत्वेनापि धर्मो विवक्षणीय इच्छा वाचकतायां न प्रवेशनीयेति । एवं स्वघटितवाक्यजन्यत्वेनोपलक्षितं ज्ञानमपि दर्शितरीत्या सम्बुद्धिप्रथमावाच्यमिति यथा तदादिपदानां न शक्त्यानन्त्यं तथा सम्बोधनप्रथमाया अपीति पदवाक्यरत्नाकरे गुरुचरणाः । अत्रेदं तत्वम् । ज्ञानेच्छा सम्बोधनप्रथमार्थः सा चेच्छा चैत्रस्य मैत्रीयगमनकर्तृत्वज्ञानं भवत्वित्यादिविशेषाकारा सर्वत्र सम्बोधनस्थले । एवं चैत्र मैत्रो गच्छतीत्यादौ चैत्रश्चैत्रप्रातिपदिकान्मैत्रीयगमनकर्तृत्वं मैत्रो गच्छतीति वाक्यात्प्रतीयतेऽनन्यलभ्यतया ज्ञानेच्छा सम्बोधनप्रथमार्थः । तत्रेच्छायां चैत्रादिप्रातिपदिकार्थस्य समवेतत्वसंसर्गावच्छिन्नस्य प्रकारतानिरूपितज्ञानत्वावच्छिन्नविशेष्यत्वावच्छिन्नोद्देश्यताप्रतियोगित्वेन सम्बन्धेनान्वयः इच्छा तु स्वोद्देश्यत्वावच्छिन्नज्ञानत्वावच्छिन्नविशेष्यतानिरूपितविषयितासंसर्गावच्छिन्नप्रकारतासंबन्धेन वाक्यार्थे मैत्रीयगमनकर्तृत्वादावन्वेति । एवं चैत्र मैत्रो गच्छतीत्यादौ चैत्रस्य व्यासङ्गवशाद्वाक्यार्थज्ञानानुत्पादेऽपि न सम्बोध्यत्वहानिः दर्शितसंसर्गेण चैत्रस्येच्छायामिच्छायाश्च वाक्यार्थेऽन्वयस्य निष्प्रत्यूहत्वात् । उद्देश्यता तु वाक्यप्रयोगप्रयोजकतत्तदिच्छीयोद्देश्यतात्वेन संसर्गमध्ये निविशते । एवमेवाशीर्लिङ्लोटोरर्थस्येच्छाया अप्युद्देश्यताप्रयोक्तृतत्तदिच्छीयोद्देश्यतात्वेन संसर्गमध्ये निविशते । भवतु वा स्वप्रयोक्तृतावच्छेदकत्वोपलक्षिधर्मविशिष्टे प्रयोक्तरि सम्बोधनप्रथमायाः आशीर्लिङ्लोटोश्च शक्तिस्तत्र

देवदत्तादेः प्रयोक्तुस्तत्तत्कालावच्छिन्नसमवेतत्वेन संबन्धेनेच्छायामन्वयः। तेन चैत्रस्य कालान्तरे देवदत्तसम्बोध्यस्य मैत्रीयगमनकर्तृत्वादिस्वरूपवाक्यार्थज्ञाने सिद्धत्वनिश्चयदशायां पुरुषान्तरस्य तादृशचैत्रीयवाक्यार्थज्ञानेच्छायां यत्तदत्तं सम्बोधयता देवदत्तेन करणापाटवेन प्रयुक्ते चैत्र मैत्रो गच्छतीत्यादौ चैत्रस्य सम्बोध्यत्वविरहादप्रामाण्यं कालान्तरीयपुरुषान्तरीयेच्छयोरुद्देश्यताघटितसंबन्धमध्ये प्रवेशाभावात्। प्रयोगजनकयत्तदत्तविषयकसम्बोधनेच्छायां तदिच्छीयोद्देश्यत्वघटितेन दर्शितसंसर्गेण चैत्रस्यान्वयासम्भवात्। प्रयोक्तुः प्रथमार्थत्वपक्षे देवदत्तसमवेततत्तत्कालिकेच्छायां दर्शितसंसर्गेण चैत्रस्यान्वयासम्भवाच्च। एवं प्रयोक्तृपुरुषेणोपलक्षिताया ज्ञानेच्छाया उद्देश्यतयाऽनुपलक्षितायास्तत्तदिच्छीयोद्देश्यतया वाऽवच्छिन्नं यच्छानत्वावच्छिन्नविशेष्यत्वं तन्निरूपितसमवेतत्वसंसर्गावच्छिन्नप्रकारतावच्छेदकत्वसंबन्धेन ज्ञानेच्छोपलक्षितधर्मविशिष्टे युष्मत्पदस्य शक्तिः तत्तदिच्छीयोद्देश्यतात्वकोद्देश्यतात्वेनैव संबन्धमध्ये प्रवेशः। यथा स्वर्गकामो यजेतेत्यादौ इष्टसाधनत्वं विध्यर्थस्तत्वाव्यवहितपूर्वकालः अधिकरणं अभावः प्रतियोगितावच्छेदकत्वं धर्मश्च खण्डशो विध्यर्थस्तत्वेष्टत्वेनोपस्थितः स्वर्गोऽव्यवहितपूर्वकाले सोऽधिकरणे तदभावे सप्रतियोगितायां सावच्छेदकत्वे तदभावे सधर्मोऽन्वेति तत्र स्वर्गाव्यवहितपूर्वकालस्यानुगमेऽपि तत्तत्क्षणावच्छिन्नाधिकरणतयाऽभावस्य स्वर्गादिकार्याधिकरणेऽन्वयस्तेन तत्तत्क्षणाव-

च्छेदेन स्वर्गाधिकरणवृत्तित्वाभावस्तत्प्रतियोगितावच्छेदकत्वाभाववान् धर्म इति लिङर्थबोधस्तत्र यथा न शक्त्यानन्त्यं तथाऽपि यदि चाव्यवहितपूर्वकालो लिङर्थे न निविश्यते किं त्वधिकरणमभावः प्रतियोगितावच्छेदकत्वं धर्मश्चेति पक्ष लिङर्थाः तत्र स्वर्गोऽधिकरणेऽधिकरणं तत्तत्स्वर्गाव्यवहितपूर्वक्षणावच्छिन्नाधेयतासंबन्धेनाभावे प्रतियोगितायां सावच्छेदकत्वे तदभावे सधर्मेऽन्वेति । एवं यागत्वावच्छेदेन स्वर्गाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वाभाववद्धर्मवत्ताज्ञानमेव यागप्रवृत्तौ हेतुः सधर्मस्तु यागत्वमेव दर्शितधर्मत्वेन रूपेण यागत्वावच्छेदेन गृह्यते । एवमेवान्यत्रापीष्टसाधनताज्ञानस्य प्रवर्तकत्वं संसर्गघटितविशेषं सामान्येनावगाहमानमिष्टसाधनताज्ञानं सामान्येन व्यभिचारग्रहः प्रतिरोद्धुं नेष्टेऽतः स्वर्गत्वावच्छेदेन सामान्यतो व्यभिचारग्रहेऽपि न क्षतिः । न चैवं व्यभिचारग्रहेऽपि दण्डविशेषत्वादिना घटकारणताग्रहः स्यात् घटत्वावच्छेदेन सामान्यतो व्यभिचारग्रहस्य सामान्यविशेषावगाहिकारणताग्रहं प्रत्यविरोधित्वादिति वाच्यम् । सामान्यतो व्यभिचारग्रहस्य सामान्यतः कारणताया ग्रहविरोधित्वे निष्प्रत्यूहत्वात् । प्रकृतेऽपि स्वर्गत्वावच्छेदेन सामान्यतो न यागकारणताग्रहः दण्डविशेषत्वादिना सामान्यतो विशेषावगाही कारणताग्रहस्तु न सम्भवति । घटत्वावच्छिन्नं प्रति दण्डत्वादिना सामान्यतः कारणत्वस्यावश्यकत्वे विशेषघटितकारणताया एवाप्रसिद्धेः । प्रकृते तु स्वर्गत्वावान्तरवैजात्यावच्छिन्नं प्रति यागत्वेन कारणतायाः

सत्वात् सामान्येन तदवगाही कारणताग्रहः सम्भवत्येवेति लिङो न शक्त्यानन्त्यम्। युष्मच्छब्दस्य तु तत्तदिच्छीयोद्देश्यतायाः संसर्गविधयाऽपि सङ्केतप्रवेशे कृतौ न शक्त्यानन्त्यमिति विभाव्यते तदा युष्मच्छब्दस्य स्वप्रयोगोपधायकेच्छीयोद्देश्यत्वावच्छिन्नविशेष्यतानिरूपितसमवेतत्वसंसर्गावच्छिन्नप्रकारतावच्छेदकत्वसम्बन्धेन स्वोपलक्षितधर्मविशिष्टे शक्तिः। युष्मच्छब्दस्य स्वशब्दस्योभयत्र परिचायकतया कथनमिति कालान्तरीयपुरुषान्तरीयेच्छाघटितसम्बन्धेन विद्यमानस्यैतत्पुरुषप्रयुक्तस्य युष्मच्छब्दस्यान्यत्रासत्वान्नातिप्रसङ्गः। तत्तद्युष्मच्छब्दस्य तत्तत्कालीनज्ञानेच्छाविषयेऽर्थतः शक्तिपर्यवसानेऽपि न शक्त्यानन्त्यं युष्मच्छब्दस्य सामान्यरूपेणैव सङ्केतग्रहे प्रवेशात्। यदि च युष्मच्छब्दाच्चैत्रत्वादिना चैत्रादिर्न प्रतीयते तथा सति त्वं चैत्र इत्यादौ चैत्रश्चैत्र इत्यादाविव निराकाङ्क्षतयाऽनन्वयः स्यादिति तदा ज्ञानेच्छाप्रकार एव युष्मच्छब्दस्य शक्तिस्तत्र ज्ञानेच्छायाः स्वप्रयोज्यवाक्यप्रयोगोपधायकेच्छीयोद्देश्यत्वावच्छिन्नज्ञानत्वावच्छिन्नविशेष्यतानिरूपितसमवेतत्वसंसर्गतानिरूपितत्वसंबन्धेन वैशिष्ट्यं प्रकारत्वे विशिष्टप्रकारत्वस्य वैशिष्ट्यं धर्मिणि स्वरूपसंबन्धेन बोध्यमिति ज्ञानेच्छाविशिष्टप्रकारत्वविशिष्टो युष्मच्छब्दार्थः। स्वप्रयोज्येत्यादुपादानात्कालान्तरीयायाः स्वज्ञानेच्छायाः प्रकारे नातिप्रसङ्गः स्वशब्दस्य ज्ञानेच्छापरिचायकत्वान्न शक्त्यानन्त्यमिति। एवं ज्ञानेच्छायाः स्वप्रयोज्यवाक्यप्रयोगोपधायकेच्छीयसमवायेन वैशिष्ट्य-

वानसूच्छब्दार्थ इति । एवं चैत्र त्वे पश्येत्यादौ चैत्रप्रकारकज्ञानेच्छाप्रकारः आशंसाविषयदर्शनकर्तृ ज्ञानेच्छाप्रकार इतिशाब्दबोधस्य विशेषणविशिष्टयोरुद्देश्यतावच्छेदकविधेययोर्विशेषणभेदाद्भेदोपपत्तिः कनककुण्डलवान् मणिकुण्डलवानितिवत् एवं म्लेच्छमुद्दिश्याचार्यैः प्रयुज्यमानस्य शुङ्गापसरेत्यादिवाक्यस्य म्लेच्छे सम्बोध्यत्वयुष्मदर्थत्वयोर्निराबाधतया शक्तिभ्रमजन्यत्वसम्भवेऽप्यगृहीतसङ्केतकोद्देश्यकतयोपहास्यत्वं सम्भवत्येव शक्तिभ्रमजन्यत्वस्योपहास्यत्वाप्रयोजकत्वात् तथासत्यपभंशेऽप्युपहास्यत्वापत्तेः । इच्छाविषयज्ञानस्य सम्बोधनार्थत्वे तत्समवायितावच्छेदकत्वोपलक्षितधर्मस्य वा युष्मत्पदप्रवृत्तिनिमित्तत्वेऽभ्युपेतेऽपि शक्तिभ्रमजन्यत्वं नोपहासप्रयोजकमन्यथा भगवज्ज्ञानस्य सिद्धतया तच्चेच्छाविरहात् भगवत्सम्बोधकस्य भगवत्पर्यायुष्मच्छब्दघटितस्य

स्वकर्मफलनिर्दिष्टां यां यां योनिं व्रजाम्यहं ।
तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढास्तु मे ॥

इत्यादिवाक्यस्य शक्तिभ्रमजन्यतयोपहास्यत्वापत्तेः । अगृहीतपदसंकेतकोद्देश्यकवाक्यत्वस्योपहासप्रयोजकत्वे भगवतो गृहीतपदसंकेतकत्वात् । तदुद्देश्यकवाक्यस्य नोपहास्यत्वमिति ज्ञानेच्छायाः सम्बोधनप्रथमार्थत्वे भगवतः संबोधयत्वं निराबाधमेव । भगवत्प्रत्यक्षस्य सिद्धत्वेऽपि भगवतः शाब्दज्ञानं जायतामितीच्छायाः सम्भवात् । न च भगवतः शाब्दबोधे कथं तादृशीच्छा सम्भवेदिति वाच्यम् । बाधितविषयेऽपीच्छासम्भवात् ।

नवपल्लवसंस्तरेऽपि ते मृदु दूयेत यदङ्गमर्पितं ।
तदिदं विषहिष्यते कथं वद वामोरु चिताधिरोहणम् ॥

इत्यादौ मृतेन्दुमतीवचनशुश्रूषादेर्दर्शनात् । स्वकर्मफलेत्याद्युक्तवाक्ये ।

विश्वरूपकृतविश्व कियत्ते वैभवाङ्गुतमणौ हृदि कुर्वे ।
हेम नद्युति कियन्निजचौरे काञ्चनाद्रिमधिगत्य दरिद्रः॥

इत्यादौ भगवतः संबोध्यत्वं निष्कृष्योहमेव । एवं "जानीहि नाथ दीनोऽहं" त्यादौ दीनाभिन्नमत्कर्तृकभवनविषयके आशंसाविषयत्वत्कर्तृकज्ञाने अथ वा भवनकर्तृत्वान्वितदीनाभिन्नमद्विषयकस्याशंसाविषयज्ञानस्य कर्तृत्वान्विते त्वंपदार्थे नाथप्रकारकज्ञानेच्छाप्रकारत्वस्य संबुद्ध्विप्रथमान्तार्थस्यान्वयः नाथस्य मदीयदीनभावविषयकज्ञानविषयकं ज्ञानं जायतामितीच्छासम्भवात् । इच्छाविषयत्वस्य ज्ञानविषयकज्ञानवृत्तित्वपर्यन्तधावनं मदीयदीनभावज्ञानस्यापेक्षात्मकत्वार्थमुपेक्षाज्ञानस्यानुव्यवसायविषयत्वानियमादिति । यत्र संबोधनपदघटितवाक्यं "नारायणि नमोऽस्तु ते" इत्यादिस्वरूपं सुतः श्रूयते तत्र ज्ञानान्तरेच्छया संबोध्यत्वनिर्वाहः । एवं "मकाराद्यशक्तिनिर्भिन्न" इत्यादिवाक्ये ज्ञानान्तरेच्छया वक्तुरपि संबोध्यत्वनिर्वाहः । एवं

शोचनीयाऽसि वसुधे या त्वं दशरथच्युता ।
रामहस्तमनुप्राप्य कष्टात्कष्टतरं गता ।

इत्यादावचेतनस्य वसुधादेर्बाधितविषयेपीच्छासम्भवेन ज्ञानेच्छाप्रकारतया संबोध्यत्वयुष्मत्पदप्रतिपाद्यत्वनिर्वाहेऽपि कष्टतरगतताद्रूप्यान्वयबाधाद्वसुधावा-

सिलोके लक्षणा तत्प्रयोजनं तु रामवद्गगत्वरूपवसुधा-
धर्मस्य लोके प्रतिपत्तिरिति । एवं सति गृहीतपदस-
ङ्केतकोद्देश्यकतया नास्य वाक्यस्योपहास्यत्वमिति
दार्शनिकसिद्धान्तः । चेतनतादात्म्यारोपेण वसुधायाः सं-
बोध्यत्वं युष्मत्प्रतिपाद्यत्वं कष्टतरगततादात्म्यान्वयश्च
सम्भवतीति । अत एव तुल्ये प्रस्तुते तुल्यस्याभिधान-
मित्यप्रस्तुतप्रशंसालंकार ईदृशस्थले स्फुरति पुत्रशो-
कसन्तप्तस्य वक्तुर्ब्राह्मणस्य प्रस्तुतस्य तादात्म्यारोपेण यु-
ष्मत्प्रतिपाद्यत्वसंबोध्यत्वयोर्वसुधायामुपपत्तौ युष्मदर्थे
सम्बोधनान्तार्थे वसुधातादात्म्येनाध्यवसितः प्रस्तुतो-
ऽर्थोऽन्वेति व्यञ्जनयोपस्थितइति रसविद्याविदः । युष्म-
देकवचनादिव्यवस्था पूर्वोक्ताऽनुसन्धेया । श्रीस्त्वाहीत्यादौ
सम्बोधनैकवचनस्य सः श्रूयमाणत्वात् स्त्वेनैव वाच-
कत्वं हरे विष्णो रामेत्यादौ लोपः स स्मारक इति ।
तदिदं सम्बोध्यत्वं क्रियायां विशेषणम् "एकतिङ्वा-
क्यमि"ति कात्यायनवाक्यात् । तत्र भाष्यकारेण ब्रूहि
देवदत्तेति वाक्यमुक्तम् । तस्यायमभिसन्धिः । "आमन्त्रि-
तस्य चे"ति सूत्रेणामन्त्रणार्थकप्रत्ययान्तपदानां पदा-
त्पराणामेव निघातो नाम सर्वानुदात्तः स्वरो विधीयते
स च देवदत्तपदे तदा स्यात् यदि देवदत्तपदब्रूहिपदयो-
र्व्यपेक्षा स्यात् । पदयोर्व्यपेक्षारूपसामर्थ्यविरहे समर्थः
पदविधिरिति व्यवस्थापनात् पदसम्बन्धिनो निघातवि-
धेरप्रवृत्तेः देवदत्तपदे निघातो न स्यात् । तथा च वा-
र्तिकं । "समानवाक्ये निघातयुष्मदस्मदादेशा" इति स-
मानवाक्यं समर्थवाक्यमेव ब्रूहि पददेवदत्तपदयोर्व्यपेक्षा

तदैव भवति यदि देवदत्तसम्बोध्यत्वं वचनक्रियायामन्वेति। न च ब्रूहीत्यत्र तिङर्थकर्तरि सम्बोधनप्रथमान्तार्थस्य देवदत्तस्य तादात्म्येन सम्बोधनार्थस्य वा समवायेनान्वयोऽस्तु तावताऽप्येकवाक्यत्वरूपसामर्थ्यमुपपद्यत इति वाच्यम्। मध्यमपुरुषार्थे कर्तरि युष्मदर्थातिरिक्तस्य तादात्म्येनान्वयायोगात्। व्रजानि देवदत्तेत्यत्र तिङर्थकर्तरि सम्बोधनप्रथमान्तार्थस्य तादात्म्येन संबोधनार्थस्य च समवायेनाऽयोग्यतयान्वयासम्भवाच्च। तथाचोक्तं हरिणा।

सम्बोधनपदं यच्च तत् क्रियाया विशेषणं।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति॥

तस्मात्प्रातिपदिकविशेषितं सम्बोध्यत्वं क्रियायां विशेषणं तिङन्तविनाकृतं वाक्यमेव नास्तीति कात्यायनानुसारिणो वैयाकरणाः। फणिभाष्यकृतस्तु एकतिङ्वाक्यमिति नानुमन्यन्ते। पश्य मृगो धावति, जानीहि जगज्जगन्नाथाज्जायते, अस्ति साधवः सीदन्ति, भवति दुर्जना मोदन्ते, इत्याद्यनेकतिङन्तमप्येकं वाक्यं मन्यन्ते तच्च मृगकर्तृकधावनस्य धावनकर्तृमृगस्य वा कर्मतया दर्शने, जगत्कर्तृकनाथहेतुकजननस्य नाथहेतुकजननकर्तृजगतो वा कर्मतया ज्ञाने, साधुकर्तृकसीदनस्य सीदनकर्तृसाधोर्वा कर्तृतया सत्तायां, दुर्जनकर्तृकमोदस्य मोदकर्तृदुर्जनस्य वा कर्तृतया संसर्गेण भवने, यथादर्शनमन्वयोपगमादेवाक्यतानिर्वाहः। तथोक्तं च।

सुबन्तं हि यथाऽनेकं सुबन्तस्य विशेषणं।
तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणम्॥

अत एव "तिङुतिङ" इति सूत्रमतिङन्तात्परं तिङन्तं निहन्यत इत्यर्थकम् अग्निं दूतं वृणीमहे इत्यादौ तिङन्ते वृणीमहे शब्दे निघातस्वरं विदधाति तत्र सूत्रे पचति भवतीत्यादौ भवतीत्यादितिङन्ते निघातवारणायातिङ इति पदं सार्थकम् । अन्यथा तिङन्तयोरेकवाक्यताविरहे सामर्थ्याश्रितनिघातविधेस्तिङन्तपरे तिङन्ते प्रसक्तिर्न भवतीति व्यर्थमेवातिङ्पदं स्यात् । न चैकतिङ्वाक्यमित्यनेन नानेकतिङन्तवाक्यस्य निषेधः किं तु वाक्यं सतिङन्तमेवेति नियम इति वाच्यम् ।

कष्टा वेधय्यथा कष्टं नित्यमुद्वहनक्षमः ।
श्रवणानामलङ्कारः कपोलस्य तु भूषणम् ॥

इत्यादेस्तिङन्तशून्यवाक्यस्य दर्शनात् । न चास्तिभवतिपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति कात्यायनवचनात् तिङन्तशून्यवाक्येऽस्तीत्यध्याहार इति वाच्यम् । अध्याहारे मानाभावात् । तिङन्तविनाकृतं वाक्य नानुभावकमिति व्युत्पत्तिरपि न सम्भवति । तथा हि । प्रथमान्ततिङन्तघटितवाक्यस्थले प्रथमान्तार्थस्य तिङन्तेऽन्वयोऽभ्युपेयते भूतले न घट इत्यादावस्तीत्यध्याहारे तिङर्थे नञर्थविशेषणाघटस्यान्वयासम्भवात् न च भूतलवृत्तित्वाभावो घटेऽन्वेतीति वाच्यम् । कारकस्य कारकान्वितनञर्थस्य वा क्रियातिरिक्तेऽन्वयस्याव्युत्पन्नत्वात् न च भूतलाधेयत्वाभावोऽस्ती यत्र धात्वर्थ एवान्वेति धात्वर्थविशेषणे तिङर्थकर्तरि घटस्य तादात्म्येनान्वयइति वाच्यम् । घटपदस्यातीतघटपरतायां घटस्य तिङर्थकर्तरि योग्यताविरहात् तादात्म्येनान्वयासम्भवा-

त्। न च भूतलाधेयत्वमध्याहृतास्तिधात्वर्थं सत्तायामन्वेति तद्विशेषणे तिङर्थकर्तरि घटविशेषितो नञर्थभेदोऽन्वेतीति वाच्यम्। तथा सति घटवत्यपि भूतले घटान्योऽस्तीतिवत् घटो नास्तीतिप्रयोगापत्तेः। न च भूतलाधेयत्वान्वितेनाध्याहृतास्तिधात्वर्थेन सत्तया विशेषितस्य तिङर्थकर्तुर्नञर्थभेदेऽन्वयस्तथान्वितो भेदो घटेऽन्वेतीति वाच्यम्। तथा सति क्रियायाः प्राधान्यनियमभङ्गापत्तेः। एवं सति शाब्दस्य क्रियामुख्यविशेष्यकत्वनियमरक्षार्थमस्तीत्यध्याहारो व्यर्थ एव तादृशनियमभङ्गस्य स्वयमेव स्वहस्तितत्वादिति। अत एव भूतले न घट इत्यादौ प्रतियोगितासंबन्धेन प्रातिपदिकार्थविशेषितस्य स्वार्थात्यन्ताभावस्यान्वयबोधने नञनुयोगिवाचकपदे सप्तम्यपेक्ष्यते नापेक्ष्यते विभक्त्यर्थविशेषितस्येति सर्वतान्त्रिकसिद्धा व्यवस्थितिरिति। एवं सुबन्तसमुदायस्तिङन्तसमुदायः सुबन्ततिङन्तोभयसमुदायश्च त्रिविधं वाक्यं तत्र प्रधानार्थे सम्बोध्यत्वान्वय इति महाभाष्यानुसारिणः। एवं चैत्रः पचतीत्यादौ धात्वर्थः प्रधानमिति शाब्दिकाः। तिङर्थो भावना प्रधानमिति भाट्टाः। प्रथमान्तार्थः प्रधानमिति तार्किकाः। तदनुसारिणोऽन्येऽपि दार्शनिकाः। तेषां तेषां तत्र तत्र प्रधानेऽर्थे सम्बोध्यत्वान्वय इति। अत एव देवदत्त यज्ञदत्तः समागत इत्यादौ समागताभिन्नयज्ञदत्ते देवदत्तसम्बोध्यत्वान्वयः। एवं सम्बोधनान्तपदं तिङन्तमात्रमाकाङ्क्षमिति भ्रमः। एवं प्रथमार्थः सम्बोध्यत्वं लिङ्गं सङ्ख्या च नञर्थेऽभावे नान्वेति। तेन यज्ञदत्तः समागतो

देवदत्तेनेत्यादौ समागतयज्ञदत्ते देवदत्तसम्बोध्यत्वाभावस्य न प्रतीतिः न वा घटो नेत्यादौ लिङ्गसङ्ख्याभावप्रतीतिरिति ।

इति विभक्त्यर्थनिर्णये सम्बोधनप्रथमार्थनिर्णयः ।

इति प्रथमाविवरणं समाप्तम् ।



अथ द्वितीया।

अम् औट् शसिति त्रयः प्रत्ययाः। तत्र सुमनसमर्चयति सुमनसौ सुमनसो वेत्यादौ श्रूयमाणत्वादसमस्तत्वेन औकारस्य औत्वेन असः अस्त्वेन वाचकत्वं टशावनुबन्धौ क्वचिदप्यश्रूयमाणत्वान्न वाचकताकुक्षिप्रविष्टाविति। अनुशासनसिद्धस्तु द्वितीयाया अर्थः अनुशासनं च "कर्मणि द्वितीये"ति तत्र कर्म कर्मत्वं वा द्वितीयार्थ इत्यादिकमग्रे स्फुटीभविष्यति कर्मपदसङ्केतग्राहकं पूर्वोक्तमनुशासनम्। "कर्तुरीप्सिततमं कर्मे"ति तत्राप्नोतेः सन्नन्ततया निष्पन्नोऽपीप्साशब्दो रूढ्या इच्छामात्रमभिधत्ते। न त्वाप्नीच्छामिति सन्नन्तस्याप्नोतेरिच्छैवार्थः। एवं वीप्साशब्दो रूढ्या व्याप्तिमभिधत्ते न तु व्याप्नीच्छामिति सन्नन्तस्य व्याप्नोतेर्व्याप्तिरेवार्थः। एवं सन्नन्ताप्नोतेः कर्मप्रत्ययेन क्तेन विषयो विषयताऽऽश्रयो वाऽभिधीयते। एवं "क्तस्य च वर्तमाने" इति विशेषानुशासनेन निष्ठायोगे सिद्धा षष्ठी कर्तृत्वमाधेयत्वस्वरूपमभिधत्ते। तमप्प्रत्ययस्तु प्रकृत्यर्थतावच्छेदकान्वितमतिशयं प्रकर्षमभिधत्ते। कर्मपदवाच्यं कर्मशब्दार्थः। धात्वर्थस्य तिङर्थस्य वा व्यापारस्याश्रयः कर्तृशब्दार्थः। एवं व्यापाराश्रयनिष्ठेच्छाप्रकृष्टविषयः कर्मपदवाच्य इति सूत्रार्थः। इच्छा तु व्यापारजनिका बोध्या ग्रामसंयोगो भवत्विच्छायां ग्रामसंयोगसाधनं स्यन्द इति ज्ञानात्प्रवृत्त्यागमनोत्पत्त्यागमनप्रयोजकेच्छाविषयत्वं ग्रामे कर्मत्वं व्यापारप्रयोजकत्वस्येच्छायां लाभार्थं कर्तुरिति पदं तेन

माषेष्वश्वं बध्नातीत्यादावश्वभोजनेच्छाविषयत्वेऽपि माषस्य न कर्मत्वं तुरगभोजनेच्छाया बन्धनाप्रयोजकत्वात् । तमप्रग्रहणं प्राधान्येन विषयत्वलाभार्थम् । तच्च क्रियाजन्यफले साक्षाद्विशेषणत्वं तेन भोजनव्यापारस्य पयस्यहितौदनकण्ठसंयोगो भवत्वितीच्छाप्रयोज्यत्वेऽपि पयसो न कर्मत्वं पयसः कण्ठसंयोगे फले साक्षाद्विशेषणतया इच्छाविषयत्वाभावात् । तेन पयसा सहौदनं भुङ्क्ते इत्यादौ पयःपदान्न द्वितीया । सर्वमेतद्बालोपलालनं न तु द्वितीयार्थोपवर्णनम् । द्वितीयातो दर्शितेच्छाविषयत्वस्य केनाप्यप्रतीयमानत्वात् । एवं "कारके" इत्यधिकारः । कारकशब्दार्थः पूर्वमुक्तः । सप्तमी निर्धारणार्था । तेन ईप्सितादिभिन्नं कारकं न कर्मेप्सितादिकारकं कर्मेत्यन्वयबोधस्तेन कर्मशब्दसङ्केतोऽत्र कारके प्रदर्शितो न तु सर्वत्र । तेन कर्मपदार्थस्योत्क्षेपणादेरप्रदर्शनेन न न्यूनत्वमिति । एवं कारके इति सप्तमी प्रथमास्थाने इति भ्रमः । एवं कर्मणि द्वितीयेत्यादौ अनभिहिते इत्यधिकारसूत्रेणाभिहिते कर्मणि द्वितीया निषिध्यते । अभिधानं तिङ्कृत्तद्धितसमासैरन्येनापि अतः पच्यते पक्वो वा तण्डुल इत्यादौ तिङा कृता कर्माभिधानात् तण्डुलपदान्न द्वितीया । नैयायिकः पण्डितः शत्योऽश्व इत्यादौ तद्धितेन कर्माभिधानात् न्यायपदादश्वपदाद्वा न द्वितीया प्राप्नानन्दः पुरुष इत्यादौ समासेन कर्माभिधानात्पुरुषपदान्न द्वितीया समासस्याभिधायकत्वं शाब्दिकमते न्यायमते त्वानन्दकर्तृकप्राप्निकर्मण्यानन्दपदस्य लक्षणा प्राप्नशब्दस्य तात्पर्यग्राहकत्वमिति आनन्दपदेनैव कर्मप्र-

तिप्रादनात्पुरुषपदान्न द्वितीया एवं विषट्चोऽपि सम्बध्यं स्वयं छेत्तुमसांप्रतमित्यादौ निपातेन कर्माभिधानाद्धृत्वपदान्न द्वितीया । उक्तार्थानामप्रयोग इति न्यायमेवानुवदतोदं सूत्रम् । अत एव धात्वर्थान्तर्भूतकर्मकधातुयोगे न द्वितीया । यथा उदयगिरिसंयोगानुकूलव्यापारवाचिन उदयतेर्योगे उदयगिरिमुदेतीति न द्वितीयाप्रयोगः । एवमनभिहिते इति कर्त्रादौ सर्वत्र सम्बध्यते तेनाभिहिते कर्तरि करणे च न द्वतीया । संप्रदाने न चतुर्थी तथाऽपादाने न पञ्चमी तथाऽधिकरणे न सप्तमी कर्त्राद्यभिधानं तु कारकलक्षणे दर्शितमिति । नन्वभिहिते कर्मणि द्वितीयानिषेधे पक्वमोदनं भुङ्क्ते इत्यादौ कृता कर्माभिधानादोदनपदाद् द्वितीया न स्यात् । न च भोजनकर्मणोऽनभिधानाद् द्वितीयोपपत्तिरिति वाच्यम् । एवमपि चैत्रेण गम्यमानं ग्रामं मैत्रो गच्छतीत्यादौ गमिकर्मणः कृताभिधानात् द्वितीयाऽनुपपत्तेः । न च चैत्रकर्तृकगमनकर्मणोऽभिधानेऽपि मैत्रकर्तृकगमनकर्मणोऽनभिधानात् न द्वितीयाऽनुपपत्तिरिति वाच्यम् । एवमपि दृष्टमपि कान्तं सुज्ञः पश्यतीत्यादौ कर्तृभेदेनापि क्रियाभेदविरहात् दृशिक्रियाकर्मणः कृताभिधानात् द्वितीयानुपपत्तेः । एवं दृश्यं पश्यति कृत्यं करोति इत्यादौ यत्प्रत्ययेन कर्मणाऽभिधानात् द्वितीयापपत्तेश्चेति चेन्न । यतो "ऽनभिहिते" इति सूत्रस्यान्य एव तात्पर्यार्थः । तथा हि । अनभिहिते इति सति सप्तमी तेन कर्मण्यनभिहिते सति द्वितीया भवतीत्यर्थः अत एवाभिधानाभावः कर्मनिष्ठो द्वितीयावाच्यतायां न निवि-

शते। एवं द्वितीयार्थविशेषणकान्वययोग्यार्थकपदे कर्म-
बोधकशब्दासमभिव्याहृते सति द्वितीया भवतीत्यर्थः। दृ-
श्यं पश्यति कृत्यं करोतीत्यादौ पश्यति करोतीतिपदयोः
कर्मबोधकपदासमभिव्याहृतत्वात्तदर्थयोर्द्वितीयार्थान्व-
ययोग्यत्वाच्च दृश्यकृत्यशब्दाभ्यां न द्वितीयाऽनुपपत्तिरि-
ति विशेषः कारकलक्षणोक्तरीत्यावसेय इति सकर्मक-
धात्वर्थौ द्वितीयार्थान्वययोग्यः सकर्मकत्वं तु न्यायम-
तेऽधिकरणविशेषितफलाश्रयच्छिन्नव्यापारस्य तादृशफल
व्यापारोभयस्य वा वाचकत्वमित्यादिकं सिद्धान्ते स्फुटी-
भविष्यति। शाब्दिकमते तच्च फलाधिकरणावाचकत्वे
सति स्वार्थफव्यधिकरणव्यापारवाचित्वम्। तेन शब्दो-
त्पत्तिरनुकूलव्यापारे शक्तेन शब्दायतिना शब्दस्य, स्फि-
ग्भूसंयोगानुकूलव्यापार्थकेनोपविशतिना स्फिग्भूद्वयस्य,
अधः संयोगानुकूलव्यापारवाचिना पततिनाऽधः पदार्थस्य,
सर्वावयवाधस्संयोगानुकूलव्यापारवाचिना शयतिना-
ऽधस्सर्वावयवद्वयस्य, उदयगिरिसंयोगानुकूलव्यापारार्थके-
नोदेतिना उदयगिरेः, मिद्रामनोर्विभागानुकूलव्यापारा-
र्थकेन जागर्तिना मिद्रामनोर्द्वयस्य, मिद्रामनः संयोगानु-
कूलव्यापारार्थकेन निद्रातिना मिद्रामनोर्द्वयस्यावयवाप-
चयानुकूलव्यापारार्थकेन क्षीयतिनाऽवयवस्यावयवोपच-
यानुकूलव्यापारार्थकेन वर्धतिनाऽवयवस्य, प्राणशरीरसं-
योगानुकूलव्यापारार्थकेन जीवतिना प्राणशरीरद्वयस्य,
प्राणशरीरात्यन्तविरोगफलकव्यापारार्थकेन म्रियतिना
प्राणशरीरद्वयस्य, च. फलाधिकरणस्याभिधानात् शब्दा-
यत्युपविशतिपततिशयत्युदेतिजागर्तिनिद्रातिक्षीयति-

वर्धतिजीवतिम्रियतीनां न सकर्मकत्वमिति तेषां वारणाय सत्यन्तम्। अनुचितकर्माऽनुत्पादफलकव्यापारोलज्जेरर्थः अनुचितकर्म यद्धेतुकं ततः पञ्चमी स्यतो लज्जते परतो लज्जत इति दर्शनात्। अनुत्पादरूपफलाधिकरणस्यानुचितकर्मणोऽभिधानादेव लज्जतिरकर्मकः। एवं स्वगतानिष्टचिन्तनं बिभेतेरर्थः। चिन्तनविषयतारूपस्य फलाधिकरणस्य चिन्तनसमानाधिकरणस्य फलस्य वाऽनिष्टस्याभिधानाद्बिभेतिरकर्मकः। आत्मधारणानुकूलव्यापारार्थकस्य भवतेरात्मधारणस्वरूपफलसमानाधिकरणव्यापारवाचकत्वम् एवं सुखस्य फलस्य समानाधिकरणं व्यापारमभिदधतो रमतेः गतिरूपफलसमानाधिकरणनिवृत्तिमभिदधतस्तिष्ठतेश्च फलसमानाधिकरणव्यापारवाचकत्वमिति भवतिरमतितिष्ठत्यादीनां वारणाय फलव्यधिकरणत्वं व्यापारे विशेषणम्। तच्च फलाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वं तेन गम्यादेः फलाधिकरणावृत्तिव्यापारवाचित्वेऽपि न सकर्मकत्वहानिः गम्यादेर्धात्वन्तरार्थफलाव्यधिकरणव्यापारार्थकत्वेऽपि सकर्मकत्वार्थं फले स्वार्थत्वं विशेषणम्। तेन स्पन्दमभिदधतः स्पन्दतेः यत्नमभिदधतो यते रुचिमभिदधतो रोचतेः दुःखमभिदधतो बाधतेः नाशमभिदधतो नश्यतेः दीप्तिमभिदधतो दीप्यतेश्च व्यापारमात्रार्थकतया स्पन्दतियतिरोचतिबाधतिनश्यतिदीप्यतीनां स्वार्थफलाभावान्न सकर्मकत्वमिति। अकर्मकपर्यायोऽकर्मक एव यथा शब्दायतिपर्यायः पटपटायतिप्रभृतिः लज्जतिपर्यायस्त्रपतिः रमिपर्यायो दी-

प्यत्यादिः बिभेतिपर्यायस्त्रस्यतिः बाधतिपर्यायो व्यथतिः रोचतिपर्यायस्त्रदतिः । एवमन्योऽपि बोध्याः । फलत्वं तु न धात्वर्थव्यापारजन्यत्वे सति धात्वर्थत्वं जन्यतावच्छेदेन गौरवात् किं तु धात्वर्थव्यापारे विशेषणतया भासमानत्वे सति धात्वर्थत्वम् । एवं विषयता ज्ञानं च जानातेः उद्देश्यत्वमिच्छा चेच्छतेः । साध्यत्वाख्यविषयत्वं यत्नश्च उत्पत्तिस्तदनुकूलव्यापारश्च वा करोतेः बाध्यत्वाख्यविषयत्वं द्वेषश्च द्विषेः लौकिकविषयता प्रत्यक्षं च साक्षात्करोतेः सा घ्राणजं च जिघ्रतेः सा रासनं च रसयतेः । सा चाक्षुषं च पश्यतेः सा स्पार्शनं च स्पृशतेः सा श्रावणं च विषयता शब्दं च शृणोतेः विधेयताऽनुमितिश्च तृतीयान्तविधेयबोधकशब्दयोगे उद्देश्यताऽनुमितिश्चानुमातेः विधेयता तर्कश्च तृतीयान्ततादृशशब्दयोगे उद्देश्यता तर्कश्चापाद्यतेश्चार्थः । विषयतादीनां ज्ञानादौ विशेषणतयाऽन्वयित्वान्निरुक्तफलत्वं निराबाधमिति जानात्यादीनां निरुक्तसकर्मकत्वं निष्प्रत्यूहमिति । सुखवन्तमात्मानमिच्छति सुरभि चन्दनं जिघ्रति ध्वनन्तं शङ्खं शृणोतीत्यादौ सविशेषणे हीति न्यायेन सुखसौरभनिध्वानानां द्वितीयार्थेऽन्वयस्तस्य च धात्वर्थफलेऽन्वयः । एवमेवेदृशस्थले कर्मलकारोपपत्तिरत एव "दधानो निध्वानमश्रुयत पाञ्चजन्य" इति माघः । पुष्पं जिघ्रतीत्यादौ घ्राणजानुगुणघ्राणसन्निकर्षस्तदनुकूलव्यापारश्च शक्त्या भक्त्या वा जिघ्रतेरर्थ इत्युपपत्तिः । एवं धात्वर्थफलशालित्वं कर्मत्वमिति । अत्र शाब्दिकाः । आश्रयः कर्मद्वितीयार्थः । तथा हि । धातूनां फले व्यापारे च श-

क्तिः । एकपदोपात्तयोरपि परस्परमन्वयो भवति यथा तिङर्थानां साधनताघटकानामधिकरणाभावादीनां यथा वा तिङर्थकर्तृसङ्ख्ययोस्तच फलं विक्लित्तिसंयोगादि तादृप्येण पचिगम्यादिनाऽभिधीयते वह्निः पचतीत्यत्रोर्ध्वज्वलनत्वेन चैत्रः पचतीत्यत्राधिश्रयणावतारणफूत्कारास्तादृप्येण व्यापाराः पाचकः पचतीत्यत्र प्रयत्नत्वेन व्यापाराः पचिनाऽभिधीयन्ते रथो गच्छतीत्यत्र स्यन्दत्वेन तुरगो गच्छतीत्यत्र प्रयत्नत्वेन व्यापारा गमिनाऽभिधीयन्ते। तत्र सकलव्यापारानुगतस्य धर्मस्यासत्वात् सत्वे वा तेन धर्मेण व्यापाराणामप्रतीतेर्नानुगतं प्रवृत्तिनिमित्तमिति बुद्धिविशेषविषयत्वोपलक्षितधर्मविशिष्टे सर्वनाम्नामिवाथ वा फलजनकतावच्छेदकत्वोपलक्षितधर्मविशिष्टे धातूनां शक्तिः अत एव विक्लित्तिजनकतावच्छेदकतया यो धर्मी गृहीतस्तद्धर्मविशिष्टमेव पचिनोपस्थाप्यते धात्वर्थव्यापार एव भावनोत्पादना क्रिया चेति व्यपदिश्यते तच प्रधानतया भासमाने व्यापारेऽधिश्रयणादौ फलस्य विक्लित्यादेरनुकूलत्वादिना संसर्गेण तिङर्थस्य वर्तमानकालस्य कर्तुश्च तत्तत्संसर्गावच्छिन्नाधेयतयाऽन्वयः कर्तरि तिङुपात्ता सङ्ख्या समवायादिना प्रथमान्तार्थश्च तादात्म्येनान्वेति प्रथमान्तार्थे सुबर्थसङ्ख्याऽन्वेति फले द्वितीयार्थस्याश्रयस्याधेयतयाऽऽश्रये प्रातिपदिकार्थस्य तादात्म्येन प्रातिपदिकार्थे सुबर्थसङ्ख्यायाः समवायादिनाऽन्वयः । एवं चैत्रस्तण्डुलं पचतीत्यादौ एकतण्डुलाभिन्नाश्रयवृत्तिविक्लित्यनुकूलाधिश्रयणादिक्रियावर्तमानकालवृत्तिरेकचैत्राभिन्नैकाश्रयवृत्तिश्चेत्यन्वयबोध-

स्तत्र फलस्य विक्लित्ते र्धातुना तण्डुलस्य प्रातिपदिकेन च लाभादनन्यलभ्यस्तण्डुलाभेदान्वययोग्य आश्रयो द्वितीयार्थः । एवं कर्माख्यातस्यापि आश्रयोऽर्थः इयं-स्तु विशेषः । कर्माख्याते चैत्रेण तण्डुलः पच्यते इत्यादौ तण्डुलाभिन्नाश्रये तिङर्थसंख्याया अन्वयः तृतीयार्थः आश्रये चैत्राभेदस्यान्वयो न तु संख्यायाः चैत्रः तण्डुलं पचतीत्यादौ कर्त्राख्याते तिङर्थाश्रये तिङर्थसंख्याऽन्वयः द्वितीयार्थाश्रये न संख्याऽन्वय इति संख्याऽतिरिक्ते विषय उभयविधवाक्यात्समानाकार एव शाब्दबोधः युज्यते च क्रियायाः प्राधान्यं "भावप्राधानमाख्यातमि"ति निरुक्तात् । तिङन्तघटितवाक्ये भावस्य क्रियायाः प्राधान्यमिति तदर्थात् । "धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते" इति परिभाषया क्रियाया भावपदार्थत्वात् । केवलः कारकाद्यनवच्छिन्नः शुद्धो धात्वर्थतावच्छेदकानवच्छिन्न इति । अत एव पचन्तिकल्पं पुरुषा इत्यादौ प्रधानीभूतक्रियायां कल्पबर्थस्य विशेषणत्वाद् विशेष्यीभूतक्रियायां लिङ्गसंख्याऽन्वययोग्यत्वात् कल्पशब्दस्य सामान्ये नपुंसकमिति क्लीबत्वं ततस्साधुत्वार्थमेकवचनम् । यदि च कल्पबर्थस्य कर्तरि प्रथमान्तार्थेऽन्वयोऽभ्युपेयते तदा विशेष्यस्य लिङ्गसंख्यान्वययोग्यतया कल्पशब्दस्य पुंस्त्वं ततो बहुवचनं च स्यात् आचार्यकल्पाः द्विजा इति वत् पचन्तिकल्पा इत्यपि स्यात् । एवं च "तिङ्तिङ" इति सूत्रेऽ तिङ्ग्रहणं संगच्छते । तथा हि । अतिङन्तात्परस्य तिङन्तस्य निघातस्वरो भवति तत्रातिङ इति पदस्य प्रयोजनं

महाभाष्येण पश्य धावति मृग इत्यत्र प्रदर्शितं तेन तिङन्तपरे धावतिपदे निघातस्वरो निषिध्यते । तत्र पदविधेर्निघातस्य सामर्थ्याश्रिततया तिङन्तयोर्व्यपेक्षायामेवेदं प्रयोजनं भवति तिङन्तयोर्व्यपेक्षा तु तदैव सम्भवति यदि क्रियायाः प्राधान्यं स्यात् । तेन मृगकर्तृकधावनक्रियायाः कर्मतासंसर्गेण दृशिक्रियायामन्वयः सम्भवति क्रियाया धात्वर्थत्वात् धातोरधातुरितिपर्युदासात्प्रातिपदिकसंज्ञाविरहान्न द्वितीयाप्रसङ्गः । धावनकर्तृमृगस्य प्रधानस्य दृशिक्रियायां कर्मतयाऽन्वये मृगपदाद् द्वितीया स्यात् । द्वितीयायां लटोऽप्रथमासामानाधिकरण्ये शतृशानजापत्या दर्शितवाक्यप्रयोग एव न स्यादिति । एवमाश्रयस्य द्वितीयार्थत्वे तत्तत्संसर्गावच्छिन्नाधेयत्वेन सम्बन्धेन तस्य फलेऽन्वय इति व्युत्पत्तिवैचित्र्ये संसर्गविशेषलाभसम्भवात् न संसर्गविशेषावच्छिन्नत्वमाश्रये विशेषणमिति संसर्गभेदेन भिन्नं न शक्त्यानन्त्यमिति अधिकरणताया आधेयताया वा द्वितीयार्थतापक्षो न युज्यते ऽधिकरणतात्वस्य शक्यतावच्छेदकत्वे गौरवात् कालं पचतीति प्रयोगप्रसङ्गाच्च । कालस्यधिकरणतानिरूपकत्वस्य विक्लित्तावबाधित्वात् । तत्तत्संसर्गावच्छिन्नाधिकरणत्वादेस्तत्तद्धातुसाकाङ्क्षद्वितीयाशक्यत्वे शक्त्यानन्त्यमिति । अधिकरणस्य द्वितीयार्थत्वे तु अधिकरणत्वं जातिवत्स्वरूपेणैव द्वितीयाप्रवृत्तिनिमित्तं तच्चाखण्डोपाधिर्गगनाभावस्वरूपोऽतिरिक्तो वेत्यन्यदेतत् । अधिकरणस्य संसर्गविशेषलाभो व्युत्पत्तिवैचित्र्ये नेत्युक्तमिति न शक्त्यानन्त्यमिति तण्डुलं पचतीत्यादौ तण्डुलात्म-

धिकरणस्यावयवशिथिलसंयोगस्वरूपायां विक्लित्तौ
वायघटितसामानाधिकरण्येन तद्वच्छिन्नाधेयत्वेन
सम्बन्धेनान्वयः ग्रामं गच्छतीत्यत्र ग्रामात्मकाधि-
णस्य धात्वर्थफले संयोगे समवायावच्छिन्नाधेयत्वेन
न्धेनान्वयः घटं जानातीत्यादौ घटाद्यात्मकाधिक-
स्य धात्वर्थफले विषयत्वे स्वरूपसम्बन्धावच्छिन्नाधेय-
ा सम्बन्धेनान्वयः । बर्हिर्जुहोतीत्यत्र वह्निसंयोगानु-
ो व्यापारो जुहोतेरर्थः । वह्नेर्धातुनोक्तत्वात् वह्नि-
ान्न द्वितीया बर्हिस्वरूपाधिकरणस्य धात्वर्थफले द्र-
संयोगे समवायावच्छिन्नाधेयत्वसम्बन्धेनान्वयः । प्र-
द्रव्यप्रतियोगिकसंयोगानुकूलोव्यापारो भुजेरर्थः ।
दनं भुङ्क्ते इत्यादौ धात्वर्थफले पार्थिवद्रव्यप्रतियोगि-
संयोगे ओदनस्वरूपाधिकरणस्य समवायावच्छि-
धेयत्वसम्बन्धेनान्वयः । न च पार्थिवद्रव्यस्य फलाधि-
स्य धातुनोक्तत्वादोदनपदात्कथं द्वितीयेति वाच्यम् ।
पुना फलस्य संयोगस्य प्रतियोगित्वे विशेषणतयाऽधि-
णस्याभिधानेऽपि फलेऽधिकरणस्याधेयतया विशेषणत्वे-
नभिधानादोदनपदाद् द्वितीयोपपत्तेः । उपविशतिना
फले स्फिग्भुवोरधिकरणयोराधेयतया विशेषणत्वेना
ानात् स्फिग्भूपदाभ्यां न द्वितीया सम्भवति । एवं द्रव-
प्रतियोगिकसंयोगस्तदनुकूलव्यापारश्च सिञ्चतेरर्थः ।
ऽधिकरणस्य जलादेराधेयत्वान्वयविवक्षायां जलम-
षेञ्चतीत्यत्र जलपदाद् द्वितीयोपपत्तिः । जलादिव्या-
जन्यत्वस्य फले विवक्षायां जलेनाभिषिञ्चति रो-
ातरुमित्यादौ जलपदात् तृतीयोपपत्तिः । एवमन्यत्रा-

पि धात्वर्थफले संसर्गविशेषावच्छिन्नाधेयत्वेन सम्बन्धेनाश्रयत्वस्यान्वयः सुधीभिरूहनीयः । एवं कर्तृकर्मणोराश्रयत्वेनाविशेषेऽपि धात्वर्थस्य व्यापारास्याश्रयः कर्ता फलस्याश्रयः कर्मेति विशेषः सम्भवति । नन्वेवं गम्यर्थस्य स्पन्दस्याश्रयत्वेन कर्तृत्वमिव तादृशस्य संयोगस्याश्रयत्वेन कर्मत्वमपि चैत्रस्य स्यात् तथा च चैत्रो गमिकर्मेतिव्यवहारश्चैत्रश्चैत्रं गच्छतीति द्वितीयाप्रसङ्गश्चेति चेत् न परया कर्तृसंज्ञया कर्मसंज्ञाया बाधात्कर्मव्यवहाराप्रसक्तेः । कर्मसंज्ञाया एव द्वितीयाप्रयोजकत्वात्कर्मसंज्ञाविरहे द्वितीयाया अप्रसक्तेश्च न च कर्तृसंज्ञया कथं कर्मसंज्ञाबाध इति वाच्यम् । या परा नवकाशा चेति परिभाषणात् अत एव अपादानसंप्रदानकरणाधारणाकर्मणां कर्तुश्चोभयसंप्राप्तौ परमेव प्रवर्तते इति पठन्ति । एवं कर्मगतस्य फलस्य विवक्षायां प्रधानीभूतधात्वर्थाश्रयत्वेन कर्मणः कर्तृत्वमेव यथा पच्यते तण्डुलः स्वयमेव एवमपादानत्वस्य विभागादेर्धातुना प्राधान्येन बोधनेऽपादानस्य कर्तृत्वमेव यथा गिरिरपसरतीत्यादौ । एवं संप्रदानकरणाधिकरणानामपि कर्तृत्वमाकलनीयमित्याहुः । तार्किकास्तु आश्रयो न द्वितीयावाच्यः । आश्रयतात्वविशिष्टस्याश्रयस्य शक्यतावच्छेदकत्वे गौरवात् तेन रूपेण वाच्यत्वासम्भवात् । न चाश्रयत्वमखण्डङ्गनाभावाद्यात्मकं तस्य निरवच्छिन्नशक्यतावच्छेदकं सम्भवतीति वाच्यम् । जातीतरस्य निरवच्छिन्नावच्छेदकत्वासंभवात् । अन्यथा पृथिवत्वादिचतुष्टयान्यतमत्वस्वरूपस्याखण्डोपाधेर्द्व्यारम्भकतायाः

मवच्छेदकत्वसम्भवे गुरुणः स्पर्शवत्त्वस्यानवच्छेदकत्वं स्यात् । यद्यन्यतमत्वस्य पृथ्व्यादिभिन्नप्रतियोगिघटितस्य भेदस्य नाखण्डत्वं तदा गगनादिप्रतियोगिघटितस्य गगनाभावादेरपि नाखण्डत्वं तुल्यत्वात् । निरवच्छिन्नविषयतया गगनाभावादेरप्रतीतेः । गगनाभाव इति प्रतीतौ गगनप्रतियोगिकस्य द्रव्यादिषट्कान्योन्याभावविशिष्टस्य विषयत्वात् । न चातिरिक्तमेवाश्रयत्वं द्वितीयाप्रवृत्तिनिमित्तमिति वाच्यम् । शब्दप्रवृत्तिनिमित्तानुरोधेनातिरिक्तवस्तुकल्पनाया अन्याय्यत्वात् । अन्यथा समासप्रवृत्तिवादिनां खपुष्पादिशब्दप्रवृत्तिनिमित्ततयाऽतिरिक्तवस्तुकल्पनाप्रसङ्गः । अथ खपुष्पादिकमतिरिक्तं क्लृप्तमेवेति चेत् तर्हि अतिरिक्तखपुष्पादिसदृशस्यातिरिक्तवस्तुनो द्वितीयार्थत्वकल्पनाऽपेक्षया खपुष्पं पश्येत्यादौ कर्मत्वेन क्लृप्तस्य खपुष्पस्य लाघवात् द्वितीयार्थत्वं स्यात् । अथाधिकरणत्वाधेयत्वयोरातिरेक्यं दीधितिकृद्भिर्युक्त्या व्यवस्थापितमिति खपुष्पे न कापि तादृशी युक्तिरिति चेत् तत्राप्यधिकरणताऽऽधेयत्वयोरातिरेक्यं दीधितिकृद्भिरङ्गीकृतम् । अन्यथाऽधिकरणता इत्याकारकप्रतीत्यनुपपत्तेः प्रकारत्वानिरूपितविशेष्यतायाः प्रकारं विना प्रकारतायाश्चासिद्धेः । दर्शितप्रतीतावधिकरणत्वं विनाऽन्यस्य प्रकारत्वायोगात् । अगत्याऽधिकरणातात्वविशिष्टस्य द्वितीयाप्रवृत्तिनिमित्तत्वमिति चेन्न । लाघवादधिकरणतात्वस्यैव द्वितीयाप्रवृत्तिनिमित्तत्वाङ्गीतिसम्भवात् । न चाधिकरणतानां तत्तत्संसर्गावच्छिन्नानां द्वितीयार्थत्वे

शक्त्यानन्त्यमधिकरणतासामान्यस्य तथात्वे कालं पचतीति प्रयोगप्रसङ्ग इति पूर्वमेवोक्तमिति वाच्यम् । अधिकरणतासामान्यस्यैव द्वितीयार्थत्वात् । अधिकरणताया: स्वनिरूपिततत्तत्संसर्गावच्छिन्नाधेयत्वसम्बन्धेन फलेऽन्वयोपगमात् । कालिकविशेषणतासम्बन्धावच्छिन्नाधेयत्वस्य विक्लित्तिसम्बन्धत्वानभ्युपगमात् । न च तण्डुलं पचतीत्यत्र तण्डुलाधिकरणताया: स्वनिरूपितेन तण्डुलसामानाधिकरण्यावच्छिन्नाधेयत्वेन सम्बन्धेन फले विक्लित्तावन्वयेन सम्बन्धस्य स्वनिरूपितत्वविशेषणं गौरवमावहत्याश्रयस्य तादृशाधेयत्वसम्बन्धेनान्वये स्वनिरूपितत्वाप्रवेशान्न सम्बन्धगौरवमित्याश्रयस्यैव द्वितीयार्थत्वं युक्तमिति वाच्यम् । सम्बन्धगौरवस्याकिंचित्करत्वात् । वाच्यतावच्छेदकगौरवस्य लक्षणाज्ञाने हेतुतागौरवापादकत्वात् द्वितीयाशक्त्याधिकरणसम्बन्धीतिलक्षणाज्ञानस्याधिकरणात्वविशिष्टाधिकरणत्वावच्छिन्नाधिकरणविषयतानिरूपितसम्बन्धविषयतात्वेन हेतुत्वं वाच्यं तदपेक्षया द्वितीयाशक्त्याधिकरणतासम्बन्धीतिज्ञानस्याधिकरणतात्वावच्छिन्नाधिकरणताविषयतानिरूपितसम्बन्धविषयतात्वेन हेतुत्वं लघुभूतमिति सम्भवति लघौ गुरौ न शक्यतावच्छेदकत्वं मन्यन्ते तान्त्रिका: । नन्वाश्रयस्याधिकरणताया वाऽऽधेयत्वसम्बन्धेन फलेऽन्वयोपगमे प्रातिपदिकार्थस्याधेयत्वेन कर्मत्वाख्यसम्बन्धेन धात्वर्थफलेऽन्वयोऽस्तु तत्र द्वितीयासमभिव्याहारस्यान्त्यमित्येवास्तु किमधिकरणस्याधिकरणताया वा द्वितीयार्थत्वकल्पनया प्र-

त्युत द्वितीयान्ततिङन्तवाक्याकाङ्क्षाज्ञानघटितशाब्द-सामग्र्यां द्वितीयाजन्याया आश्रयोपस्थितेः प्रवेशेन गौरवमाधीयते इत्यनया रीत्या सर्वा विभक्तिर्निरर्थिकैव । न च तण्डुलं पचति न जलमित्यादौ जलकर्मकपाकस्याप्रसिद्धेस्तत्कर्तृत्वाभावो न प्रत्येतुं शक्यते किं तु पाके जलकर्मकत्वाभावः तत्र द्वितीयाया निरर्थकत्वे कर्मणोऽनुपस्थितेर्न जलकर्मत्वाभावप्रतीतिः सम्भवतीति वाच्यम् । तत्र कर्मत्वाख्याधेयत्वसम्बन्धेनावच्छिन्नप्रतियोगिताकस्य जलाभावस्यैव पाके प्रतीतेः आधेयत्वसम्बन्धस्य इत्यनियामकतया प्रतियोगितानवच्छेदकत्वे त्वाश्रयस्य द्वितीयार्थतावादेऽपि तत्सम्बन्धावच्छिन्नप्रतियोगिताकाश्रयाभावाप्रसिद्धेर्जलकर्मकत्वाभावप्रतीत्यनुपपत्तेः । न चाश्रयस्य द्वितीयार्थत्वे जलं न पचतीत्यत्र जलभेद आश्रये तस्य पाकेऽन्वयस्तथा च जलान्यकर्मकत्वं पाके प्रतीयत इति नानुपपत्तिरिति वाच्यम् । प्रकृत्यर्थाभावस्य प्रत्ययार्थे प्रत्ययार्थाभावस्य प्रकृत्यर्थे चान्वयस्याव्युत्पन्नत्वात् माषतण्डुलोभयं पक्त्वापि तण्डुलं न पचतीतिप्रयोगापत्तेश्च तण्डुलान्यकर्मकत्वस्य माषकर्मकपाके सत्वात् । अथ द्वितीयाया निरर्थकत्वं न युज्यते । तथा हि । कर्मतासंसर्गकबोधे द्वितीयासमभिव्याहारो न हेतुः "देवाकर्णाय संग्रामे चापिनामादिताश्शरा" इत्यादौ चापकर्तृकासादनकर्मणां कर्मतासंसर्गेणाकर्णनेऽन्वयबोधस्य विना द्वितीयां दर्शनात् । न चात्र वाक्यार्थस्य कर्मतयाऽन्वयेऽपि शब्दान्तरार्थाविशेषितप्रातिपदिकार्थस्य कर्मतासंसर्गेण बोधे द्वितीयासमभिव्याहारो हेतुः प्रकृते आसा-

दितशब्दार्थविशेषितानां शराणामाकर्णने कर्मतयाऽन्वयेऽपि न व्यभिचार इति वाच्यम् । नीलं घटं पश्येत्यादौ नीलपदार्थविशेषितस्य घटस्य कर्मतया दर्शनेऽन्वयबोधादन्वयव्यभिचारादिति द्वितीयाया आश्रयोऽर्थः तेन वाक्यार्थस्य कर्मतासंसर्गेणान्वयबोधे द्वितीयार्थस्य न विशेषतया न प्रकारतया भानमिति द्वितीयाज्ञानस्य तज्जन्योपस्थितेर्वा न व्यभिचार इति जलं न पचतीत्यत्र जलाश्रयाभावः पाके प्रतीयते इत्यनियामकसम्बन्धस्य प्रतियोगितानवच्छेदकत्वे बीजाभावादिति चेन्न । यतोऽत्यनियामकसम्बन्धो न प्रतियोगिमत्ताबुद्धिजनकः । गगनादिसंयोगस्य मूर्ते सत्वेऽपि मूर्तं गगनादिमत् गगनादि मूर्तवद्वेति प्रतीत्यनुदयात् तथा च प्रतियोगिमत्ताबुद्धजनकत्वेन व्यधिकरणसम्बन्धतुल्यो ह्यत्यनियामकसंबन्ध इति व्यधिकरणसंबन्धावच्छिन्नप्रतियोगिताकस्येव ह्यत्यनियामकसंबन्धावच्छिन्नप्रतियोगिताकस्याप्यभावस्य केवलान्वयित्वमित्येव ह्यत्यनियामकसंबन्धस्य प्रत्ययार्थाभावप्रतियोगितानवच्छेदकत्वे बीजमिति नत्वा तत्संबन्धावच्छिन्नप्रत्ययार्थाभावो न बोध्यते । यदि बोध्येत तदा ह्यत्यनियामकसंबन्धेन प्रतियोगिसंबन्धिनि यथा मूर्ते न गगनादि गगनादौ न मूर्तमित्यादि प्रयोगस्तथा तण्डुलं पचत्यपि तण्डुलं न पचतीति प्रयोगः स्यात् । न चैवं द्वितीयाया निरर्थकत्वेऽपि जलं न पचति तण्डुलं न पचतीत्यादावन्वयबोधानुपपत्तिस्तदवस्थेति वाच्यम् । आश्रयस्याधिकरणताया वा द्वितीयार्थत्ववादे द्वितीयाया निरर्थकत्ववादे च

सर्वपक्षेऽनुपपत्तेराधेयत्वस्य द्वितीयार्थत्वं युज्यत इति चेत् एवमेवैतत् अत एव परसमवेतधात्वर्थफलशालित्वं कर्मत्वमिति तान्त्रिका वदन्ति । तेषामयमाशयः । द्वितीयाकाङ्क्षाप्रयोजकतावच्छेदकधर्मवत्वं सकर्मकत्वं तादृशो धर्मो नानाविधः । पचिगम्यादीनामधिकरणाविशेषितफलव्यापारोभयवाचकत्वं तथा शब्दायत्यादेरधिकरणविशेषितफलवाचकत्वान्न द्वितीयाऽऽकाङ्क्षा रमत्यादेर्द्वितीयार्थभेदान्वययोग्यार्थकत्वविरहान्न द्वितीयाऽऽकाङ्क्षा यत्यादीनां व्यापारमात्रवाचकतया फलावाचकत्वान्न द्वितीयाऽऽकाङ्क्षा शीङ्स्थासामधिपूर्वकत्वं तथा वसस्तु उपान्वध्याङ्न्यतमपूर्वकत्वं तथा अधिकरणविशेषितफलवाचकानां शब्दायत्यादीनां द्वितीयार्थभेदान्वययोग्यार्थकानां रमत्यादीनां फलावाचकानां यत्यादीनां च कालादिवाचकशब्दोत्तरद्वितीयाभिन्नद्वितीयानिराकाङ्क्षत्वस्वरूपाकर्मकत्वेन व्यवक्रियमाणानां णिजन्तत्वं तथा न तु शाब्दिकोक्तं सकर्मकत्वमधिशीङादावकर्मकणिजन्ते चाव्याप्तेः । एवं धात्वाकाङ्क्षाद्वितीयार्थत्वं कर्मत्वं तदपि नानाविधं अधिशीङ्स्थासादीनामाधारत्वम् अकर्मकणिजन्तानामणिजन्तस्वकर्तृत्वं पचिगम्यादीनां परसमवेतधात्वर्थफलशालित्वम् इदं कर्तृत्वं च गतिबुध्यशनार्थकानां शब्दकर्मकाणां च णिजन्तानां तत्र धात्वर्थफलस्य धातुना लाभात् परसमवेतत्वं द्वितीयार्थः तंत्रापि परत्वं भेदः समवेतत्वमाधेयत्वं खण्डशो द्वितीयार्थः तत्र प्रातिपदिकार्थ आधेयत्वे निरूपितत्वसंसर्गेण भेदे च तत्तद्व्यक्तित्वावच्छिन्न-

प्रतियोगितासंबन्धेनान्वेति आधेयत्वं फले स्वरूपेण भेदो व्यापारे सामानाधिकरण्येनान्वेति । एवं ग्रामं गच्छति चैत्र इत्यादावेकग्रामवृत्तिसंयोगानुकूलाया एकग्रामवृत्तेश्च क्रियाया अनुकूलकृतिमानेकः चैत्र इति शाब्दबोधः । तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगितायाः भेदसंबन्धोपगमान्मल्लो मल्लं गच्छतीत्यादौ नान्वयबोधानुपपत्तिरन्यथा मल्लत्वावच्छिन्नप्रतियोगिताकभेदसमानाधिकरणाया मल्लगमनक्रियाया अप्रसिद्धेः शाब्दानुदयः स्यात् । न च शब्दार्थे भेदेऽन्वयितावच्छेदकावच्छिन्नप्रतियोगितैव संबन्धो व्युत्पन्न इति वाच्यम् । नञर्थभेद एव तथाव्युत्पत्तेः । अथ वा भेदे प्रातिपदिकार्थ आधेयत्वसंबन्धेनान्वेति भेदः प्रतियोगितावच्छेदकतासंबन्धेन व्यापारेऽन्वेति । दर्शितस्थले गम्यमल्लवृत्तिभेदस्य गन्तृमल्लगमने प्रतियोगितावच्छेदकतायाः सत्वात् गन्तृभेदस्य गम्ये सत्वात् नानुपपत्तिरिति । ननु भेदांशे द्वितीयाशक्तिकल्पनमप्रामाणिकं भेदानुभवस्य विवादग्रस्तत्वात् । कर्तृसंज्ञया कर्मसंज्ञाया बाधात् चैत्रश्चैत्रं गच्छतीति प्रयोगप्रसक्त्यभावादित्युक्तत्वादिति चेन्न । निषेधप्रतीत्यन्यथाऽनुपपत्तेराख्यातवादे दीधितिकृद्भिः प्रमाणत्वेनोक्तत्वात् । तथा हि खगो भूमिं गच्छति न तु स्वमिति सर्वजनीनः प्रयोगस्तत्र भूमिकर्मकगमनकर्तृत्वं स्वकर्मकगमनकर्तृत्वाभावश्चेत्युभयमथ वा स्वकर्मकत्वाभाववतो भूकर्मकगमनस्य कर्तृत्वं खगे प्रतीयते । तत्र स्वपदोत्तरद्वितीयाऽऽधेयत्वमात्रमभिधत्ते यदि तदा गमिफले संयोगे स्वाधेयत्वस्य सत्वान्न तस्य निषेधः । न वा

गमने स्वाधेयसंयोगजनकत्वस्य सत्त्वात्तस्य निषेधः । न वा स्वाधेयसंयोगजनकगमनकर्तृत्वस्य खगे सत्त्वात्तस्य निषेधो नञा बोधयितुं शक्य इति निषेधप्रतीत्यनुपपत्तिः भेदस्य द्वितीयार्थत्वे तु स्वपदार्थविहगवृत्तिभेदस्य प्रतियोगितावच्छेदकतया विहगकर्तृकगमने विरहात्तस्य निषेधो नञा बोध्यत इति निषेधप्रतीत्युपपत्तिः । एवं रूपं न गच्छतीत्यादौ रूपवृत्तित्वाभाव एव गमिफले संयोगे नञा बोध्यते रूपसमवेतसंयोगस्याप्रसिद्धेः रूपकर्मकगमनकर्तृत्वाभावस्य बोधयितुमशक्यत्वात् । न च गम्यादिसमभिव्याहृतद्वितीयायाः समवायाद्यवच्छिन्नाधेयत्वं यद्यर्थस्तदा शक्त्यानन्त्यं जातिमभावं वा न गच्छतीत्यादौ निषेधप्रतीत्यसम्भवश्च जातिनिरूपितस्याभावनिरूपितस्य च समवायावच्छिन्नाधेयत्वस्याप्रसिद्धेरिति वाच्यम् । आधेयतात्वेनाधेयतासामान्यैव द्वितीयार्थत्वेन शक्त्यानन्त्यविरहात् गम्यादिसमभिव्याहारे तु समवायावच्छिन्नाधेयत्वीयस्वरूपसंबन्धेन फले संयोगादावाधेयत्वस्यान्वयोपगमात् दर्शितस्थले जातिनिरूपितस्याभावनिरूपितस्य चाधेयत्वस्य समवायावच्छिन्नाधेयत्वीयस्वरूपसंसर्गावच्छिन्नप्रतियोगिताकभावं संयोगे बोधयता नञा निषेधप्रतीतिसम्भवाच्च । कालिकविशेषणतासंबन्धावच्छिन्नाधेयत्वीयस्वरूपसंसर्गस्य द्वितीयार्थाधेयतायां अनन्वयोप्रयोजकत्वात् कालं पचतीत्यादिको न प्रयोगः अत एव कालिकविशेषणतादिघटितव्यापकत्वार्थं पृथगनुशासनमित्यादिकं वक्ष्यते । एवं स्वावयवावच्छेद्याधिकरणतानिरूपितत्वसंबन्धेन

प्रकृत्यर्थस्य द्वितीयार्थाधेयत्वेन गम्यादिफलसंयोगाद्यन्वययोग्येऽन्वयो वक्तव्यः । स्वपदं परित्यायक्रमवयवः समवायी तेन गगनं चैत्रश्चं कालं दिशं वा गच्छतीति न प्रयोगः । न च मनः परमाणुं गच्छतीतिप्रयोगोऽनुपपन्न इति वाच्यम् । इष्टत्वात् । परमाणुमनसोर्मिथः संयोगसत्वेऽपि गगनघटयोरिव गम्यगन्तृभावानभ्युपगमात् । गगनं गच्छतीत्यादौ गगनपदं दर्शितसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावपरं तादृशाकाशाभावस्य विशेषणतया द्वितीयार्थाधेयत्वेऽन्वय इति यदि च वृक्षादौ संयोगो व्याप्यवृत्तिर्न तु तदधिकरणता तदा द्वितीयार्थाधेयत्वस्य स्वनिरूपकप्रकृत्यार्थात्मकाधिकरणावयवनिष्ठावच्छेदकतानिरूपितावच्छेद्यतासमानाधिकरणेन समवायावच्छिन्नाधेयत्वीयस्वरूपसंसर्गेण गम्यफले संयोगे त्यज्यफले विभागे चान्वयस्तेन गगनादिकं गच्छति त्यजति वेति न प्रयोगः । दर्शितसंसर्गेण द्वितीयार्थाधेयत्वस्य संयोगे विभागे च बाधात् । गगनादिकं गच्छति त्यजति वा इत्यादौ द्वितीयार्थाधेयत्वस्य दर्शितसंसर्गावच्छिन्नप्रतियोगिताकोऽभावः संयोगे विभागे चान्वेतीति तत्प्रयोगोपपत्तिः । प्राचीं गच्छतीत्यादौ दिगुपाधिमत उदयगिरिसंनिहितदेशस्य प्राचीपदेन प्रतिपादनान्नानुपपत्तिः । एवं शकुनिः खं गच्छतीत्यादौ खशब्देन वायुमण्डलस्य प्रतिपादनान्नानुपपत्तिः । एवं प्रयोक्तृपुरुषाधिष्ठितदेशावधिकगमनकर्तृदेशसमवेतपरत्वनिरूपितापरत्वस्य समानाधिकरणः संयोग आङ्पूर्वस्य गमेः फलं तादृशापरत्वस्यासमानाधि-

करणः संयोगः आङ्वर्जितस्य गमेः फलमिति तेन प्रयागात्काशीमागच्छति शक्रप्रस्थं गच्छतीति प्रयोगः प्रयागात् शक्रप्रस्थमागच्छति काशीं गच्छतीति न प्रयोगः पाटलिपुत्रस्थानामिति । ननु भेदस्य द्वितीयार्थतास्युपगमेन विहगो भूमिं गच्छति न तु खमित्यादौ निषेधप्रतीत्युपपादनेऽपि चैत्रो ग्रामं गच्छति न तु मनुष्यमित्यादौ निषेधप्रतीत्यनुपपत्तिस्तदवस्यैव गम्यर्थसंयोगे चैत्रात्मकमनुष्यसमवेतत्वस्य व्यापारे च मनुष्यान्तरवृत्तिभेदस्य प्रतियोगितावच्छेदकतायास्सत्वात् । द्वितीयार्थयोराधेयत्वभेदयोर्निषेधस्य तत्र बोधयितुमशक्यत्वात् चैत्रो मनुष्यं गच्छतीतिप्रयोगापत्तिश्च । न च तत्तन्मनुष्यनिष्ठान्योन्याभावप्रतियोगितावच्छेदकं तत्तन्मनुष्यवृत्तिसंयोगजनकत्वविशिष्टं यावत् तावदभावकूट एव नञा प्रतिपाद्यते । तथा च चैत्रात्मकमनुष्यवृत्तिसंयोगजनकत्वविशिष्टं यत् चैत्रात्मकमनुष्यवृत्तिभेदप्रतियोगितावच्छेकत्वं चैत्रकर्मकान्यदीयगमनेऽस्ति तदभावस्य नञा बोधनात् मनुष्यान्तरकर्मकचैत्रकर्तृकगमने यत्किंचिन्मनुष्यवृत्तिसंयोगजनकत्वविशिष्टस्य यत्किंचिन्मनुष्यनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य विरहेऽपि चैत्रो मनुष्यं न गच्छतीति न प्रयोगः तादृशतावदभावकूटस्य तादृशचैत्रगमनेऽसत्त्वादिति वाच्यम् । भेदस्यैव द्वितीयार्थतया तावदवच्छेदकत्वस्यानुपस्थित्या तदभावग्रहासम्भवात् तावदभावकूटस्य युगसहस्रेणापि ग्रहीतुमशक्यत्वाच्च । तस्माद् द्वितीयाया भेदार्थकत्वेऽपि निषेधप्रयोगोपपत्तिर्न सम्भवतीति चेन्न । यत-

यो ग्रामं गच्छति न तु मनुष्यमित्यादौ स्वसमवेतसंयोगजनकत्वस्वप्रवृत्तिभेदप्रतियोगितावच्छेदकत्वोभयसंबन्धावच्छिन्नप्रतियोगिताको मनुष्यसामान्याभावो गमने नञा बोध्यते । संयोगेन घटो नास्तीत्यत्र तृतीयान्तसंयोगपदमिव द्वितीया प्रतियोगितावच्छेदकसंसर्गानुवादकतयोपयुज्यते अतो न काऽप्यनुपपत्तिः । न च दर्शितसंबन्धोभयस्य वृत्त्यनियामकत्वात्कथं प्रतियोगितावच्छेदकत्वमिति वाच्यम् । यतः स एव वृत्त्यनियामकः स्वावच्छिन्नप्रतियोगिताकतयाऽभावस्य जगद्वृत्तित्वप्रयोजको यः संबन्धः प्रतियोगिवैशिष्ट्यबुद्धिं न जनयति यथा गगनादिसंयोगो गगनादिवैशिष्ट्यबुद्धिं न जनयति तदवच्छिन्नप्रतियोगिताकोऽभावो जगद्वृत्तिः प्रकृते दर्शितसंबन्धेन यस्य गमने मनुष्यात्मकप्रतियोगिवैशिष्ट्यबुद्धिजनकत्वान्न तदवच्छिन्नप्रतियोगिताको जगद्वृत्तिरिति स्वावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वप्रयोजकत्वस्वरूपस्य वृत्त्यनियामकसंबन्धप्रतियोगितानवच्छेदकत्वबीजस्य दर्शितोभयसंबन्धे विरहान्नानुपपत्तिरिति । न चैवमधिकरणं द्वितीयार्थोऽस्तु तस्यैव दर्शितोभयसंबन्धावच्छिन्नप्रतियोगिताकोऽभावः प्रकृते प्रतीयेतेति वाच्यम् । अधिकरणस्य द्वितीयार्थत्वे शक्यतावच्छेदकगौरवस्य दर्शितत्वात् । न चैवं दर्शितस्थले संसर्गानुवादकतया साधुत्वे द्वितीया सर्वत्र साधुत्वार्थमेवास्तु किमाधेयत्वादेः तस्याः शक्तिकल्पनेन ग्रामं गच्छतीत्यत्र दर्शितोभयसंबन्धेन गम्यर्थे व्यापारे प्रातिपदिकार्थस्य ग्रामस्यान्वयः तादृशसंसर्गेण प्रातिपदिकार्थप्रकारकशाब्द-

बुद्धौ द्वितीयान्तप्रातिपदिकजन्या पदार्थोपस्थितिः ग-म्यादिधातुजन्या व्यापारोपस्थितिश्च कारणं तेन ग्रामो-ग्रामात् ग्रामेण वा गच्छतीत्यादौ न तथा शाब्दबुद्धिः ग्रामोपस्थितेर्द्वितीयान्तपदाजन्यत्वाद् न वा घटपदेन लक्षणया स्यन्दोपस्थितावपि ग्रामं घट इत्यादौ तथाशा-ब्दबोधः स्यन्दोपस्थितेर्धातुजन्यत्वाभावात् । एवं सर्वत्रैव स्ववृत्तिफलसंबन्धित्वस्ववृत्तिभेदप्रतियोगितावच्छेदकत्वो-भयसंबन्धेन प्रातिपदिकार्थप्रकारकशाब्दबुद्धौ द्वितीया-न्तपदजन्योपस्थितिः सामान्यतः कारणं धातुजन्योप-स्थितिस्तु विशेषतः कारणं तेन स्यन्दिजन्योपस्थितेरहे-तुत्वाद् ग्रामं स्यन्दते इत्यादौ न तथा शाब्दबोधः । न च द-र्शितोभयसंबन्धस्य कर्मत्वात्मकत्वात्कर्मतासंसर्गेण प्राति-पदिकार्थप्रकारकशाब्दे द्वितीयान्तपदजन्योपस्थितेर्व्यभि-चारः"देवाकर्ण्य संग्रामे चापेनासादिताः शरा" इत्यादौ पूर्वमेव दर्शित इति कथमीदृशः कार्यकारणभाव इति वाच्यम् । आसादनकर्मशराणां वाक्यार्थत्वात्प्रातिपदि-कार्थत्वविरहात् व्यभिचाराप्रसक्तेः । कृदन्ततद्धितान्तस-मासानां वाक्यानां प्रातिपदिकसंज्ञाविधानाद्वाक्यार्थ-स्यापि तेषामर्थस्य प्रातिपदिकार्थत्वमक्षतमेवेति कर्मता-संसर्गेण कृदन्तादिवाक्यार्थप्रकारिका शाब्दधीः प्राति-पदिकार्थप्रकारिकैवेति पाचकमानय दात्रिं भोजय स्वे-ष्टदेवं पूजयेत्यादौ न द्वितीयान्तपदजन्योपस्थितेरन्वय-व्यभिचारः । एवं खगो भुवं गच्छति न तु स्वमित्यत्रापि दर्शितोभयसंबन्धात्मककर्मत्वसंसर्गेण भूप्रकारिकायास्त-थाविधसंसर्गावच्छिन्नप्रतियोगिताकस्वाभावप्रकारिका-

यास्तथाविधसंसर्गावच्छिन्नप्रतियोगिताकस्वाभावप्रकारिकाया एव शाब्दधियः समभ्युपगमः । वृत्त्यनियामकसंबन्धस्य प्रतियोगितावच्छेदकतायास्त्वयैवाभ्युपगमादिति चेन्न । वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वेऽपि द्वितीयायाः सार्थकत्वस्यावश्यकत्वात् चैत्रो ग्रामं गच्छति न तु मनुष्यमित्यादौ क्वचित्साधुत्वार्थत्वेऽपि सर्वत्र साधुत्वमात्रार्थतया द्वितीयायाः कर्मत्वाद्यनर्थकत्वे मानाभावात् । न च कर्मत्वाद्यर्थकत्वे मानाभावात् द्वितीयाया निरर्थकत्वमिति वाच्यम् । द्वितीया न कर्मत्ववाचिकेति ज्ञानेऽपि ग्रामं गच्छतीत्यत्र कर्मतासंसर्गेण ग्रामस्य गमनेऽन्वयप्रसङ्गात् । ग्रामीयं न कर्मत्वमिति बाधग्रहेऽपि कर्मतासंसर्गेण ग्रामस्य गमनेऽन्वयबोधप्रसङ्गाच्च । तादृशबाधस्य कर्मतासंसर्गकग्रामान्वयबुद्धावविरोधित्वात् । एवं गमनं न ग्रामकर्मताकमिति बाधकालेऽपि कर्मतासंसर्गेण ग्रामस्यान्वयबोधः स्यात् । तत्संसर्गाभाववत्ताज्ञानस्य तत्संसर्गकबुद्धावविरोधित्वात् । किं च द्वितीयाया निरर्थकत्वे कर्म गच्छतीतिप्रयोगः स्यात् । कर्मणां कर्मतासंसर्गेण ग्रामेऽन्वयबोधे निष्प्रत्यूहत्वात् । सार्थकत्वे तु न तथाप्रयोगः सम्भवति । कर्मेत्यत्र द्वितीयाया निराकाङ्क्षत्वात् । शाब्दिकमते कर्मणो द्वितीयार्थत्वात्कर्म कर्मेत्यभेदान्वयबोधो न भवति उद्देश्यतावच्छेदकविधेयतावच्छेदकयोर्भेदस्य तथान्वयबोधे तन्त्रस्य विरहान्न तथाप्रयोगः न्यायमते तु द्वितीयाया आधेयत्वमर्थः । निरूपकतया आधेयतावान् कर्मशब्दार्थः । तथा च कर्मेतिद्वितीयान्तप्रयोगे-

द्वितीयार्थाधेयत्वस्योद्देश्यत्वे कर्मशब्दार्थस्याधेयतावत-
स्तत्र विधेयत्वं न सम्भवति अभेदातिरिक्तसम्बन्धेनोद्देश्य-
विधेयभावेन प्रकृतिप्रत्ययार्थयोरन्वये प्रकृत्यर्थतावच्छे-
दकप्रत्ययार्थयोरन्योन्याभावस्य न कर्म गच्छतीति प्र-
योगः । एवमधिकरणमाश्रयं वा गच्छतीति न प्रयोगः ।
अधिकरणाश्रयशब्दयोर्निरूपकतया ऽऽधेयतावदर्थकत्वा-
त् । अधिकरणतावदर्थकत्वे तु आश्रयं श्रयन्तीतिवत् अ-
धिकरणमाश्रयं वा गच्छतीतिप्रयोगो भवत्येव । ननु
भवतु द्वितीयाया आधेयत्वमर्थः । खगो भुवं गच्छति न
तु स्वमित्यादौ निषेधप्रतीत्यनुरोधेन भेदोऽप्यर्थः स्यात् ।
तथाऽपि यन्मते वृत्त्यनियामकः सम्बन्धः प्रतियोगिताव-
च्छेदको भवति तन्मते खगो भुवमित्यादौ दर्शित-
स्थले चैत्रो ग्रामं गच्छति न तु मनुष्यमित्यादौ च कथं
निषेधप्रतीतिः प्रतियोगितावच्छेदकत्वसम्बन्धस्य वृ-
त्त्यनियामकतया तत्संसर्गावच्छिन्नप्रतियोगिताकस्य स्व-
वृत्तिभेदाभावस्याप्रसिध्या खगकर्तृकगमने तत्प्रतीतेर-
सम्भवात् । एवं मनुष्यवृत्तिभेदप्रतियोगितावच्छेदकत्वो-
भयसम्बन्धस्य वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नप्र-
तियोगिताकमनुष्यसामान्याभावस्याप्रसिध्या चैत्रकर्तृ-
कगमने तत्प्रतीतेरसम्भवादिति चेन्न तन्मतेऽपि निषेध-
प्रतीतिः सम्भवति द्वितीयार्थभेदस्य स्वसमानाधिकरणा-
फलसम्बन्धित्वप्रतियोगितावच्छेदकत्वोभयसम्बन्धाव-
च्छिन्नविशेषणतासम्बन्धेन सर्वत्र व्यापारेऽन्वयः । एवं ख-
गो भुवं गच्छति न तु स्वमित्यत्र स्ववृत्तिभेदस्य स्वसमा-
नाधिकरणसंयोगजनकत्वसम्बन्धेनावच्छिन्नया विशेष-

ण्यतया खगकर्तृके गम्यर्थव्यापारे सत्त्वेऽपि प्रतियोगिता-
वच्छेदकत्वसम्बन्धेनावच्छिन्नया विशेषणतयाऽसत्त्वात्
तादृशसंयोगजनकत्वप्रतियोगितावच्छेदकत्वोभयसम्ब-
न्धावच्छिन्नविशेषणतासंसर्गावच्छिन्नप्रतियोगिताकस्य
स्ववृत्तिभेदाभावस्य गम्यर्थव्यापारे निराबाधत्वात्स्व-
वृत्तिभेदनिषेधप्रतीत्युपपत्तिः। चैत्रो ग्रामं गच्छति न तु
मनुष्यमित्यत्र चैत्रात्मकमनुष्यवृत्तिभेदस्य प्रतियोगिता-
वच्छेदकत्वसम्बन्धेनावच्छिन्नया मनुष्यान्तरवर्तिभेदस्य
तादृशसंयोगजनकत्वसम्बन्धेनावच्छिन्नया विशेषणत-
या चैत्रकर्तृके गम्यर्थव्यापारेऽसत्त्वात् तादृशसंयोगजन-
कत्वप्रतियोगितावच्छेदकत्वोभयसम्बन्धावच्छिन्नविशे-
षणतासंसर्गावच्छिन्नप्रतियोगिताकस्य मनुष्यवृत्तिभेद-
सामान्याभावस्य तथाविधगम्यर्थव्यापारे निराबाधत्वा-
त् मनुष्यवृत्तिभेदनिषेधप्रतीत्युपपत्तिः दर्शितोभयसम्ब-
न्धावच्छिन्नविशेषणतया भूवृत्तिभेदस्य खगकर्तृकगमने
ग्रामवृत्तिभेदस्य चैत्रकर्तृकगमने सत्त्वात् तदन्वयोप-
पत्तिः विशेषणता तु तत्तदधिकरणस्वरूपातिरिक्ता वे-
त्यन्यदेतत्। उभयथाऽपि तस्या वृत्तिनियामकत्वमच्च-
तमेव। यत्तु ग्रामं गच्छतीत्यादौ परसमवेतत्वे भेदसा-
मानाधिकरण्यात्मके द्वितीयाया लक्षणा न तु भेदादौ
शक्तिर्द्वितीयान्तार्थविशेषितभेदसामानाधिकरण्यं व्यापा-
रे फले वाऽन्वेतीति शाब्दिकैरुक्तं तन्न विचारसहं तथा हि
द्वितीयाऽन्तार्थः प्रतियोगितया भेदे तत्सामानाधिकरण्यं-
व्यापारेऽन्वेतीत्ययं पक्षो न सम्भवति मल्लो मल्लं गच्छती-
त्यादावन्वयितावच्छेदकीभूतमल्लत्वावच्छिन्नप्रतियोगि-

ताकमल्लभेदस्य मल्लवृत्तिव्यापारे सामानाधिकरण्यासम्भवात् शब्दार्थीभावेऽन्वयितावच्छेदकेतरधर्मावच्छिन्नप्रतियोगितया पदार्थान्वयस्याव्युत्पन्नत्वात् । न वा द्वितीयान्तार्थ आधेयतया व्यापारवान् प्रतियोगितया भेदे तत्सामानाधिकरण्यं फलेऽन्वेतीत्यपि सम्भवति ग्रामं गच्छतीत्यत्र व्यापारवतस्तादृप्येणानुपस्थितेः । तव मते त्वाश्रयत्वेन तिङोपस्थापितस्य तस्य धात्वर्थविशेषणतया अन्वितत्वात् द्वितीयालक्ष्यप्रविष्टभेदेऽन्वयासम्भवात् विशेषणतयाऽन्वितस्यापि पदान्तरार्थान्वयोपगमे तु मृगो धावति पश्येत्यत्रापि मृगे विशेषणतयाऽन्वितस्य धावनस्य दृश्यर्थान्वयप्रसङ्गात् । भेदस्य लक्ष्यैकदेशतया तत्र पदार्थान्वयस्य सर्वमतेऽप्यव्युत्पन्नत्वाच्च । न च द्वितीयाया आश्रयो वाच्यः भेदो लक्ष्यः प्रकृत्यर्थस्य तादात्म्येनाश्रये आधेयतया भेदे आश्रय आधेयतया फले भेदः प्रतियोगितया व्यापारेऽन्वेतीति वाच्यम् । युगपद्वृत्तिद्वयविरोधात् भेदस्य लघुतया शक्यत्वोपपत्तौ गुरुतयाऽऽश्रयस्यैव लक्ष्यत्वापत्तेश्च । यद्यपि भेदे द्वितीयाया न शक्तिः किं तु द्वितीयार्थाधिकरणविशेषितफलप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दं प्रति द्वितीयान्तार्थत्वन्योन्याभावप्रतियोगितावच्छेदकव्यापारोपस्थितिर्विशेष्यतासंबन्धेन कारणमतश्चैत्रश्चैत्रं गच्छतीत्यत्र न शाब्दबोधः । तादृशव्यापारोपस्थितिविरहादिति नव्यशाब्दिकैरुक्तम् । तदप्यसत् । द्वितीयान्तं विनापि गच्छतीत्यादौ फलप्रकारतानिरूपितव्यापारविशेष्यताकशाब्दबोधोदयात् । तत्र कृत्स्नसामग्र्यां द्वितीयान्तसमभिव्याहारेऽपि फलप्रकारकशा-

बदसम्भवादीदृशकार्यकारणभावे मानाभावात्। द्वितीयान्तसमभिव्याहारात् प्रकृत्यर्थविशेषितद्वितीयार्थस्य विशेषणतया फलेऽन्वयसम्भवाद्दर्शितकार्यतावच्छेदकस्यार्थसमाजगृस्तत्वाच्च। किं च दर्शितकार्यकारणभावेन चैत्रश्चैत्रं गच्छतीत्यत्र शाब्दवारणेऽपि खगो भुवं गच्छति न तु स्वमित्यत्र निषेधप्रतीत्युपपत्तिर्न भवति। स्वकर्मकत्वाभावस्य विना भेदं प्रत्येतुमशक्यत्वादिति भेदस्य द्वितीयार्थत्वावश्यकत्वे तावतैव चैत्रश्चैत्रं गच्छतीत्यत्र चैत्रकर्मकत्वशाब्दासम्भवान्निष्प्रामाणिकतरो दर्शितोऽयं कार्यकारणभावः। यदि च पचतीत्यादौ भेदप्रतीतिर्निषेधसुखेनापि न भवतिगम्यादौ तु भुवं गच्छति न तु स्वमिति निषेधप्रतीत्यन्यथाऽनुपपत्त्या भेदप्रतीतिरावश्यकी तत्र भेदः फलविधया धात्वर्थः तत्र द्वितीयार्थस्याधेयत्वस्याऽन्वयः तस्य च प्रतियोगितावच्छेदकतया व्यापारेऽन्वयः संयोग इव भेदोऽपि फलविधया धात्वर्थ एव तावताऽपि न तु स्वमिति निषेधप्रतीत्युपपत्तिरिति भेदो धातोर्द्वितीयाया वा शक्य इत्यत्र विनिगमनाविरहः। न च भेदस्य फलविधया गम्यर्थत्वे भेदरूपफलत्वात् ग्रामत्वस्य कर्मत्वं स्यात् तथा च ग्रामत्वं गच्छतीति प्रयोगापत्तिरिति वाच्यम्। संयोगभेदोभयफलवतो गमिकर्मत्वात् तदुभयविरहेण ग्रामत्वस्य कर्मत्वायोगात्तथा प्रयोगानापत्तेः। न च चैत्रो ग्रामं गच्छति न तु मनुष्यमित्यत्र निषेधप्रतीत्यनुपपत्तिः। संयोगे चैत्रात्मकस्य भेदे चैत्रान्यमनुष्यस्याधेयतायाः सत्वात् तदभावप्रतीत्यसम्भवादिति वाच्यम्।

द्वितीयार्थाधेयत्वस्य संयोगसमानाधिकरणविशेषणता-सम्बन्धावच्छिन्नाधेयत्वीयस्वरूपसम्बन्धेन भेदेऽन्वयोपगमाद्दर्शितस्थले मनुष्यनिरूपिताधेयत्वस्य द्वितीयान्तार्थस्य दर्शितसम्बन्धावच्छिन्नप्रतियोगिताकभावं बोधयता नञा निषेधप्रतीतेर्निष्प्रत्यूहत्वात् किं च भेदस्य द्वितीयार्थत्वोपगमे द्वितीयान्तपदघटितशब्दसामग्र्यां भेदोपस्थितेः सर्वत्र प्रवेशेन भिन्नविषयकप्रत्यक्षादिप्रतिबन्धकतायां गौरवं विनिगमकाभावादानन्त्यं च स्यादिति संयोगादिव्याप्यज्यवृत्तिफलकगम्यादिधातोर्भेदार्थकत्वे तु गम्यादिघटितशाब्दसामग्र्यामेव भेदोपस्थितेः प्रवेशेन सर्वत्राप्रवेशेन लाघवं स्यादिति विभाव्यते तदा भेदो न द्वितीयाया न वा धातोरर्थः किं तु गम्यादिफले संयोगे त्यज्यादिफले विभागे द्वितीयार्थाधेयत्वस्य व्यापारवद्भेदसमानाधिकरणत्वविशिष्टसमवायावच्छिन्नाधेयत्वीयस्वरूपसंबन्धेनान्वयोऽभ्युपेयते तत एव चैत्रश्चैत्रं गच्छतीत्यत्र न शाब्दबोधः चैत्राधेयत्वस्य दर्शितसंसर्गेण संयोगेऽयोग्यत्वात् चैत्रो ग्रामं गच्छति न तु स्वं न वा मनुष्यमित्यादौ स्वाधेयत्वस्य मनुष्याधेयत्वस्य च दर्शितसंबन्धावच्छिन्नप्रतियोगिताको भावो नञा संयोगे बोध्यते अतो निषेधप्रतीतिरुपपद्यते । एवमेव चैत्रश्चैत्रं त्यजतीत्यत्र न शाब्दबोधः । न वा चैत्रो ग्रामं त्यजति न तु स्वं न वा मनुष्यमित्यत्र निषेधप्रतीत्यनुपपत्तिरितीयमभिनवा रीतिः सुधीभिराकलनीयेति । । एवं कर्माख्यातस्य फलान्वितमधिकरणत्वमर्थः । न च द्वितीयापर्यायत्वानुपपत्तिरिति वाच्यम् । अधिकरणत्वा-

धेयत्वयोः समानसंवित्संवेद्यतया कर्मत्वशब्दप्रतिपाद्यत्वात् कर्मत्वार्थकतया द्वितीयाकर्माख्यातयोः पर्यायत्वसम्भवात् । न चैवं कर्माख्याते फलान्विताधेयत्वस्यानभिधानाद् द्वितीयाप्रसङ्ग इति वाच्यम् । फलान्विताधिकरणत्वतदितरान्यतरानभिधानस्यैव द्वितीयाप्रयोजकत्वात् तयोरन्यतरबोधकशब्दासमभिव्याहृते द्वितीयार्थान्वययोग्यार्थके पदे सति द्वितीया भवतीत्यस्योक्तत्वात् । एवं चैत्रेण ग्रामो गम्यते इत्यादावेकचैत्रकर्तृकव्यापारजन्यसंयोगाधिकरणतावानेकग्राम इत्यन्वयबोधः । कर्माख्यातस्थले तृतीयार्थकर्तृत्वं व्यापारे व्यापारः फले फलं तिङर्थाधिकरणत्वे तिङर्थः प्रथमान्तार्थेऽन्वेतीति । अत्रापि चैत्रेण ग्रामो गम्यते न तु स्वात्मा न वा मनुष्य इति निषेधप्रतीत्यनुरोधेन कर्माख्यातस्य भेदोऽप्यर्थः । स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन व्यापारो भेदे भेदो विशेषणतया प्रथमान्तार्थेऽन्वेति । तथा च तादृशसंयोगाधिकरणतावान् व्यापारावच्छिन्नप्रतियोगिताकभेदवानेकग्राम इत्यन्वयबोधः । संयोगविशिष्टविशेषणता भेदस्य संसर्गः तादृशविशेषणतासंसर्गावच्छिन्नप्रतियोगिताकस्य व्यापारावच्छिन्नप्रतियोगिताकभेदाभावस्य स्वात्मनि मनुष्ये च सत्वान्निषेधप्रतीतिरुपपद्यते । अभिनवरीतौ तु संयोगफलकगम्यादिना विभागफलकत्यज्यादिना च समभिव्याहृतस्य कर्माख्यातस्यार्थोऽधिकरणत्वं व्यापारवच्छेदसमानाधिकरणत्वविशिष्टसमवायावच्छिन्नाधिकरणत्वीयस्वरूपसंबन्धेन प्रथमान्तार्थेऽन्वेति । चैत्रेण ग्रामो गम्यते न तु स्वात्मा न वा मनुष्य इत्यत्र

गम्यर्थफलसंयोगान्वितं तिङर्थाधिकरणत्वं दर्शितसंसर्गेण ग्रामे निराबाधमिति तस्य ग्रामेऽन्वयो भवति तस्य तु दर्शितसंसर्गावच्छिन्नप्रतियोगिताकोऽभावः स्वात्मनि मनुष्ये च निराबाध एव स्वात्मनि दर्शितसंसर्गेण मनुष्यान्तरे स्वरूपसंबन्धेनापि चैचकर्तृकव्यापारजन्यसंयोगाधिकरणत्वस्यासत्वादिति निषेधप्रतीत्युपपत्तिरिति । एतेन तिलं जुहोति न तु वन्हिमित्यादौ भेदस्य द्वितीयार्थत्वाभ्युपगमेऽपि निषेधप्रतीत्यनुपपत्तिः वन्हिसंयोगफलकविहितव्यापारार्थकस्य जुहोतेः फले वन्हिसंयोगे वन्हिसमवेतत्वस्य वन्हौ व्यापारवङ्गेस्य च सत्वात् न च वन्हौ जुहोतिकर्मत्वमिष्टमेवात एव "यथाविधिहुताग्नीनामि"त्यत्र हुतशब्दार्थस्य हवनकर्मणस्तादात्म्यमग्नौ प्रतीयते एवं "जटाधरस्त्वन् जुहुधीह पावकमि"त्यत्र द्वितीयान्तार्थस्य वन्हिकर्मत्वस्य जुहोत्यर्थेऽन्वय इति वन्हिकर्मत्वस्य निषेधो हवनेऽयोग्यतया न प्रत्येतुं योग्य इति वाच्यम् । हुताग्नीनामित्यत्र पावकं जुहुधीत्यत्र च संयोगफलकस्वाहाकरणकप्रक्षेपार्थकतया जुहोतेः कर्मप्रत्ययनिष्ठद्वितीयोपपत्तेः । न च जुहोतेः संयोग एव फलं न तु वन्हिसंयोग इति वाच्यम् । तथासति वन्हिं हुतं जुहोतीति प्रयोगापत्तेः एवं पार्थिवद्रव्यप्रतियोगिककण्ठसंयोगफलकव्यापारार्थकस्य भुजेर्योगे इव द्रव्यप्रतियोगिककण्ठसंयोगफलकव्यापारार्थकस्य पिबतेर्योगे ओदनं भुङ्क्ते न तु कण्ठं पयः पिबति न तु कण्ठमित्यत्रापि निषेधप्रतीत्यनुपपत्तेः भुजिपिबतिफलयोर्व्यापारवङ्गेदस्य च कण्ठे सत्वात् । एवं प्राणवियोगफलकव्यापारा-

र्थकस्य हन्तेर्योगे शत्रुं हन्ति न तु प्राणमित्यत्रापि निषेधप्रतीत्यनुपपत्तिः प्राणविभागस्वरूपफलस्य व्यापारवद्दृष्टस्य च प्राणे सत्वात् । एवं यवो हूयते न तु वन्हिः ओदनो भुज्यते न तु कण्ठः पयः पीयते न तु कण्ठः शत्रुर्हन्यते न तु प्राण इत्यादिकर्माख्यातेऽपि निषेधप्रतीत्यनुपपत्तिरिति परास्तम् । अभिनवरीत्या जुहोत्यर्थफले वन्हिसंयोगे वन्हिभेदावच्छिन्नसमवायावच्छिन्नाधेयत्वीयस्वरूपसंसर्गेण भुज्यर्थे पिबत्यर्थे च फले कण्ठभेदावच्छिन्नसमवायावच्छिन्नाधेयत्वीयस्वरूपसंसर्गेण हन्त्यर्थे फले प्राणभेदावच्छिन्नसमवायावच्छिन्नाधेयत्वीयस्वरूपसंसर्गेण द्वितीयार्थाधेयत्वस्यान्वयोपगमात् । तत्तत्संसर्गावच्छिन्नप्रतियोगिताको वन्ह्याधेयत्वस्याभावो जुहोत्यर्थफले निराबाध इति निषेधप्रतीत्युपपत्तेः दर्शितसंसर्गावच्छिन्नप्रतियोगिताकस्य कण्ठाधेयत्वाभावस्य भुज्यर्थे पिबत्यर्थे च फले सत्वात् दर्शितसंसर्गावच्छिन्नप्रतियोगिताकस्य प्राणाधेयत्वाभावस्य हन्त्यर्थफले सत्वान्निषेधप्रतीत्युपपत्तेः । एवं दर्शितसंसर्गे आधेयत्वस्थानेऽधिकरणत्वं निवेश्यं कर्माख्यातार्थाधिकरणत्वस्य फलान्वितस्य तेन संसर्गेण प्रथमान्तार्थेऽन्वयोपगमात् तत्संसर्गावच्छिन्नप्रतियोगिताकः फलान्वितस्याधिकरणत्वस्याभावो नञा प्रथमान्तार्थे बोध्यत इति निषेधप्रतीत्युपपत्तिरित्यादिकं सुधीभिः स्वयमूहनीयमिति धातोः फलव्यापारोभयवाचितावादिनां मतनिष्कर्षः । प्राञ्चस्तु धातोर्व्यापार एवार्थः फलं द्वितीयार्थः कर्माख्यातस्यापि फलमर्थः एवं द्वितीयाकर्माख्यातयोः पर्या-

यतोऽपि स्पष्टा अनभिहिते इत्यनेन फलानभिधानस्यैव द्वितीयाप्रयोजकत्वमावेद्यते सकर्मकत्वं तु पूर्ववत् द्वितीयासाकाङ्क्षत्वमेव तत्र द्वितीयाऽऽकाङ्क्षाप्रयोजको धर्मः गमित्यजिपच्यादीनां फलान्वितव्यापारानादितात्पर्यकत्वं तद्विरहादेव व्यापारमात्रार्थकानां स्यन्दियतिप्रभृतीनां न द्वितीयाऽऽकाङ्क्षा अतो ग्रामं स्यन्दते सुखं यतत इति न प्रयोगः शीङादेरधिपूर्वकत्वं वसश्चोपादिपूर्वकत्वं तथा । तत्राधिकरणत्वमाधेयत्वं वा द्वितीयार्थः पूर्वोक्ताकर्मकत्वेन व्यवच्छिद्यमानानां णिजन्तत्वं तथा तत्राणिजन्तधात्वर्थकर्तृत्वं द्वितीयार्थः गतिबुध्यशनार्थकानां शब्दकर्मकाणां च णिजन्तानां च फलमणिजन्तधात्वर्थकर्तृत्वं च द्वितीयार्थः अधिकरणविशेषितफलविशिष्टव्यापारवाचकाः शब्दायत्यादयः फलसमानाधिकरणव्यापारवाचका रमत्यादयश्चात्रापि मते तथैव तत्र फलस्य धातुनोक्तत्वादुक्तार्थानामप्रयोग इति न्यायान्न फलार्थकद्वितीयाप्रसङ्गः । ननु गमित्यज्योर्व्यापारमात्रार्थकत्वे पर्यायत्वं स्यात् न च तदर्थार्थकत्वं तत्पर्यायत्वं स्वार्थव्यापारार्थकत्वं त्यजिगम्योः परस्परं तदिष्टमेति वाच्यम् । तथा सति त्यागे वक्तव्ये गमनमिति गमने वक्तव्ये त्याग इति च प्रयोगप्रसङ्गादिति चेन्न । गमेः संयोगान्वितव्यापारानादितात्पर्यकत्वात् त्यजेर्विभागान्वितव्यापारानादितात्पर्यकत्वात्तथाप्रयोगप्रसङ्गविरहात् । न चैवं त्यजिगम्योस्तथातात्पर्यावधारणे त्यजति-गच्छतीत्यादौ त्यजनं गमनमित्यादौ च धातोर्व्यापारमात्रबोधने तात्पर्यविरहेण कर्मप्रत्ययाभावेन फलबो-

धासम्भवान्मूकत्वं स्यादिति वाच्यम् । कर्मप्रत्ययासमभिव्याहारस्थले निरूढलक्षणया विभागावच्छिन्नस्य त्यजिना संयोगावच्छिन्नस्य गमिना व्यापारस्य बोधनसम्भवात् एवं चैत्रस्तण्डुलं पचतीत्यत्र विक्लित्तिर्द्वितीयार्थः । तत्र तत्तत्संसर्गावच्छिन्नाधेयत्वेन संबन्धेन प्रकृत्यर्थस्य तण्डुलादेरन्वयः एकतण्डुलाधेयविक्लित्यनुकूलव्यापारानुकूलयत्नवानेकचैत्र इत्यन्वयबोधः । एवं ग्रामं गच्छतीत्यत्र संयोगो द्वितीयार्थः ग्रामं त्यजतीत्यत्र विभागो द्वितीयार्थः । एवमन्यत्रापि फलं द्वितीयार्थोबोध्यः तत्र द्वितीयार्थस्य संयोगस्य व्यापारेऽन्वये गम्यादिसमभिव्याहारस्य तथा विभागस्य व्यापारेऽन्वये त्यजादिसमभिव्याहारस्य च हेतुत्वात् ग्रामं स्यन्दते इत्यादौ द्वितीयार्थसंयोगविभागयोः स्यन्देनान्वय इत्याहुः । अत्र द्वितीयार्थे व्यासज्यवृत्तिसंयोगविभागादिके फले व्यापारवह्नेदावच्छिन्नसमवायावच्छिन्नाधेयत्वसम्बन्धेन प्रकृत्यर्थस्यान्वयः तेन चैत्रश्चैवं गच्छतीत्यत्र न शाब्दबोधः । दर्शितसम्बन्धेन फले संयोगादौ चैत्रस्यान्वयायोग्यत्वात् चैत्रो ग्रामं गच्छति न तु स्वं न वा मनुष्यमित्यत्र दर्शितसम्बन्धावच्छिन्नप्रतियोगिताकः स्वस्य मनुष्यस्य वा भावो नञा फले संयोगे बोध्यते अस्मिन्मते प्रकृत्यर्थाभावः प्रत्ययार्थे नञा बोध्यते । एवं तण्डुलं पचति न तु गगनमित्यत्र निषेधप्रतीतेरन्यथाऽनुपपत्तेः ग्रामो गम्यते त्यज्यते इत्यादौ कर्माख्याते दर्शितसंसर्गे आधेयत्वस्यानेऽधिकरणत्वं योजनीयं तेन संसर्गेण कर्माख्यातार्थस्य फलस्य संयोगविभागादेः ग्रामादौ प्रथमान्तार्थेऽन्वयः तेन चैत्रश्चैत्रेण

આ પુસ્તક
શ્રી જૈન મુની

गम्यते इत्यत्र न शाब्दबोधः चैत्रेण ग्रामो गम्यते न तु स्वात्मा न वा मनुष्य इत्यादौ तत्संसर्गावच्छिन्नप्रतियोगिताकस्तिङर्थसंयोगस्याभावः स्वात्मनि मनुष्ये च नञा बोध्यते इति निषेधप्रतीत्युपपत्तिः घृतं जुहोति न तु वह्निमोदनं भुङ्क्ते न तु कण्ठं शत्रुं हन्ति न तु प्राणमित्यादौ यवा हूयन्ते न तु वह्निरोदनोभुज्यते न तु कण्ठः शत्रुर्हन्यते न तु प्राण इत्यादौ द्वितीयाकर्माख्यातयोर्वह्निसंयोगः पार्थिवद्रव्यप्रतियोगिककण्ठसंयोगः प्राणात्यन्तविभागः फलमर्थः तत्र द्वितीयार्थे वह्निभेदेन कण्ठभेदेन प्राणभेदेनावच्छिन्नसमवायाच्छिन्नाधेयत्वेन सम्बन्धेन प्रकृत्यर्थस्य यथाक्रममन्वयः तत्तत्संसर्गावच्छिन्नप्रतियोगिताको वह्न्याद्यभावो वह्निसंयोगादौ नञा बोध्यते कर्माख्यातार्थस्य वह्निभेदाद्यवच्छिन्नसमवायावच्छिन्नाधिकरणत्वेन सम्बन्धेन प्रथमान्तार्थेऽन्वयः तत्संसर्गावच्छिन्नप्रतियोगिताकः कर्माख्यातार्थस्याभावः प्रथमान्तार्थे नञा बोध्यते इत्यादिकं सुधीभिरूहनीयमिति। यदा तु धातुना फलमेवाभिधीयते तदोक्तार्थानामितिन्यायाद् द्वितीया न भवति कर्मत्वभावको धातुर्भवति तत्र तिङा फलान्वितमाश्रयत्वमभिधीयते फलान्विताश्रयत्ववतः कर्मणः कर्तृत्वमेव तत्र निर्वर्त्यविकार्ययोः कर्मणोः कर्तृत्वे कर्मवद्भावो यथा ओदनः पच्यते स्वयमेव वंशश्छिद्यते स्वयमेवेत्यादौ प्राप्यकर्मणः कर्तृत्वे तु न कर्मवद्भावो यथा ग्रामो गच्छतीत्यादौ अधिकमुपरिष्टाद्यक्ष्यामोभविष्यतीति प्राचीनमतमप्यनवद्यमिति। आख्यातार्थभावनायां प्रधानीभूतायामेवक्रा-

रकाणामन्वयो न तु धात्वर्थे धात्वर्थस्यापि कारकतया भावनायामेवान्वयात् कारकाणां परार्थतया परस्परमन्वयायोगात् गुणानां च परार्थत्वादसम्बन्धः समत्वादित्युक्तत्वात्कारकं तु कर्मत्वकर्तृत्वादिकमखण्डपदार्थः अत एवाध्वर्युयजमानयोः संयमनभावनाकर्मत्वं दम्पत्योराधानभावनाकर्तृत्वं च व्यासक्तमित्युपपद्यत इति भाट्टाः । नन्वाख्यातस्य फलव्यापारोभयवाचित्वाभावादाख्यातार्थभावनायां सकर्मकत्वमनुपपन्नमिति कथं तत्र कर्मकारकान्वय इति चेन्न । यतो विवरणेनाख्यातस्य फलव्यापारोभयवाचित्वमवधार्यते पचतीत्यत्र पाकं करोत्युत्पादयति जनयति वेति उत्पत्त्यनुकूलव्यापारार्थकेन करोत्यादिना तिङो विवरणेनाख्यातस्योत्पत्त्यनुकूलव्यापारवाचित्वावगमात् उत्पत्त्यनुकूलव्यापार एव भावनाशब्दार्थः तत्रानुकूलत्वं सम्बन्धविधया तिङ्जन्यबोधे भासते उत्पत्तिव्यापारौ तिङर्थः एकपदोपात्तयोरपि धात्वर्थयोः फलव्यापारयोरिव तिङर्थधात्वोरप्युत्पत्तिव्यापारयोः परस्परान्वयो निराबाध एव तत्र तिङर्थभावनाफलोत्पत्त्यन्वितं कर्म द्विधा क्वचिद्धात्वर्थः क्वचित्प्रातिपदिकार्थः धात्वर्थो यथा पचतीत्यादौ तिङर्थभावनाफलोत्पत्तावाधाराधेयभावसंसर्गेण धात्वर्थः पाकादिरन्वेति अत एव पचतीत्यस्य पाकं करोतीतिविवरणे पाकपदात्कर्मानुवादिका द्वितीया । प्रातिपदिकार्थो यथा ओदनं पचतीत्यादौ द्वितीयार्थ ओदनान्वितमाधेयत्वं तिङर्थभावना फलोत्पत्तावन्वेति ओदनार्थो पचतीत्यादावोदनस्याधेयत्व-

संसर्गेण भावनाफलोत्पत्ताऽन्वयः यत्र प्रातिपदिकार्थेनान्वितस्य कर्मतासंसर्गेण तस्यैव वा भावनायामन्वयस्तत्र धात्वर्थस्य करणतयाऽन्वयः अत एव तादृशस्थले पाकेनौदनं भावयतीति विवरणे पाकपदात्करणत्वानुवादिका तृतीया एवं यत्र नित्यस्थले फलं न भावयत्वान्वययोग्यं तत्र नित्यतया प्राप्तकर्तव्यताको धात्वर्थ एव भावयतया भावनाकर्म । तत्र धात्वर्थविशेषणवाचिपदाद्वितीया भवति यथाऽग्निहोत्रं जुहोतीत्यादौ कर्मनामधेयाग्निहोत्रपदात् द्वितीया नीलं घटमानयतीत्यत्रानयनकर्मघटविशेषणनीलपदादिवोपपद्यते यत्र तु तिङर्थभावनाया स्वर्गादिभाव्यं विना निष्फलतया तिङर्थप्रवर्तनाया नान्वयः काम्यस्थले धात्वर्थस्य कष्टतया भाव्यत्वायोगात् तत्र स्वर्गादिभावनेनान्वितायां भावनायां प्रवर्तनाऽन्वयः यथा स्वर्गकामो यजेत विश्वजिता यजेतेत्यादौ स्वर्गकामशब्दोपात्तेनाक्षिप्तेन वा स्वर्गेण भाव्येन सकर्मिकायां भावनायां तत्र धात्वर्थस्य न कर्मतयाऽन्वयः एककर्मावरुद्धे कर्मान्तरस्यानाकाङ्क्षितत्वात् किं तु करणतया अत एव यजेतेत्यस्य यागेन स्वर्गं भावयेदिति विवरणम् एवं सति यागकरणिकायाः स्वर्गोत्पत्तेरनुकूलो व्यापारः प्रवर्तनागोचर इति वाक्यार्थबोधः तत्र प्रवर्तना शब्दधर्मः स च समवेतोऽतिरिक्तपदार्थः प्रवृत्तितात्पर्यकत्वं वेत्यन्यदेतत् । अत एव करणतयाऽन्वितस्य यागस्य विशेषणवाचिपदात्तृतीया यथा ज्योतिष्टोमेन यजेत वाजपेयेन यजेतेत्यादौ कर्मनामधेयात् ज्योतिष्टोमपदाद्वाजपेयपदाच्च तृतीया कुटिलेन दण्डेन

गां कालयेत्यत्र कालनकरणदण्डविशेषणकुटिलपदादिवोपपद्यते । नन्वेवं गोदोहेन प्रणयेत्पशुकामस्य दर्भेन्द्रियकामस्य मुञ्जयादित्यादौ प्रणयनहवनादेर्धात्वर्थस्य कथं भावनायामन्वयः न तावत्करणतया गोदोहदर्भादिना करणेनावरुद्धायां भावनायां करणान्तराकाङ्क्षाविरहात् । नापि कर्मतया पशुइन्द्रियादिना भाव्येन कर्मतयाऽवरुद्धायां कर्मान्तराकाङ्क्षाविरहात् करणत्वकर्मत्वान्यसंसर्गेण धात्वर्थस्य भावनायामन्वयायोगादिति चेत् दर्शितस्थलेऽनन्वित एव धात्वर्थः किं तु प्रकरणवशादुपस्थितस्यार्थस्यानुवादको धातुः केवलस्य प्रत्ययस्यासाधुतयाऽऽख्यातप्रयोगप्रयोजनकतयोपयुज्यते न तु तदर्थो वाक्यार्थे निविशते अत एव दर्शितस्थले प्रणयतिरनर्थक इति तेषां प्रवादस्सङ्गच्छते । अथैवं सोमेन यजेतेत्यादौ धात्वर्थस्य भावनायामन्वयो दुर्घटः सोमेन करणेनावरुद्धायां करणतयाऽन्वयायोगात् प्रवर्तनाऽन्वयानुरोधात् स्वर्गेण भाव्येन कर्मतयाऽवरुद्धायां कर्मतयाऽप्यन्वयायोगादिति चेन्न । धात्वर्थस्य यागस्य करणतयाऽन्वयात् सोमादिशब्दस्य मत्वर्थलक्षणाऽभ्युपगमेन सोमवदर्थकतया करणीभूतयागविशेषणवाचित्वात्तत्स्तुतीयोपपत्तेः । न च किमर्थं सोमादिशब्दे लक्षणाऽनन्वित एव धात्वर्थयागोऽस्त्विति वाच्यम् । तथा सति यागस्य परंपरयाऽपि प्रवर्तनागोचरत्वविरहात्तत्र प्रवृत्त्यनुपपत्तेः । नन्वेवं व्रीहीनवहन्तीत्यादौ व्रीह्यादीनां सिद्धत्वाद्भावनाफलोत्पत्तावन्वयायोगात्कथं व्रीह्यादीनां कर्मत्वमिति कथं वा व्रीह्यादिपदाद् द्वितीयेति चेत्संस्कार्यत्वमेव व्री-

ह्यादीनां कर्मत्वं संस्कारद्वाराऽवहननकरणकभावनाफलोत्पत्तावन्वयः एवमवहननेन व्रीहीन् भावयेदित्यर्थः । न चैवं सक्तून् जुहोतीत्यादौ सक्तूनां सिद्धत्वाद्भूतभाव्युपयोगविरहेण संस्कार्यत्वाभावाच्च कर्मत्वविरहात्सक्तुपदाद्द्वितीयाऽनुपपत्तिरिति वाच्यम् । करणार्थकतया द्वितीयोपपत्तेः । होमस्य भाव्यतया सक्तुकरणकत्वस्य भावनायामन्वयात् । एवं सक्तुभिर्होमं भावयेदित्यर्थः । होमस्य भाव्यत्वं फलान्तरसाधनतया पचतीत्यादौ पाकस्येव । तदुक्तं भट्टपादैः ।

भूतभाव्युपयोगं हि संस्कार्यं द्रव्यमिष्यते ।
सक्तवो नोपयोक्ष्यन्ते नोपयुक्ताश्च ते क्वचित् ॥
प्राधान्यमेव तत्रापि द्वितीया वदति स्वतः ।
विरोधात्तेन सम्बन्धी गुणाभावस्तु लक्ष्यते ॥

अस्यार्थः । भूतोपयोगस्य संस्कार्यतया भाव्यत्वं यथा बर्हिर्जुहोतीत्यादौ परिस्तरणोपयुक्तानां बर्हिषां संस्कार्यतया भाव्यत्वम् एवं होमेन बर्हिर्भावयेदित्यर्थः । भाव्युपयोगस्य संस्कार्यतया भाव्यत्वं यथा व्रीहीनवहन्तीत्यादौ भाविपुरोडाशाद्युपयोगवतां व्रीहीणां संस्कार्यतया भाव्यत्वमित्युक्तं सक्तूनां तु भूतभाव्युपयोगविरहात्संस्कार्यतया भाव्यत्वं न सम्भवति तथाभाव्यत्वमङ्गानामिव भवति तथाभाव्यत्वविरहेऽङ्गत्वविरहात्सक्तूनां प्राधान्यं प्रधानतया भाव्यत्वं द्वितीया वदति तच्च न सम्भवति [illegible]वती विरोधात्सिद्धानां सक्तूनां भाव्यत्वविरोधात्तेन सम्बन्धी करणादिर्लक्ष्यते स गुणाभावः भूतभाव्युपयोगन्य इत्यर्थः । एवमग्निहोत्रं जुहुयात्स्वर्गकाम इत्यादौ

स्वर्गभाव्यकत्वावरुद्धायां करणतयाऽन्वितस्य होमस्य विशेषणीभूतनामधेयाग्निहोत्रपदाद्द्वितीया करणानुवादिका , ननु करणमध्यस्तु द्वितीयार्थः तथाऽपि द्वितीयाया आधेयत्वमेव मुख्यार्थः एवं तृतीयायाः करणत्वं कर्तृत्वं चार्थः किमर्थमतिरिक्ताखण्डकर्मत्वकर्तृत्वकल्पनमिति चेद्भवतु द्वितीयार्थः आधेयत्वं तथापि कर्मत्वमखण्डमेव संस्कार्यं व्रीहौ भाव्ये च कर्मानुगतबुध्या कर्मपदव्यवहारेण चाखण्डकर्मत्वसिद्धिः साधारणधर्मं विना ऽनुगतबुद्धिव्यवहारयोरभावात्संस्कार्यभाव्ययोरतिरिक्तकर्मत्वं विनाऽनुगतकर्मत्वस्याभावादित्यतिरिक्ताखण्डकर्मत्वसिद्धिः " अत एवाध्वर्युयजमानौ वाचं संयच्छत" इत्यादौ वाचो भाव्यत्वसंस्कारार्थत्वयोरनुपपत्तिः संयमकरणकभावनया भाव्यत्वासम्भवात्संयमस्य संस्कारकत्वासम्भवेन संस्कार्यत्वासम्भवात् वाचंमित्यत्र सबन्धित्वं संबन्धो वा द्वितीयार्थः तथा च वाक्संबन्धिसंयमस्य भाव्यतया भावनाऽन्वयात्कर्मत्वम् इत्थं च वाक्संयमनभावनाश्रयतया कर्तृत्वेऽपि वाक्संयमेन संस्कार्यतया कर्मत्वमध्वर्युयजमानयोरुपपद्यते । एवं चौमे वसानावग्नीनादधीतामित्यादावाधानभावनाश्रयतया पत्युरेव कर्तृत्वेऽपि पत्न्या आधानकर्तृत्वं तदर्थातिरिक्तकर्तृत्वं विना नोपपद्यत इत्यतिरिक्तकर्तृत्वसिद्धिः । एवमतिरिक्तकर्मत्वमध्वर्युयजमानयोर्व्यासक्तमतिरिक्तकर्तृत्वं च दम्पत्योर्व्यासक्तमिति एवं कारकान्तरमप्यूह्यमिति भाट्टमतविवेकः । तदत्र तिङर्थभावनाफलोत्पत्त्यन्वितस्याधेयत्वस्य द्वि-

तीयार्थत्वे ओदनं पचतीतिवत् स्वर्गं यजेतेत्यादि-
प्रयोगप्रसङ्गः तण्डुलं पचति ग्रामं गच्छतीत्यादौ
तण्डुलग्रामयोर्भाव्यत्वविरहेण तण्डुलग्रामपदाभ्यां द्वि-
तीयाऽनुपपत्तिश्च न चात्र सम्बन्धः सम्बन्धयोर्वा
द्वितीयाऽर्थः तथा च तण्डुलसम्बन्धिपाकग्रामसम्बन्धिग-
मनयोरेवात्र प्रतीतिरिति वाच्यम् । तथाऽपि ग्रामो
गमिकर्मेति प्रतीतिव्यवहारयोरनुपपत्तेः । भाव्यत्वसं-
स्कार्यत्वाभ्यां विना तदभिव्यङ्ग्यस्यातिरिक्तकर्मत्वस्याप्य-
भावेन कर्मत्वप्रतीतिव्यवहारयोरुपपत्त्यसंभवादिकं चि-
न्तनीयमिति । एवं पचति चैत्रो गच्छति मैत्र इत्यादौ
प्रथमान्तार्थप्रधानकशब्दबोध उपपत्तिसिद्धः । ननु प्र-
थमान्तार्थप्राधान्यं न युज्यते तथा सति पश्य मृगो धा-
वतीत्यत्र मृगस्य धावनक्रियां प्रति प्राधान्ये तस्य दृशि-
क्रियायां कर्मतयाऽन्वयोपगमे मृगपदाद् द्वितीया स्यात्
मृगपदस्य प्रातिपदिकत्वाद् द्वितीयाप्रसक्तौ शब्दशान-
जापत्या दर्शितप्रयोग एव वा न स्यात् मृगस्य प्राधा-
न्ये गुणीभूतधावनक्रियाया दृशिक्रियायां कर्मतयाऽ-
न्वयो न सम्भवति एकत्र वाक्यार्थे प्रधानस्यापरवाक्यार्थे
विशेषणतयाऽन्वयादर्शनात् । न च दृशिक्रियायां न मृ-
गस्य न वा धावनस्यान्वय इति वाच्यम् । तथा
सति पश्य धावति मृग इत्यादौ महाभाष्याभ्युपेतस्यै-
कवाक्यत्वस्यानुपपत्तिप्रसङ्गात् । तथा हि "तिङ्स्तिङ"-
इति सूत्रं तिङन्तभिन्नपरतिङन्ते निघातस्वरं विदधा-
ति तत्र पश्य धावति मृग इत्यादौ धावतिपदे निघा-
तवारणमतिङ इतिपदस्य प्रयोजनं महाभाष्येणोक्तम् ।

तच्च पश्यधावतिपदयोरेकवाक्यताविरहे न सम्भवति प-
दविधेर्निघातस्य सामर्थ्याश्रितत्वात् "समर्थः पदविधि-
रि"ति व्यवस्थापनात् एकवाक्यतास्वरूपसामर्थ्यविरहा-
देव धावतिपदे निघाताप्रसक्तेरित्यतिङ इति पदस्य म-
हाभाष्योक्तप्रयोजनोपपत्तये पश्य धावति मृग इत्यादावे-
कवाक्यत्वमावश्यकं तच्च प्रथमान्तार्थस्य मृगस्य प्राधा-
न्ये न सम्भवतीत्युक्तं धावनक्रियायाः प्राधान्ये तु तस्या-
दृशिक्रियायां कर्मतयाऽन्वयोपपत्तेरधातुरिति पर्युदासा-
द्धातूत्तरं द्वितीयाप्रसक्तिविरहात् दृशितस्थले एकवा-
क्यत्वं निष्प्रत्यूहमिति। एवं पचन्तिकल्पं चैत्रमैत्रयज्ञद-
त्ता इत्यादौ प्रथमान्तार्थस्य कर्तुः प्राधान्ये तस्य लिङ्ग-
संख्याऽन्वयायोग्यत्वादाचार्यकल्पा द्विजा इतिवत् पच-
न्तिकल्पास्ते इति प्रयोगप्रसङ्गः क्रियायाः प्राधान्ये तु
तस्या लिङ्गसंख्यान्वयायोग्यत्वात्साधुत्वार्थं क्लीवैकवचन-
मिति न तथाप्रयोगः। एवं भावप्रधानमाख्यातमिति
निरुक्तमपि भावस्य क्रियायाः प्राधान्यमादिशतीति
तिङन्तस्थले क्रियाप्रधानक एव शाब्दबोध इति शा-
ब्दिकमतमेवयुक्तमिति चेत्। उच्यते। पश्य धावति मृग
इत्यादौ धावनकर्तृमृगस्य वाक्यार्थस्य कर्मतया दृशि-
क्रियायामन्वयोपगमादेकवाक्यत्वमुपपद्यते वाक्यस्य दृ-
श्यार्थत्वाभावात्प्रातिपदिकसंज्ञाविरहेण ततो द्वितीया-
प्रसक्त्यभावात् अत एव "देवाकर्णयसंग्रामे चापेनासादि-
ताः शराः" इत्यादौ चापकर्तृकासादनकर्मणां कर्मत-
याऽऽकर्णनक्रियायामन्वयेऽपि न द्वितीया एवं "पश्य ल-
क्ष्मण पम्पायां बकः परमधार्मिकः" इत्यादौ पम्पावृत्ति-

धार्मिकवकस्य कर्मतया दृशिक्रियायामन्वयेऽपि न द्वितीया कालय परिस्रवन्ते गाव इत्यादौ परिस्रवनकर्तृगवां कर्मतया कालनेऽन्वयेऽपि न द्वितीया दर्शि तस्यलेष्वेकवाक्यत्वं तु स्फुटमेव अतः प्रथमान्तार्थस्य प्रधानतायां नैकवाक्यताहानिरिति । यदपि पचन्तिकल्पमित्यादौ कल्पबुत्तरं बहुवचनापत्तिरित्युक्तं तदपि न सुन्दरम् । कल्पबन्तार्थस्य नामार्थसामानाधिकरण्ये हि समानलिङ्गवचनत्वं तन्त्रं प्रकृते तु न्यायमते कल्पबन्तार्थस्य सामानाधिकरण्यविरहात्साधुत्वार्थमेकवचनमेव युक्तम् । प्रत्युत कर्तुराख्यातार्थवादिनां शाब्दिकानां कल्पबन्तार्थस्य प्रथमान्तार्थे सामानाधिकरण्येनान्वयात् बृहस्पतिकल्पाः पण्डिता इतिवत् पचन्तिकल्पास्ते इति प्रयोगप्रसङ्गः । यत्तु भावप्रधानमाख्यातमिति निरुक्तं तदप्याख्यातार्थेषु संख्याकालभावनासु भावो भावना धात्वर्थं प्रति प्रधानमित्येतदर्थकमन्यथा नाम्नोऽपि व्यक्तिस्वरूपसत्वप्रधानकशाब्दबोधार्थकताया भावप्रधानमाख्यातं सत्वप्रधानानि नामानीति निरुक्तेनैव प्रतिपादनादेकतरपरिच्छेदस्य कर्तुमशक्यत्वादिति पदवाक्यरत्नाकरे गुरुचरणाः । वस्तुतस्तु पश्य धावति मृग इत्यादौ प्रथमान्तार्थमृगविशेषणतिङर्थकृतिविशेषणतया शाब्दविषयस्य धावनक्रियायाः कर्मतासंसर्गेण दृशिक्रियायां विशेषणतयाऽन्वयोपगमादर्थैकवाक्यत्वं निर्वहति । न चैकत्र वाक्यार्थे प्रधानस्यापरवाक्यार्थे विशेषणतयाऽन्वय इति नियम इति वाच्यम् । पाचक एधोदकस्योपस्कुरुते इत्यादौ क-

दन्तार्थे विशेषणतयाऽन्वितस्य पाकस्य गुणाधानरूपोपस्कारे विशेषणतयाऽन्वयदर्शनात् पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञार्थे विशेषणताऽन्वितस्य साध्यवन्हेर्धूमादित्यन्तहेत्वर्थे धूमज्ञाप्यत्वे विशेष्यतयाऽन्वयदर्शनेन वाक्यार्थे विशेषणस्यापरवाक्यार्थे विशेष्यतयैव विशेषणतयाऽप्यन्वये बाधकाभावात् विशेष्यविशेषणभावेनान्वये व्युत्पत्तिवैचित्र्यस्य तन्त्रत्वात् । किं च द्वयोरेकमिति न्यायेन शाब्दोपगमे तु स्फुटमेकवाक्यत्वं सम्भवति मृग विशेषणतिङर्थकृतौ दृश्यर्थे दर्शने धावने क्रियाया एकदैकविशेषणत्वोपगमात् धावनक्रियायाः कर्ता मृगो द्रष्टा त्वमित्याकारकशाब्दसम्भवादिति । ननु प्रथमान्तार्थस्य प्रधानतया निर्दोषत्वेऽपि प्रथमान्तार्थः प्रधानं क्रिया वा प्रधानमित्यत्र विनिगमकाभाव इति चेन्न । चैत्रः पक्त्रेत्यादौ प्रथमान्तार्थचैत्रादिप्राधान्यस्य क्लृप्तत्वाच्चैत्रः पचतीत्यादौ प्रथमान्तार्थचैत्रादिप्राधान्यस्योचितत्वात् । न च पचतीत्यादौ प्रथमान्तासमभिव्याहृते क्रियायाः प्राधान्यं क्लृप्तमिति चैत्रः पचतीत्यादावपि क्रियायाः प्राधान्यमुचितमिति वाच्यम् । पचतीत्यादावपि तिङर्थयत्नस्यैव प्राधान्यात् क्रियायाः प्राधान्यविरहात् । किं च धात्वर्थमुख्यविशेष्यकशाब्दबोधोपगमे पचन्पचतीति प्रयोगप्रसङ्गः विद्यमानपाककर्तृकर्तृको विद्यमानपाक इत्यन्वयबोधस्य निरपवादत्वात् । न च पचन्नित्यनेन विद्यमानपाककर्तुरवगमादवगतार्थस्य पुनः कथं शाब्दबोध इति वाच्यम् , विशेष्यविशेषणभावव्यत्यासेनावगतार्थस्यापि पुनः शाब्दबोधोदयात् ज्ञान

वतां ज्ञानमित्यादौ ज्ञानसंबन्धिसंबन्धवज्ज्ञानमित्यन्वयबोधदर्शनात् , प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधोपगमे तु नेदृशः प्रयोगः सम्भवति उद्देश्यतावच्छेदकविधेययोरैक्येन घटे घट इतिवन्निराकाङ्क्षत्वादिति , अपि च पाचको न पचतीत्यादौ धात्वर्थमुख्यविशेष्यकः शाब्दबोधः कथमपि न सम्भवति यदि नञो भेदोऽर्थस्तत्प्रतियोगितया पाचकस्यान्वयस्तदा पाचकभेदस्य तिङर्थकर्तर्यन्वये तादृशकर्तुः पाकेऽन्वयो न सम्भवत्ययोग्यत्वात्पाचकान्यकर्तृको विद्यमानपाक इत्यन्वयबोधासम्भवात् पाकस्य पाचककर्तृकत्वनियमात् । यदि च नञोऽत्यन्ताभावोऽर्थः तत्र पाचकविशेषितस्य तिङर्थकर्तुः प्रतियोगितयाऽन्वयस्तदाऽपि तस्य पाके नान्वयोऽयोग्यत्वात् पाचकाभिन्नकर्तृभाववान् विद्यमानपाक इत्यन्वयबोधासम्भवात् कर्तृविनाकृतायाः क्रियायाः कदाप्यसत्वात् । न च नञर्थात्यन्ताभावे पाचकाभिन्नकर्तुराधारतयाऽन्वयस्तत्रैवाभावे लडर्थवर्तमानत्वान्वयः सोऽत्यन्ताभावः प्रतियोगितासंबन्धेन पाके विशेषणतयाऽन्वेति तथा च पाचकाभिन्नकर्तृवृत्तिविद्यमानात्यन्ताभावप्रतियोगी पाक इत्यन्वयबोधसम्भवान्न शाब्दबोधस्य धात्वर्थमुख्यविशेष्यकत्वहानिरिति वाच्यम् । लडर्थवर्तमानत्वस्य नञर्थान्वये व्युत्पत्तिविरहात् विद्यमानपाके तादृशाभावप्रतियोगित्वासम्भवात् दर्शितान्वयबोधस्याप्यसम्भवात् नञर्थाभावस्य प्रतियोगिनि विशेषणाभावेनान्वयस्याव्युत्पत्तेश्च तथा सति पाकेन रक्ततादृशायां घटे रक्तो नेति प्रतीतिव्यवहारापत्तेः । घटवृत्त्यत्यन्ताभावप्र-

तियोगित्वस्य रक्ते निराबाधत्वात् अभावाव्याप्यवृत्तित्वस्यावश्यकत्वे प्रतियोगित्वस्याव्याप्यवृत्तित्वानभ्युपगमादित्यस्यान्यत्र विस्तरात् । वस्तुतस्तु नञर्थस्य प्रतियोगिनि विशेषणभावेनान्वयोपगमेऽपि न सर्वत्र शाब्दबोधस्य धात्वर्थमुख्यविशेष्यकत्वं सम्भवति जलं गगनं वा न पचतीत्यादौ जलादिकर्मकपाकाप्रसिद्धेः पाकवृत्त्यत्यन्ताभावस्य जलादिकर्मत्वे प्रतियोगिनि विशेषणभावेनान्वयोपगमे दर्शितस्थले जलकर्मत्वं पाकवृत्त्यत्यन्ताभाववदिति शाब्दबोधोपगमे शाब्दबोधस्य जलकर्मत्वमुख्यविशेष्यकतया धात्वर्थपाकमुख्यविशेष्यकत्वहानेः स्फुटत्वात् प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधोपगमे तु पाचको न पचतीत्यादौ नञर्थात्यन्ताभावे विद्यमानपाकादिकृतेस्तिङन्तार्थस्य प्रतियोग्यनुयोगिभावसम्बन्धेनान्वयस्यात्यन्ताभावस्य विशेषणतया प्रथमान्तार्थे पाचकादावन्वयस्तथा च विद्यमानपाककृत्यत्यन्ताभाववान्पाचक इत्यन्वयबोधो निष्प्रत्यूहः पाचकशब्दार्थे पाककृतिमति विशिष्टपाककृत्यत्यन्ताभावस्यान्वयबोधे बाधकाभावात् दण्डिमान् रक्तदण्डवद्भाववानितिवत् । एतेन भावनाप्रधानकः शाब्दबोध इत्यपि निरस्तम् । न पचतीत्यादावनुपपत्तेः न चात्र तिङर्थभावनाया पाकाभावः प्रतीयत इति वाच्यम् । भावनासामान्यशून्ये सुप्तादौ नायं पचतीत्यादिप्रयोगानुपपत्तेः भावनाया विरहात्तत्र पाकाभावप्रतीत्यनुपपत्तेः मृतो न पचतीत्यत्र मृते भावनासामान्यस्य विरहात्तत्र पाकाभावप्रतीतेः कथमप्युपपत्त्यसम्भवादित्यादिकं सुधीभिः स्व-

यमूह्यनीयमिति । एवं सति पच्यते तण्डुल इत्यादौ कर्माख्यातेऽपि प्रथमान्तार्थमुख्यविशेष्यक एव शाब्दबोधः फूत्कारादिव्यापारजन्यविक्लित्त्यधिकरणतावानेकतण्डुल इत्याद्याकारकः सम्भवति । ननु व्यापारस्य विक्लित्त्यादिफलविशेषणतया भानोपगमे फलत्वापत्तिः धात्वर्थविशेषणतया भासमानस्य धात्वर्थस्य फलत्वाभ्युपगमात् न च नेदं फलस्य लक्षणं किं तु धात्वर्थस्वरूपक्रियाजन्यत्वे सति धात्वर्थत्वं तथा सति व्यापारस्य विक्लित्त्यजन्यतया न फलत्वं किं तु विक्लित्तेरेव तथात्वमिति वाच्यम् । क्रियाजन्यत्वस्य फललक्षणे विशेषयितुमशक्यत्वात् जानातीत्यादौ विषयतादिफले ज्ञानाजन्येऽव्याप्यापत्तेः न च विषयता न धात्वर्थफलमिति तत्राव्याप्तिर्न दोषाय जानातेर्ज्ञानमात्रार्थकत्वात् अत एव घटं जानातीच्छति कुरुते चैत्रो मैत्रेण ज्ञायते दृश्यते क्रियते घट इत्यादौ सविषयकार्थकधातुयोगे कर्मप्रत्ययेन यथायथं विषयित्वं विषयत्वं वा बोध्यते भाक्तस्तु जानात्यादेः सकर्मकत्वव्यवहार इत्याख्यावादे दीधितिकृद्भिरुक्तमिति वाच्यम् । फलव्यापारोभयं धात्वर्थमभ्युपगच्छतां नये द्वितीयार्थस्य फलान्वयनियमात्सविषयकार्थकधातुयोगे द्वितीयाऽनुपपत्तेः द्वितीयार्थस्य व्यापारान्वयोपगमे प्राचीनमतप्रवेशेन फलस्य द्वितीयार्थतापत्त्या धात्वर्थताविरहप्रसङ्गात् । न च कर्माख्याते व्यापारस्य फलत्वमिष्टमिति वाच्यम् । व्यापारस्य फलत्वे तद्वतः कर्मत्वापत्त्या तद्वाचकपदाद् द्वितीयापत्तेः । तथा च चैत्रं पच्यते तण्डुल इत्यादिप्रयोगप्रसङ्ग इति चेत् ।

उच्यते । कर्माख्याते व्यापारस्य फलविशेषणतया भानेऽपि न फलत्वं भावाख्याते धात्वर्थविशेषणतया भासमानस्य धात्वर्थस्य सर्वाख्याते फलत्वात् दर्शितलक्षणस्य कर्माख्यातेऽपि व्यापारे विरहात् ईदृशफलवतः कर्मत्वात्तद्वाचकपदादेव द्वितीया भवतीति न दर्शितप्रयोगप्रसङ्गः । एवं सति फलस्य धातुना प्राधान्येन विवक्षायां फलवतः कर्मणः कर्तृत्वेऽपि व्यापारवतो न कर्मत्वं व्यापारस्य निरुक्तफलत्वायोगात् अतो व्यापारवच्चैत्राद्यर्थकाच्चैत्रादिपदान्न द्वितीया तण्डुलः पच्यते स्वयमेवेत्यादौ कर्मकर्त्राख्यातेन वा तण्डुलस्य फलवत्तया कर्मत्वेऽपि तण्डुलपदाद् द्वितीयार्थभेदस्यान्वयायोग्यत्वात् कर्माख्यात इव कर्मकर्त्राख्यातेऽधिकरणत्वस्याभिधानादनभिहित इति निषेधाच्च । ननु कर्मगतफलस्येव करणादिकारकगतव्यापाराणामपि धातुना प्राधान्येनाभिधानसम्भवात्करणादीनामपि कर्तृत्वं स्यादिति चेदिष्टमेव करणादीनां कर्तृत्वं साध्वसिश्छिनत्ति महिषमित्यादावन्वयव्यारम्भकसंयोगप्रतिद्वन्द्वी विभागः फलं तदनुकूलव्यापारश्च छिनत्तेरर्थः स च व्यापारः खड्गादीनामभिघातादिस्वरूपः पुरुषादीनां खड्गाद्युद्यमनादिस्वरूपः तत्र व्यापारफलयोर्जन्यजनकभावसंसर्गेणान्वयः फले तथाभूते विभागे द्वितीयार्थः सामानाधिकरण्यं सामानाधिकरण्यसंबन्धावच्छिन्नमाधेयत्वं वा महिषादिविशेषितमन्वेति न त्वत्र सामानाधिकरण्यानवच्छिन्नमाधेयत्वं द्वितीयार्थः तथा सति हि तृणं छिनत्तीति प्रयोगो न स्यात् स्याच्च दलद्वयं छिनत्तीति प्रयोगः खड्गादिगताभिघाता-

देर्धातुनाऽभिधाने खड्गादिकरणानां कर्तृत्वमेव एवं स्थाली पचतीत्यादौ विक्लित्त्यनुकूलव्यापारस्य सन्तापनादेरधिकरणगतस्य धातुनाऽभिधाने स्थाल्याद्यधिकरणानां कर्तृत्वमेव एवं गिरिरपसरतीत्यादौ विभागस्तदनुकूलव्यापारश्चापसरतेरर्थः स च व्यापारः कर्माभिमुख्यादिस्तद्रूपक्लित्त्वादिस्वरूपोपादानगतो यदि विवक्षितस्तदाऽपादानस्य कर्तृत्वमेव विभागस्वरूपफलवत्तया पुरुषस्य कर्मत्वमेवेति पुरुषमपसरति गिरिरित्यपि प्रमाणम्। यदि च स्वजन्यविभागवद्भिन्नदेशसंयोगानुकूलो व्यापारोऽपसरतेरर्थः स च व्यापारः पुरुषगतः स्पन्दादिर्यदि विवक्षितस्तदा पुरुषस्य कर्तृत्वं क्रियाजन्यविभागवत्तयाऽवधितया वा गिरेरपादानत्वं सम्भवति यदि च कर्माभिसुखवृत्तिविभागः पर्वतादिगतो विवक्षितस्तदा गिरेः कर्तृत्वमवधितया पुरुषस्यापादानत्वं सम्भवति तेन गिरेः पुरुषोऽपसरति पुरुषाद्गिरिरपसरतीति द्विविधोऽपि प्रयोगः प्रमाणं धात्वर्थान्तर्भूतकर्मकत्वाद्दर्शितार्थकोऽपसरतिरकर्मक इति नैतद्योगे द्वितीयादिकर्मप्रत्ययप्रयोगः। एवं विप्रो ददातीत्यादौ स्वत्वध्वंसस्य तद्द्वारा स्वत्वान्तरस्य वाऽनुकूलो व्यापारो ददातेरर्थः स च व्यापारोऽनुमत्यादिर्विप्रगतो यदि विवक्षितस्तदा विप्रस्य कर्तृत्वमेवेति विवक्षावशात्सर्वस्य कारकस्य कर्तृत्वमिति अत एव विवक्षातः कारकाणि भवन्तीति प्रवादः। न च प्रधानीभूतधात्वर्थव्यापारवत्त्वं कर्तृत्वं शाब्दिकस्य संमतं न तु तार्किकस्य तत्कथं न्यायमते दर्शितस्थलेषु कर्तृत्वोपपत्तिरिति वाच्यम्। प्रधानीभूतधा-

त्वर्थान्वितातिङर्थवत्वस्वरूपकर्तृत्वस्य तार्किकसंमतस्य दर्शितस्थलेष्वनपायात्। वस्तुतस्तु धातुना तिङा वा यस्य व्यापारो बोध्यते स कर्ता यथा वन्हिः पचतीत्यत्र करणगतोर्ध्वज्वलनस्वरूपव्यापारस्य धातुना बोधनाद्वन्हेः कर्तृत्वमेवं चक्षुः पश्यतीत्यत्र करणसंनिकर्षव्यापारस्य तिङा बोधनाच्चक्षुषः कर्तृत्वमेवं प्रधानीभूतधात्वर्थवत्वं प्रधानीभूतधात्वर्थान्वितातिङर्थवत्वं चोभयविधमपि कर्तृत्वं नैयायिकसंमतमेव अत एव "प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणमि"त्युपक्रमे"ऽर्थवति च प्रमाणे प्रमाता प्रमेयं प्रमितिरित्यर्थवन्ती"ति वात्स्यायनभाष्यं तत्र प्रमाता स्वतन्त्रः किं पुनः स्वातन्त्र्यं कारकफलोपभोक्तृत्वं यस्मात्कारकाणां फलेनायमभिसंबध्यते तत्समवायो वा इति वार्त्तिकम्। अत्र तात्पर्यटीकायां मिश्राः। कारकाभिधानसंनिधापितां क्रियां तदिति सर्वनाम्ना परामृशति यस्य हि व्यापारं प्राधान्येन धातुराख्यातप्रत्ययो वाऽभिधत्ते सः स्वतन्त्रः कर्ता तथा हि विक्लिद्यन्तीत्यत्र तण्डुलाद्यः कर्तारः पचन्तीत्यत्र देवदत्ताद्यः तत्कस्य हेतोरेकत्र तण्डुलादेर्व्यापार उपात्तोऽन्यत्र देवदत्तादेरिति प्राहुः। ननु कर्मगतस्यार्थस्य धातुना प्राधान्येनाभिधाने कर्मणः कर्तृत्वं स्यात् तथा च ग्रामो गच्छति घटो जानातीति प्रयोगः स्यादिति चेत् इष्ट एवायं प्रयोगः कर्मस्थभावके धातौ कर्मणः कर्तृत्वादत "एवाधिगच्छति शास्त्रार्थः स्मरति श्रद्दधातिचे"त्यादयः प्रयोगाः अत्राधिगमविषयत्वं स्मरणविषयत्वं श्रद्धाविषयत्वं व्यापारफलयोर्विशेष्यविशेषणभावव्यत्या-

सेन धातुना प्रत्याय्यते प्राधान्यवशात्क्रियाभावं प्राप्तस्य फलस्याधिकरणतया भवति शास्त्रार्थोऽधिगमादिकर्तेति प्राञ्चः । नन्वेवमधिगमादेर्विषयताविशेषणतया भासमानत्वेन फलत्वं स्यात् धात्वर्थविशेषणतया भासमानस्य धात्वर्थस्य तथात्वोपगमात् तथा अधिगमाद्यात्मकफलवतः शिष्यादेः कर्मत्वापत्त्या शिष्यमधिगच्छति शास्त्रार्थं इत्यादिप्रयोगः स्यात् न च बुभुक्षितं न प्रति भाति किंचिदिति दर्शनादियमिष्टापत्तिरिति वाच्यम् । अत्र प्रतियोगे द्वितीयाया अकर्मणि साधुत्वात् यत्तु ।

एकदेशे समूहे वा व्यापाराणां पचादयः ।
स्वभावतः प्रवर्तन्ते तुल्यं रूपं समाश्रिताः ॥

इति वाक्यपदीयवाक्यस्य एकदेशे फलमात्रे समूहे व्यापारमात्रे वा धातवः प्रवर्तन्ते तेन व्यापाराविवक्षायां फलमात्रे धातुप्रयोगः यथा पच्यते ओदनः स्वयमेव फलाविवक्षायां व्यापारमात्रे धातुप्रयोगः यथा पचति चैत्र इत्यादावित्यर्थं व्याकुर्वाणैरधिगच्छति शास्त्रार्थं इत्यादौ विषयतास्वरूपं फलमात्रं धात्वर्थः तच्च प्रधानतया क्रिया भवति विशेषणीभूतधात्वर्थस्य फलस्याभावात् फलावाचकत्वादकर्मकः कर्मस्थभावको धातुरिति नैतद्योगे द्वितीयाप्रसङ्ग इति कैश्चिदुक्तम् । तन्न विचारसहम् । विषतया स्वरूपफलमात्रार्थकतया अधिगच्छतिस्मरतिश्रद्दधातीनां पर्यायताप्रसङ्गात् । यद्यपि स्मरति शास्त्रार्थं इत्यादौ विषयतया फलमुद्बोधकादिस्मरणीयवृत्तिर्व्यापारश्च धात्वर्थः फलव्यापा योर्वैयधिकरण्याभावादकर्मकः कर्मस्थभावको

रिति नैतद्योगे द्वितीयाप्रसङ्ग इति शाब्दिकैरुक्तम्। तदपि न सुन्दरम्। तथा हि उद्बोधकादिस्तत्वेन स्मरणजनकत्वेन वा स्मृधातुना वाच्यः। नाद्यः। प्रकृते स्मरणावगमस्य सर्वजनसिद्धस्यापलापप्रसङ्गात्। न द्वितीयः। स्मरणजनकसंस्कारादेः शिष्यादिगतत्वेन कर्मस्थभावकत्वाभावप्रसङ्गात् तस्मादधिगमादिविषयतयोर्विशेष्यविशेषणभावव्यत्यासेन धातुना प्रतिपाद्यत्वेऽधिगच्छति शास्त्रार्थं इत्यादौ द्वितीयाप्रसङ्गो दुर्वार इति चेत्। अत्र गुरुचरणाः। अधिगच्छति शास्त्रार्थं इत्यादावधिगमविषयतायां विशिष्टायां धातोर्लक्षणास्वरूपा वृत्तिः न तु विशेष्यविशेषणभावव्यत्यासमात्रेण लृप्ताभ्यां खण्डशक्तिभ्यां निर्वाहः खण्डशक्तिजनितपदार्थोपस्थितेः फलविशेषणकव्यापारविशेष्यकशाब्दबोधस्य प्रयोजिकायामधिगमिधातुत्वावच्छेदेन तादृशशाब्दबोधाभावप्रयोजकीभूताभावप्रतियोगित्वस्वरूपाकाङ्क्षा बुद्धावेव सहकारित्वाद्व्युपगमात् व्यापारविशेषणकफलविशेष्यकशाब्दोपयोगिव्युत्पत्त्यन्तरस्य तत्र खण्डशक्तिजनितपदार्थोपस्थितेः सहकारित्वस्य च कल्पनमपेक्ष्य विशिष्टे वृत्तिरेव कल्पयितुमुचिता। तथा चाधिगमादिविषयतायां विशिष्टायां धात्वर्थे विशेषणीभूताधिगमादौ पदार्थैकदेशतया न द्वितीयाऽर्थान्वय इति कर्मस्थभावकानां प्रायेणाकर्मकत्वमन्यत्र भावदेशकालाध्वभ्य इति पदवाक्यरत्नाकरे प्राहुः। तदिदं शाब्दिकमतमेव परिष्करोति न्यायमते तु कर्माख्याते व्यापारविशेषणकफलविशेष्यकशाब्दबोध-

स्याभ्युपगमात्तादृशशाब्दबोधापयोगिव्युत्पत्त्यन्तरस्य तत्र खण्डशक्तिजनितपदार्थोपस्थितेः सहकारित्वस्य कल्पनमावश्यकमेव । न चात्रापि विशिष्टवृत्तिस्वीकारान्निर्वाह इति वाच्यम् । तथा सति फलावाचकत्वाद्धातोः कर्मप्रत्ययस्याख्यातादेरनुपपत्तेः । न च फलावच्छिन्नव्यापारवाचकस्येव व्यापारविशेषितफलार्थकस्यापि फलवाचकत्वमस्त्येवेति न धातोः कर्मप्रत्ययानुपपत्तिरिति वाच्यम् । तथा सति फलावच्छिन्नव्यापारवाचकतावादिनामिव व्यापारविशेषितफलार्थकतावादिनस्तवाप्येकदेशान्वयस्याभीष्टतया कर्मस्थभावेऽप्येकदेशे द्वितीयार्थान्वयसम्भवेन धातोर्विशिष्टे वृत्तिस्वीकारेऽपि द्वितीयाप्रसङ्गस्य दुर्वारताऽऽपत्तेः । तस्मात्कर्माख्यात इव कर्मस्थभावकेऽपि व्यापारफलयोर्विशेष्यविशेषणभावव्यत्यासेनान्वयेऽपि व्यापारस्य पूर्वोक्तफललक्षणस्यासत्वान्न तदतः कर्मत्वमित्यधिगमादिमतः शिष्यादेः कर्मताविरहादधिगच्छति शास्त्रार्थं इत्यादौ शिष्यादिपदान्न द्वितीयाप्रसङ्ग इति । वस्तुतस्तु कर्मस्थभावके धातोर्व्यापारमात्रमर्थः फलं तु तिङोऽर्थः अयमेव कर्माख्यातात्कर्मकर्त्राख्यातस्य विशेषः कर्माख्याते व्यापारविशेषिते फले तिङर्थस्याश्रयत्वस्यान्वयः कर्मकर्त्राख्याते तु व्यापारे तिङर्थस्य फलस्यान्वय इत्यधिगच्छति शास्त्रार्थं इत्यादौ धातोर्व्यापारमात्रार्थकतया फलावाचकत्वादकर्मकत्वमिति कर्मस्थभावकधातुयोगेन द्वितीयाप्रसङ्गः शिष्यादिगताधिगमादिसमवायित्वस्वरूपकर्तृत्वस्य संबन्धत्वेन विवक्षायां शेषिष्टो भवतीति शिष्य

धिगच्छति शास्त्रार्थं इति प्रमाणमियमभिनवा रीतिरिति। कालदेशभावाध्वनामकर्मककर्मत्वमनुशिष्टमिति कालादिवाचकपदेभ्यो द्वितीया कर्मस्थभावकयोगे भवतीत्यपि चिन्त्यमेव तथा सति मास आस्यते शिष्येणेतिवत् शास्त्रार्थेन मासोऽधिगम्यते इति कर्माख्यातप्रयोगप्रसङ्ग इति यस्य धातोः क्वचिदपि न कालादिभिन्नगतकर्मत्वबोधकप्रत्ययाकाङ्क्षा सोऽकर्मकः तत्कर्मत्वमेवानुशिष्टं कालादीनामिति कर्मस्थभावको धातुस्तु नेदृशाकर्मकः शिष्यः शास्त्रार्थमधिगच्छति शिष्येणाधिगम्यते शास्त्रार्थं इत्यादावधिगम्यादेः कर्मप्रत्ययसाकाङ्क्षत्वादिति। धातोर्व्यापारमात्रार्थकतां कर्मप्रत्ययस्य फलार्थकतां मन्वानानां प्राचां मते कर्मस्थभावकधातोर्व्यापारविशेषितं फलमर्थः आश्रयत्वं तिङर्थः न च व्यापार एव धात्वर्थः फलं तिङर्थोऽस्त्विति वाच्यम्। तथा सति कर्माख्याताविशेषप्रसङ्गात्। न च फलमात्रं धात्वर्थोऽस्त्विति वाच्यम्। तथा सत्यधिगच्छतिस्मरतिश्रद्दधातीनां पर्यायताऽऽपत्तेरधिगमाद्यवगमस्य सर्वसिद्धस्यापलापप्रसङ्गाच्च तस्माद्विशिष्टमेव फलं धात्वर्थः फलस्यात्र धातुनोक्तत्वादुक्तार्थानामप्रयोग इति न्यायान्न द्वितीयाप्रसङ्ग इत्यस्य प्रागेवोक्तत्वादिति। यत्तु सकर्मकधातूनां पच्यादीनां विक्लित्त्यादिरूपं फलमेवार्थः तिङादिप्रत्ययानां व्यापारोऽर्थ इति मन्यन्ते तेषां मण्डनमिश्राणां मते सकर्मकधातूनां कर्मस्थभावकत्वं स्पष्टमेव। नन्विदमयुक्तं विक्लित्त्यादेः पूर्वोक्तस्य फललक्षणस्यासत्वाद्धातोफलमात्रवाचकत्वानुपपत्तिरत एव फलावाचकत्वात्स-



श्री चन्द्रसागर

कर्मकत्वमप्यनुपपन्नमिति चेन्न । प्रत्ययार्थव्यधिकरणधात्वर्थत्वस्वरूपफलत्वस्य विक्लित्यादावनपायात् प्रत्ययार्थव्यापारव्यधिकरणार्थकत्वस्वरूपसकर्मकत्वस्य पच्यादिधातूनासुपपत्तेश्च । एवं च प्रत्ययार्थव्यापारव्यधिकरणधात्वर्थवत्वं कर्मत्वमिति घटं भावयतीत्यादौ णिजर्थव्यापारव्यधिकरणधात्वर्थवत्वात् घटादेः कर्मत्वमुपपन्नं यत्रापि णिजर्थान्तर्भावः तत्र शम्भुर्घटं भवतीत्यादौ तिङ्प्रत्ययस्य णिजर्थव्यापारे लक्षणया णिचोऽनुसंधानेन वा कर्मत्वोपपत्तिसम्भवात् । एवं प्रत्ययार्थव्यापारवत्वं कर्तृत्वं चैत्रः पचतीत्यादौ तिङर्थवत्वं चैत्रादेः कर्तृत्वं चैत्रः पाचयतीत्यादौ णिजर्थवत्वं कर्तृत्वं चैत्रादेरिति एवं तिङां व्यापारान्वितकालबोधकत्वमिति न तिङर्थकालान्वयानुपपत्तिः भावप्रत्ययानां घञादीनां व्यापारवाचित्वाभ्युपगमादेव ग्रामो गमनवानित्यादिप्रयोगानापत्तिः एवं तिङर्थसमवायित्वस्वरूपव्यापारस्य फलतोवच्छेदकविषयतासम्बन्धेन व्यधिकरणानां ज्ञानेच्छाकृतीनां वाचकतया जानातीच्छतिकरोतयः सकर्मकाः फलतावच्छेदकसम्बन्धेनैव व्यापारवैयधिकरण्यस्य विवक्षितत्वात् अन्यथा कालिकसम्बन्धेन फलसमानाधिकरणव्यापारवाचित्वात्सकर्मकाणामप्यकर्मकत्वापत्तिरतः एव ह्यर्थः पचिरिति महाभाष्यसूत्पत्तिविक्लित्तिस्वरूपफलद्वयं पच्यर्थतया प्रतिपादयति व्यापारस्य धात्वर्थत्वे तु अर्थः पचिरिति स्यादिति मण्डनमिश्रमतम् । अत्र शाब्दिकाः । क्रञः कृतिमात्रफलार्थकत्वे क्रियते घटः स्वयमेवेतिप्रयोगानुपपत्तिः धात्वर्थव्यापारप्रयोज्यधात्वर्थविशेषवत्व-

स्य कर्मकर्तृप्रयोगनिमित्तस्याभावात्। न च विशेषे धात्वर्थत्वं न निविशते तथा च कृतिप्रयोज्योत्पत्तिस्वरूपविशेषस्य घटे सत्वाद्दर्शितप्रयोगोपपत्तिरिति वाच्यम्। तथा सति कुलालज्ञानेच्छाप्रयोज्योत्पत्तिस्वरूपविशेषस्य घटे सत्वात् ज्ञायते घटः स्वयमेवेतिप्रयोगापत्तेः। ननु प्रत्ययार्थीभूतक्रियाकृतविशेषस्य कर्मकर्तृप्रयोगनिमित्तत्वात् ज्ञायते घटः स्वयमेवेति प्रयोगो न भवति तत्र तिङ्प्रत्ययार्थस्य विषयत्वस्य ज्ञानस्वरूपक्रियाप्रयोज्यत्वादिति कृञः कर्मकर्तरि प्रयोगो नानुपपन्न इति चेत् तथापि पचति पच्यति पक्ववानित्यादौ फूत्कारादिव्यापारप्रतीतये ऽनेकप्रत्ययानां तत्र शक्तिकल्पने शक्तावच्छेदकानन्त्यं मम तु पचिधातोरेकस्य फूत्कारादौ शक्तिकल्पने शक्तावच्छेदकलाघवमिति धातोर्व्यापारवाचित्वं युक्तं न च ह्यर्थः पचिरिति भाष्यविरोध इति वाच्यम् तस्य फलमात्रगतहित्वबोधकत्वात् न च पचिपर्यायाणां भूयसां धातूनां फूत्कारादौ शक्तिकल्पने तवापि न लाघवं किं च पचिगमिप्रभृतीनां भूयसां धातूनां व्यापारेषु शक्तिकल्पनमपेक्ष्याल्पसंख्यकानां प्रत्ययानां शक्तिकल्पने शक्तावच्छेदकलाघवमिति धातोर्व्यापारवाचित्वं न युक्तमिति वाच्यम्। व्यापारस्य प्रत्ययार्थत्ववादे गच्छतीत्यादौ फूत्कारादेरप्रतीत्या तद्बोधं प्रति पचिसमभिव्याहारस्य हेतुतायाः स्वीकारे तदपेक्षया तत्र पचिधातोः शक्तिकल्पनाया एव युक्तत्वादिति सर्वधातूनां व्यापारवाचित्वमेवोचितमिति। ननु स्थाली पचतीत्यत्र पचिसमभिव्याहारेऽपि यथाऽविवक्षावशाद्योग्यताविरहा-

ङा फूत्कारादेर्न प्रतीतिस्तथा गच्छतीत्यादावपि न तत्प्रतीतिरिति समभिव्याहारज्ञानस्य न हेतुत्वमिति चेत् तथापि धातोर्व्यापारावाचित्वं न युज्यते तथा सति गुरुः शिष्येण वाचयतीत्यादौ णिजर्थस्य प्रयोजकव्यापारस्य तिङर्थप्रयोज्यव्यापारं प्रति प्रकृत्यर्थत्वादप्राधान्यापत्तिराख्यातार्थव्यापारानन्वयिनि गुरौ संख्यान्वयासम्भवादनभिधानेन गुरुपदात्तृतीयाऽऽपत्तिः शिष्यव्यापारस्य तिङभिधानात् शिष्यपदाच्च प्रथमापत्तिश्चेति वदन्ति । तच्चिन्त्यं णिजर्थस्याप्राधान्येऽपि णिजर्थवत्वं कर्तृत्वं गुरावुचितमेव । वस्तुतस्तु णिच्प्रकृतिकतिङ एव प्रयोजकव्यापारोऽर्थः सच धात्वर्थफले परम्परासंबन्धेनान्वेति तृतीयार्थप्रयोज्यव्यापारः साक्षादन्वेति तथा च गुरुः शिष्येण वाचयतीत्यत्र गुरौ प्रयोजकव्यापाररूपकर्तृत्वस्य कर्तृसंख्यायाश्च तिङाऽभिधानाद्गुरुरित्यत्र न तृतीयाप्रसक्तिः शिष्ये प्रयोज्यव्यापाररूपकर्तृत्वस्य कर्तृसंख्यायाश्च तिङाऽनभिधानान्न तृतीयाऽनुपपत्तिरिति मण्डनमिश्रमते शाब्दिकोक्तौ यद्यपि न दोषस्तथापि धातोर्व्यापारावाचकत्वं न युज्यते तथा सति प्रस्थं गच्छति तिर्यक् गच्छतीत्यादौ प्रस्थतादिपदार्थानां कर्मविशेषाणां धात्वर्थविशेषणत्वानुपपत्तिप्रसङ्गः फले संयोगादौ तादात्म्येनान्वयायोग्यत्वात् । न चात्र प्रस्थतादीनां तिङर्थव्यापारे तादात्म्येनान्वयाद्विशेषणत्वमिति वाच्यम् तथापि प्रस्थं गम्यते ग्राम इत्यादौ संयोगात्मकफलान्विते तिङर्थाश्रयत्वेऽभेदान्वयायोग्यत्वादनुपपत्तितादवस्थ्यात् किं च वृक्षाद्भूतलं गम्यते इत्यादौ पञ्चम्यर्थविभागस्य ज-

नकतासम्बन्धेन संयोगात्मकफले तदन्विताश्रयत्वस्वरूपतिङर्थे वा अन्वयायोग्यत्वात् पञ्चम्यनुपपत्तिः न चात्र विभागस्य स्वजनकक्रियाजन्यत्वस्वरूपपरम्परासंबन्धेन संयोगेऽन्वयोपगमान्नानुपपत्तिरिति वाच्यम् तथा सति वृक्षात्संयुज्यते इत्यादौ पञ्चमीप्रयोगापत्तेः. पञ्चम्यर्थविभागस्य दर्शितसंसर्गेण संयोगेऽन्वयसम्भवात् एवं कर्मस्थभावके कर्माख्याताविशेषप्रसङ्गोऽपि कर्माख्यातकर्मकर्त्राख्यातयोरुभयत्रैव फलान्वयत्वबोधसम्भवादिति । नन्वेवं पचत्योदन इति प्रयोगः स्यात् कर्मगतव्यापारस्य धातुना तिङा वा प्रतिपादने कर्मणा ओदनादेः कर्तृतोपपत्तिरिति चेन्न कर्मवद्भावस्यानुशासनसिद्धत्वात् तथा च सूत्रं "कर्मवत्कर्मणा तुल्यक्रिय" इति कर्मणाऽधिकरणेन तुल्या क्रिया नाम प्रधानीभूतधात्वर्थस्तदन्वितातिङर्थो वेति स कर्मवद्भवतीति तदर्थः कर्मात्मकाधिकरणेन तुल्यत्वोक्त्या क्रियायाः कर्मवृत्तित्वं प्रतीयते कर्मवृत्तिक्रियाश्रयः कर्मैव भवतीति कर्तृत्वं कर्मणः स्फुटमिति तत्र कर्मवद्भावोक्त्या कर्मकर्तृकतिङ्समभिव्याहारे धातोर्यक्चिणात्मनेपदादीनि कर्माख्यातविहितानि भवन्ति तेन पच्यते अपाचि वा ओदनः स्वयमेवेत्येव प्रमाणं न तु पचत्यपाक्षीदिति । शाब्दिकास्तु यत्र भावे लकारस्तत्र कर्मकार्यं द्वितीया स्यादिति तण्डुलं पच्यते इति प्रयोगप्रङ्गः तद्वारणार्थं "लिङ्याशिष्यङ" तिसूत्रे संयुक्तलकारद्वयनिर्देशः कल्प्यः तत्राद्यं लकारमनुवर्त्य कर्मवदित्यनुशासनं लकाराभिहितः कर्ता कर्मवृत्तिक्रियः कर्मवद्भवतीत्यर्थकं तथा च लकारेण कर्तुरनभिधाने क-

र्मकार्यं न प्रसज्यते इति तात्पर्यार्थः कल्प्यः तेन भावाख्याते लकारेण कर्तुरनभिधानान्न द्वितीयाप्रसङ्गः अत एव कृत्यक्तखलर्थप्रत्यया अपि कर्मकर्तरि न भवन्ति स्वयमेव भेत्तव्यं भिन्नं सुभिदं वा कुसूलेनेत्यादौ भावार्थकानां तेषां योगे कर्तरि तृतीयैव प्रमाणमिति वदन्ति। तदाकरसिद्धान्तानभिज्ञानविजृम्भितम् । तथा हि । भावे चाकर्मकेभ्य इत्यनुशासने अकर्मकपदस्य कर्मप्रत्ययनिराकाङ्क्षपरत्वमावश्यकमन्यथा सकर्मकपच्यादितो भावप्रत्ययानुपपत्तेस्तथा च कर्मप्रत्ययनिराकाङ्क्षेभ्यो धातुभ्यो भावप्रत्ययस्य विधानेन कर्मप्रत्ययस्यासाधुत्वादेव भावाख्याते न द्वितीयादिकर्मप्रसङ्गः एवं भावकर्मणोर्विहितानां कृत्यक्तखलर्थानां कर्तरि विधेरभावादेवाप्रसङ्गः अत एव "तयोरेव कृत्यक्तखलर्था" इतिसूत्रे तच्छब्देन भावकर्मणोः परामर्शे एवकारेण कर्तृव्यवच्छेद इति संयुक्तलकारद्वयनिर्देशकल्पनया मुनिवचनविपर्यसनपातकेनालमिति एवं च लकारेण कर्तुरनभिधाने कर्मकार्यं न प्रसज्यत इति तात्पर्यार्थोऽपि न युक्तस्तथा सति कर्माख्याते कर्तुरनभिधानाद्यक्चिणात्मनेपदादिकर्मकार्यस्याप्रसङ्गादिति । नन्वेवमधिगच्छति शास्त्रार्थ इत्यादौ प्राप्यकर्मणि कर्तरि कर्मवद्भावः स्यादिति चेन्न निर्वर्त्यविकार्ययोः कर्मणोः कर्तृत्वे कर्मवद्भावस्याभ्युपगमेन प्राप्यस्य कर्मणस्तथात्वे तन्निषेधात् ननु प्राप्यस्य तथात्वे कथं तन्निषेध इति चेदत्र आचार्योपदेश एव शरणमिति । ननु किमिदं निर्वर्त्यं विकार्यं प्राप्यं च कर्मेति चेत् । अत्र गुरुचरणाः । क्रियाजन्यफलोत्पत्तिस्वरू-

पेण धात्वर्थेन संसृज्यते यत्तन्निर्वर्त्यं नाम यथा कटं करोतीत्यत्र उत्पादनार्थककरोत्यर्थफलीभूतोत्पत्तिसंसृष्टः कटः । यत्तु विकारैर्धात्वर्थफलैः संसृज्यते तद्विकार्यं विकारस्तु क्वचिन्नाशस्वरूपः । यथा शत्रुं छिनत्तीत्यत्र नाशनार्थकच्छिंस्यर्थफलीभूतनाशसंसृष्टः शत्रुः क्वचिन्नाशानुकूलोऽवयवविघटनादिः यथा तृणं छिनत्ति कुसूलं भिनत्तीत्यादौ धात्वर्थफलेनावयवविघटनेन परम्परया संसृष्टस्तृणकुसूलादिः उत्पत्तिविकारभिन्नेन फलेन संसृष्टं तु प्राप्यं कर्म यथा ग्रामं गच्छति रूपं पश्यतीत्यादौ संयोगविषयत्वादिफलेन संसृष्टं ग्रामरूपादि । वाक्यपदीये हरिस्तु निर्वर्त्यादिलक्षणमाह यथा वा ।

सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी ।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ॥
प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा ।

यस्य कर्मणः प्रकृतिः समवायिकारणं परिणामितया उपादानतया नोपादीयते तत् क्रियाजन्यफलोत्पत्तिमन्निर्वर्त्यं कर्म यथा करोतीत्यत्र कटः नह्यत्र सदपि कटोपादानं वीरणं तथात्वेन विवक्ष्यते यत्र च प्रकृतिरुपादीयते तद्विकार्यं यथा कनकं कुण्डलं करोतीत्यत्र कुण्डलम् अचोपादानत्वविषयतया कनकस्य साध्यत्वविषयतया संसर्गेण फलेन वा कुण्डलस्य क्वजर्थयत्नेऽन्वयः विकार्ये कर्मणि प्रकृतिर्द्विविधा क्वचिदुपादेयतुल्यकालिकी सती यथा वीरणं कटं करोति कनकं कुण्डलं करोति वेणुदलं वक्रं करोतीत्यादौ वीरणकनकवेणुदलादिकाः क्वचिदविद्यमाना कार्यासंसृष्टत्तिस्तदसमान-

लकी यथा काष्ठं भस्म करोति तण्डुलानोदनं पच-
्यादौ काष्ठतण्डुलादिका अत्र हि ध्वंस उत्पत्तिश्च
ः विक्लित्तिरुत्पत्तिश्च पचेः फलविधयाऽर्थः काष्ठ-
स्य भस्मोत्पत्तेश्चानुकूलतया कृञोऽर्थे व्यापारे त-
ुविक्लित्तेरोदनोत्पत्तेश्चानुकूलतया पच्यर्थे व्यापा-
्वयः प्रकृतित्वं तु काष्ठादेः परम्परया व्यावहारि-
मति कारिकार्थः । पक्षान्तरमप्याह हरिरेव कै-
दिति ।

निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम् ।
यदसज्जायते यद्वा जन्मना यत्प्रकाश्यते ॥
तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम् ।
प्रकृत्युच्छेदसंभूतं किंचित्काष्ठादिभस्मवत् ॥
किंचिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ।

र्वमसतः सत्त्वं स्वाधिकरणसमयध्वंसानधिकरण-
यसम्बन्ध उत्पत्तिरिति तार्किकवैशेषिकादयः । का-
लविशेषणतासामान्येन न कोऽपि कुत्रापि समये सं-
दैशिकसंसर्गभेदेन कालिकविशेषणतायां भेदाव-
त्वात् अत एव गवावयवावच्छेदेन संयोगसंसर्गाव-
च्छिन्नकालिकसंसर्गेणावच्छिन्नप्रतियोगिताको गवा-
भो गोमत्यपि काले विद्यते न तु समवायावच्छिन्न-
लकसंसर्गेण इदानीमवयवेषु समवायेन गौर्न तु
गेनेति प्रतीत्या कालेऽवयवावच्छेदेन गवाभावस्य
ीकरणात् अवयवेषु संयोगेन गवाभावस्य व्या-
त्तितया कालावच्छिन्नत्वासम्भवात् अत एव चिरा-
तस्याप्यनुभवयागादेर्भावनासुकृतादिसंसर्गावच्छि-

न्नकालिकविशेषणतया स्मरणस्वर्गाद्यव्यवहितपूर्वक्षण-वृत्तित्वेन तत्तत्कारणत्वं सूपपादं तथा च ध्वंसप्रागभा-वस्वरूपदैशिकसंसर्गावच्छिन्नकालिकेन पूर्वस्मिन्नेव काले प्रत्यासीदति सर्वो भाव इति नाभावो विद्यते सतः ज-न्मना तु प्रकाश एव प्रकाशस्तु समवायतादात्म्याद्यव-च्छिन्नकालिकविशेषणतया प्रथमः समवायसंबन्ध इति कापिलाः । तदाह हरिरेव ।

उत्पत्तेः प्रागसद्भावो बुध्यवस्थानिबन्धनः ।
अविशिष्टः सताऽन्येन कर्ता भवति जन्मनः ॥
कारणं कार्यभावेन यदा वा व्यवतिष्ठते ।
कार्यं शब्दं तदा लब्ध्वा कार्यत्वेनोपजायते ॥
यथाहेः कुटिलीभावो व्यग्राणां वा समग्रता ।
तथैव जन्मरूपत्वं सतामेके प्रचक्षते ॥

इति एवं चासतः सत्त्वं सतः प्रकाशो वा भवत्युत्प-त्तिर्धात्वर्थफलीभूतोत्पत्तिमन्निर्वर्त्यं कर्म यथा घटं करो-त्योदनं पचतीत्यादौ घटौदनादि यथा वा कनकं कु-ण्डलं करोतीत्यादौ कुण्डलादि धात्वर्थफलीभूतविका-रसंसृष्टं विकार्यं कर्म यथा शत्रुं छिनत्ति काष्ठं छिनत्ती-त्यादौ शत्रुकाष्ठादि यथा वा कनकं कुण्डलं करोति त-ण्डुलानोदनं पचतीत्यादौ कनककुण्डलादि प्रकृत्युच्छे-देत्यादिकारिका तु प्रकृत्युच्छेदेन संभूतं कर्म निर्वर्त्य सा प्रकृतिर्विकार्यं कर्म यथा काष्ठोच्छेदसंभूतं भस्म निर्वर्त्य-मित्यतः काष्ठं विकार्यं सत्यामेव यस्यां प्रकृतौ गुणो-वृत्तिः धातुना प्रत्याय्यते साऽपि प्रकृतिर्द्वितीयं विकार्यं कर्म यथा सदेव शलाकास्वरूपं कनकमवयवानामनार-

श्मकसंयोगमात्रविरोधिना कर्मणा भुग्नत्वगुणोत्पत्त्या विकार्यं कुण्डलपदस्य हि भुग्नं द्रव्यमर्थः धात्वर्थोत्पत्तिस्तु भुग्नत्व एवार्थतोऽन्वेति इत्यर्थिका । प्राप्यलक्षणमप्याह हरिरेव ।

क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ॥

तत्र क्रियाकृतविशेषा उत्पत्तिक्षयोपचयाद्यो भावविकारा एव गणनीया इति पदवाक्यरत्नाकरे प्राहुः । एवं सकलकर्मगतफलान्वयि आधेयत्वं द्वितीयार्थः । ननु भेदस्य द्वितीयार्थतावादे आत्मानमात्मना वेत्सीत्यादौ कथं भेदान्वयः कर्तृकर्मणोर्युष्मदात्मशब्दार्थयोरैक्यात् शाब्दिकमते परया कर्तृसंज्ञया कर्मसंज्ञाया बाधाद्दर्शितस्थले द्वितीयाया एवानुपपत्तिः न च युष्मदात्मशब्दार्थयोरवच्छेदकभेदेन भेदोपगमादैक्येऽपि कर्तृत्वकर्मत्वोपपत्तिरिति वाच्यम् । अवच्छेदकभेदेन भेदोपगमस्य बाह्यमतप्रवेशप्रसङ्गकत्वात् तथा सति चैत्रश्चैत्रं गच्छतीति प्रयोगप्रसङ्गाच्च तथाचोभयमते प्रकृतानुपपत्तिरिति चेत् अत्राहुः युष्मदस्मत्पदवत् द्वितीयाया भेदाधेयत्वयोरेकशक्तिस्वीकारेण दर्शितस्थले भेदबाधे आधेयत्वमात्रलक्षणाभ्युपगमाद्विधेः श्येनादौ बलवदनिष्टाननुबन्धित्वबाधे दृष्टसाधनत्वमात्रार्थकत्वादिव वाक्यार्थबोधोपपत्तिरिति तार्किकमतमुत्कर्षमावहति । ननु लौकिकवाक्ये विभक्तेर्न लक्षणा तथा हि वार्त्तिकम् ।

सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम् ।
प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा ॥

इति सुपां तिङां च यथानुशासनं तत्रानुशासनानि नियमपर्यवसायीनि स च नियम एकवचनमेवैकत्वं द्विवचनमेव द्वित्वं द्वितीयैव कर्मत्वं बोधयतीत्याकारकस्तेन द्वितीयाभिन्ने कर्मत्वबोधकत्वाभावः पर्यवस्यति। नन्वेवं द्वितीया कर्मत्वमपहाय क्वाचिद्गगनादिकमपि बोधयेत्तावताऽयुक्तानियमभङ्गादित्यतः पक्षान्तरमाह नियमः प्रकृतेषु वेति तथा च द्वितीया कर्मत्वमेव बोधयतीति नियमः स च यावन्नोऽनुशासनसिद्धा द्वितीयार्थास्तेभ्यः प्रकृतेभ्योऽन्यमर्थं द्वितीया न प्रतिपादयतीत्यर्थतः पर्यवसित इति तस्य वार्त्तिकस्य विवरणम् अतः कथमननुशिष्टे आधेयत्वमात्रे द्वितीया साधुरिति चेन्न। विभक्तिः प्रकृतेष्वेवेति नियमशरीरस्यासम्भवदुक्तिकत्वात् तत्र हि विभक्तित्वावच्छेदेन प्रकृतभिन्नाप्रतिपादकत्वं च प्रतीयते। ननु विभक्तित्वसामानाधिकरण्येन उद्देश्यतावच्छेदकावच्छेदेनोभयभागान्वययोग्यत्व एवैवकारस्य साधुत्वादन्यथा विभक्तिः कर्मण्येव शब्दो वाचक एवेति प्रयोगप्रसङ्गात्। न च विभक्तित्वावच्छेदेन प्रकृतप्रतिपादकत्वमस्ति विशेषणवाचकसमभिव्याहृतानामव्ययनिपातसमभिव्याहृतानां च सुपां निरर्थकत्वदर्शनात् प्रातिपदिकार्थः सत्ता सुपामर्थ इत्यस्य प्रागेव निराकृतत्वात्। ननु भवतु तर्हि विभक्तिः प्रकृतेष्विति परिसंख्या विभक्तिः प्रकृतेतरन्न प्रतिपादयतीत्येवंरूपा तस्य एव च्छन्दसि प्रतिप्रसवः सुपां सुबिति तेन स्वर्गकामो यजेतेत्यत्र भट्टमते प्रथमा यागभावनाकर्मत्वं लक्षणया स्वर्गस्य प्रतिपादयन्ती नाननुशिष्टविषया एवं सम्पन्ना व्रीहय

इत्यादौ जातिगतैकत्वबोधकत्वं बहुवचनस्य जात्याख्यायामित्यनुशासनप्रतिप्रसूतमेवेति नास्त्यनुशिष्टे विभक्तीनां लक्षणाऽपीति चेत् तर्हि नानार्थवद् द्वितीयाया आधेयत्वे भेदे च शक्तिर्व्युत्पत्तिवैचित्र्येणैकपदोपात्तयोरप्याधेयत्वभेदयोर्यौगपद्येनान्वयबुध्यनुप्रवेश औत्सर्गिकः यत्र कर्तृकर्मणोर्भिन्नयोः फलं कर्तृभिन्ने वा फलं तत्र भेदाधेयत्वयोर्व्यापारफलान्वयबुद्धिर्द्वितीयया जन्यते यत्र तु फलस्य व्यापाराधिकरणमात्रगतत्वं तत्र भेदान्वयबाधादाधेयत्वमात्रं द्वितीया शक्त्या प्रतिपादयति न चानुशासनव्यत्यय इति बाधसापेक्षवृत्तित्वेनात्राभिधायामेव लक्षणाव्यपदेशः बाधश्चात्र फलाधिकरणयत्किंचिद्भिन्ने व्यापारो न वर्तत इति सामान्याकारेणोपतिष्ठते । तेन व्यासज्यवृत्तिसंयोगादिफलकधात्वर्थे भेदाधेयत्वयोरुभयोर्नियमेनान्वय इति चैत्रश्चैत्रं गच्छतीति न प्रयोग इति वदन्ति । इदमत्र चिन्त्यं-यथा हि भेदस्य बाधे आधेयत्वमात्रं द्वितीया शक्त्या प्रतिपादयति तथा आधेयत्वस्य बाधे भेदमात्रमपि बोधयेत्तथा च गगनं पचति पश्यति वेति प्रयोगप्रसङ्गः विक्लित्तौ लौकिकविषयतायां च फले गगनाधेयत्वस्य बाधेऽपि गगनवृत्तिभेदस्य प्रतियोगितावच्छेदकतायाः फूत्कारादौ चाक्षुषे च व्यापारे निष्प्रत्यूहं विद्यमानत्वात् तस्मात्पुष्पवन्तपदवत् द्वितीयाया भेदाधेयत्वयोः शक्तिराधेयत्वमात्रे लक्षणेत्ययमेव पक्षः साधीयान् न च दर्शितवार्त्तिकविरोध इति वाच्यं नियमः प्रकृतेषु वेति वाकारेणानास्थायाः स्वय-

मेव वार्त्तिकेन सूचनात् अन्यथा तिङामपि लक्षणा न स्यात् न चेष्टापत्तिरिति वाच्यं घटो नश्यतीत्यादौ शाब्दिकमते आश्रयस्य दार्शनिकमते यत्नादेस्तिङर्थस्य बाधेन प्रतियोगिनि प्रतियोगित्वे वा तिङो लक्षणां विनाऽन्वयानुपपत्तिप्रसङ्गात्। ननु भवतु तिङो लक्षणा सुपोऽननुशिष्टेऽर्थे लक्षणायाः क्वाप्यदर्शनाद् द्वितीयाया नाधेयत्वमात्रे लक्षणा युज्यते अत एव सुब्विभक्तौ न लक्षणेति प्रवादः न च विषयत्वे द्वितीयाया लक्षणादर्शनान्नेदं युक्तम् अत एव घटं जानातीत्यादावन्वयबोधोपपत्तिरिति वाच्यं विषयत्वे द्वितीयाया लक्षणाभ्युपगमस्य निराकरिष्यमाणत्वात् घटं जानातीत्यादावन्वयबोधोपपत्तेर्वक्ष्यमाणत्वाच्चेति चेन्न द्वितीयाया लक्षणाभ्युपगस्यावश्यकत्वात् तथा हि शास्त्रवान् हिनस्ति हन्ति पुण्यं पुराकृतमित्यादौ नाशानुकूलव्यापारार्थकस्य हिंसेर्हन्तेश्च फले नाशे शास्त्रवाधेयत्वस्य पुण्याधेयत्वस्य च बाधात् द्वितीयायाः प्रतियोगिनि प्रतियोगित्वे वा यथादर्शनं लक्षणाभ्युपगम आवश्यकः अन्यथाऽन्वयबोधानुपपत्तेरिति। यदि च दर्शितस्थले प्रतियोगिता नाशश्च द्वयं धात्वर्थः तिङर्थो व्यापारः शास्त्रवाधेयत्वस्य पुण्याधेयत्वस्य च फले प्रतियोगितायां सा नाशे सोऽनुकूलतया तिङर्थे व्यापारे विशेषणीभूयान्वेतीत्यन्यत्रापि धातोः शब्दान्तरस्य वाऽर्थकल्पनयोपपत्तौ द्वितीयाया लक्षणा न क्वाप्यभ्युपेयते इति तदा पूर्वोक्ताभिनवरीत्या आधेयत्वमात्रं द्वितीयार्थस्तावतैव स्वं जानातीत्यादावन्वयबोधोपपत्तिः व्यासज्यवृत्तिसंयोगादौ गम्यादिफले द्वितो-

यार्थाधेयत्वस्य व्युत्पत्तिवैचित्र्येण व्यापारवच्छेदावच्छिन्न-समवायावच्छिन्नाधेयत्वीयस्वरूपसंबन्धेनान्वयोपगमादेव चैत्रश्चैत्रं गच्छतीत्यादिप्रयोगवारणं सम्भवतीत्यादिकं पूर्वोक्तं स्मर्तव्यमिति । के चित्तु ज्ञाधातोर्बुद्धिः फलं तदनुकूलो मनोयोगादिव्यापारश्चार्थः बुध्यन्वयिनि विषयत्वे द्वितीया लाक्षणिकी विषये न कर्मसंज्ञामपेक्षते इति स्वं जानातीत्यत्र कर्तरि विषये द्वितीया नानुपपन्ना नियमः प्रकृतेषु वेति वार्तिकं तु निरूढलक्षणामेव नियमयति इयं तु स्वारसिकी विभक्तेर्विषयत्वादौ लक्षणा एवं स्वं हिनस्तीत्यत्र द्वितीया प्रतियोगित्वं ध्वंसात्मकफलान्वितं लक्षयति न चापेक्षते प्रतियोगिनि कर्मसंज्ञामाकडारादिति परया कर्तृसंज्ञया तदपवादात् अभिधेयमात्रं न द्वितीया प्रतिपादयति भेदमादायैव तस्या स्वाभिधेयप्रतिपादकत्वादतश्चैत्रश्चैत्रं गच्छतीति न प्रयोगः नचैवं स्वारसिकलक्षणाया अनियम्यत्वे द्वितीया लक्षणया गगनमपि बोधयेदिति वाच्यम् । स्वारसिकलक्षणायामप्यप्रयोगस्य बाधकत्वात् । यदाहुः ।

निरूढा लक्षणाः काश्चित्प्रसिद्धा अभिधानवत् ।
क्रियन्ते सांप्रतं काश्चित्काश्चिन्नैव त्वशक्तितः ॥

इति अशक्तिरप्रयोगः प्रयोजनराहित्यं च उदाहरन्ति रूपं वस्त्वमिति नेयार्थतापायमेव यदप्रयोगप्रतिबन्धकतालक्षणात्वं प्रयोजनराहित्यमपि प्रयोजनप्रतिपत्तिप्रयोजकतावच्छेदकवल्लक्षणात्वविरह इति तत्र तत्रावगन्तव्यमिति वदन्ति । तदपि न सुन्दरं तथा हि प्रयोजनवत्वे सति प्रयोगराहित्यं स्वारसिकलक्षणायां न

दोषः जान्हव्यादिशब्दे लक्षणाप्रयोगविरहेऽपि जान्हव्यां घोष इत्याद्याधुनिकप्रयोगे जान्हव्यादिशब्दे लक्षणायाः सर्वसंमतत्वात्। किं चापूर्वचैत्रादिशब्दस्य शिष्टत्वं प्राक्षत्वादिचैत्रादिधर्मप्रतिपत्तये चैत्रादिसम्बन्धिनि लक्षणा न स्यात् प्रयोगविरहात् प्रयोजनराहित्यस्यावश्यकतया दोषत्वे सति प्रयोगराहित्यस्य दोषत्वे मानाभावश्च रूपं वस्त्रमित्यादौ लक्षणायाः प्रयोजनराहित्येनैव दृष्टत्वात्। अत एव काव्यप्रकाशे प्रयोजनराहित्यं नेयार्थतेति व्यवस्थापितम्। एवं ज्ञाधातोर्बुद्धिः फलं तदनुकूलो मनोयोगादिर्व्यापारश्चार्थ इत्यपि न विचारसहं तथा सति भगवान् सर्वं जानातीत्यादावनन्वयापत्तेः भगवज्ज्ञानस्य नित्यस्यानुकूलतासंसर्गेण व्यापारेऽन्वयायोगात् मनोयोगादिव्यापारस्य भगवति बाधितत्वाच्च एतेनाकथितं चेति सूत्रेण विषये कर्मसंज्ञा ज्ञाप्यते इति विषयत्वमनुशासनसिद्धमेव द्वितीयार्थः विषयत्वस्वरूपकर्मत्वं न भेदघटितमिति स्वं जानातीत्यादौ नानुपपत्तिरित्यपि निरस्तम्। अत्र विषयत्वं फलान्वयि व्यापारान्वयि वा आद्ये बुद्धेः फलत्वासम्भवस्योक्तत्वात् जानात्यादियोगे द्वितीयाऽनुपपत्तिः अन्त्ये यत्नस्वरूपव्यापारान्वयसम्भवात् यतेर्योगेऽपि द्वितीयाप्रसङ्गः यदपि कर्मस्थभावके निर्वर्त्यविकार्ययोः कर्मवद्भावस्यातिदेशेन द्वितीयानिषेधः प्राप्यकर्मणि तदतिदेशविरहेण न द्वितीयानिषेध इति कर्मस्थभावके स्वं जानातीत्यादावाधेयत्वमात्रार्थिका द्वितीया नानुपपन्नेति तदपि चिन्त्यं यत्र हि फलं धातुना तिङा वा प्राधान्येन प्रत्याय्यते तत्र

ज्ञापकादेवमवधार्यते ज्ञापकं तु "तथा युक्तं चानीप्सितमि"ति सूत्रं तथा ईप्सिततमवद् युक्तं धात्वर्थः फलेनेति शेषः यद्वा तथा धात्वर्थफलेन युक्तमित्यर्थश्चोऽप्यर्थः ईदृशमनीप्सितमपि कर्मसंज्ञकमित्यर्थकम् । अनीप्सितं द्वेधा ईप्सायाः अविषयो द्वेषस्य विषयश्च । आद्यं यथा ग्रामं गच्छंस्तृणं स्पृशतीत्यत्र तृणमीप्सायाः अविषयः द्वितीयं यथा रथ्यां गच्छंश्चाण्डालं स्पृशतीत्यत्र स्पर्शवत्तया द्वेषस्य विषयश्चाण्डालः इत्थं चाप्यर्थकेन चकारेणेप्सिततमानीप्सितयोरिवच्चणात्तथा युक्तं कर्मेति ज्ञाप्यते इति धात्वर्थफलवत्त्वं सूत्रादेवावधारितमिति । गां दोग्धि दुग्धमित्यादौ गवादेः कर्मत्वोपपत्तये "अकथितं च" इत्यनुशासनं अपादानादिभिरकथितं कारकं कर्मसंज्ञं भवतीत्यर्थकम् । अत्र केचित् दुहेः स्यन्दनं तदनुकूलो व्यापारश्चार्थः स्यन्दनत्वं द्रवत्वजन्यतावच्छेदिका चौरादिक्रियावृत्तिर्जातिः गोपदोत्तरद्वितीयाया विभागोऽर्थः दुग्धपदोत्तरद्वितीयाया आधेयत्वमर्थः द्वितीयार्थविभागस्यानुकूलतया स्यन्देनास्य तथैव व्यापारेऽन्वयः एवं गोविभागानुकूलदुग्धवृत्तिस्यन्दनानुकूलव्यापारानुकूलकृतिमान्गोपाल इत्याकारको गां दोग्धि दुग्धं गोपाल इत्यत्र शाब्दबोधः न च विभागः पञ्चम्यर्थत्वादपादानत्वमेव तद्विवक्षायामपादानाद्यकथनासम्भवात् कर्मत्वानुपपत्त्या द्वितीयाऽनुपपत्तिरिति वाच्यम् । प्रधानीभूतधात्वर्थान्वयिनो विभागस्यापादानत्वरूपत्वात् वृक्षात्पर्णं पततीत्यादौ प्रधाने स्यन्दे पतत्यर्थे पञ्चम्यर्थविभागस्यान्वयात् प्रकृते स्यन्दनानुकूलव्यापारे वि-

भागस्यान्वयाप्रसक्तेरपादानत्वासम्भवाद्दर्शितानुशासनेन द्वितीयोपपत्तेः द्वियोयार्थविभागस्य स्यन्दनादिरूपे फलेऽन्वयसम्भवात्। यद्वा विभागः स्यन्दनं व्यापारश्च त्रयो दुहेरर्थाः तत्र फलविशेषणफलवतोऽपि कर्मत्वमिति ज्ञापयितुमकथितं चेत्यनुशासनं तेन प्रधानीभूतधात्वर्थे साक्षाद्विशेषणस्य धात्वर्थविशेषणीभूतधात्वर्थे विशेषणस्यापि धात्वर्थस्य फलत्वमवसीयते धात्वर्थविशेषणीभूत[illegible]त्वर्थत्वमेव फलत्वं न तु प्रथमधात्वर्थे प्रधानीभूतत्वं प्रवेशनीयं प्रयोजनविरहादिति स्यन्दनादिविशेषणीभूतविभागादेरपि फलतया तद्वतो गवादेः कर्मत्वं स्पष्टमित्यत्रापि गवादिपदोत्तरद्वितीयाया आधेयत्वमर्थस्तच्च स्यन्दनविशेषणे विभागेऽन्वेति अत्रापि परसमवेतत्वं द्वितीयार्थस्तेन पयोनिष्ठविभागजनकस्यन्दनस्य पयोनिष्ठत्वेऽपि यवः पयो दोग्धीति न प्रयोग इत्याहुः। विभागः स्यन्दनं व्यापारश्च त्रयो दुहेरर्थास्तत्र विभागं प्रति प्रधानतया स्यन्दनं व्यापारस्तद्वत्तया दुग्धादेः कर्तृत्वात्कर्तृसंज्ञापवादार्थम् अथ वा विभागावच्छिन्नस्यन्दनं व्यापारश्च दुहेरर्थस्तत्र फलैकदेशविभागादिमत्वं कर्मत्वं ज्ञापयितुमकथितं चेत्यनुशासनं विशेषानुशासनेन फलैकदेशे विभागादौ द्वितीयार्थाधेयत्वस्यान्वय इत्यपि वदन्ति। शाब्दिकास्तु गवादेः सम्बन्धविवक्षायां शेषे षष्ठी प्रसक्ता रजकस्य वस्त्रं ददातीतिवत् तदपवादायाकथितं चेत्यनुशासनं तथा च गवादिपदोत्तरद्वितीयायाः सम्बन्धोऽर्थः स विभागे स चौरवृत्तिस्यन्दने तच्च गोपालव्यापारेऽन्वेति एवं गां दोग्धि दुग्धं गोपाल इ-

भवतीति कश्चित् । गुरुचरणास्तु विभागानुत्पादः कर्मानुत्पादो व्यापारश्च रुधेरर्थाः व्रजं गां रुणद्धि गोपालः इत्यादौ द्वितीययोराधेयत्वार्थः विभागानुत्पादः कर्मानुत्पादे स व्यापारे योगक्षेमसाधारण्या जनकतया ऽन्वेति एवं व्रजवृत्तिविभागानुत्पादस्य प्रयोजको यो गोवृत्तिकर्मानुत्पादस्तत्प्रयोजकव्यापारानुकूलकृतिमान् गोपाल इ याकारकः शाब्दबोधः व्रजपदोत्तरद्वितीयाया भेदोऽप्यर्थः तेन गां गां रुणद्धि इति न प्रयोग इति पदवाक्यरत्नाकरे प्राहुः । युज्यते चैतत् विभागानुत्पादस्वरूपगुणाफलवत्तया व्रजस्य गौणकर्मत्वोपपत्तेरिति । व्यापारप्रयोज्यविशेषज्ञानेच्छा पृच्छतेरर्थस्तत्र व्यापारो विशेषज्ञानमिच्छा चेति त्रिषु खण्डशक्तिः जानपदं पन्थानं पृच्छति पान्थ इत्यादौ पथिपदोत्तराया विषयतासम्बन्धावच्छिन्नं जानपदोत्तराया व्यापारीयतत्संसर्गावच्छिन्नं द्वितीयाया आधेयत्वमर्थः जानपदविशेषितंव्यापारे पथि विशेषितं विशेषज्ञाने आधेयत्वमन्वेति व्यापारस्य प्रयोज्यतया विशेषज्ञाने तस्योद्देश्यितया इच्छायामन्वयः एवं जानपदवृत्तिव्यापारप्रयोज्यस्य विषतया पथि वृत्तेर्विशेषज्ञानस्योद्देश्यिनी या इच्छा तदाश्रयः पान्थ इत्याकारकः शाब्दबोधः इच्छायां ज्ञाप्यमानत्वं विशेषणं तेन प्रतिवादिनो विशेषणं तेन प्रतिवादिनो विशेषणं शास्त्रार्थं ज्ञातुमिच्छति जिज्ञासाबोधककिंशब्दघटितवाक्यादिव्यापारमप्रयुञ्जाने जनेऽयं प्रतिवादिनं शास्त्रार्थं पृच्छतीति न प्रयोगः प्रयोगस्तु प्रतिवादिनोऽदृष्टं शास्त्रार्थं ज्ञातुमिच्छत्ययमित्युपपद्यते ।

यत्तु जिज्ञासाबोधकशब्द. पृच्छतेरर्थः जिज्ञासाविषयितया बोधे बोधोऽनुकूलतया शब्देऽन्वेति गुरुं धर्मं पृच्छति शिष्य इत्यादौ गुरुसमवेतत्वं द्वितीयान्तार्थो बोधे धर्मविषयित्वं द्वितीयान्तार्थो जिज्ञासायामन्वेतीति तच्चिन्त्यं बोधस्य जिज्ञासाविशेष्यतया अन्वयोपगमे प्रधानफलत्वापत्त्या तद्गतो गुरोः प्रधानकर्मत्वापत्तेस्तथा सति गुरुर्धर्मं पृच्छ्यत इत्यादिप्रयोगानुपपत्तेर्वक्ष्यमाणत्वात् न च शब्दत्वेन शब्दः पृच्छ्यर्थो न निविशते तथा सत्यभिनयादिना जिज्ञासां ज्ञापयति जनोऽयं पृच्छतीति प्रयोगानुपपत्तेः शाब्दिकास्तु उत्तरमनुशास्त्यत्वमनुयोगश्च पृच्छतेरर्थः विशेषबोधकवचनमुत्तरं जिज्ञासितत्वेन प्रतिपत्तिरनुशास्यता किंशब्दघटितवाक्यादिरनुयोगः जानपदं पन्थानं पृच्छति पथिक इत्यत्र परम्परया जानपदाश्रितमुत्तरं पथिविषयिण्यां जिज्ञासितत्वप्रतिपत्तौ सा च कः पन्था इति वाक्यादिस्वरूपे पथिकानुयोगे जनकतयाऽन्वेतीत्याहुः । अन्ये तु उत्तरमनुयोगश्च पृच्छतेरर्थः उत्तरं कृतिद्वाराधिकरणेन ज्ञानद्वारा विषयेण चोभयविधेन कर्मणाऽन्वितमिति वदन्ति । तदुभयमते जानपदं पन्थानं पृच्छति पथिकः जानपदः पथिकाय न किंचिदुत्तरयतीत्यादौ गतिश्चिन्त्या । रक्ताशोकं क्वशोदरी क्व नु गता त्यक्त्वाऽनुरक्तं जनमित्यादावनुयोगदर्शनाद्रक्ताशोकं क्वशोदरीगतदेशं पृच्छति कामुक इत्यादौ रक्ताशोकव्यापारस्य प्रयोज्यत्वस्वरूपव्यधिकरणसंसर्गस्य क्वशोदरीगतदेशीयविशेषज्ञाने इच्छयाऽवगाहनसम्भवात् पृच्छतेर्दर्शितव्यापारादितिरार्थक-

त्वेनान्वयानुपपत्तिरिति । भिक्षतिरपि द्विकर्मकः न च भिक्षतेर्याचति समानार्थकत्वादेव द्विकर्मकत्वे सिद्धे दुहियाचिरुधिपृच्छिभिक्षिचिञामित्यत्र पृथगुपादानमनर्थकमिति वाच्यम् । पर्यायग्रहणार्थमेव पृथगुपादानात् तेन राजानं कनकं प्रार्थयते भिक्षुरित्यादिप्रयोगोऽपि साधुरिति । यत्तु भिक्षतेर्ज्ञानेच्छास्वरूपयाचत्यर्थार्थकत्वेऽपि याचतेरर्थान्तरेऽपि द्विकर्मकत्वज्ञापनार्थं पृथगुपादानं तथा हि याचमानःशिवं सुरानित्यादौ व्यापारजन्यत्वप्रकारिकेच्छा याचतेरर्थः इच्छायां प्रधानकर्मकल्याणान्वितद्वितीयार्थविषयितायाः अन्वयः व्यापारे च सुराधेयत्वस्य सुरानिति द्वितीयान्तार्थस्यान्वयः तथा च सुरवृत्तिव्यापारजन्यत्वप्रकारकल्याणविषयिताकेच्छाश्रय इत्यन्वयबोध इति । तच्चिन्त्यं भिक्षतेरप्यर्थान्तरे द्विकर्मकत्वात्तत्समानार्थत्वस्य याचतावच्चत्वात् पृथगुपादानसमर्थनानुपपत्तेः भिक्षिता शतमखो न सुकृतं यदित्यादावर्थान्तरे भिक्षतेर्द्विकर्मकत्वदर्शनात् यत्कर्तृकं दानप्रसिद्धं तत्र कृपणं कनकं याचते इत्यादिप्रयोगः दण्डकावनतरून् सीतां याचते रामभद्र इत्यादिप्रयोगेण तुल्ययोगक्षेमः अत्र व्यापारः प्राप्तिरिच्छा च याचतेरर्थः तेन तरुवृत्तिव्यापारप्रयोज्यायाः सीतावृत्तिप्राप्तेरुद्देश्यनी या इच्छा तदाश्रयो रामभद्र इत्यन्वयबोधः एवं याचमानः शिवं सुरानित्यादावपि सुरवृत्तिव्यापारप्रयोज्यायाः कल्याणवृत्तिप्राप्तेरुद्देश्यनी या इच्छा तदाश्रय इत्यन्वयबोधः । नन्वेवं सर्वत्रैव व्यापारप्राप्तीच्छानां चयाणां याचचतिपर्यायधातूनामर्थत्वमस्तु राजानं कनकं

याचते इत्यादावप्येतावतैव चरितार्थत्वात् व्यापारस्तु क्वचिद्दानं क्वचिदन्यादृशः प्राप्तिस्तु संबन्धः प्रकृते राजसमवेतं दानं प्रयोज्यतया कनकवृत्तिस्वस्वत्वरूपे सम्बन्धे स उद्देश्यतया इच्छायामन्वेति याचमानः शिवमित्यत्र सुरवृत्तिः कृपाव्यापारः कल्याणवृत्तिस्वसमवेतत्वं प्राप्तिस्तयोरन्वयः पूर्ववत् भिक्षिता शतमखीत्यत्र सकलाङ्गसाहित्यं शतमखीव्यापारस्तदाश्रयः कर्मप्रत्ययस्यार्थः सुकृतवृत्तिस्वसमवेतत्वं प्राप्तिरिच्छाया उद्देश्यतया सुकृतवृत्तिस्वसमवेतत्वे तस्य प्रयोजकतया सकलाङ्गसाहित्यस्वरूपे व्यापारे तस्याश्रयैकदेशे आश्रयत्वे आश्रये वा विशेषणतया अन्वयः आश्रयस्याभेदेन शतमख्यामन्वय इति कृपणं कनकं याचते दण्डकावनतरून् सीतां याचते इत्यादौ कृपणवृत्तिव्यापारस्य कनकवृत्तिस्वस्वरूपप्राप्तौ दण्डकातरुवृत्तिव्यापारस्य सीतावृत्तिस्वसंनिधानस्वरूपप्राप्तौ प्रयोज्यत्वबाधेऽपि बाधितस्य प्रयोज्यत्वसम्बन्धस्येच्छया अवगाहनसम्भवान् नान्वयानुपपत्तिः इच्छाया बाधितार्थविषयकत्वस्य सम्बुद्धिप्रथमाविवरणे दर्शितत्वात् सन्निधानं तु संयोगः स्वल्पतरसंयोगघटितपरम्परासम्बन्धावच्छिन्नसामानाधिकरण्यं वा न चैवं दण्डव्यापारप्रयोज्याया घटप्राप्तेरिच्छा कुलालेऽस्तीति दण्डं घटं याचते कुलाल इति प्रयोगः स्यादिति वाच्यम् इच्छायां ज्ञाप्यमानत्वविशेषणेन तत्प्रयोगवारणात् न च ज्ञाप्यमानत्वं ज्ञानविषयत्वं तस्य विशेषणत्वं न सम्भवति अव्यावर्तकत्वात् भगवज्ज्ञानविषयत्वस्य सर्वत्र सत्वात् याचत्यर्थव्यापाराश्र-

यज्ञानविषयत्वस्य तत्त्वे दण्डकातरुन् याचते इति प्रयोगानुपपत्तिः व्यापाराश्रयदण्डकातरुज्ञानाप्रसिद्धेरिति वाच्यं व्यापाराश्रयज्ञानेच्छास्वरूपजिज्ञापयिषाविषयत्वस्येच्छाविशेषणत्वोपगमात् इच्छाया बाधितार्थविषयकत्वसम्भवेन तरुज्ञानाप्रसिद्धावपि तरुजिज्ञापयिषाविषयत्वस्य स्वसम्बन्धेच्छायां सम्भवान्नानुपपत्तिः घनं जलं याचन्ते सस्यानीत्यादावचेतनसस्यादिकर्तृकयाचनप्रयोगे याचतेरिच्छास्थाने पुष्टिरर्थः तत्र घनवृत्तिव्यापारस्य प्रयोज्यतया जलवृत्तिस्वसम्बन्धे स प्रयोज्यतया पुष्टौ स निरूपकतया तिङर्थे स्वरूपयोग्यत्वेऽन्वेतीत्येवमन्यत्राप्यूह्यमिति चेदस्तु व्यापारादित्रिकं याचतेस्तत्पर्यायस्य भिक्षत्यादेश्चार्थः अस्तु जिज्ञापयिषाविषयत्वमिच्छायां विशेषणम् अस्तु चेच्छास्थाने पुष्ट्यादिकं याचत्यादेरर्थस्तावतापि न नः कापि हानिरिति । प्रतियोग्युत्पत्तिद्वितीयक्षणोत्पन्नसंयोगस्य प्रतिद्वन्द्वी विभागः कर्मव्यापारश्च चिनोतेरर्थाः अवयवसंयोगजसंयोगस्य प्रतियोग्युत्पत्तिद्वितीयक्षणेऽप्युत्पत्तिसम्भवान्नानुपपत्तिः तरुं पुष्पं चिनोति मालाकार इत्यत्र तरुवृत्तितादृशविभागः पुष्पवृत्तिकर्मणि तन्मालाकारव्यापारे प्रयोजकतया अन्वेति शाब्दबोधाकारस्तु स्वयमूहनीयः । यत्तु भिदा हेतुविघटनञ्चिनोतेरर्थः भिदा संयोगध्वंसः विघटनङ्कर्मानुकूलो व्यापारः तरुं पुष्पञ्चिनोतीत्यत्र तरुवृत्तिसंयोगध्वंसः पुष्पवृत्तिकर्मणि तद्व्यापारे प्रयोजकतया अन्वेतीति तच्चिन्त्यं तथा सति घटाज्जलमाददाने जनेऽयं घटं जलं चिनोतीति प्रयोगप्रसङ्गात्

घटवृत्तिसंयोगध्वंसानुकूलजलवृत्तिक्रमानुकूलव्यापारस्य तत्र जने सत्वात् न चोदाकर्षणरूपं कर्म विवक्षितमिति वाच्यम् । तथासति कूपञ्जलं चिनोतीतिप्रयोगापत्तेः पुष्पस्याधराकर्षणे तरुं पुष्पञ्चिनोतीतिप्रयोगानुपपत्तेश्च प्रकृते तु जलीयकूपसंयोगस्य जलोत्पत्तिद्वितीयक्षणोत्पादे प्रमाणाभावान्न तथाप्रयोगः वृक्षतरुसंयोगानन्तरमुत्पद्यमानस्य पुष्पस्य स्वावयववृक्षतरुसंयोगाधीनतरुसंयोगे पुष्पोत्पत्तिद्वितीयक्षणोत्पादनियमात्तरुं पुष्पञ्चिनोतीति प्रयोग उपपद्यते यदि च खलं क्षेत्रं वा धान्यं चिनोति वनं कच्छं वा शुष्कगोमयानि चिनोतीतिप्रयोगोऽपि मन्यते तदाविभागकर्मग्रहणव्यापारश्च चिनोतेरर्थः विभागः प्रयोजकतया कर्मणि तत् ग्रहणव्यापारे अन्वेति कर्मणि द्रवत्वासामानाधिकरण्यं विशेषणं तेन जलं चिनोतीति न प्रयोगः न च दर्शितप्रयोगवारणार्थं कर्मणि पृथिवीवृत्तित्वं विशेषणमस्तु तावतैव समीहितसिद्धेरिति वाच्यम् । तथासति भाण्डं तैलं चिनोतीतिप्रयोगापत्तेः ।

अयमपि खरयोषित् कर्णकाषायमीष-
द्विसमरतिमिरोर्णोजर्जरं शोणमर्चिः ।
मदकलकलपिङ्क्षीकाकुनान्दीकरेभ्यः
क्षितिरुहशिखरेभ्यो भानुमानुच्चिनोति ॥

इत्यत्र भानुमान् क्षितिरुहशिखरेभ्योऽर्चिः चिनोतीतिप्रयोगानुपपत्तेश्च अर्चिषस्तेजस्त्वात् तत्कर्मणः पृथिव्यवृत्तित्वात् विभागस्वरूपगुणफलस्यावधित्वविवक्षायामपि गोभ्यः पयो दोग्धीत्यत्रेव पञ्चमीप्रयोगोऽप्युपपद्यते

अत एव संयोगनाशो न चिनोतेर्गुणफलं तथासति द-
र्शितपञ्चमीप्रयोगानुपपत्तेरिति । यदि च इष्टकाञ्चिनो-
तीतिप्रयोगस्तदा सजातीयसंयोगो व्यापारश्च चिनोतेर-
र्थः इष्टकावृत्तिसजातीयप्रतियोगिकसंयोगो व्यापारे प्र-
योजकतयाऽन्वेति यदि च इष्टकाम्भित्तिं चिनोतीतिप्र-
योगस्तदासजातीयप्रतियोगिकसंयोग उत्पत्तिर्व्यापारो-
ऽपि चिनोतेरर्थः इष्टकावृत्तितादृशसंयोगस्य प्रयोज्यतया
भित्तिवृत्त्युत्पत्तौ सा प्रयोजकतया व्यापारेऽन्वेतीति
चिनोतेरर्थान्तरेऽपि द्विकर्मकत्वमिति । संस्कारः शाब्द-
बोधः वाक्यानुगुणेच्छा च ब्रुवेरर्थः नृपहितं ब्रवीतीत्यत्र
नृपसमवेतसंस्कारो विषयतया हितवृत्तौ शाब्दबोधे प्र-
योजकतया स चोद्देश्यितया वाक्यानुगुणेच्छायामन्वे-
ति यदि चाभिनयादिना बोधनेऽपि ब्रुविप्रयोगस्तदा शा-
ब्दबोधस्थाने ज्ञानसामान्यं वाक्यस्थाने व्यापारमात्रं ब्रु-
वेरर्थेषु निविशतेऽन्वयस्तु पूर्ववत् यत्तु ज्ञानानुकूलः श-
ब्दो ब्रुवेरर्थः शिष्यं धर्मं ब्रवीतीत्यत्र ज्ञानरूपफले शि-
ष्यसमवेतत्वं धर्मविषयत्वं च द्वितीयान्तार्थद्वयमन्वेतीति
तदसत् ज्ञानस्यैकस्यैव फलतया गुणफलाभावेन शि-
ष्यादेर्गौणकर्मत्वानुपपत्तेः शिष्यं धर्मं ब्रवीति शिष्यस्तु
न शृणोतीति प्रयोगानुपपत्तेश्च ब्रुविपर्यायवदत्यादयो-
ऽपि द्विकर्मका इति वदन्ति । कृतिरुपदेशो व्यापारानु-
गुणेच्छा च शास्तेरर्थः कृतिः प्रवृत्तिर्निवृत्तिश्च उपदेश
इष्टसाधनत्वेनानिष्टसाधनत्वेन वा ज्ञानं बोध्यं शिष्यं ध-
र्ममधर्मं वा शास्ति गुरुरित्यत्र शिष्यसमवेता प्रवृत्ति-
र्निवृत्तिर्वा विषयतया धर्मवृत्तावधर्मवृत्तौ वा इष्टसा-

धनत्वेनानिष्टसाधनत्वेन वा ज्ञाने प्रयोजकतया तच्छोद्देश्यतयाऽन्वेति इच्छाया धात्वर्थे निवेशात् शिष्यं धर्मं शास्ति शिष्यो धर्मं न प्रवर्तते न वा तमिष्टसाधनत्वेन जानातीत्यादि प्रयोगस्य नानुपपत्तिः। भङ्गस्त्यागो ग्रहणव्यापारश्च जयतेरर्थः भङ्गो दूतादौ समीहितात्तदायाद्यनुपहितेच्छा युद्धादौ पलायनादिः आत्तिकं शतं जयतीत्यत्रात्तिकसमवेतात्तदायाद्यनुपहितेच्छाविषयतया शतवृत्तौ त्यागे स च ग्रहणव्यापारे प्रयोज्यतयाऽन्वेति शत्रुं महीं जयतीत्यत्र वृत्तिपलायनादिकं विषयतया महीवृत्तौ त्यागे स च ग्रहणव्यापारे प्रयोज्यतयाऽन्वेतीति। स्वत्वनिष्ठानिष्टसाधनतात्त्वज्ञानप्रयोज्यद्वेषस्त्यागो ग्रहणव्यापारश्च दण्डयतेरर्थः गर्गं शतं दण्डयतीत्यत्र गर्गवृत्तिस्तादृशद्वेषो विषयतया शतवृत्तौ त्यागे स च ग्रहणव्यापारे प्रयोज्यतयाऽन्वेति शतानर्पणादण्डताडनादि सम्भावनया शतस्वत्वे द्वेषः ततः शतस्वत्वनाशेच्छास्वरूपस्त्याग इत्युपपत्तिरिति। अवयवसंयोगनाश उद्गमनकर्मव्यापारश्च मथ्नातेरर्थः दधि घृतं मथ्नातीत्यत्र सामानाधिकरण्येन दधिवृत्तिरवयवसंयोगनाशो घृतसमवेतोद्गमनकर्मणि प्रयोज्यतया उद्गमनकर्म तु प्रयोजकतया विलोडनव्यापारे अन्वेति घृतस्य दधिनाशजन्यत्वाद्दध्यवयवसंयोगनाशस्य घृतकर्मप्रयोजकत्वाद्वत्युपपत्तिः। एवं क्षीरसागरं कौस्तुभं मथ्नातीत्यत्रापि क्षीरसागरावयवकौस्तुभसंयोगानां कौस्तुभोद्गमनप्रतिबन्धकानां नाशे सति मन्दरादिसंयोगजं कौस्तुभोद्गमनं भवतीति तादृशसंयोगनाशप्रयोज्यत्वं कौस्तुभोद्गमने सम्भवतीति ना-

नुपपत्तिरिति । विक्लित्तिरुत्पत्तिर्व्यापारश्च पचेरर्थः तण्डुलानोदनान् पचतीत्यत्र तण्डुलवृत्तिविक्लित्तिरोदनवृत्तावुत्पत्तौ सा च प्रयोजकतया व्यापारेऽन्वेतीति । स्वामित्वे सति विनियोगानुत्पादोऽस्वामिसम्बन्धो व्यापारश्च मुष्णातेरर्थः वणिजं हिरण्यं मुष्णातीत्यत्र स्वामिवणिग्वृत्तिर्विनियोगानुत्पादो हिरण्यवृत्तावस्वामिसम्बन्धे स च तस्करव्यापारे प्रयोजकतयाऽन्वेति विनियोगो दानविक्रयादिः संबन्धः संयोगसामानाधिकरण्यादिरिति । प्रेरकपुरुषदेशावधिकप्रेर्यदेशवृत्तिपरत्वनिरूपितापरत्वासमानाधिकरणसंयोगः कर्म व्यापारो नयतेर्वहतेश्चार्थः वहतेरर्थे प्रेरकप्रेर्ययोः स्थाने वोढृवोढव्यौ बोध्यौ तादृशापरत्वसमानाधिकरणः संयोग आङ्पूर्वस्य नयतेरर्थे निविशते व्यापारस्तु नयतेः प्रेरणादिः वहतेराधेयकर्मानुकूलाधारकर्मादिः ग्राममजां नयतीत्यत्र ग्रामवृत्तिस्तादृशसंयोगोऽजावृत्तिकर्मणि तच्च पुरुषप्रेरणास्वरूपे व्यापारे प्रयोजकतयाऽन्वेति ग्रामं भारं वहति पुरुषो द्वीपं सांयात्रिकं वहति नौरित्यादौ ग्रामवृत्तिसंयोगो भारवृत्तिकर्मणि तच्च पुरुषव्यापारे कर्मणि प्रयोजकतयाऽन्वेति वहतेस्तु क्वचित्संबन्धप्रतियोगित्वे सप्यर्थौ यथा वहति यः परितः कनकस्थलीरित्यादौ अत्र हि कनकस्थलीवृत्तिः संयोगस्स्वरूपेण प्रतियोगित्वे तच्च निरूपकतया तिङर्थाश्रयत्वेऽन्वेति एवमन्यत्रापि साक्षात्परम्परास्वरूपः सम्बन्धो बोध्यः परम्परासम्बन्धस्तु गन्धं वहति वायुरित्यादौ बोध्यः । कर्षकदेशावधिककर्षणीयदेशवृत्तिपरत्वनिरूपितापरत्वसमानाधिकरणसंयो-

ग: कर्मव्यापारश्च कृषेरर्थ: भूमिं शाखां कर्षति फलार्थी-त्यादौ भूमिवृत्तिताद्दशसंयोग: शाखावृत्तिकर्मणि तच्च फलार्थिव्यापारे प्रयोजकतयाऽन्वेति। संयोग: कर्म-व्यापारश्च हरतेरर्थ: स्वगृहं परधनं हरति तस्क-र इत्यादौ स्वगृहवृत्तिसंयोग: परधनवृत्तिकर्मणि तच्च तस्करव्यापारे प्रयोजकतयाऽन्वेति उपादानव्यापा-र उत्पत्तिर्व्यापारश्च करोतेरर्थ: उपादानव्यापारस्तु क्व चित्संयोग: यथा वीरणं कटं करोतीत्यत्र वीरणवृत्ति-संयोग: कटवृत्तावुत्पत्तौ प्रयोज्यतया सा पुरुषव्यापारे प्रयोजकतयाऽन्वेति क्व चित् क्रिया यथा कनकं कु-ण्डलं करोतीत्यत्र कनकवृत्तिक्रिया कुण्डलोत्पत्तावन्वे-ति क्वचिदवयवसंयोगनाश: यथा काष्ठं भस्म करोती-त्यत्र परम्परया काष्ठवृत्तिरवयवसंयोगनाशो भस्मोत्प-त्तावन्वेति। द्वादश दुहादय: पञ्च ण्यादय: एते सप्त-दश धातवो द्विकर्मका:। ग्रहिरपि द्विकर्मक इति के चित् तन्निर्मूलमित्यन्ये तदुक्तम्।

दुह्याच्यञ्जुधिपृच्छिचिब्रूशासिजिमन्थिमुषाम्।
कर्म युक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम॥

युक् द्वितीयमित्यर्थ: तथा।

दुहियाचिरुधिप्रच्छिचिब्रूशासिजिदण्डय:।
मन्थि: पञ्चिश्च मुष्णातिर्धातवोऽमी दुहादय:॥

नयतिवहतिकर्षतीन् करोतिनयतिगणेषु वदन्ति पाणिनीया:। दुहादिभ्यो द्वादशभ्य: कर्मप्रत्ययेन प्र-धानकर्मणो विवक्षणे अविवक्षणेऽपि गौणकर्माभिधीय-ते यथा गौ: पयांसि दुह्यते दुग्धा वा प्रधानाविवक्षणे

यथा गौर्दुह्यते दुग्धा वा गौणकर्माविवक्षणे तु प्रधानकर्मात्यभिधीयते यथा पयांसि दुह्यन्ते दुग्धानि वान्यादिभ्यः पञ्चभ्यः कर्मप्रत्ययेन गुणकर्मणो विवक्षणे वा प्रधानकर्मैवाभिधीयते यथा अजा ग्रामं नीयते अविवक्षणे तु यथा अजा नीयते एवं राजा कनकं याच्यते याचितो वा अत एव राजा सुतं याचित इति यथा वा कनकं याच्यते याचितं वा एवं व्रजो गामवरुद्यते अवरुद्धो वा यथा वा गौरवरुध्यते अवरुद्धा वा-एवं जानपदः पन्थानं पृच्छ्यते पृष्टो वा प्रच्छिपर्यायश्चुदिर्वोध्यः अत एवाहमपीदमचोद्यं चोद्य इति । एवं तरुः पुष्पमवचीयते अवचितो वा यथा वा पुष्पमवचीयते अवचितं वा अत एव अवचितकुसुमा विहाय वल्लीरिति एवं शिष्यो धर्ममुच्यते उक्तो वा एवं शिष्यो धर्ममनुशास्यते अनुशासितो वा यथा वा धर्मोऽनुशास्यते अनुशासितो वा एवमाचिकः शतं जीयते जितो वा यथा वा शतं जीयते जितं वा अत एव कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यत इति एवं गर्गः शतं दण्ड्यते दण्डितं वा एवं क्षीरनिधिः कौस्तुभं मथ्यते मथितो वा अत एव देवासुरैरमृतमम्बुनिधिर्ममन्थे इति यथा वा कौस्तुतो मथ्यते मथितो वा एवं तण्डुल ओदनं पच्यते पक्वो वा यथा वा ओदनः पच्यते पक्वो वा एवं वणिग्विरण्यं मुष्यते मुषितो वा अत एव रत्नानि मुषितो वणिगिति यथा वा कनकं मुष्यते मुषितं वा एवं भारो ग्राममुह्यते ऊढो वा एवं परधनं स्वगृहं ह्रियते हृतं वा यथा वा परधनं ह्रियते

कृतं वा एवं शाखा भूमिं कृष्यते कृष्टा वा यथा वा शाखा कृष्यते कृष्टा वा एवं कटो वीरणं क्रियते कृतो वा यथा वा कटः क्रियते कृतो वा तदुक्तम्।

प्रधानकर्मण्याख्येये लादीनाङ्हिकर्मणाम्।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः॥

इति प्रधानफलवत् प्रधानकर्मगुणफलवदप्रधानकर्म बोध्यम्। तदिदं कर्म वाक्यपदीये प्रोक्तम्।

निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम्।
तच्चेप्सिततमं कर्म चतुर्धाऽन्यत्तु कल्पितम्॥
औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम्।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्॥

निर्वर्त्यविकार्यप्राप्यलक्षणं हरिणोक्तं पूर्वमेवप्रदर्शितम् औदासीन्येन प्राप्यं ग्रामं गच्छंस्तृणं स्पृशतीत्यादौ तृणादि अनीप्सितं तु रथ्यां गच्छन् चाण्डालं स्पृशतीत्यादौ चाण्डालादि संज्ञान्तरैरनाख्यातं तु गां पयो दोग्धि दुह्यादावकथितमित्यनेन कर्म गवादि अन्यपूर्वकं तु क्रूरमभिक्रुध्यतीत्यादौ संप्रदानसंज्ञाबाधकानुशासनेन कर्म क्रूरादि तदनुशासनं तु वक्ष्यते मासमास्ते इत्यादौ मासादेः कर्मत्वोपपत्तये "अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक" इति वाच्यमि"ति वार्तिकम्। अत्राकर्मकधातवस्तु सकर्मकलक्षणे प्रोक्ताः देशः देशत्वावान्तरधर्मवान् कुरुपञ्चालादिः न तु सामान्यतो देशः न वा ग्रामत्वादिना ग्रामादिः तेन कुरून् स्वपिति तिष्ठति वेति प्रयोगः न तु देशं ग्रामं वा स्वपिति तिष्ठति वेति प्रयोगः। कालः

कालत्वावान्तरधर्मवान् माससम्बत्सरादिः न तु सामान्यतः कालः तेन मासं सम्बत्सरं वाऽऽस्ते इति प्रयोगः न तु कालमास्ते इति प्रयोगः । भावो गोदोहादिः तेन गोदोहं तिष्ठतीति प्रयोगः । यद्यपि गोदोहादिशब्दस्य कालार्थकतया कालग्रहणेनैव दर्शितप्रयोगसिद्धेः भावग्रहणमनर्थकं तथापि घञन्तेन प्रतिपाद्यमानोऽपि कालः कर्म भवतीति प्रपञ्चार्थमेव भावग्रहणम् । गन्तव्योऽध्वा ऽध्वत्वावान्तरधर्मवान् क्रोशयोजनादि र्न तु सामान्यतोऽध्वा सामान्यव्यवच्छेदार्थं गन्तव्यपदं तेन क्रोशं योजनं वा रमते सांयात्रिक इति प्रयोगः न तु अध्वानं रमत इति प्रयोगः । न च "कालाध्वनोरत्यन्तसंयोगे" द्वितीयाऽत्यनुशासनेनैव मासमास्ते क्रोशं रमते इत्यादिप्रयोगोपपत्तेः प्रकृतवार्त्तिके कालाध्वग्रहणमनर्थकमिति वाच्यं प्रकृतवार्त्तिकेन कर्मसंज्ञाज्ञापनेन कर्माख्यातप्रयोगोपपादनात् तेन कुरवः सुप्यन्ते मास आस्यते क्रोशो रम्यते गोदोहः स्थीयते इत्यादि प्रयोगः अत्र कुरुषु स्वपिति क्रोशं रमत इत्यादौ दैशिकेन कर्तृघटितपरम्परया साक्षाद्वा संसर्गेणावच्छिन्नमाधेयत्वं द्वितीयार्थः स च स्वपादिप्रधानीभूतधात्वर्थान्वयी एवं मासमास्ते गोदोहं तिष्ठतीत्यादौ कालिकसम्बन्धावच्छिन्नमाधेयत्वं द्वितीयार्थः सोऽपि प्रधानीभूतासनादिधात्वर्थान्वयी एवं कुरवः सुप्यन्ते क्रोशो रम्यते इत्यादौ दैशिकताद्दशसंसर्गावच्छिन्नमधिकरणत्वं कर्माख्यातार्थः एवं मास आस्यते गोदोहः स्थीयते इत्यादौ कालिकताद्दशसंसर्गावच्छिन्नमधिकरणत्वं कर्माख्यातार्थः । एवं कुरून् स्वपि-

ति कुरवः सुप्यन्ते इत्यादौ शाब्दबोधः स्वयमूह्य इति । गमयति दिगन्तमरातीनित्यादावराल्यादेः कर्मत्वोपपत्तये "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ" त्यनुशानम् । गत्यर्था गमिव्रज्यादयः बुध्यर्थाः बुध्यतिजानात्यादयः । प्रत्यवसानं भोजनं तदर्था अशिभुज्यादयः शब्दकर्मणः शब्दाभिन्नकर्मकारकोपलक्षितक्रियावाचिनो वदत्यध्येत्यादयः अकर्मका देशकालभावगन्तव्याध्वभिन्नकर्मान्वययोग्यार्था आसिरम्यादयः अत्र "सनाद्यन्ताधातव" इत्यनेन णिजन्तस्य धातुत्वे णिच्प्रकृतिधात्वर्थस्य फलतया तद्धतोऽराल्यादेः कर्मत्वं स्पष्टमिति । कर्तुरीप्सिततमानीप्सिताभ्यां कर्मसंज्ञासिद्धौ गत्यादिसूत्रं नियमार्थं तेन गमयति दिगन्तमरातीनित्यादावराल्यादीनामिव पाचयत्यन्नं यज्ञदत्तं देवदत्त इत्यादौ यज्ञदत्तादीनां कर्मत्वं नेष्टमिति पाचयत्यादियोगे न कर्मसंज्ञा भवतीति नियमार्थमिदं सूत्रम् । एवं पाचयत्यन्नं यज्ञदत्तेन देवदत्त इत्येव प्रमाणं तदाहुः ।

गुणक्रियायां स्वातन्त्र्यात्प्रेरणे कर्मतां गतः ।
नियमात्कर्मसंज्ञायाः स्वधर्मेणाभिधीयते ॥

इति गुणक्रियायां णिच्प्रकृतिधात्वर्थे प्रधाने स्वातन्त्र्यात्साक्षादाश्रयत्वात् स्वधर्मेण स्वधर्मस्वातन्त्र्यस्याभिधायकेन तृतीययेति यावत् प्रेरणे णिजर्थे कर्मतां गतोऽपीति शेषः नियमात् गत्यादिकर्मण्येव कर्मसंज्ञाज्ञापनादिति प्राचीनाः । नवीनास्तु गत्यादिसूत्रं विधायकमेवान्यथा परया कर्तृसंज्ञया कर्मसंज्ञाया बाधात् गत्यादाणिजन्तकर्तुर्णिजन्तेऽपि कर्मत्वाप्रसङ्गात् प्रयोज्ये

कर्तृसंज्ञां विना णिच एवानुत्पत्तेः हेतुमति हि णिज्विधीयते कर्तुः प्रयोजको हेतुरिति कर्तृसंज्ञा सापेक्षतया कर्मसंज्ञायामुपजीव्यत्वात् कर्तृसंज्ञावलवती । एवं स्वकारकविशिष्टा क्रिया णिजर्थेऽन्वेतीति गुणक्रियाकारकसंज्ञाऽन्तरङ्गतया बलवती । तदुक्तमभियुक्तैः ।

परत्वादन्तरङ्गत्वादुपजीव्यतया तथा ।
प्रयोज्यस्यास्तु कर्तृत्वं गत्यादेर्विधितोचिता ॥

कर्तृत्वमस्तु तथापि गत्यादेः गत्यादिसूत्रस्य विधिता विधायकतेत्यर्थः तथा च गत्यादिसूत्रेण कर्तृसंज्ञाया अपवादात् कर्मसंज्ञाविधानमिति । नन्वेवमरात्यादेः कर्तुः कर्मसंज्ञया कर्तृसंज्ञाबाधे दिगन्तस्य कर्मेप्सिततया कर्तुरीप्सिततमत्वाभावात्कर्मसंज्ञाविरहात् गमयति दिगन्तमरातीनित्यादौ दिगन्तमिति द्वितीयानुपपत्तिरिति चेन्न । "कर्तुरीप्सिततमं कर्मे"ति सूत्रे कर्तृशब्दस्य कर्तृसंज्ञाविशिष्टार्थकत्वाभावात् धात्वपात्तव्यापाराश्रयस्वतन्त्रमात्रार्थकत्वात् । एवं दर्शितस्वातन्त्र्यस्यारात्यादावनपायात् कर्तुरीप्सिततमत्वं दिगन्तमिति द्वितीयाया नानुपपत्तिरिति वदन्ति । वस्तुतस्तु प्राचीनमतेऽपि परया कर्तृसंज्ञया न कर्मसंज्ञाया बाधः गमयति दिगन्तमरातीनित्यादावरात्यादेः गां पयो दोग्धीत्यादौ पयस इव न च दुहादेः प्रधानव्यापारस्य गोपाले सत्वात् दुग्धे असत्वात् पयसो न कर्तृसंज्ञाप्रसक्तिरिति वाच्यं तथा सति णिजन्तस्य धातुत्ववादिनां प्राचामपि मते प्रधानव्यापारस्यारात्यादावसत्वात् णिजर्थस्यैव प्राधान्यात् । एवं

गत्यादिसूत्रे कर्तृशब्दो न कर्तृसंज्ञाविशिष्टार्थकः किं तु दर्शितस्वतन्त्रार्थक इति कर्मसंज्ञा न कर्तृसंज्ञामुपजीवति एवं "हेतुमति णिजि" तिसूत्रस्थ कर्तृप्रयोजको हेतुरिति व्याख्यानेऽपि कर्तृशब्दः स्वतन्त्रार्थक एवेति णिजुत्पत्तावपि न कर्तृसंज्ञापीति न कर्मसंज्ञा कर्तृसंज्ञामुपजीवति एवं गुणक्रियाकारकं न प्रधानक्रियाकारकं भवतीति नान्तरङ्गतयाऽपि कर्तृसंज्ञा बलवतीति न चैवमराट्यादेः प्रधानव्यापारानाश्रयत्वे दिगन्तस्य कर्तुरीप्सिततमत्वाभावात् कर्मसंज्ञानुपपत्तिरिति वाच्यम् । णिजन्तस्य धातुत्ववादिनां गुणफलवतो दिगन्तस्य गां पयो दोग्ध्यादौ पथस इवाकथितमित्यनेन कर्मसंज्ञासम्भवात् अत एवाकथितसूत्राव्यवधानेन गत्यादिसूत्रमुक्तं नन्वेवं पाचयति चैत्रेण मैत्र इत्यादौ तृतीयानुपपत्तिः चैत्रस्य प्रधानव्यापारानाश्रयतया कर्तृत्वाप्रसक्तेरिति चेन्न जलेनाभिषिञ्चतीत्यादाविव कर्मणः करणतया चैत्रेण पाचयतीत्यत्रापि करणार्थकतृतीयोपपत्तेः चैत्रव्यापारजन्यत्वस्वरूपश्चैत्रेणेति तृतीयान्तार्थः पच्यर्थेऽन्वेति तत्र फले व्यापारे चान्वय इत्यन्यदेतत् । भवतु वा प्रधानीभूतस्य धात्वर्थस्य तदन्वितनिङर्थस्य वाऽऽश्रयः कर्ता स च धातुर्भूवादिरणिजन्तो णिजाद्यन्तस्य एवमणिजन्तधात्वर्थकर्तृतया प्रयोज्यस्य चैत्रेण पाचयतीत्यत्र तदर्थकतृतीयोपपत्तिः णिजन्तार्थकर्तृतया प्रयोजकस्य मैत्रेण पाच्यते इत्यत्र तदर्थकतृतीयोपपत्तिः एवं "कर्तृकरणयोस्तृतीये" ति सूत्रे कर्तृशब्दो दर्शितार्थक एव न तु कर्तृसंज्ञाविशिष्टार्थकः । नन्वेवं गमयति दिग-

न्तमरातीनित्यादावध्यरात्यादौ दर्शितकर्तृत्वस्यानपायात् अरातिपदात्तृतीयाप्रसङ्गः न च गत्यादिकर्तुः कर्मत्वात्कथं तृतीयाप्रसङ्ग इति वाच्यम् । गत्यादिसूत्रस्य नियमार्थत्वात्कर्मसंज्ञाविधायकत्वाभावात् णिजन्तार्थकर्मत्वस्याणिजन्तार्थकर्तृत्वस्य चोभयस्यारात्यादौ सत्वात् द्वितीयातृतीययोरेकशेषस्य कर्तुमशक्यत्वादुभयविधप्रयोगस्य साधुत्वप्रसङ्गादिति चेन्नैवं गत्यादिसूत्रस्य द्विविधनियमार्थकत्वात् । नियमस्तु गत्यादीनामेव कर्ता कर्मेति गत्यादीनां कर्ता कर्मैवेति । कर्मैवेत्येवकारेण कर्मकार्यातिरिक्तं तृतीयादिकं व्यवच्छिद्यते । एवं "माकडारादेका संज्ञा" या परा ऽनवकाशा चेत्यत्रापि परकार्यातिरिक्तस्यानवकाशकार्यातिरिक्तस्य च कार्यस्य व्यवच्छेदः प्रतीयते इति न काप्यनुपपत्तिरिति । गमयति दिगन्तमरातीनित्यादावरातिपदोत्तरद्वितीयायाः कर्तृत्वमर्थः गत्यादिसूत्रे कर्तेति भावप्रधानो निर्देशः कर्तृत्वं तु गमयत्यरातीनित्यादौ कृतिः । बोधयति धर्मं माणवकमित्यादौ माणवकपदोत्तरद्वितीयायाः समवेतत्वलक्षणं तदर्थः भोजयति मिष्टमतिथीनित्यादावतिथिपदोत्तरद्वितीयायाः कृतिलक्षणं तदर्थः गत्यादिसूत्रे भोजनग्रहणं पानमप्युपलक्षयति तेन पाययन्त्यः शिशून् पय इत्यादिप्रयोगोऽप्युपपद्यते अत्रापि शिशुपदोत्तरद्वितीयायाः कृतिरेवार्थः । ब्रह्मैनं व्याहारयतीत्यादावेतत्पदोत्तरद्वितीयायाः कृतिलक्षणं तदर्थः । मासमासयत्यतिथीनित्यादावतिथिपदोत्तरद्वितीयायाः कृतिलक्षणं तदर्थः द्वितीयार्थो नानाविधकर्तृत्वं णिच्प्र-

कृतिधात्वर्थे प्रधानेन तत्संसर्गेणान्वेति । के चित्तु णिजन्तसमुदायस्य धातुतया णिजर्थविशेषणधात्वर्थस्य फलतया तद्वतः कर्तुः कर्मत्वं स्पष्टमेव "हेतुमति चे"त्यनुशासनात् णिचो हेतुकर्तृत्वं कर्तृप्रयोजकत्वमर्थः कर्तृत्वं च णिच्प्रकृतिधात्वर्थत्वं तदन्वितत्वं तिङर्थत्वं वा तदपि क्वचित्प्रयत्नः क्वचिदाश्रयत्वादिकं यादृशधातूत्तराख्यातेन यादृशं कर्तृत्वं बोध्यते णिच्प्रत्ययेन तादृशकर्तृत्वनिर्वाहकव्यापारो बोध्यते स च पाचयतीत्यादौ पाककृतिनिर्वाहकः ज्ञापयतीत्यादौ ज्ञानाश्रयत्वनिर्वाहकः नाशयतीत्यादौ नाशप्रतियोगित्वनिर्वाहकः व्यापारः प्रतीयते निर्वाहकत्वं च स्वरूपसंबन्धविशेषः न तु जनकत्वमतो ज्ञापयतीत्यादौ नानुपपत्तिः एवं च णिच्प्रकृतिधात्वर्थकर्तृत्वस्य फलतया तद्वतः स्वतन्त्रस्य कर्तुः कर्मत्वात्तादृशफलविशेषणतया स्वतन्त्रकर्तृवृत्तित्वविवक्षायां पाचयत्योदनं सहायमित्यादयः प्रयोगाः यदा तु पाकादिविशेषणतया सहायादिकर्तृत्वं विवक्षितं तदा पाचयत्योदनं सहायेनेत्यादयः । अथ यत्र चैत्रमैत्रोभयकर्तृकः पाकस्तत्र चैत्रमात्रं प्रयोजयति यज्ञदत्ते मैत्रेणायं पाचयतीति प्रयोगापत्तिः मैत्रकर्तृकपाकप्रयोजकव्यापारस्य दर्शितस्थले यज्ञदत्ते सत्वात्तादृशप्रयोगवारणार्थं णिजर्थव्यापारविशेषणधात्वर्थकर्तृत्वे प्रातिपदिकार्थान्विताधेयत्वस्य तृतीयान्तार्थस्यान्वयो वाच्यः एवं मैत्रं पाचयतीत्यादिवाक्यजबोधावैलक्षण्याद् द्वितीयातृतीययोरन्वयतात्पर्यभेदेन व्यवस्था न युक्तेति चेन्न अगत्या पाकादिविशेषणतान्वितायास्तृती-

यार्थकृतेः पारतन्त्र्येण णिजर्थविशेषणकर्तृत्वेऽभेदान्वयोपगमेन दर्शितप्रयोगवारणसम्भवात् अन्वयभेदेन तृतीयाद्वितीययोर्व्यवस्थासम्भवात् । धात्वर्थकर्तृत्वं निर्व्यापारस्य खण्डशो णिजर्थ इति नैकदेशान्वयशङ्केति वदन्ति । तच्चिन्त्यं चैवं पाचयतीत्यादिप्रयोगाभ्युपगमे गत्यादिसूत्रप्रणयनवैयर्थ्यप्रसङ्गात् नियमार्थतापक्षे सूत्रेण गत्यादिकानामेव कर्तुः कर्मत्वज्ञापनात् न च गत्यादिकर्ता कर्मैवेति नियमस्य सूत्रेण ज्ञापनात् देवदत्तेन ग्रामं गमयतीत्यादिको न प्रयोगः प्रयोगश्च अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाकेत्यादिक उपपद्यत इति वाच्यम् । गत्यादिकानामेव कर्ता कर्मेति गत्यादिकानां कर्ता कर्मैवेति द्विविधनियमस्य सूत्रेण ज्ञापनात् देवदत्तेन गमयतीत्यादिप्रयोगानुपपत्तेः अयाचितारमित्यादेरन्यथोपपत्तेश्च तथा हि सुतां ग्राहयितुं देवमयाचितारं न शशाक न कृतवानित्यर्थे देवदेवस्य ग्राह्यर्थेन ह्यन्वयः अत एव जायाप्रतिग्राहितगन्धमाल्यामित्यत्र कर्मप्रत्ययस्य क्तस्य गौणकर्मणि साधुत्वमवसीयते अन्यथा ण्यन्ते कर्तुश्च कर्मणा इत्यनुशासनेन धात्वर्थकर्तरि कर्मण्येव तस्य साधुतया गौणकर्मण्यसाधुत्वप्रसङ्ग इत्यादिकं वक्ष्यते । एवं सन्नन्तस्य धातुत्वात् सन्नर्थेच्छाविषयस्य कर्मत्वं भवति । यथा पाकं चिकीर्षत्योदनं बुभुक्षत इत्यादौ पाकौदनयोः कृतिभोजनयोर्धात्वर्थयोः सन्नर्थेच्छायां विशेष्यतासमानकर्तृकत्वाभ्यां संबन्धाभ्यामन्वयः तेनान्यदीयकृतिभोजनविषकेच्छासत्वे चिकीर्षति बुभुक्षते वा इति न

प्रयोगः समानकर्तृकत्वबाधात् न वा पुत्रधनेच्छायां विद्यमानायां चिकीर्षतीतिप्रयोगः कृतिविशेष्यत्वबाधादिति वदन्ति तदत्र विषयतामात्रेण कर्मत्वं न सम्भवति पाकत्वं चिकीर्षतीतिप्रयोगापत्तेः उद्देश्यतया तथात्वे तु ओदनं बुभुक्षत इत्यादावोदनस्यानुद्देश्यत्वात् कर्मत्वानुपपत्तिरित्यादिकं चिन्तनीयम्। मणिकृतस्तु चिकीर्षाकृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयेच्छा पाकं कृत्वा साधयामीति तदनुभवात् कृतिसाध्यत्वप्रकारकफलेच्छावारणाय क्रियाविषयकत्वं विशेषणं कृतिसाध्यत्वभ्रमजन्यायाः कृत्यसाध्यक्रियाविषयिण्या इच्छाया वारणाय कृतिसाध्यत्वं वास्तवं विशेषणम् अनुभवस्तु कृतिसाध्यत्वेन पाकमिच्छामीत्याकारक एव पाकं चिकीर्षतीत्यत्र प्राधान्येन पाकस्येच्छाविषयत्वमनुभूयते न तु कृतेः प्राधान्यमुद्देश्यत्वं धातोश्च सन्प्रत्ययाभिधेयेच्छाप्रकारत्वाचित्वं तेन कृञः कृतिसाध्यत्वं तत्प्रकारकत्वं वार्थस्तच्च प्रकारितया स्वरूपेण वा संसर्गेणेच्छायां सन्नर्थेऽन्वेति। ओदनं बुभुक्षत इत्यत्र भोजनविशेष्यतयौदनस्यानुभवात् भोजनस्य कर्मतासंसर्गेणौदनेऽन्वयः तस्य च विषयतया सन्नर्थेच्छायामन्वयः अत्र कृतिसाध्यत्वस्य स्वनिरूपककृतिसामानाधिकरण्येनौदनस्य स्वकर्मकभोजनजनककृतिसामानाधिकरण्येनापि सन्नर्थेच्छायामन्वयः तेनान्यदीयकृतिसाध्यत्वभोजनीयकर्मत्वविषयकेच्छायां विद्यमानायां न तथा प्रयोगः दर्शितलक्षणचिकीर्षायाः प्रवृत्तिहेतुत्वात् चिकीर्षतीत्यत्रेत्यन्यात्वर्थनिर्वचनादिति वदन्ति। सोदरोपाध्यायास्तु पाकं चिकीर्ष-

तोत्यादौ सन इच्छामात्रमर्थः तत्र धात्वर्थस्य कृत्यादेरुद्देश्यत्वसमानकर्तृत्वाभ्यां संबन्धाभ्यामन्वयः धात्वर्थकृत्यादौ तत्फले साध्यत्वविषयत्वे वा पाककर्मत्वस्य विषयित्वस्याधेयत्वस्य वा अन्वयः समानकर्तृकत्वनिवेशादन्यदीयकृतीच्छायां चिकीर्षतीति न प्रयोगः उद्देश्यत्वनिवेशात्कृतिज्ञानेच्छायां न तथा प्रयोग इति वदन्ति । युज्यते चैतत् तथा हि सन्नर्थेच्छायां पाकादिविषयत्वस्य नान्वयः धात्वर्थस्यैवोद्देश्यतयाऽन्वयात् न तु विषयत्वसामान्यस्य द्वितीयार्थतयाऽन्वयस्तथा सति पाकत्वं चिकीर्षतीति प्रयोगप्रसङ्गाद् उद्देश्यता तु प्रातिपदिकार्थे सन्नर्थेच्छाया न व्युत्पत्तिसिद्धा तण्डुलं पिपक्षतोत्यादौ तण्डुलस्य सिद्धतयाऽसम्भवात् न च पाकीयस्तण्डुलो भवत्वितीच्छायामपि तण्डुलं पिपक्षतीति प्रयोगात् प्रातिपदिकार्थस्य विषयतया तत्रान्वय इति वाच्यं तथा सति पाकीयं ज्ञानं भवत्वितीच्छायां ज्ञानं पिपक्षतीति प्रयोगोपपत्तेः विषयतामात्रेणान्वयोपगमेऽतिप्रसङ्गस्य दर्शितत्वाच्च न चौदनं बुभुक्षत इत्यत्र भोजनविशेष्यतयौदनस्यानुभवादिति मणिविरोध इति वाच्यम् । भोजनविशेष्यतयेत्यत्र बहुव्रीहिणा विशेषणत्वानुभवस्य बोधितत्वात् । ननु कथं तर्हि पाकं चिकीर्षतीत्यत्र प्राधान्येन पाकस्येच्छाविषयत्वमनुभूयते न तु कृतेरिति मणेः सङ्गतिरिति चेत् प्रवृत्तिहेतुभूतायाश्चिकीर्षायाः कृतिसाध्यत्वप्रकारकतया पाकस्योद्देश्यत्वसम्भवात्तथैव तन्निर्वचनमुक्तं सामान्यतश्चिकीर्षाशब्दार्थः धातुप्रत्ययार्थयोरन्वयेन कृतीच्छैव । न च तत्र विषयितामात्रेण

पाकस्यान्वयेऽतिप्रसङ्गस्य दर्शितत्वाद् उद्देश्यितया धात्वर्थक्रतेरेव तत्रान्वयः पिपक्षतीत्यादौ तथादर्शनाद् एवं धात्वर्थफले द्वितीयाऽऽर्थस्यान्वयः न तु सन्नर्थे अत एव गृहं तिष्ठासतीति न प्रयोगः अन्यथा गृहे स्थितिः स्यादितीच्छाया गृहविषयत्वात् तथाप्रयोगप्रसङ्गात्। ननूक्तं पाकश्चिकीर्ष्यते तण्डुलः पिपक्ष्यते ओदनो बुभुक्ष्यते इत्यादौ पाकतण्डुलादेस्तिङर्थकर्मत्वस्यान्वयानुपपत्तिः सन्नर्थाकर्मत्वात् सन्नर्थाविशेषितस्य धात्वर्थविशेषितस्य तस्यान्वेतुमशक्यत्वात्। प्रकृत्यर्थविशेषितस्यैव प्रत्ययार्थस्यान्यवान्वेतुं योग्यत्वात्। एवं धात्वर्थकर्मत्वानभिधानादीदृशकर्माख्यातस्थले पाकतण्डुलादिपदाद् द्वितीयाप्रसङ्गश्च तस्मात्पाकतण्डुलादिप्रातिपदिकार्थस्य धात्वर्थकर्मत्वं न युज्यते युज्यते च सन्नर्थकर्मत्वमिति न दर्शितद्वितीयाप्रसङ्गः कर्मतासंबन्धेन धात्वर्थविशिष्टप्रातिपदिकार्थस्य सन्नर्थकर्मत्वोपगमात् तिष्ठासतियोगे न द्वितीयाप्रसङ्गः तिष्ठतेरकर्मकत्वात् तत्र तादृशप्रातिपदिकार्थस्यासम्भवात् तण्डुलादेस्त्विच्छत्वेऽपि कर्मतया पाकविशिष्टतण्डुलस्येच्छोद्देश्यत्वं नानुपपन्नं सुखवन्तमात्मानमिच्छतीत्यादौ सुखविशिष्टात्मनस्तथादर्शनात् अत एवौदनं बुभुक्षत इत्यादौ भोजनविशेष्यतयौदनस्यानुभवादित्युक्तं विशिष्टतण्डुलादेः सन्नर्थकर्मत्वसम्भवात्तण्डुलं पिपक्षतीत्यादिप्रयोगोपपत्तिः पाकज्ञानेच्छायां तु ज्ञानं पिपक्षतीति न प्रयोगः तत्र कर्मतया पाकवैशिष्ट्यस्य ज्ञाने विरहात् किं तु ज्ञानवैशिष्ट्यस्य पाके सत्वात्पाकं जिज्ञासतीति प्रयोगोपपत्तिरिति चेत्तथासति गुडपाकस्य

कर्मतया तण्डुले वैशिष्ट्यमवगाहमानायां गुडपाकीयस्त-
ण्डुलो भवत्वितीच्छायां गुडं तण्डुलः पिपक्ष्यते इत्या-
दिकर्माख्यातप्रयोगप्रसङ्गः सन्नर्थकर्मत्वस्य तण्डुलगत-
स्याख्यातेनाभिधानेऽपि गुडगतस्य धात्वर्थपाककर्मत्व-
स्यानभिधानात् गुडपदाद् द्वितीयाप्रसङ्गस्य दुर्वार-
त्वात् । ननु धातोरप्रकृतित्वात् सन्प्रकृतिकेन कर्माख्या-
तेन कथं धात्वर्थकर्मत्वं तण्डुलादिगतं तण्डुलः पिप-
क्ष्यते इत्यादौ बोधनीयमिति चेत् कर्मख्यातस्थले प्रथ-
मान्तार्थस्य मुख्यविशेष्यकत्वानुरोधेन सन्नर्थस्य धा-
त्वर्थविशेषणतयाऽन्वयावश्यकत्वे सन्नर्थविशेषितधात्व-
र्थकर्मत्वस्यैव कर्माख्यातेन प्रतिपादनसम्भवात् इष्टपा-
ककर्मत्वस्य तण्डुलेऽन्वयबोध उपपद्यते यथा गुरुणा शि-
ष्येण पाच्यते तण्डुल इत्यादौ णिच्प्रकृतिकेन कर्माख्या-
तेन णिजर्थप्रयोजकव्यापारेण प्रयोज्यतासंबन्धेन विशे-
षितस्य पाकस्य कर्मत्वं तण्डुलान्वयि प्रत्याय्यते न हि
तत्र णिजर्थप्रयोजकव्यापारकर्मत्वं प्रत्याययितुं शक्यत
इति । एवं द्वितीयाकर्माख्यातार्थयोः कर्मत्वयोः विशेष-
णत्वविशेष्यत्वाभ्यां सन्प्रकृतिधात्वर्थ एवान्वयोपगमात्
गृहांस्तिष्ठासति गृहास्तिष्ठास्यन्ते वा इति न प्रयोगः अ-
त एव "पूर्ववत्सन" इति सूत्रेण सन्नन्तस्यात्मनेपदादिव्य-
वस्थायां पूर्वस्य प्रकृतिभूतधातोः साम्यं ज्ञापनेन सकर्म-
काकर्मकत्वयोरपि प्रकृतिभूतधातुसाम्यं ज्ञाप्यते इच्छा-
भिन्नार्थकस्य सनः प्रयोगस्तत्र तत्र द्रष्टव्य इति दिक् ।
एवं "जल्पश्रुग्रहदृशामुपसंख्यानमिति" वार्त्तिकेन जल्प-
तिप्रभृतिकर्तरि कर्मसंज्ञा ज्ञाप्यते तेन पुत्रमक्षराणि ज-

ल्यायतीति प्रयोगः तत्र वर्णोत्तरावृत्तित्वेन विशेषितोत्पत्तिर्व्यापारश्च जल्पतेरर्थः न च वर्णोत्पत्तिः फलविधयार्थ इति वाच्यं तथा सति धात्वर्थान्तर्भूतकर्मकत्वात् शब्दायतिवज् जल्पतेरकर्मकत्वापत्तेः वर्णान् पदं वा जल्पतीतिप्रयोगानापत्तेः अथ वा उत्पत्तिः फलतया विवृतस्पृष्टेषत्स्पृष्टाः प्रयत्नास्तादृप्येण व्यापारतया जल्पतेरर्थः जल्पतिवत् ब्रुविवचिवदिगदिप्रभृतयो बोध्याः पुत्रमक्षराणि जल्पयति पितेत्यत्र पुत्रपदोत्तरद्वितीयाया विवृतादिव्यापारान्वयिसमवेतत्वमर्थः णिचः शिक्षणाक्षादिः प्रयोजकव्यापारोऽर्थः एवमक्षरनिष्ठोत्पत्त्यनुकूलस्य पुत्रसमवेतविवृतादिव्यापारस्यानुकूलो यः शिक्षणादिस्तदाश्रयः पितेति वाक्यार्थबोधः अत्र शब्दकर्मकतया जल्पतेः कर्तरि कर्मसंज्ञासिद्धौ वार्त्तिके जल्पतिग्रहणमनर्थकमिति ध्येयम् । एवं यजमानं सूक्तमनुवाकं वा श्रावयतीत्यत्र यजमानपदोत्तरद्वितीयायाः श्रावणप्रत्यक्षान्वयिसमवेतत्वमर्थः अत्रापि शृणोतेः शब्दकर्मकतया पृथग्ग्रहणमनर्थकमिति ध्येयम् । न च शृणोतेः श्रावणत्वमिव शब्दत्वमपि प्रवृत्तिनिमित्तं तथा च शिष्यं धर्मं श्रावयतीति प्रयोगोपपत्तये श्रुवः पृथग्ग्रहणमिति वाच्यम् । शब्दकर्मेत्यत्र कर्मपदस्य कारकपरतया शब्दकारकार्थवाचिधातोरुपग्रहात् शाब्दबोधस्य शब्दकरणकतया शृणोतेस्तथात्वात् शाब्दबोधार्थकस्य शृणोतेर्बुध्यर्थकतयोपग्रहसम्भवाच्च न च सूत्रे बुद्धिपदेन ज्ञानसामान्यवाचिनामेवोपग्रहो न तु ज्ञानविशेषवाचिनां दृशेश्चेति पृथगनुशासनविरोधादिति वाच्यम् । ज्ञानातिरिक्तार्थेऽपि प्र-

वर्तमानस्य दृशेः कर्तरि कर्मत्वज्ञापनार्थं पृथगनुशासनसम्भवात् ।

यत्पथावधिरणुः परमः सा
योगिधीरपि न पश्यति यस्मात् ।
बालया निजमनः परमाणौ
ह्रीदरीशयहरीकृतमेनम् ॥

इत्यादौ दृशेरवगाहनार्थकत्वस्य दर्शनात् तेन योगिधियं परमाणुं दर्शयति योगाभ्यास इति प्रयोगोपपत्तिर्दृशेश्चेत्यनुशासनफलम् अत एव स्मारयत्येनं वनगुल्मः स्वयमेवेत्यादौ इदंपदाद् द्वितीयोपपत्तिः स्मरतेर्ज्ञानार्थकतया स्मरणकर्तरि गत्यादिसूत्रेणैव कर्मत्वज्ञापनात् अन्यथा कर्मत्वेऽनुशासनदौर्लभ्यापत्तेः ननु स्मारयत्येनमित्यादिः क्व प्रयोगः यदर्थं सूत्रे बुद्धिपदस्य ज्ञानसामान्यविशेषोभयवाचित्वमुपेयत इति चेत् णेरणाविति सूत्रे भाष्योदाहरणमिदं तथा हि " णेरणौ यत्कर्मणौ चेत्सकर्तानाध्याने"ति सूत्रस्यायमर्थः रापन्ताद्धातोरात्मनेपदं भवति अण्यन्तधातोर्यत्कर्म णिजन्तधातोः स कर्ता चेद्यथा हस्तिनमारोहतीत्यत्राण्यन्तस्यारोहतेर्हस्ती कर्म तत्रारोहणप्रयोजको न्यग्भावादिर्व्यापारो णिचा हस्तिगतः प्रत्याय्यते चेत्तदा आरोहयते हस्ती स्वयमेव एवं पश्यति शिवमित्यत्र दर्शननकर्मशिवस्तत्र दर्शनप्रयोजकः करुणादिर्व्यापारश्शिवगतो णिचा प्रत्याय्यते चेत् तदा दर्शयते शिवः स्वयमेवेति ईदृशार्थस्याध्यानार्थकप्रकृतिकण्यन्तसमुदायेन बोधनेऽपि आत्मनेपदं न भवति तत्रेदमुदाहरणं स्मरय

त्येनं वनगुल्मः स्वयमेवेति अत्र स्मरणकर्मवनगुल्मगत उद्बोधकसम्बधादिणिचा प्रत्याय्यते एवमूर्ध्वादिगवच्छिन्नसंयोगानुकूलव्यापारार्थकस्यारोहतेर्गत्यर्थकत्वमक्षतमेवोर्ध्वस्याधिकस्य निवेशेऽपि गत्यर्थकत्वहानेरयोगात् करेणुरारोहयते निषादिनमित्यत्रारोहणकर्तरि कर्मत्वं गत्यादिसूत्रेणैव ज्ञाप्यते एवं शिवो दर्शयते भक्तानित्यत्र दृशेर्ज्ञानार्थकतया गत्यादिसूत्रेण दृशेश्चेति वार्त्तिकेन च दर्शनकर्तरि कर्मत्वं ज्ञाप्यते नन्वत्रारोहतिफलोर्ध्वसंयोगाधिकरणतया हस्तिनो दर्शनफलविषयत्वाधिकरणतया शिवस्य कर्मत्वसम्भवे हस्ती स्वमारोहयते निषादिनमिति शिवः स्वं दर्शयते भक्तानिति च प्रयोगः स्यादिति चेदिष्यत एवायं प्रयोगः यदि नेष्यते तदा धात्वर्थफलान्वयिनि कर्मणि णिजर्थव्यापारवङ्भेदोऽपि कर्मत्वे तन्त्रं स भेदः पूर्वोक्तरीत्या णिजर्थान्वयिफले कर्मत्वान्वयसंसर्गघटको वेत्यन्यदेत्। यत्तु पश्यति भव इति कर्मस्थभावके धात्वर्थफलस्थ णिचा प्रतिपादने दर्शयते भव इति तत्र कर्मस्थभावकधातोरकर्मकत्वान्नैतद्योगे द्वितीयाप्रसङ्ग इति शाब्दिकैरुक्तं तत्सूत्रार्थानभिज्ञानविजृम्भितं तथा हि हेतुमतिचेति सूत्रेण प्रयोजकव्यापारे णिचो विधानाद्धात्वर्थव्यापारस्याप्रयोजकं फलं प्रतिपादयितुमसामर्थ्यमेव किं च कर्मस्थभावके कर्मणः कर्तृत्वादणौ कर्मत्वायोगात् ण्यन्तस्यात्मनेपदमपि न सम्भवतीत्यन्यत्र विस्तरोऽनुसन्धेयः। धर्मं वा ग्राहयति शिष्यमित्यत्र गृह्णातेर्ज्ञानार्थकत्वे शिष्यपदोत्तरद्वितीयायाः समवेतत्वमर्थः संयोगादिलक्षणसम्बन्धानुकूलव्या-

पारार्थकत्वे तु कृतिरर्थः तत्र ग्रहिकर्तरि कर्मत्वं न प्रयोगसाधुत्वं संपादयति तथा हि जायाप्रतिग्राहित-गन्धमाल्यामित्यत्र समासानुपपत्तिः नह्यत्र जायया प्रतिग्राहिते गन्धमाल्ये यामिति बहुव्रीहिः सम्भवति । ण्यन्ते कर्तुश्च कर्मण इत्यनुशासनेनाण्यन्तधातुकर्तरि कर्मण्येव कर्मप्रत्ययस्य साधुत्वज्ञापनात् धात्वर्थकर्मग-न्धमाल्यादिसामानाधिकरण्येन कर्मकर्तुस्यासाधुत्वात् न वा जायया गन्धमाल्ये प्रतिग्राहितामित्यर्थेपिपल्यादि-रसौ तत्पुरुषः तथा सति तत्पुरुषस्योत्तरपदलिङ्गतानि-यमेन टापोऽनुत्पादप्रसङ्गात् । इत्थं ग्रहिकर्तुर्ण्यन्तेऽपि न कर्मत्वं किं तु ग्रहिकर्मण एवातो जायया प्रतिग्राहि-ते गन्धमाल्ये यये ति बहुव्रीहिः विग्रहवाक्यात् जाया-प्रयोजितयत्कर्तृकप्रतिग्रहकर्मणी गन्धमाल्ये इति शा-ब्दबोधः समासे तु जायापदस्य जायाप्रयोजकगन्धमा-ल्यकर्मकप्रतिग्रहकर्तरि लक्षणा प्रतिग्राहितादिशब्दानां तात्पर्यग्राहकत्वमिति एवं ग्रहिग्रहणमप्यनर्थकमिति ध्येयं माणवकं सूर्यं दर्शयत्याचार्य इत्यादौ माणवक-पदोत्तरद्वितीयाया दर्शनान्वयिसमवेतत्वमर्थः अत्रापि दृशेश्चेत्यनुशासनेन दर्शनकर्तरि कर्मत्वज्ञापनात् दृशेः पृथग्ग्रहणमप्यनर्थकमिति ध्येयम् । दृशेश्चेत्यनुशास-नं दर्शनकर्तरि कर्मत्वं ज्ञापयति न च दृशेर्ज्ञानार्थक-तया तत्कर्तरि गत्यादिसूत्रेणैव कर्मत्वसिद्धेः पृथगनुशा-सनं व्यर्थमिति वाच्यम् । ज्ञानभिन्नार्थकस्यापि दृशेः क-र्तरि कर्मत्वज्ञापनार्थतया अवैयर्थ्यात् यथा दर्शये-नमपि केवलान्वयिनः सरणमित्यादौ जातिमत्वसाध्य-

कसत्त्वहेतोरिदंपदार्थतया तस्य दर्शनकर्तृत्वं बाधितमिति दृशेः प्राप्तौ लक्षणा तथा च दर्शयेत्यस्य प्रापयेत्यर्थः. दृश्यर्थप्राप्तिकर्तरि सत्त्वादौ कर्मत्वज्ञापनं दृशेश्चेत्यनुशासनफलम्। न च प्राप्तेर्गतित्वात् तदर्थकस्य दृशेः कर्तरि गत्यादिसूत्रेणैव कर्मत्वसिद्धेः पृथगनुशासनवैयर्थ्यमितिति वाच्यम्। गत्यादिसूत्रे गतिवाचकानामेवोपादानात् न तु गतिलक्षकानां अन्यथा प्रचेर्गतिलाक्षणिकत्वे पाचयति देवदत्तं यज्ञदत्त इति प्रयोगापत्तेः। एवमयस्कान्तमयो दर्शयतीत्यव्याव्यवहितावस्थानं दृशेरर्थः तच्चायःकर्मत्वमव्यवधाने फलेऽन्वेति अयस्कान्तनिष्ठं कर्तृत्वलक्षणं कर्मत्वमवस्थानेऽन्वेति एवं परमाणुं योगिधियं दर्शयतीत्यत्र विषयताप्रतियोगित्वं दृशेरर्थस्तत्र परमाणुविशेषितमाधेयत्वं विषयत्वे फलेऽन्वेति धीविशेषितं कर्तृत्वमाधेयत्वलक्षणं प्रतियोगित्वेऽन्वेति। तादृशप्रतियोगित्वं तु प्रयोजकतया ण्यर्थे योगजधर्मलक्षणातिशयविशेषे योगाभ्यासादिव्यापारेऽन्वेतीति। यत्तु दृशेश्चेति पृथगनुशासनेन गत्यादिसूत्रे बुद्धिपदेन ज्ञानत्वविशिष्टवाचिनामेव ग्रहणं न तु ज्ञानत्वव्याप्यविशिष्टवाचिनां स्मरतिजिघ्रत्यादीनामिति ज्ञायते अन्यथा पृथगनुशासनवैयर्थ्यप्रसङ्गादिति शाब्दिकैरुक्तं तन्न पृथगनुशासनसार्थक्यस्य दर्शितत्वात् स्मरतियोगे स्मारयत्येनमितिभाष्यप्रयोगस्य दर्शितत्वाच्च। जिघ्रतियोगेऽपि घ्रापयत्योषधीगन्धं वाहान्मृतः स्मर्शयति कन्यां वरं परिचारिकेत्यादिप्रयोग इष्ट एव "अभिवादिदृशोरात्मनेपदे वेति वाच्य"मिति वार्त्तिकेनाभिवादिदृशोः कर्तरि कर्मत्वविकल्प-

आत्मनेपदसमभिव्याहारे ज्ञाप्यते तत्राभिवादेरात्मनेपदित्वाद् दृशः परस्मैपदित्वे तु न विकल्पः किं तु दृशः कर्त्तरि कर्मत्वमेव अभिवादयते विश्वामित्रं रामेण रामं वा दशरथ इत्यादावभिवादेर्नमस्कारोऽर्थः स चोत्कर्षवत्तया ज्ञापनस्वरूपस्तत्रोत्कर्षप्रकारकज्ञानं व्यापारश्च खण्डशोऽर्थः तत्राभिवाद्यविश्वामित्रादिविशेषितमाधेयत्वमुत्कर्षविशिष्टसमवायावच्छिन्नाधेयत्वीयस्वरूपसंसर्गेण ज्ञानेऽन्वेति ज्ञानं तु प्रयोजकतया व्यापारे त्वत्तोऽहमपकृष्ट इति वाक्यादिस्वरूपेऽन्वेति उत्कर्षस्तु व्यापाराश्रयाभिवादकावधिको बोध्यः रामपदोत्तरतृतीयाद्वितीयायोर्व्यापारान्वयिनी कृतिरर्थः व्यापारस्तु प्रयोजकतया णिजर्थे दशरथव्यापारेऽन्वेति द्वितीयार्थाधेयत्वस्य दर्शितसंसर्गेण ज्ञानेऽन्वयोपगमात् अभिवाद्यान्यस्याभिवाद्यगतोत्कर्षज्ञानेऽपि तमभिवादयते इति न प्रयोगः यदि चोत्कर्षप्रकारकज्ञानं भ्रमोऽपि धात्वर्थस्तदा उत्कर्षप्रकारतानिरूपितविशेष्यतया समवायेन च द्वाभ्यां संबन्धाभ्यामवच्छिन्नमाधेयत्वमभिवाद्यवाचिपदोत्तरद्वितीयाया अर्थ इति न काऽप्यनुपपत्तिः । यदि चाभिवाद्यस्य व्यासङ्गवशादुत्कर्षाज्ञानेऽपि अभिवादिप्रयोगस्तदा उत्कर्षवत्ताजिज्ञापयिषा धात्वर्थः फलं व्यापारस्तु पूर्वोक्त एव तच्चोत्कर्षप्रकारकज्ञाननिष्ठोद्देश्यतावच्छेदकीभूतयोरुत्कर्षप्रकारतानिरूपितविशेष्यताकत्वसमवेतत्वयोर्वर्तमानाभ्यामवच्छेदकत्वाभ्यां निरूपितयाऽवच्छेदकतया संबन्धेनावच्छिन्नमाधेयत्वमभिवाद्यवाचिपदोत्तरद्वितीयायाअर्थः उत्कर्षजिज्ञापयिषायां फलीभूतायामन्वेति । सा

च प्रयोज्यतया दर्शितव्यापारेऽन्वेति शेषं तु पूर्ववत् अत्र विश्वामित्रसमवेतमुत्कर्षप्रकारतानिरूपितविश्वामित्रविशेष्यताकमुत्कर्षप्रकारकज्ञानं भवत्वितीच्छाया उद्देश्यतावच्छेदकद्वयं समवेतत्वं दर्शितविशेष्यत्वं च तदवच्छेदकता विश्वामित्रे स्पष्टा सा चैका द्वयी वेत्यन्यदेतत् विश्वामित्रस्य स्वविशेष्यतया निरूपितोत्कर्षप्रकारताकं ज्ञानं भवत्वितीच्छा तत्रापि विशेष्यतानिरूपितप्रकारताकत्वावगाहने प्रकारतानिरूपितविशेष्यताकत्वावगाहननियमाद्विशेष्यत्वस्योद्देश्यतावच्छेदकत्वमिति न विश्वामित्रस्योद्देश्यतावच्छेदकतावच्छेदत्वहानिरिति। भवतु वा प्रकारित्वस्योद्देश्यतावच्छेदकता तथापि तन्निरूपकावच्छेदकताघटितपरम्पराविशेष्यत्वविशेषणतया भासमानाभिवाद्यनिष्ठाऽपि सम्बन्धस्तथा चान्यतरसम्बन्धावच्छिन्नमाधेयत्वमभिवाद्यवाचिपदोत्तरद्वितीयाया अर्थः तेन गालवसमवेतस्य विश्वामित्रसमवेतस्य विश्वामित्रोत्कर्षज्ञानस्य विश्वामित्रसमवेतस्य शिवोत्कर्षज्ञानस्य विश्वामित्रविशेष्यकगुणप्रकारकशिवोत्कर्षप्रकारकसमूहालम्बनज्ञानस्य वेच्छायां विश्वामित्रमभिवादयत इति न प्रयोगः द्वितीयार्थस्य निरुक्ताधेयत्वस्यान्वेतुमयोग्यत्वात् एवमेवाभिवादिपर्यायाः नमस्करोत्यादयो बोध्याः। एवं मूर्धं दर्शयते माणवकेन माणवकं वाऽऽचार्य इत्यादौ माणवकपदोत्तरतृतीयाद्वितीययोर्दर्शनान्वयिसमवेतत्वमर्थ इत्युक्तप्रायम्। "कृञोरन्यतरस्यामि"त्यनुशासनेन कर्मत्वविकल्पज्ञापकेन कर्मकार्यद्वितीयाविकल्पो बोध्यते अत एव गत्यादिमूलस्य गत्यादिकर्ता कर्मेवेति

नियममात्रार्थकता न युज्यते गत्यादिसूत्रेणैव गत्याद्यर्थकभिन्नानां कर्तरि कर्मत्वविकल्पावगमेन हृक्रोरित्यनुशासनस्य वैयर्थ्यप्रसङ्गात् । तस्मात् गत्यादीनामेव कर्तृतिनियमे गत्याद्यर्थकान्यधातुकर्त्तरि व्यवच्छिन्नस्य प्रतिप्रसवार्थं विधानार्थं वा हृक्रोरित्यस्य पृथगारम्भः यद्यन्तयोर्हृक्रोरण्यन्तहृक्रकर्तरि कर्मत्वं विकल्पेन ज्ञापयति यथा हारयति भारं भृत्येन भृत्यं वा प्रभुरित्यत्र भृत्यपदोत्तरतृतीयाद्वितीययोः कृतिलक्षणं कर्तृत्वमर्थो हरणोऽन्वेति गत्यर्थकतया हृञः कर्तरि कर्मत्वस्य नित्यताप्राप्तौ विकल्पार्थं ग्रहणं सेतुं कारयति वानरैर्वानरान्वा राम इत्यत्र कृञो यत्नार्थत्वे वानरपदोत्तरतृतीयाद्वितीययोः समवेतत्वमर्थः उत्पादनार्थत्वे तु कृतिरर्थ इति मन्तव्यम् । अत्र धात्वर्थकर्मणः प्रयोगेऽप्रयोगे वा धात्वर्थकर्तरि णिजर्थकर्मणि तिङादयः कर्मप्रत्यया भवन्ति यथा द्विगन्तं गम्यते गमितो वा रिपुर्गम्यते गमितो वा रिपुः, धर्मं बोध्यते बोधितो वा माणवकः बोध्यते बोधितो वा माणवकः, मिष्टं भोज्यते भोजितो वाऽतिथिः भोज्यते भोजितो वाऽतिथिः, पयः पाय्यते पायितो वा शिशुः पाय्यते पायितो वा शिशुः, ब्रह्म व्याहार्यते व्याहारितो वा माणवकः व्याहार्यते व्याहारितो वा माणवकः, मासमास्यते आसितो वाऽतिथिः आस्यते आसितो वाऽतिथिः, तदुक्तम् ।

प्रधानकर्मण्याख्येये लादीनाहुर्हि कर्मणाम् ।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः ॥

इति यत्र यादृशकर्तृत्वं द्वितीयार्थस्तत्र तादृशकर्तृ-

त्वं कर्माख्यातार्थस्तद्वान् कर्मकृदर्थ इति मन्तव्यं यत्र धात्वर्थकर्तृणिजर्थकर्मणो न प्रयोगस्तत्र धात्वर्थकर्मण्यपि कर्मप्रत्ययाः भवन्ति यथा गमितः प्रापितो वा गिरिः, बोधितो धर्मः, पायसं भोजितं, पयः पायितं, वेदो व्याहारितो, मास आसितः, एवं सूर्यं दर्श्यते दर्शितो वा मा-णवकः, केवलान्वयिनः सरणिं दर्श्यतां दर्शनीयो वाऽयं दर्शनीयो वाऽयं, यद्वात्वर्थकर्तरि णिजर्थकर्मत्वं वैकल्पिकं तत्रापि णिजर्थकर्मण्येव कर्मप्रत्ययः विश्वामित्रमभिवाद्यते अभिवादितो वा रामः, अभिवाद्यते ऽभिवादितो वा रामः भारं हार्यते हारितो वा भृत्यः हार्यते हारितो वा भृत्यः, सेतुं कार्यन्ते कारिता वा वानराः कार्यन्ते कारिता वा वानराः, एवं सूर्यो दर्शितः, अत एव "विस्तरो दर्शितः शब्दकौस्तुभे" इत्युपपद्यते विश्वामित्रोऽभिवादितः, भारो हारितः, सेतुः कारितः, इत्यादयः प्रयोगा अनुसन्धेयाः गमनानुकूलव्यापारवाचकस्य नयतेर्वहतेश्चाधिकस्य व्यापारस्य वाचकत्वेऽपि गत्यर्थकत्वस्य न हानिरिति गत्यर्थकतया नयतेर्वहतेश्च कर्तरि प्रसक्तं णिजर्थकर्मत्वं निषेधति "नीवह्योः प्रतिषेधो वक्तव्य" इत्यनुशासनं तेन नाययति वाहयति वा भारं-भृत्येनेति प्रमाणं न तु नाययति वाहयति वा भारं भृत्यमिति "वहेरनियन्तृकर्तृकस्ये" ति वक्तव्यम् । इति वार्त्तिकेन वहेः कर्तरि नियन्तृकर्तृकणिजर्थकर्मत्वस्याप्रतिषेधो ज्ञाप्यते नियन्ता तु पशुशिक्षकः तेन वाहयति रथं वाहान्सूतः वाहयति गोणीं बलीवर्दान् वणिक् इत्याद्युपपत्तिः । भोजनार्थतयाऽऽदिखादयत्योः कर्तरि

प्रसक्तं णिजर्थकर्मत्वं निषेधति "आदिखाद्योः प्रतिषेधो-वक्तव्य"इत्यनुशासनं तेन णिजन्तयोरादिखाद्योरणिजन्तादिखादतिकर्तरि कर्मत्वनिषेधो ज्ञाप्यते तेनादयति खादयति वाऽन्नं वटुनेति प्रमाणं न तु आदयति खादयति वाऽन्नं वटुमिति । "भक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्य"इत्यनुशासनं भक्षेः कर्तरि णिजर्थकर्मत्वं निषेधति तेन भक्षयत्यन्नं वटुनेति प्रमाणं न तु भक्षयत्यन्नं वटुमिति हिंसार्थस्य कर्तरि न णिजर्थकर्मत्वनिषेधः हिंसार्थत्वं तु हिंसानुगुणीभूतार्थकत्वं न तु हिंसावाचकत्वं-भक्षिणा मरणानुकूलव्यापारस्य ज्ञाप्यबोधनात् तेन भक्षयति बलीवर्दान् सस्यमिति प्रयोग उपपद्यते चेत्थंसस्यानां प्राणित्वात् सस्यभोजनस्य सस्यमरणानुगुणत्वात् । अकर्मकतया शब्दायतेः कर्तरि प्रसक्तं णिजर्थकर्मत्वं निषेधति "शब्दायतेः प्रतिषेधो वक्तव्य"इत्यनुशासनं तेन शब्दाययति सैनिकैरिति प्रमाणं न तु शब्दाययति सैनिकानिति । वैकुण्ठमधिशेते हरिरित्यादौ वैकुण्ठादेः कर्मत्वोपपत्तये"अधिशीङ्स्थासां कर्म"इत्यनुशासनम् । अधिपूर्वकाणां शीङ्स्थासां कर्तुः कर्माधारः कर्मसंज्ञ इत्यर्थकं यद्यप्यधिशयत्यादेरकर्मकस्य कर्मत्वं वैकुण्ठादिदेशस्य मासादिकालस्य च वार्त्तिकेनैवोपपादितं-देशकालयोरेवाधारत्वादनुशासनवैयर्थ्यम् । तथापि वार्त्तिके देशः कुरुत्वपञ्चालत्वादिना कालोऽपि तदवान्तरधर्मेण ज्ञापितः न तु देशत्वेन कालत्वेन प्रकृतसूत्रेण देशत्वेन कालत्वेनापि देशान्योऽपि गृहशय्यादिस्तथोक्तइति न वैयर्थ्यमिति । एवं वैकुण्ठमधिशेतेऽध्यास्तेऽधि-

तिष्ठति वा हरिरित्यादौ कर्तृघटितपरम्परासंसर्गावच्छिन्नमाधेयत्वं द्वितीयार्थो धात्वर्थव्यापारे शयनादावन्वेति शौङ्स्यासामर्थ्यात् पूर्वमेवोक्ता अधिस्तु कर्मप्रत्ययाकाङ्क्षायामुपयुक्तो निरर्थक एव । अभिनिविशतेराधारे कर्मत्वं ज्ञापयति । "अभिनिविशश्च" इत्यनुशासनम् । अभिनिपूर्वकस्य विशतेराधारः कर्मसंज्ञक इत्यर्थकम् अभिनिविशते सन्मार्गमित्यत्राभिनिविशो धारापन्नज्ञानं तज्जन्मा दृढतरसंस्कारो वाऽर्थः यतिवत्फलावाचकत्वाद्कर्मकत्वं सन्मार्गादिविशेषितं विषयतासंबन्धावच्छिन्नमाधेयत्वं द्वितीयार्थस्तादृशे ज्ञाने संस्कारे वा धात्वर्थेऽन्वेति यदि च साक्षात्संबन्धावच्छिन्नाधेयत्वस्य सप्तम्यर्थस्येव सप्तम्यर्थानुशिष्टद्वितीयार्थस्यापि धात्वर्थेऽन्वयोनाभ्युपेयते तदा व्यापारानुबन्धिविषयतास्वकर्तृसंबन्धघटितपरम्परासंबन्धावच्छिन्नमाधेयत्वं द्वितीयार्थ इति विशतेस्तु अन्तरवयवावच्छिन्नसंयोगानुकूलो व्यापारोऽर्थोऽत एवायं सकर्मकः अन्तरवयवास्तु विजातीयारम्भकसंयोगवदवयवाः आरब्धैकावयविभिन्नावयव्यारम्भकसंयोगानधिकरणावयवा वा गृहादेर्बहिरवयवानामलिन्दादीनां गृहान्याङ्गनाद्यवयव्यारम्भकसंयोगवत्त्वान्नान्तरवयवत्वमिति अन्तर्विशतीत्यादावन्तरिति लुप्तसप्तमीकमव्ययं न तु लुप्तद्वितीयान्तमधः पततीत्यत्राधःपदवदतो नानुपपत्तिरिति मन्तव्यम् । निविशतेस्तु तथाविधः संयोग एवार्थोऽत एवायमकर्मक इति । यत्र तु कारणतायां प्रविशति निविशते वा इति प्रयोगस्तत्र प्रपूर्वस्य वा विशतेर्घटकत्वलक्षणसंबन्धोऽर्थस्तत्र कारणता-

विशेषितस्य सप्तम्यर्थस्य निरूपकत्वेन निरूपकनिरूपकत्वेन वा संबन्धेनावच्छिन्नस्याधेयत्वस्यान्वय इति एष्वर्थेष्वभिनिविष्टानामिति फणिभाष्यप्रयोगदर्शनात् सूत्रे चकारोऽधिकतया क्वचित्कर्मसंज्ञानिषेधं सूचयति यथा पापेऽभिनिविशत इति । उपवसति वैकुण्ठमित्यादौ वैकुण्ठादेः कर्मत्वोपपत्तये "उपान्वध्याङ्वस" इत्यनुशासनमुपादिपूर्वकस्य वसतेराधारः कर्मसंज्ञ इत्यर्थकम् । उपवसति अनुवसति अधिवसति आवसति वा वैकुण्ठं हरिरित्यत्र भूयःकालावच्छिन्नसत्वं वसेरर्थस्तत्र कर्तृसंबन्धघटितपरम्परासंसर्गावच्छिन्नमाधेयत्वं द्वितीयार्थो धात्वर्थेऽन्वेति यत्राभोजनमुपवसेरर्थस्तत्र कर्मसंज्ञानिषेधक"मभुक्त्यर्थस्य तु ने"ति वार्त्तिकम् । तेन वनेतूपवसतीत्येव प्रमाणम् । एकादशीमुपवसेद्द्वादशीमथवा पुनः । इत्यादावुपवसेरभोजनं नार्थः किं तु दोषादुपावृत्तस्य गुणैः सह वासः ।

उपावृत्तस्य दोषेभ्यो यस्तु वासो गुणैः सह ।
उपवासः स विज्ञेयः सर्वभोगविवर्जितः ॥

इत्यार्षपरिभाषणादतो न द्वितीयानुपपत्तिरिति वदन्ति । वस्तुतस्तूपवसेरभोजनार्थकत्वेप्यकर्मकत्वमक्षतमेवेति देशकालादीनामकर्मककर्मत्वं वार्त्तिकेन ज्ञापितमिति न द्वितीयानुपपत्तिः कालिकाधेयत्वस्य द्वितीयाधेयत्वं न तु कर्तृसम्बन्धघटितपरम्परावच्छिन्नाधेयत्वस्येति । शीङादीनां वस्यन्तानामनुपसृष्टानामाधारस्याधिकरणसंज्ञा उपसृष्टानां तु कर्मसंज्ञेत्यन्यपूर्वकं कर्म विज्ञेयमिति । "क्रुधद्रुहोरुपसृष्टयोः कर्मे"त्यनुशासनम् । क्रु-

धद्रुहोरुपसृष्टयोर्यं प्रति कोपस्तत्कारकं कर्मसंज्ञकमित्यर्थकं क्रूरमभिक्रुध्यतीत्यत्र क्रूरे कर्मत्वं ज्ञापयति । क्रुधिद्रुहोर्योऽर्थः क्रूरविशेषितं द्विष्टतास्वरूपं विषयत्वं द्वितीयार्थः क्रूरमभिद्रुह्यतीत्यत्र द्रुहेर्द्विष्टाचरणमर्थस्तत्र द्वेषो व्यापारश्च द्वयमर्थस्तत्र क्रूरादिविशेषितं समवेतत्वं द्वेषेऽन्वेति । यदि च व्यापारमात्रमनिष्टानुकूलव्यापारोद्रुहेरर्थस्तदा द्वेषो द्वितीयार्थः क्रूरादिविशेषितो विषयतात्रिशेषेण व्यापारमात्रेऽनिष्टे वाऽन्वेति इत्यादिकं वक्ष्यते तत्रापि क्रुधद्रुहोरुपसर्गविनाकृतयोर्द्वेषस्य विषये समवायिनि च संप्रदानसंज्ञा सोपसर्गयोस्तु कर्मसंज्ञेत्यन्यपूर्वकं कर्मेति ।

इति विभक्त्यर्थनिर्णये कारकद्वितीयार्थनिर्णयः ॥

नामार्थान्वयिनो द्वितीयार्था अकारकतया संज्ञायन्ते यथा उभयतः सुभद्रां संकर्षणवासुदेवावित्यत्रोभयशब्दस्य पार्श्वद्वयमर्थः प्रकृते पञ्चरास्थानां समूहो न पार्श्वः किंतु तत्संनिहितो देशो दिग्वा तसिलो वृत्तिमत्वमर्थः द्वितीयायाः पार्श्वान्वयिसंबन्धित्वमर्थः तथा च सुभद्रासंबन्धिपार्श्वद्वयवृत्तौ संकर्षणवासुदेवावित्यन्वयबोधः तदुक्तं-

नाम्नो द्विधैव संबन्धः सर्ववाक्ये व्यवस्थितः ।
सामानाधिकरण्येन षष्ठ्या वाऽपि क्वचिद्भवेत् ॥

इति षष्ठीपदसमानविभक्तीनामुपलक्षकम् । पार्श्वपदेन पार्श्वसन्निहितदिशो विवक्षणादग्रपृष्ठयोस्तुल्यान्तरयोरुभयशब्दप्रयोगे न द्वितीया । सर्वतः कृष्णं गोपाइत्यत्र सर्वपदं सर्वदिक्परन्तसेर्द्वितीयायाश्च पूर्वोक्त एवार्थस्तथा च कृष्णसंबन्धिसर्वदिग्वृत्तयो गोपा इत्यन्व-

यबोधः धिक्शाक्यानित्यत्र निन्दिताचारो जुगुप्सा वा धिक्शब्दार्थः जुगुप्सा तु द्वेषविशेषः द्वितीयाया आधेयत्वं निन्दिताचारान्वयिजुगुप्सान्वयिविषयित्वं वाऽर्थस्तथा च शाक्यवृत्तिनिन्दिताचार इति शाक्यविषयिणी जुगुप्सेति वा शाब्दबोधः "धिगस्तु तृष्णातरलं भवन्मन" इत्यत्र मन इति द्वितीयान्तं धिगित्यस्तिक्रियायां कर्तृतयाऽन्वेति अथ वा धिगित्यस्तिक्रियायामेवान्वेति तथा च जुगुप्सितसत्तावन्मन इत्यन्वयबोधः । धिङ्मूर्खंत्यत्र जुगुप्सायां मूर्खसम्बोध्यत्वस्यान्वयः व्युत्पत्तिवैचित्र्येण विषयितासंसर्गेण मूर्खस्यापि जुगुप्सायामन्वयः तेनान्यविषयकजुगुप्सायां मूर्खसम्बोध्यत्वान्वयविवक्षायां न तथाप्रयोगः । आत्मिन्नभवन्निपदार्थे सम्बोध्यत्वस्यान्वयो धिगितिक्रियायां भवनेऽन्वेतीति कश्चित् । यदि च स्वविषयकद्वेषो न भवतीति धिङ्मामित्यादौ नैषा गतिरिति विभाव्यते तदा गुणाभावदोषान्यतरस्वरूपोपकर्षो धिक्शब्दार्थः द्वितीयायाः संबन्धोर्थः मां धिगित्यत्रापकर्षो मत्संबन्धीत्यन्वयबोधः । गुणः पाण्डित्यकारुण्यादिर्दोषः क्रोधलोभादिः । एवं धिङ्मूर्खंत्यत्र शास्त्रानभिज्ञस्य मूर्खपदार्थस्य सम्बोध्यत्वं वस्तुविवेकराहित्यस्वरूपापकर्षेऽन्वेति दर्शितापकर्षं मूर्खस्यानन्वयेऽपि न क्षतिरस्य मूर्खसाधारणत्वात् यत्र तु सम्बोध्यसाधारणोनापकर्षस्तत्र द्वितीयान्तपदापेक्षाऽवश्यकी यथा "कृष्ण त्वत्सेवका धन्या धिगन्यान् प्राकृतान् जनानि"त्यादौ एतेन धिगर्थं प्रातिपदिकार्थस्य साक्षादन्वयोपगमे धिक्चेलश्चेण वेत्यादिकः प्रयोगः स्यादिति समाहितंसा-

त्वादन्वयानुपगमात् । एवं धिगध्ययनहीनं जनमित्यत्र पाण्डित्याभावः धिग्व्याधमित्यत्र कारुण्याभावः अचान्तं-धिगित्यत्र क्रोधः धिक् स्वस्तिवाचनिकानित्यत्र लोभः धिक्पदार्थस्तत्र द्वितीयार्थसम्बन्धस्यान्वय इति । अकरुणं धिगित्यत्र परकीयस्य सुखस्य दुःखहानेर्वा हेषः धिक् क्रुद्धमित्यत्र हन्तृत्वं धिक् लुब्धमित्यत्र परस्वापहारित्वं धिक्पदार्थः एवमन्यत्राप्यूहनीयमिति । धिक्कृष्णाभक्तमित्यत्र भक्तिप्रयोज्यगतेर्विरुद्धः अभक्तिप्रयोज्याधोगतिर्वा धिक्पदार्थ इति । सर्वनाम्नामिव बुद्धिविशेषप्रकारत्वोपलक्षितधर्मवति धिक्पदस्य शक्तिरिति नानुगमः उपर्युपरिलोकं रविरित्यत्र ध्रुवावधिकपरत्वनिरूपितापरत्वाधिकरणादेश उपरिपदार्थस्तस्य चाधेयतया प्रातिपदिकार्थेऽन्वयः परत्वान्वयिसमवेतत्वं द्वितीयार्थः तथा च लोकसमवेतध्रुवावधिकपरत्वनिरूपितापरत्वाधिकरणदेशवृत्ती रविरित्यन्वयबोधः अधोऽधश्चन्द्रमसं रविरित्यत्र शेषावधिकपरत्वनिरूपितापरत्वाधिकरणं देशोऽधःपदार्थः शेषं पूर्ववत् तथा च शेषावधिकचन्द्रमस्समवेतपरत्वनिरूपितापरत्वाधिकरणदेशवृत्ती रविरित्यन्वयबोध अध्यधिगगनं रविरित्यत्र मध्यभागोऽधिशब्दार्थस्तस्यान्वयः पूर्ववत् द्वितीयार्थः सम्बन्धः गगनशब्दो वायुमण्डलार्थकस्तथा च वायुमण्डलसम्बन्धिमध्यभागवृत्ति रविरित्यन्वयबोधः । वायुमण्डलमध्यभागस्तूदयास्ताचलान्तराभूतदेशावधिकपरत्वनिरूपितापरत्वाश्रयः सामान्यतस्तु अवयवावधिकावयवसमवेतपरत्वनिरूपितापरत्वाश्रयो मध्यभागो

बोध्यः । द्विर्वचनं सामीप्यमभिधत्ते द्योतयति वा "उपर्यध्यधः सामीप्ये" इत्यनुशासनात् अत्र उपरिदेशसामीप्यमुपरिदेशे बुध्यते । एवमधोऽधिदेशयोरपि सामीप्यं तु संयुक्तसंयोगादिपरम्पराघटकसंयोगानामल्पत्वं बोध्यमिति यदि च द्वितीयाप्रकृत्यर्थनिरूपितसामीप्यं प्रतीयते तदोपर्युपरिपद्मान् भ्रमराश्चपलाः पद्मानधोऽधो नीराणि कामारमध्यधि पद्माः इत्युदाहरणं कामारनिरूपितं मध्यभागे सामीप्यं तु स्वसंयुक्तसंयोगादिपरम्पराघटकसंयोगानां चतुर्दिगवच्छिन्नानां तुल्यत्वं बोध्यमिति अत एव ।

नवानधोधो दृहतः पयोधरान्
समूढकर्पूरपरागपाण्डुरम् ।
क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना
स्फुटोपमं भूतिसितेन शम्भुना ॥

इत्यत्र नवमेघसमीपाधरस्थितनारदे उत्क्षिप्तगजकृत्तिशम्भूपमा प्रतीयते दूरावस्थितौ तु न विशिष्टोपमा सम्भवतीति तदेतदुक्तं वाक्यपदीये ।

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥

धिगिति लुप्तसप्तमीकमव्ययमाम्रेडितमिह सामीप्यबोधकं विवक्षितं वीप्सार्द्विर्वचने तु न द्वितीयानियमः अत एवोपर्युपरिबुद्धीनां चरन्तीश्वरबुद्धय इत्यत्र षष्ठीति वदन्ति उपरिबुध्धीनामुत्तानबुद्धीनामुपरीत्यन्वयोपगमादुपरिशब्दस्य नाम्रेडितत्वमिति न द्वितीयेति कश्चित् वस्तुतस्तु शेषे षष्ठ्या न क्वाप्यपवाद इति द्वितीयाषष्ठ्यो-

रुभयोः समभिव्याहारः प्रामाणिक इति वक्ष्यते । अन्यत्रापि दृश्यते द्वितीया यथा चैत्रं यावच्छ्रोतमित्यादौ यावद्योगे । यावन्निपातस्योत्तरावधिकपरत्वमर्थः तदन्वयिनिरूपकत्वं द्वितीयार्थः अथ वा उत्तरावधिकपरत्वं खण्डशोऽर्थः अवश्यन्वयितादात्म्यं द्वितीयार्थ इति यथा वा "क्व कर्मप्रध्वस्तं फलति पुरुषाराधनमृते" इत्यादौ ऋते योगे अत एव "ऋते द्वितीया चे"ति चान्द्रं सूत्रम् ऋतेशब्दार्थो वक्ष्यते "क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गत्वं चे"ति परिभाषणात् स्तोकं पचतीत्यादौ द्वितीया नपुंसकत्वमजहल्लिङ्गेतरशब्दानां बोध्यं तेन सुखहेतुं पश्यतीत्यत्र न क्लीवत्वं न च क्रियाविशेषणस्य कर्मत्वे कर्मलकारापत्त्या स्तोकः पच्यते इति प्रयोगः स्यादिति वाच्यं यतोऽनुशासनेन क्रियाविशेषणवाचिप्रातिपदिकानां कर्मत्ववाचिद्वितीयाप्रकृतित्वं प्रत्याय्यते अत एव शब्दधर्मक्लीवत्वस्याप्यन्वय इति तत्र यदि विशेषणविभक्तेस्तादात्म्यमर्थस्तदा द्वितीयाया अपि यदि च तादात्म्यं संसर्गः विशेषणविभक्तिः साधुत्वार्थिका तदा द्वितीयापि साधुत्वार्थिका तत्राद्ये तादात्म्यस्य फलान्वयेऽपि न कर्मत्वं फलान्वयिन आधेयत्वस्यैव तथात्वात् अन्यथा जलं न पचतीत्यत्र जलाधेयत्वाभावस्य विक्लित्त्यन्वये जलाधेयत्वाभावः पच्यत इति प्रयोगप्रसङ्गात् द्वितीयपक्षेऽपि तादात्म्येन फलान्वयिनो न कर्मत्वं न हि सम्बन्धमात्रेण फलान्वयिकर्म भवति कालोपाधेः सकर्मकमात्रकर्मत्वापत्तेः किं तु तत्तत्संसर्गविशेषेण फलान्वय्येव तत्र संसर्गविशेषे तादात्म्यं नाल्पभवति येन

क्रियाविशेषणश्लोकादौ कर्मलकारः प्रसज्येत अत एव क्रियाविशेषणस्य फलान्वये कर्मत्वमिति तत्र द्वितीया-व्यापारान्वये कर्तृत्वमिति तत्र प्रथमा अथ वा ज्योतिष्टोमेन यजेतेत्यत्रैव करणानुवादिका तृतीया इव एवमग्निहोत्रं जुहोतीत्यत्रैव श्लोकं पचतीत्यत्रापि भावना-कर्मपाकविशेषणश्लोकादिपदात् कर्मानुवादिका द्वितीया । न च क्रियाविशेषणस्य कर्मत्वपक्षे तत्र कर्मलकारः स्यादिति वाच्यम् । अस्तेर्व्युत्पन्नस्यात्मधारणसुच्यत इति निरुक्तस्मृत्याऽऽत्मधारणानुकूलव्यापारार्थकस्यास्तेरप्यात्मनि कर्मणि कर्मलकारप्रसक्त्या व्युत्पत्तिवैचित्र्याभ्युपगमात् । तथा हि येन कर्मणा सकर्मको धातुः तत्रैव कर्मणि कर्मप्रत्ययस्य साधुत्वं-आत्मनः कर्मणो धात्वर्थान्तर्भूतत्वात् धातुनाऽभिधानात् न तेन कर्मणाऽस्तेः सकर्मकत्वमिति न तत्र कर्मलकारप्रसङ्गः तथा फलात्मकश्लोकस्य धातुनाऽभिधानान्न तेन कर्मणा सकर्मकत्वमिति नात्र कर्मलकारप्रसक्तिः द्वितीया तु न तेन कर्मणा सकर्मकत्वमपेक्षते यतस्तारं शब्दायति दीर्घमश्नोत्यादौ धात्वर्थान्तर्भूतकर्मणः शब्दात्मादेर्विशेषणे कर्मानुवादिका दृश्यते इत्यमेव क्रियाविशेषणपदोत्तरद्वितीयायाः कर्मानुवादकत्वपक्षोऽभ्युपेयते एवं फलान्वयिक्रियाविशेषणानां-कर्मानुवादिका द्वितीया फलव्यापारयोः संसर्गीभूतकर्मत्वस्य प्रापिका यथा धात्वर्थान्तर्भूतकर्मफलयोः संसर्गीभूतकर्मत्वस्य तादृशकर्मविशेषणानां कर्मानुवादिकेति शाब्दिकमतमपि परास्तम् । श्लोकं स्यन्दते इत्यादौ

व्यापारविशेषणपदोत्तरद्वितीयाः कर्मानुवादकत्वस्याप्यसम्भवात् न चात्र व्यापारविशेषणे नपुंसकप्रथमेति वाच्यं प्रथमायाः अननुशिष्टतया असाधुत्वात् व्यापारविशेषणस्य कर्तृत्वपक्षे तिङा तङ्गतकर्तृत्वानभिधानात्, तृतीयापक्षेदुर्वारत्वात् सुखहेतुं चेष्टते चेतते यतते वेत्यत्र प्रथमाप्रसक्तेरसम्भवेन द्वितीयोपपत्तेः कथमप्यसम्भवाच्च तस्माद्दर्शितपरिभाषणात् फलव्यापारोभयविशेषणवाचिपदाद् द्वितीयैव साधुरिति "अभितःपरितः समयानिकषाहाप्रतियोगेऽपि" अभितःपरितःशब्दौ सर्वतःपर्यायौ समयानिकषाशब्दौ सामीप्यार्थकौ एतेषां शब्दानां योगे द्वितीया सम्बन्धार्थिका अभितः परितो वा कृष्णं गोपाः लङ्कां निकषा समया वा हनिष्यति इत्यादौ शाब्दबोधाकारः स्वयमूहनीयः हा साधूनित्यत्र हाशब्दार्थः शोकः स च विपङ्क्तोचरो द्वेषविशेषस्तच्चालम्बनत्वेन विषयित्वं द्वितीयार्थः तथा च साधुविषयिताको विपद्द्वेष इत्यन्वयबोधः हा राम हा देवर तात मातरित्यत्र सीतायाः स्वविपद्द्वेषे रामादेर्विषयितया नान्वयः किं तु तत्सम्बोध्यत्वस्येति वदन्ति विपद्द्वेषो न शोकः तथा सति कपयो रामं शोचन्तीतिप्रयोगापत्तेः किं तु अनिर्वचनीयस्तत्वेन ज्ञातो वा खेदः शोकस्तत्र द्वितीयार्थः समवेतत्वमन्वेतीत्यपरे प्रतियोगे द्वितीया माणवकं प्रति भान्ति वेदा इत्यत्र ज्ञानविषयत्वं धात्वर्थः विशिष्टशक्तस्य धातोः खण्डशः फलवाचकत्वाद्कर्मकत्वं तत्र ज्ञाने पदार्थैकदेशे द्वितीयार्थसमवेतत्वान्वयार्थं प्रतेरिहोपादानं तथा च माणवकसम-

वेतज्ज्ञानविषया वेदा इत्यन्वयबोध इति वदन्ति प्रतिभातेर्ज्ञानमात्रमर्थः विषयत्वमाख्यातार्थः फलावाकत्वादयमकर्मक इति प्रधानधात्वर्थे द्वितीयार्थान्वयार्थमुपसर्गप्रतेरिहोपादानमित्यन्ये अन्तरा शब्दयोगे द्वितीयां ज्ञापयति "अन्तरान्तरेणायुक्ते" इत्यनुशासनमाभ्यां योगे द्वितीया स्यादित्यर्थकं मगधान् विदेहानन्तरा गङ्गा इत्यत्र परत्वद्वयनिरूपितापरत्वद्वयं तदधिकरणादेशो वा अन्तराशब्दार्थः द्वितीयर्थोश्च द्वयं प्रत्येकमर्थस्तथा च मगधसमवेतेन विदेहावधिकेन विदेहसमवेतेन मगधावधिकेन परत्वेन प्रत्येकं निरूपितं यदपरत्वद्वयन्तद्वती तदद्वेशवृत्तिर्वा गङ्गेत्यन्वयबोधः क्वचिदप्राप्तिरन्तराशब्दार्थः तद्योगेऽपि द्वितीयैव प्रमाणं प्राप्तिर्ज्ञापनं गमनं चेति द्विधा तथा हि ।

अनुरागमयेन भूयसा मधुरेणापि रसेन को गुणः ।
प्रियसङ्गमभूमिमन्तरा यदि विच्छिन्नपदा सरस्वती ॥

इत्यत्र भारत्या अनुरागप्रकृतिकेनापि भूयसा शृङ्गाररसेन को गुणो यदि प्रिययोः सङ्गमपर्यन्तमज्ञापयित्वा मध्ये विच्छिन्नप्रबन्धा चित्राङ्गदकथासरस्वतीतिप्रकृतं अथ सरस्वत्या नदीविशेषस्य लौहित्यबहुलेन भूयसा मिष्टेन जलेन को गुणो यदि प्रियस्य समुद्रस्य सङ्गममहीमप्राप्यैव विलीनगतिरसावित्यप्राकरणिकमनयोरुपमाध्वनये प्रतीयते इति पदवाक्यरत्नाकरे गुरुचरणाः । अन्तरेणशब्दस्याभावोऽर्थः प्रतियोग्यनुयोगिभावस्तु द्वितीयार्थः धनमन्तरेण न सुखमित्यत्र द्वितीयार्थः प्रतियोगित्वे धनस्य स्ववृत्तिधनत्वावच्छिन्नत्वाधेयत्वाभ्यां सम्बन्धा-

भ्यां व्युत्पत्तिवैचित्र्येणान्वयोपगमाद् धनसामान्याभाव-लाभः अभावयोः प्रयोज्यप्रयोजकभावो योगक्षेमसाधारणः संसर्गस्तथा च धनसामान्याभावप्रयुक्तः सुखसामान्याभाव इत्यन्वयबोधः गीतश्रवणाजन्मन ऐहिकस्य जपादिप्रयोज्यस्यामुष्मिकस्य च सुखस्य धनं विनाऽपि सम्भव इति कथं सुखसामान्याभावो धनसामान्याभावप्रयुक्त इति यदि तदा धनमन्तरेण न दानं यागो वेत्युदाहरणं बोध्यमिति क्व चिदन्तराशब्दस्याप्यभावोऽर्थः यथा अध्ययनमन्तरा न पाण्डित्यमिति । "अनुर्लक्षणे" इति सूत्रं लक्षणे द्योत्ये अनुः कर्मप्रवचनीयसंज्ञः स्यादित्यर्थकं-"कर्मप्रवचनीययुक्ते द्वितीया" इत्यनुशासनं कर्मप्रवचनीय योगे द्वितीया भवतीत्यर्थकं लक्षणं हेतुत्वं तथा च जपमनु प्रावर्षदित्यत्र द्वितीयाया हेतुत्वं जन्यत्वमर्थः प्रवर्षणेऽन्वेति अनुशब्दस्तु समभिव्याहारस्वरूपाकाङ्क्षाप्रयोजकी निरर्थक एव न चानुशब्दस्यैव हेतुत्वमर्थो द्वितीया निरर्थिका तथा ऽस्त्विति वाच्यम् । द्वितीयाया निरर्थकत्वस्य क्वाप्यदृष्टत्वात् दर्शितानुशासनद्वयस्य जपेन प्रावर्षदिति हेतुतृतीयाबाधकत्वाच्च । "तृतीयार्थे" इत्यनुशासनं तृतीयार्थे साहित्ये द्योत्ये अनुः कर्मप्रवचनीयसंज्ञः स्यादित्यर्थकं तथा च नदीमन्ववसिता सेनेत्यत्र द्वितीयार्थः साहित्यमन्ववसितार्थेऽन्वेति एवं नद्या सह संबन्धेत्यन्वयबोधः । "हीने" इति सूत्रं हीने द्योत्ये अनुः प्राक्संज्ञः स्यादित्यर्थकं तथा चानु हरिं सुरा इत्यत्र हीनत्वं द्वितीयार्थः सुरेष्वन्वेति हीनत्वमपकर्षोऽवन्ध्येक्षत्वादिविरहस्वरूपो बोध्यः । "उपोऽधिकेच" । इति सूत्रं-

र्मधिके हीने च द्योत्ये उपेति प्राक्संज्ञं स्यादित्यर्थकं त-
था चोपहरिं सुरा इत्यत्रापि द्वितीयाया हीनत्वमर्थः
शेषं पूर्ववत् अधिकेऽर्थे कर्मप्रवचनीययोगे सप्तमी वक्ष्यते ।
"लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः" इति
सूत्रं भागान्तेष्वर्थेषु द्योत्येषु वीप्साप्रयोगे च प्रत्यादयः
प्राक्संज्ञकाः स्युरित्यर्थकं तथा च वृक्षं प्रति परि अनु
वा द्योतते विद्युदित्यत्र लक्षणं द्वितीयार्थस्तच्च धात्वर्थेन
निरूपितं जनकत्वं तन्निष्ठजन्यत्वं वा द्योतनं च तेजो-
विषयकं चाक्षुषं तादृशः साक्षात्कारो वा तत्र वृक्षहेतु-
कत्वमन्वेति तत्र वृक्षादेर्हेतुत्वं चक्षुरादिसन्निकर्षाणां-
सान्निध्येन विद्युदाद्याभिमुख्यद्वारा कथं चित्प्रयोजकत्व-
स्वरूपं बोध्यं तिङर्थो विषयत्वं तथा च वृक्षप्रयोज्यस्य
तेजोविषयकस्य चाक्षुषस्य साक्षात्कारस्य वा विषयो वि-
द्युदित्यन्वयबोधः धात्वर्थनिरूपितहेतुताविशेषस्य प्रकृते
प्रतिपादनात् हेतुतासामान्यप्रतिपादकस्य अनुर्लक्षणे इ-
त्यनुशासनस्य न वैयर्थ्यमतो दण्डमनु घट इत्यादौ
दण्डादिहेतुकत्वं घटादौ प्रतीयते अत एव परिपन्थ च
तिष्ठतीतिनिर्देशस्तच्च परिपन्थशब्दस्य निपात्यमानत्वेऽपि
परियोगावैकल्याद् द्वितीया तदर्थो हेतुत्वविशेषो धात्व-
र्थस्थितावन्वेतीति । इत्थंभावो वास्तवसंबन्धो द्वितीयार्थः
स च क्व चिद्विषयिविषयभावः यथा विष्णुं प्रति परि
अनु वा भक्त इत्यत्र इष्टत्वेन इष्टसाधनत्वेन पूज्यत्वेन
वा ज्ञानं भक्तिः इष्टमामुष्मिकं बोध्यं तत्र द्वितीयार्थो
विषयित्वमन्वेति तथा च विष्णुविषयकेष्टसाधनत्वादि-
प्रकारकज्ञानवानित्यन्वयबोधः क्व चिदुद्देश्योद्देश्यिभाव-

यथायं शत्रून् प्रति धावतीत्यत्र द्वितीयार्थ उद्देश्यत्वं-तच्च क्रियाप्रयोजकफलेच्छाविषयत्वं तथा च शत्रुपदो-त्तरद्वितीयाया शत्रुनाशादिस्वरूपफलेच्छार्थस्तत्र शत्रो-र्विषयित्वेन संबन्धेनान्वयः सा चेच्छा प्रयोज्यत्वेन क्रि-यायामन्वेति। एवं शत्रुविषयकनाशादीच्छाप्रयोज्यधाव-नानुकूलकृतिमानयमित्यन्वयबोधः क्व चित्समवायिसम-वेतभावः यथा दण्डमनुजातिरित्यत्र समवेतत्वं द्वितीयार्थः जातावन्वेति क्व चित्संयोगिसंयुक्तभावः यथा पुरुषमनुदण्ड इत्यत्र संयुक्तत्वं द्वितीयार्थो दण्डेऽन्वे-तीति भागोऽसाधारणस्वत्वाश्रयः तस्मिन् द्योत्ये द्वितीया यथा लक्ष्मीर्हरिं प्रति परि अनु वेत्यादौ-द्वितीयाया असाधारणस्वत्वमर्थो लक्ष्म्यादावन्वेति तथ-च लक्ष्मीर्हरेरसाधारणस्वमित्यन्वयबोधः वीप्साप्रयोगे यथा वृक्षंवृक्षं प्रति परि अनु वा सिञ्चतीत्यादौ शाब्दबो-धस्तु वृक्षंवृक्षं सिञ्चतीत्यत्रैव बोध्यः। "अभिरभागे" भागातिरिक्तार्थे पूर्वोक्ते अभिरुक्तसंज्ञकः स्यादित्यर्थकं-तथा च हरिमभि वर्तते इत्यत्र लक्षणं भक्तो हरिमभी-त्यत्रेत्थंभावः भागे तु यदत्र ममाभिष्यात्तदर्पयेत्यत्र षष्ठ्येव प्रमाणं न तु द्वितीया वीप्साप्रयोगे तु देवदेवमभिस्तौ-तीत्यत्र द्विर्वचनेन वीप्साया द्वितीयाया कर्मत्वस्याभिधा-त् प्रतिपर्यन्वभीनां कर्मप्रवचनीयसंज्ञा गत्युपसर्गसं-पवादाय तेनोपसर्गपरत्वप्रयुक्तषत्वाट्टभावः फलं पर्य-वस्यति। "अधिपरी अनर्थकौ" इति सूत्रं निरर्थकावेतौ प्रादसंज्ञकावित्यर्थकं तथा चात्रापि विशेषणविभक्तिभिन्न-निरर्थकद्वितीयायामनुशासनविरहान्न द्वितीया संज्ञाफा

लं तु कुतोऽध्यागच्छति कुतः पर्यागच्छति इत्यत्र गतिर्गतावितिसूत्रेण विहितस्य गतावाङादौ परतो गतेरध्यादेर्निघातस्वरस्याभावो गतिसंज्ञाबाधादिति । "सुः पूजायाम्" इति सूत्रे पूजायां धात्वर्थे सुरुक्तसंज्ञः स्यादित्यर्थकमत्रापि निरर्थकत्वान्न द्वितीया संज्ञाफलं तु सुसिक्तं शोभनमित्यत्र षत्वाभाव उपसर्गसंज्ञाबाधादिति "अतिरतिक्रमणे च" इति सूत्रमतिक्रमणे पूजायां चार्थे द्योत्येऽतिरुक्तसंज्ञम्स्यादित्यर्थकं तत्संयोगासमानाधिकरणतत्संयोगध्वंसोऽतिक्रमणं सामानाधिकरण्यमेककालावच्छिन्नबोध्यं पूजा प्रीणनं तच्च प्रीतीच्छा तथा चातिपर्वतं सार्थः अतिदेवान् कृष्णा इत्यत्रातिक्रमणं प्रीणनं च द्वितीयार्थस्तत्र तत्तत्संसर्गावच्छिन्नाधेयत्वेन सम्बन्धेन प्रकृत्यर्थस्यान्वयोऽतिक्रमणं सार्थं प्रीणने कृष्णेऽन्वेति एवं पर्वतवृत्तिर्यः पर्वतसंयोगासमानाधिकरणः पर्वतसंयोगध्वंसस्तद्वान् सार्थ इति देवसमवेता या प्रीतीच्छा तद्विषयः कृष्ण इति चान्वयबोधः काशिकायां तु निष्पन्नेऽपि वस्तुनि क्रियाप्रवृत्तिरतिक्रमणम् अतिसिक्तमेव भवता अतिस्तुतं भवता पूजायाम् अतिसिद्धं भवता अतिस्तुतं भवता शोभनं कृतं भवतेत्युक्तं तच्चेदृशमप्यतिक्रमणं-तद्द्योतकस्य पूजाद्योतकस्य चातेः कर्मप्रवचनीयतया तद्योगे द्वितीयाविनाकृतदर्शितप्रयोगे षत्वाभाव इत्येव हृदयं न तु पूर्वप्रदर्शितोदाहरणे द्वितीयायाम् असाधुत्वप्रत्यमिति। "अपिः पदार्थसम्भावनाऽन्ववसर्गगर्हासमुच्चयेषु इति सूत्रं पदार्थादिषु द्योत्येषु अपिरुक्तसंज्ञः स्यादित्यर्थकं पदार्थे यथा सर्पिषोऽपि स्यात् इत्यत्र तिङर्थस-

भावनाविषयत्वस्य धात्वर्थभवने उपपादकं दुर्बले कर्तृत्वं द्योतयन्नपिशब्दः स्यादित्यनेन साकाङ्क्षः षष्ठ्या एवावयवावयविभावसम्बन्धवान् विन्दुरूपोऽर्थः स च विन्दुत्वादेव दुर्बलः अल्पस्य दध्यादेर्विलोडने विन्दूत्क्षेपेऽपि संदिग्धत्वात् तत्र विन्दुस्तत्त्वेन सम्बन्धत्वेन वा षष्ठ्यर्थ इत्यादिकं वक्ष्यते षष्ठ्यर्थविन्दुं द्योतयन् पदार्थद्योतकोऽपिशब्दः सर्पिःशब्देन साकाङ्क्षः धातुसमभिव्याहृतस्यैवापिशब्दस्य पदार्थद्योतकत्वात् इत्यपियोगाभावात् सर्पिःशब्दान्न द्वितीया अत एवोक्तं सर्पिषो विन्दुना योगो न त्वपिनेति वस्तुतस्तु पदासत्वेन पदार्थद्योतकत्वं पदसत्वे तु निरर्थकत्वमेवेति न द्वितीया षष्ठ्यर्थविन्दोस्तिङर्थकर्तृतायां विशेषणतयाऽन्वयः तथा च सम्भावनाविषयभवनकर्तृता सर्पिर्बिन्द्वौयेत्यन्वयबोधः सम्भावने यथा अपिस्तुयाद्विष्णुमित्यत्र सम्भावनं लिङर्थस्तच्च सन्देह आपत्तिर्वा धात्वर्थे स्तवेऽन्वेति धातुसमभिव्याहृतोऽपिशब्दो लिङर्थसम्भावनस्य द्योतकः अन्ववसर्गे यथा अपि स्तुहि इत्यत्र धातुसमभिव्याहृतोऽपिशब्दो लोडथान्ववसर्गं द्योतयति स च कामचारानुज्ञा कामचारः प्रकाराविवक्षणामनुज्ञा इच्छा तथा च येन केन चन प्रकारेणो चान्ववसर्गः प्रकारो भेदकधर्मः अन्ववसर्गो विषयतया धात्वर्थेऽन्वेति गर्हायां यथा अपि स्तौति शाक्यान् धिगित्यत्र तादृशोऽपिशब्दो धिगर्थं गर्हां द्योतयति सा धात्वर्थेऽन्वेति द्योतकत्वं [illegible]नानार्थशब्दस्य एकत्रार्थे तात्पर्यज्ञापनं धिक्शब्दोऽप्यपकर्षस्य गर्हायाश्च वाचकत्वान्नानार्थः समुच्चये यथा सखे अपि सिञ्च अपि स्तुहि शम्भुमित्यत्र त-

थामूतोऽपिशब्दः समुच्चयमेककर्तृकत्वादिकं वाक्यार्थीभूतं द्योतयति एकस्य सम्बोध्यस्य द्वयोः क्रिययोः कर्तृत्वान्वये एककर्तृकत्वं शम्भोरेकस्य कर्मत्वान्वय-एककर्मकत्वं वाक्यार्थतयाऽवगम्यते संभावनान्ववसर्गार्थकप्रत्ययस्य प्रकृतिधातोश्च प्रातिपदिकत्वविरहात् गर्हाविषयधातोः समुच्चयार्थकवाक्यस्य च पर्युदासेन इत्याऽर्थवत्वाभावेन च प्रातिपदिकत्वविरहान्न ततो द्वितीया वस्तुतस्तु निरर्थकत्वादेव न द्वितीया सम्भावनाद्यर्थस्य पदान्तरेण लाभे निरर्थकत्वसंभवात् यदि च समुच्चय एककालिकत्वं तच्च न वाक्यार्थः दर्शितस्थले कालवाचकशब्दाभावात् अत एव विभिन्नकालिकौ गमनत्यागावादाय काशीं व्रज त्यजापीति न प्रयोग इति समुच्चये कुतो न द्वितीया निरर्थकत्वप्रसक्तेरसंभवादिति विभाव्यते तदाऽपि समुच्चयान्वयिक्रिययोर्वाचकधातोरप्रातिपदिकत्वान्न ततो द्वितीया वस्तुतस्तु एककालिकत्वस्य समुच्चयस्य न द्योतकोऽपिशब्दस्तस्य पदान्तरेणालाभे द्योतनासम्भवात् किं तु वाचक एव तथा चापिशब्देन समुच्चयस्याभिधानात् निरर्थकत्वादेव न द्वितीया अत एव रसो गन्धोऽपि मनोहरः पनसे इत्यत्र रसादिशब्दान्न द्वितीयाऽपिशब्देन समुच्चय बोधने निरर्थकत्वसम्भवात् अत एव कर्मप्रवचनीया द्योतका द्वितीया वाचिकेति न च वैपरीत्यमेवास्त्विति वाच्यं तथा सति निरर्थकद्वितीयाऽभ्युपगमे सुसिक्तं शम्भोरित्यत्र द्वितीयापत्तेः अत एवार्थाद्योतकाधिकरणे निरर्थकद्वितीयायाः साधुतायां बाधिकायामधिवचनसूत्रमित्यत्र विवदन्ते तद्विदः

नचापेर्योगे द्वितीयाविरहे संज्ञावैयर्थ्यमिति वाच्यं संज्ञाया दर्शितस्थले षत्वाभावफलकत्वात् उपसर्गसंज्ञापवादकत्वादिति । "कालाध्वनोरत्यन्तसंयोगे" इति सूत्रं कालावयवाध्वावयववाचिशब्दाभ्यामत्यन्तयोगेऽर्थे द्वितीया स्यादित्यर्थकम् अत्यन्तसंयोगोऽवच्छिन्नत्वं तत्रावच्छेदको देशविधया कालविधया द्विविधो द्विविधमपि तद्व्यापकत्वपर्यवसितं व्यापकत्वमभावाप्रतियोगित्वं तत्राभावः प्रतियोगित्वं खण्डशो द्वितीयार्थः यदि चावच्छेदकत्वं विना व्यापकत्वमतिप्रसक्तमिति मन्यते तदावच्छेदकत्वमपि द्वितीयार्थे निविशते एकपदार्थानामपि व्युत्पत्तिवैचित्र्येण परस्परान्वयोऽभ्युपेयते व्यापकतावच्छेदकः संबन्धो दैशिकः संयोगादिः कालिकस्तु विशेषणतात्रिशेषः तया चायं मासमधीत इत्यत्र मासस्याधेयत्वेन संबन्धेनाभावे तस्य प्रतियोगितायां तस्याः कालिकसंबन्धावच्छिन्नप्रतियोगित्वीयनिरूपितत्वसंबन्धेनावच्छेदकत्वे तस्यान्वयितावच्छेदकतावच्छेदकसंसर्गावच्छिन्नावच्छेदकत्वीयस्वरूपसंसर्गावच्छिन्नप्रतियोगितयासंबन्धेनाभावे तस्य धर्मे तस्यान्वयितावच्छेदकीयेनाध्ययनत्वसंबन्धेनाध्ययनेऽन्वयः एवं मासव्यापकाध्ययनकर्तृत्ववानयमित्यन्वयबोधः प्रतियोगितायां निरूपितत्वसंसर्गे कालिकसंबन्धानुप्रवेशात् संयोगेन मासहत्यभावप्रतियोगित्वस्याध्ययने सत्वेऽपि नान्वयबोधानुपपत्तिः । अवच्छेदकत्वस्य प्रतियोगितासंसर्गेऽन्वयितावच्छेदकसंसर्गस्यानुप्रवेशात् संयोगेन ज्योत्स्नावतः प्रासादादेर्मासहत्यभावप्रतियोगितायाः संयोगसंसर्गावच्छेदक-

त्वस्य ज्योत्स्नानिष्ठस्याध्ययनत्वे विरहेऽपि द्विर्दिनाध्ययनस्थले न दर्शितप्रयोगः धर्मस्यान्वयितावच्छेदकप्रतियोगिकसम्बन्धेनान्वयोपगमात्तादृशस्य मासदृत्यभावप्रतियोगितावच्छेदकत्वस्य सत्वे विरहात् सत्ववतो द्विर्दिनाध्ययनस्य सत्तायां न दर्शितप्रयोगः एवं क्रोशं कुटिला नदीत्यत्र क्रोशवृत्त्यभावप्रतियोगित्वस्य संयोगावच्छिन्नप्रतियोगित्वीयनिरूपितत्वसम्बन्धेनावच्छेदकत्वेऽन्वयः अवच्छेदत्वादेस्तु प्रदर्शितरीत्याऽन्वयो बोध्यः कुटिलत्वं तु तिर्यग्गमनजन्यावयवसंयोगसामानाधिकरण्यं तद्भावः सरलत्वं न च तिर्यग्गमनवदवयवसमवेतत्वं तत् तथा सति कुटिलदण्डादौ कौटिल्यानुपपत्तेः तदवयवे तदा तिर्यग्गमनस्याभावात् सामानाधिकरण्यमेककालावच्छिन्नं बोध्यं तेन पूर्वं कुटिलेऽनन्तरं सरले दण्डे न कौटिल्यप्रतीतिव्यवहारौ कूपादौ कौटिल्यप्रतीतिव्यवहारयोरभावात् सामानाधिकरण्यं द्रव्यत्वविशिष्टं बोध्यमिति वस्तुतस्तु मासमधीते इत्यत्र मासात्मककालिकविशेषणतावच्छिन्नमाधेयत्वं द्वितीयार्थः तन्मासनिरूपितमध्ययनेऽन्वेति द्विर्दिनाध्ययनेन निरुक्तमाधेयत्वमिति न तत्र दर्शितप्रयोगः एवं क्रोशं कुटिला नदीत्यत्र क्रोशत्वमध्वपरिमाणविशेषः तद्वान् क्रोशः क्रोशत्वव्यापकसंयोगावच्छिन्नमाधेयत्वं द्वितीयार्थः तत् क्रोशनिरूपितं कुटिलेऽन्वेति कुटिलस्य तादात्म्येन नद्यामन्वय इति मासं कल्याणीत्यत्र कल्याणजनकः कल्याणशब्दार्थः कल्याणजनकत्वविशिष्टे मासीयस्य व्यापकत्वस्य निरुक्ताधेयत्वस्य वाऽन्वयोपगमा-

द्विशेषणोऽप्यन्वयः व्यापकत्वस्य निरुक्ताधेयत्वस्य वा विवक्षायां न द्वितीया किं तु सम्बन्धमात्रे षष्ठी यथा मासस्य द्विरधीते क्रोशस्यैकदेशे पर्वत इति।

इति विभक्त्यर्थनिर्णयेऽकारकद्वितीयार्थनिर्णयः।

इति द्वितीयाविवरणं समाप्तम्।



अथ तृतीया । टाभ्यांभिसिति त्रयः प्रत्ययास्तत्र सुमनसा स्तूयत इत्यादौ श्रूयमाणत्वादाकारस्यात्वेन भ्यामित्यस्य भ्यांत्वेन भिसो भिस्त्वेन वाचकत्वं टकारोऽनुबन्धः क्वचिदप्यश्रूयमाणत्वान्न वाचकतामुज्झितप्रविष्ट इति अनुशासनसिद्धस्तृतीयार्थः अनुशासनं च "कर्तृकरणयोस्तृतीये"ति तत्र कर्ता करणं चाथ वा कर्तृत्वं करणत्वं च तृतीयार्थ इति वक्ष्यते । अत्रा "प्यनभिहिते" इत्यधिकारस्तेन पचतीत्यत्र तिङा कर्तृत्वस्य पक्वेत्यत्र कृता पक्वपूर्वीत्यत्र तद्धितेन पक्वौदन इत्यत्र समासेन कर्तुरभिधाने सति न तृतीया एवमन्यत्रा दीव्यन्ते इत्यत्र कर्माख्यातेन फलतः करणत्वस्याभिधाने पचनं काष्ठमित्यत्र कृता स्नानीयं चूर्णमित्यत्र तद्धितेन पक्वौदनं काष्ठमित्यत्र समासेन करणस्याभिधाने सति न तृतीयेति कर्तृपदसङ्केतग्राहकमनुशासनं "स्वतन्त्रः कर्ते"ति स्वातन्त्र्यं च कारकान्तरानपेक्षतया क्रियासम्बन्धवत्त्वं कारकान्तराणां कर्तृसापेक्षतयैव क्रियासंबन्धित्वं कर्तृघटितमूर्तिकत्वात् अत एव समस्तकारकोपहितं रूपं कर्तुरित्युक्तमात्मतत्त्वविवेके उपहितं व्यापकं तत्रैव विवरणे अपादानादीनांलक्षणं कर्तृघटितं विवृतं दीधितिकृद्भिरिति । क्रिया क्वापि न कर्तृविनाकृतेति कारकान्तराणां कर्तृसापेक्षत्वनियमः कर्तुश्चापादानादिविनाकृतायाअपि क्रियायाः संबन्ध इति न कारकान्तरापेक्षानियमः । यद्यपि जानातीत्यादावपादानं विना स्पन्दत इत्यादौ कर्म विना दर्शितोभयस्थले संप्रदानं विनाऽपि क्रियाया दर्शनान्नोपादानसंप्रदानकर्मभिः सापे-

त्वनियमः करणाधिकरणयोस्तु सकलक्रियानियतत्वात् कथं न तत्सापेक्षत्वमिति तथापि करणस्य कर्तृव्यापार्यतया कर्तृसापेक्षत्वेनैव क्रियायां न तु कर्तुः करणसापेक्षतया संबन्धः करणाव्यापार्यत्वात् अधिकरणस्य कर्तृकर्मान्यतरद्वारकक्रियाधारत्वेनैव कारकान्तरसापेक्षतया क्रियायां संबन्धः न तु कर्तुस्तथा साक्षात्संबन्धादिति यद्वा यः प्रधानीभूतो धात्वर्थस्तदन्वितस्तिङर्थो वा व्यापारस्तद्दत्त्वं स्वातन्त्र्यमिति टीकाकृदभिमतमिति प्रागेवोक्तम्। सर्वमेतद्बालोपलालनं न तु तृतीयार्थोपवर्णनं दर्शितस्वातन्त्र्यस्य तृतीयया कुलापाप्रत्यायनात्। अत्र शाब्दिकाः चैत्रेण पच्यते तण्डुल इत्यत्र विक्लित्तिः प्रयत्नस्वरूपो व्यापारश्च पचेरर्थः आश्रयस्तृतीयाया आश्रये तादात्म्येन चैत्र आश्रयः समवेतत्वेन प्रयत्ने व्यापारेऽन्वेति व्यापारे प्रधाने तण्डुलाभिन्नाश्रयिका विक्लित्तिरन्वेति तत्र धात्वपात्तव्यापाराश्रयः स्वतन्त्रः धात्वपात्तत्वं न शाब्दबोधविषयः व्यापारो धातुलभ्य एवानन्यलभ्यतयाऽऽश्रयमात्रं तृतीयार्थइति वदन्ति। तदत्रापाश्रयत्वस्यौखण्डस्याभावेनाश्रयस्य गौरवान्न शक्यत्वमिति प्रागेवावेदितं किं त्वाश्रयत्वमाधेयत्वं वा लाघवात्तृतीयार्थः यदि च चैत्रेण पच्यते इत्यादौ पचिना फूत्कारादिव्यापार एव प्रत्याय्यते तदाऽऽख्यातस्यैव लाघवात्प्रयत्न एव तृतीयायाः शक्यइति तार्किकाः। चैत्रेण गम्यते स्यन्द्यते इत्यादौ प्रयत्नस्तृतीयार्थः स च समवेतत्वेन चैत्रविशेषितः साध्यतया गमनादौ विशेषणीभूयान्वेति रथेन गम्यते चैत्रेण ज्ञा-

यते इत्यादौ तृतीयाया आधेयत्वमर्थः तच्च निरूपितत्वेन संबन्धेन प्रकृत्यर्थविशेषितं स्वरूपसंसर्गेण धात्वर्थं विशेषणतयाऽन्वेति शोभया प्रतिभायते प्रकाश्यते वा मोदकेन स्वद्यते रुच्यते वेत्यादौ विषयत्वं तृतीयार्थस्तच्चाधेयत्वसंसर्गेण प्रकृत्यर्थविशेषितं प्रतियोगितासंसर्गेण धात्वर्थं ज्ञाने इच्छायां च विशेषणतयाऽन्वेति ज्ञानमात्रार्थकयोः प्रतिभातिप्रकाशत्योरिच्छामात्रार्थकयोः स्वदतिरोचत्योर्विषयत्वार्थककर्तृप्रत्ययेनैव सह साकाङ्क्षत्वात् । प्रतिबिम्बत इत्यादौ प्रतिबिम्बो धात्वर्थः स च स्वविषयासंबद्धवृत्तिचक्षुःसंयोगप्रयोज्यचक्षुःसंयोगजन्यचाक्षुषप्रत्यक्षं तादृशचक्षुःसंयोगः क्व चित्प्रतीघाततया प्रयोजकः प्रतिघातस्तु देशान्तरसंयोगजनिकायाः क्रियाया जनकः संयोगः यथा सुखचक्षुःसंयोगजनकक्रियाजनको दर्पणचक्षुःसंयोगः क्व चिन्मार्गसंयोगतया गन्तव्यसंयोगप्रयोजकः यथा स्फटिकाधस्थितपद्मरागचक्षुःसंयोगप्रयोजकः स्फटिकचक्षुःसंयोगः एतेन प्रतिहतचक्षुःसंयोगजन्यत्वमात्रं न चाक्षुषविशेषणमिति तत्र तन्तुचक्षुःसंयोगाधीनपटचक्षुःसंयोगजन्यपटचाक्षुषव्युदासाय स्वविषयासंबद्धवृत्तित्वं प्रथमचक्षुःसंयोगे विशेषणं स्वविषयासंबद्धस्तु स्वविषयसंबन्धित्वावच्छिन्नप्रतियोगिताकान्योन्याभाववान् बोध्यः तेन तन्तुषु तत्तत्तुभेदसत्वेऽपि न क्षतिः ईदृशं चाक्षुषमादर्शाद्यविषयकमिदं सुखमित्याकारकमपि प्रतिबिम्ब एव ईदृशमेव सुखावगाहिज्ञानं प्रथमतो जायते तत एवादर्शे सुखमिति सुखवानादर्श इति विशिष्टवैशिष्ट्यावगाहि-

ज्ञानसम्भवात् प्राथमिकज्ञानं प्रतिविम्बः तद्विषयत्व-माख्यातार्थो मुखे एव न त्वादर्शे अत एव मुखं प्रति-विम्बते न तु दर्पण इति प्रयोगोपपत्तिः यदि चादर्श-ज्ञानं विनाऽपि दर्शितविशिष्टवैशिष्ट्यबोधयोरसम्भव ए-वेति प्राथमिकज्ञाने ऽप्यादर्शो विषय एवेति इदं मुख-मयमादर्शश्चेति समूहालम्बनचाक्षुषमेव प्रथमतो जा-यते तत्कथमुक्तप्रयोगोपपत्तिरिति विभाव्यते तदा स्व-विषयेत्यत्र स्वविषययत्किञ्चिद्व्यक्त्यसंबन्धित्वं वक्तव्यं ते-नादर्शस्य स्वविषयत्वेऽपि तद्वृत्तिचक्षुःसंयोगस्य प्रयोजक-त्वे मुखप्रतिबिम्बस्य न तथात्वहानिः एवं प्रतिबिम्बते इत्यत्र प्रयोजकचक्षुःसंयोगसंबन्धिवृत्तिभिन्नविषयत्वमा-ख्यातार्थो वाच्यस्तत एव दर्शितप्रयोगोपपत्तिः आदर्शा-दर्शत्वादिविषयतानां तादृशभिन्नत्वाभावान्मुखमुखत्वा-दिविषयतानां तादृशभिन्नत्वात् एवं मुखं प्रतिबिम्बते इत्यत्र तिङर्थविषयत्वं तादृशभेदेन विशिष्टमुपलक्षितं-वेत्यन्यदेतत्। एवं धात्वर्थचाक्षुषमपि तादृशचक्षुःसंयो-गजन्यत्वेन विशिष्टमुपलक्षितं वेत्यन्यदेतत् उपलक्षण-तापक्षेऽपि विषयत्वत्वेन चाक्षुषत्वेन तादृशी व्यक्तिः प्र-तीयत इति नातिप्रसङ्गः बुद्धौ चैतन्यं प्रतिबिम्बते इत्यत्र प्रतिबिम्बो भ्रमो धात्वर्थः प्रकारत्वं तु तिङर्थः बुद्धिप-दोत्तरसप्तमी तु बुद्धिगतं प्रयोजकव्यापारं स्वाच्छ्यमभि-धत्ते तस्य प्रयोजकतासंबन्धेन धात्वर्थभ्रमेऽन्वयः एवं बु-द्धिस्वाच्छ्यप्रयोज्यभ्रमप्रकारश्चैतन्यमिति शाब्दबोधः यथा च व्यापारस्सप्तम्यर्थस्तथा सप्तमीविवरणे वक्ष्यते। एवं मुखेन प्रतिबिम्ब्यते इत्यत्र प्रयोजकचक्षुःसंयोगसंबन्धे

वृत्तिभिन्नविषयत्वं तिङ इव तृतीयाया अर्थः तस्य प्रतिबिम्बे तथाविधचाक्षुषे धात्वर्थे विशेषणतया प्रतियोगितासंसर्गेणान्वयः एवं मुखविषयताप्रतियोगितथाविधचाक्षुषमित्यन्वयबोधः चैतन्येन प्रतिबिम्ब्यत इत्यत्र प्रकारत्वं तृतीयार्थः तस्य प्रतियोगितासंसर्गेण धात्वर्थभ्रमे विशेषणतयाऽन्वयः एवं चैतन्यप्रकारताप्रतियोगी भ्रम इत्यन्वयबोधः । घटेन नश्यत इत्यत्र घटो नश्यतीत्यादौ तिङ इव तृतीयायाः प्रतियोगित्वमर्थस्तस्य निरूपितानुयोगितासंबन्धेन धात्वर्थे नाशे विशेषणतयाऽन्वयः एवं घटप्रतियोगिताको नाश इत्यन्वयबोधः वह्निना दीप्यत इत्यत्र भास्वररूपं भास्वररूपवत्तेजसंयोगनियतावयवसंयोगो वा दीप्यतेरर्थः मणिना दीप्यत इत्यत्र भास्वररूपवत्तेजःसंयोगनियतावयवसंयोगो दीप्यतेरर्थस्तदन्वयिसमवायावच्छिन्नसमवायघटितसामानाधिकरण्यावच्छिन्नमाधेयत्वं वा तृतीयार्थः चैत्रेण शय्यत इत्यत्राधःस्वावयवावच्छिन्नसंयोगानुकूलव्यापारः शयतेरर्थस्तदनुकूलप्रयत्नः तृतीयार्थः यदि च तादृशसंयोग एव शयतेरर्थः व्यापारो नार्थः अत एव व्यापारे नष्टेऽपि तादृशसंयोगे विद्यमाने शय्यत इति लट्प्रयोगस्तदा तथाविधमाधेयत्वं तृतीयार्थ आधेयत्वेनाधेयत्वस्य शक्यत्वेऽपि संसर्गविशेषावच्छिन्नाधेयत्वीयस्वरूपसंसर्गेण धात्वर्थेऽन्वयोपगमान्नानुपपत्तिरिति । अत्र प्रयत्नत्वस्य जातितया तद्विशिष्टे तृतीयायाः शक्तिराधेयत्वादौ लक्षणा यदि चाधेयत्वत्वविषयत्वत्वप्रकारत्वत्वप्रतियोगित्वत्वान्यखण्डोपाधयस्तदा तत्तद्विशिष्टेऽपि तृ-

तीयाया: शक्तिरेव । नृपेण गम्यते गमितो वा दिगन्तं-शत्रुरित्यत्र तृतीयार्थ: प्रयाणादिव्यापार: नृपविशेषित: प्रयाज्यतासंसर्गेण शत्रुकर्तृकगमनेऽन्वेति । आचार्येण बोध्यते बोधितो वा धर्मं माणवक इत्यत्र तृतीयार्थो-ऽध्यापनादिव्यापार आचार्यादिविशेषितो माणवकर्तृ-कबोधे तथाऽन्वेति । यजमानेन भोज्यते भोजितो वा पायसं ब्राह्मण इत्यत्र तृतीयार्थो निमन्त्रणादिव्यापारो-यजमानविशेषितो ब्राह्मणकर्तृकभोजने तथाऽन्वेति । गुरुणा व्याहार्यते व्याहारितो वा ब्रह्मैष इत्यत्र तृतीया-र्थ: शिक्षणादिव्यापारो गुरुविशेषित एतत्कर्तृकव्याहारे तथाऽन्वेति । गुरुणा श्राव्यते श्रावितो वा धर्मं शिष्य-इत्यत्र तृतीयार्थो वाक्यादिव्यापारो गुरुविशेषित: शिष्य-कर्तृकशाब्दबोधे तथाऽन्वेति । गृहस्थेन मासमास्यते आसितो वाऽतिथिरित्यर्थ: शयनासनभोजनादिदानव्या-पारो गृहस्थविशेषितोऽतिथिकर्तृकासने तथाऽन्वेति । मुद्गरेण नाश्यते घट इत्यत्र तृतीयार्थो ऽभिघातव्यापा-रो मुद्गरविशेषितो घटप्रतियोगिताकनाशे तथाऽन्वेति यदि च प्रयाणादिव्यापारो णिजर्थ एव स कथं तृतीया-र्थोऽन्यलभ्यत्वादिति विभाव्यते तदा प्रयत्न आधेयत्वा-दिकं च तृतीयार्थो णिजर्थप्रयाणादिव्यापारे तत्तत्संस-र्गेण यथायोग्यमन्वेति । न च प्रयाणादिव्यापार: प्रय-त्नादिर्वा कथं तृतीयार्थो ज्ञापकस्यानुशासनस्य विरहात् स्वतन्त्र: कर्त्तेत्यत्र धात्वर्थस्य तिङर्थस्य वा प्रधानव्यापा-रस्याश्रयताया: कर्तृतात्वेन ज्ञापनान्न तु णिजर्थव्यापार-स्येति वाच्यं "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणा-

मणि कर्ता स णावि"त्यत्राणीत्यस्य ज्ञापकस्य सत्त्वात् यदि च स्वतन्त्र एव कर्तृशब्दार्थस्तदा सूत्रेऽणीत्यस्य वैयर्थ्यं स्यात् णिजर्थव्यापाराश्रयस्यास्वतन्त्रत्वादेव तत्र कर्तृत्वाप्रसक्तेः तथा च प्रयोजकोऽपि कर्ता भवति तत्र कर्मत्वनिषेधकतयाऽणीत्यस्य सार्थक्यं तेन गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्र इत्यत्र देवदत्तपदान्न द्वितीयेति । एवं प्रयोजकस्य णिजर्थव्यापाराश्रयस्य कर्तृत्वेऽवगते कर्तृकरणयोरित्यनेनैव प्रयोजकवाचिपदात्तृतीयेति । अत एव तत्र पञ्चविधः कर्तेत्यत्र प्रयोजकस्वतन्त्रकर्मकर्तॄणामेव ग्रहणमिति त्रिविध एव कर्ताऽभिहितत्वानभिहितत्वे स्वतन्त्रप्रयोजकयोरवान्तरधर्मौ न विभाजकोपाधी इति कौण्डभट्टैरुक्तम् । करणपदसंकेतग्राहकमनुशासनं "साधकतमं करणमि"ति साधकतमत्वं च फलायोगव्यवच्छिन्नव्यापारवत्वं साधकस्य व्यापारस्य साधकं करणमिति ज्ञापयन् तमप्प्रत्ययः फलायोगव्यवच्छित्तिं व्यापारे ज्ञापयति तथा च फलोपहितव्यापारद्वारा क्रियाया जनकं करणमिति तत्र फलोपहितव्यापारस्तृतीयार्थः फलोपधानं विशेषणमुपलक्षणं वेत्यन्यदेतत् । तत्र साक्षाज्जनकं न करणमिति तण्डुलविक्लित्त्योदनं पचतीति न प्रयोगः तण्डुलविक्लित्तेरोदनोत्पत्तिं प्रति साक्षाज्जनकत्वात् फलानुपहितव्यापारकमपि न करणमिति शूर्पेण तण्डुलं पचतीति न प्रयोगः शूर्पव्यापारस्य तण्डुलविक्लित्त्यनुपधायकत्वात् व्यापारस्तु क्रियाजनकतावच्छेदकत्वेन धर्मेणोपलक्षणेनानुगतीकृततत्तद्-

संवान् तृतीयाप्रत्ययेनोपस्थाप्यः एतेन सकलव्यापारसाधारणैकरूपाभावेन न शक्त्यैक्यं तत्तद्रूपेण शक्तिस्वीकारे नानार्थता युगसहस्रेणाप्यग्रहश्चेति निरस्तम् । यद्वाधारादिव्यापारो धातुनाऽनभिधीयमानः क्रियाजनकतया विवक्षितस्तदाऽऽधारादिकारकगणाः करणमेव । तदाहुः ।

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा यत्र करणं तत्तदा मतम् ॥
वस्तुतस्तद्निर्देश्यं न हि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः ॥

वस्तुव्यवस्थितिविरहेणानिर्देश्यत्वादेव विवक्षाऽधीनत्वं करणस्येति कारकान्तरेऽपीयमेव गतिरिति विवक्षाऽधीनत्वमपादानादीनामत एव विवक्षातः कारकाणि भवन्तीति प्रवादः । अत्र व्यापाराश्रयः करणतृतीयार्थ इति शाब्दिकाः । तन्न विचारसहं व्यापारस्य शक्यत्वे लाघवात् तदाश्रयस्य तथात्वे गौरवात् किं च व्यापारस्य धात्वर्थे जन्यत्वेन संसर्गेण साक्षादन्वयस्तदाश्रयस्य तु स्वव्यापारजन्यत्वसंसर्गेण परम्पराऽन्वय इति वह्निना पचतीत्यत्र तृतीयार्थ ऊर्ध्वज्वलनव्यापारो जन्यत्वसंसर्गेण पाकेऽन्वेति वह्नूर्ध्वज्वलनजन्यपाककृतिरित्यन्वयबोधः । अनुभवेन स्मरति योगेन स्वर्गच्छति चक्षुषा पश्यतीत्यादौ तृतीयार्थेषु संस्कारापूर्वसंनिकर्षेषु प्रकृत्यर्थानां जन्यत्वसंसर्गेणान्वयः श्रोत्रेण शृणोतीत्यत्र तृतीयार्थे शब्दावच्छिन्नसमवाये सविशेषणे हीतिन्यायेन श्रोत्रस्य जन्यतासंसर्गेण शब्देऽन्वयः पर्यवस्यति यथा रूपं चक्षुषा पश्यतीत्यत्र संयोगे क्वचिज्जन्यत्वातिरिक्तसंसर्गेणापि तृ-

આ પુસ્તક
શ્રી જૈન મુની

तीयार्थे प्रकृत्यर्थस्यान्वयः यथा चिकीर्षया प्रवर्तते परामर्शेनानुमिमीते इत्यादौ तृतीयार्थे समवाये चिकीर्षापरामर्शयोः स्वप्रतियोगिताकत्वसंसर्गेणान्वयः यदि च शृणोतेः प्रत्यक्षार्थकत्वेऽपि शब्देन शृणोतीतिप्रयोगस्तदा शब्दस्यापूर्ववत्समवायेऽन्वय इति वदन्ति । अन्ये तु सर्वत्र करणतृतीयार्थे प्रकृत्यर्थस्य जन्यजनकभावसंसर्गेणैवान्वयः परामर्शेनानुमिमीत इत्यादौ दण्डेन घट इत्यत्रैव हेतौ तृतीया न तु करणे इत्याहुः । अत्र वदन्ति । अनुमानीयः परामर्श इत्यत्र करणे क्त्वाप्रत्ययस्य दर्शनात्परामर्शेनानुमिमीत इत्यत्र करणे तृतीया न तु हेतौ करणत्वं तु फलोपधायकत्वं तत्रोपहितत्वं करणतृतीयार्थः हेतुतृतीयायास्तु स्वरूपयोग्यत्वमर्थ इति । तच्चिन्त्यं पटीयास्तन्तव ओदनीयः पाक इत्यादाविव हेतुत्वार्थकेन संबन्धार्थकेन वा क्त्वाप्रत्ययेन दर्शितप्रयोगोपपादनसम्भवात् उपहितत्वस्य कार्याव्यवहितपूर्वक्षणवृत्तित्वस्वरूपस्य कार्यविशेषाणामन्यलभ्यानामज्ञाने दुर्ग्रहस्य कार्यविशेषाणामननुगमेन तत्तत्कार्यव्यक्तीनामननुगततयाऽव्यवहितपूर्वक्षणस्याननुगमेन चात्यननुगतत्वात्तृतीयार्थत्वासम्भवाच्च व्यापारस्य तृतीयार्थत्वे तु प्रकृत्यर्थस्य व्यापारे तस्य च धात्वर्थे जन्यत्वसंसर्गेणान्वयान्नाननुगमशङ्काऽपीति । अत एव सव्यापारकं कारणं करणमिति करणस्य स्वजन्यः सन् स्वजन्यजनको व्यापार इति व्यापारस्य च लक्षणं संगच्छते । ननु घटादौ दण्डादेर्व्यापारद्वारा हेतुत्वमत एव शब्दालोके मिश्रैर्दण्डकाष्ठादेश्च चक्रभ्रमिविक्लित्त्या-

दिजनकत्वं स्वनिष्ठस्यन्दज्वलनहारित्युक्तं तथा च दण्डेन घट इत्यत्र सव्यापारकहेतुत्वस्य तृतीयार्थतया तस्य च नामार्थान्वयेन करणत्वस्य कारकत्वहानिरिति चेन्न व्यापारस्य करणतृतीयार्थतया तस्य च जन्यत्वसंसर्गेणा धात्वर्थ एवान्वयेन कारकत्वानपायात् हेतुत्वमर्थस्तच्च साक्षात्परम्परासाधारणमित्यादिकं वक्ष्यते । द्वितीयार्थोऽपि व्यापारो दिवोर्थेऽन्वेतीति ज्ञापयितुं "दिवः कर्म चेति सूत्रं" दिवः साधकतमं कर्म करणं च भवतीत्येतदर्थकं चकारः संज्ञाद्वयार्थकः अत एव मनसादेव इत्यत्र करणसंज्ञाप्रयुक्ता तृतीया कर्मसंज्ञाबलात्कर्मोपपदप्रयुक्तोऽण्प्रत्ययः "मनसः संज्ञायामि" त्यनुशासनेन तृतीयाया अलुक् एवमक्षैरक्षान्वा दीव्यतीत्युभयविधप्रयोगः साधुः के चित्तु दिवः साधकतमे करणसंज्ञाप्रयुक्तकार्यं देवना अक्षा इत्यत्र ल्युट् कर्मसंज्ञाप्रयुक्तं तु अक्षादीव्यन्त इत्यत्र लः देवनीया इत्यादावनीयरादिः प्रत्ययः अक्षैर्दीव्यन्तीत्यत्र च संज्ञाद्वयप्रसक्तौ परया तृतीयया द्वितीयाया बाध इत्यक्षान्दीव्यतीति न प्रमाणमिति वदन्ति । तन्न विचारसहं तृतीयाया द्वितीयाबाधकत्वे बीजीभूतानुशासनविरहात् प्रत्युत परया कर्मसंज्ञया तत्प्रयुक्तद्वितीयादिकार्येण वा करणसंज्ञायास्तत्प्रयुक्ततृतीयादिकार्यस्य वा बाधापत्तेः न चैवमेवास्तु अक्षान्दीव्यतीत्येव प्रमाणं न चाक्षैर्दीव्यतीति दीव्यतियोगे तृतीयाद्वितीयोभयप्रयोगोऽसाधुरेवेति वाच्यं तथा सति "दिवः कर्म चे"ति सूत्रे चकारवैयर्थ्यप्रसङ्गात् । न च क्वाचित्कसंज्ञाद्वयप्रयुक्तस्य ल्युट्कर्माख्यातादिकार्यस्योप-

पादकतया चकारः सार्थक इति वाच्यं क्वाचित्ककार्यो-पपादकत्वे बीजविरहेण विशेषेण कार्यद्वयोपपादकतयैवैच्छिकविकल्पार्थकस्य चशब्दस्य सार्थकत्वसम्भवात् । एवमक्षैरक्षान्वा दीव्यति मल्य इत्यत्र दीव्यतेः क्रीडा सा तु सुखव्यापारोभयं सुखमेव वाऽर्थः तृतीयाद्वितीययोः पातस्वरूपो व्यापारोऽर्थः तथा चाक्षजन्यपातजन्यस्य सुखानुकूलव्यापारस्य सुखस्य वाऽनुकूलकृतिमान्मल्य इति शाब्दबोधः । न चात्र धात्वर्थफले सुखे आधेयत्वस्वरूपं कर्मत्वं द्वितीया बोधयितुमीष्टे सुखादावक्षाधेयत्वस्य बाधादिति द्वितीयाया अपि व्यापारोऽर्थः अत एव देवना अक्षा इत्यत्र व्यापाराश्रयस्य करणस्य ल्युटाऽभिधानान्न व्यापारार्थिका द्वितीया । एवमक्षा दीव्यन्ते देवनीया वेत्यत्र तिङा व्यापारस्य तदाश्रयस्यानीयराऽभिधानान्न व्यापारार्थिका करणतृतीया "अनभिहित इति निषेधादिति । द्वितीयायाः करणत्वमिव तृतीयाया अपि कर्मत्वमर्थ इत्यावेदयितुं "संज्ञोऽन्यतरस्यां कर्मणी" ति सूत्रम् । सम्पूर्वस्य जानातेः कर्मणि तृतीया द्वितीय वा स्यादित्यर्थकं पित्रा पितरं वा संजानीत इत्यत्र संजानातेः संज्ञानमसाधारणधर्मेण ज्ञानमर्थस्तृतीयाद्वितीययोर्विषयतास्वरूपं कर्मत्वमर्थः अथ वाऽऽधेयत्वस्वरूपमेव कर्मत्वमिहाप्यर्थः विषयतायाः पूर्वोक्तयुक्त्या धात्वर्थफलत्वावश्यकत्वात् तथा च पितृविषयताकं पितृवृत्तिविषयताकं वा ज्ञानं वाक्यार्थः सञ्जानीत इत्यत्र "संप्रतिभ्यामनाध्याने" इत्यनुशासनेन संपूर्वकात् प्रतिपूर्वकाच्च ज्ञ आत्मनेपदं भवति यद्याध्यानं स्मरणं नार्थ इ-

त्यर्थकेन सिद्धमात्मनेपदम्। आध्याने तु मात्रा मातरं-वा संजानातीत्येव प्रमाणम्। के चित्तु आध्याने मातरं-मातुर्वा सञ्जानातीत्येव साधु "अधीगर्थे" ति सूत्रेण विहितया षष्ठ्या तृतीयाया बाधात् अत एव क्रद्योगषष्ठ्या तृतीयाया बाधः पितुः संज्ञानमित्यादावित्याहुः। तन्न विचारसहं षष्ठ्या तृतीयाया बाधे द्वितीयाया अपि बाधापत्तेर्युक्तेस्तौल्यात् पितुः संज्ञाजं संज्ञा वेत्यत्र वृत्तिकारमते क्रद्योगे कर्मार्थकषष्ठ्या कर्मप्रत्ययस्य द्वितीयातृतीयादेर्बाध इति नात्र तृतीयादेः प्रसक्तिरिति। हविष्कर्मण्यपि तृतीयां ज्ञापयति "तृतीया च होश्छन्दसी" ति सूत्रं छन्दसि होर्हुवेः कर्मणि तृतीया स्याच्चकाराद्द्वितीयाऽपीत्यर्थकं यवाग्वा जुहोति यवागूं जुहोतीत्यादौ-जुहोतेर्वह्निसंयोगफलकस्वाहाकरणकप्रक्षेपोऽर्थस्तत्र वह्निसंयोगान्वय्याधेयत्वस्वरूपं कर्मत्वं तृतीयाद्वितीययोरर्थः तथा च यवागूवृत्तिवह्निसंयोगफलकस्वाहाकरणकप्रक्षेपकर्तृत्वं वाक्यार्थः लोके तु घृतं जुहोतीत्यादौ न तृतीयेति। "अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया स्यादि" ति दाण्डा संयच्छते कामुक इत्यत्र तृतीया अशिष्टो वेदनिषिद्धकर्ता, व्यवहार इति निमित्तसप्तमी तथा च वेदनिषिद्धव्यवहारप्रयोजकश्चेद्दाणोऽर्थस्तदा चतुर्थ्यर्थे तृतीया भवति अत एव "दाणश्च सा चेच्चतुर्थ्यर्थे" इत्यनुशासनेन सम्पूर्वकाद्दाण आत्मनेपदं भवति यदि चतुर्थ्यर्थिकया तृतीयया योगो भवतीत्यर्थकेनात्मनेपदं साधयता संप्रदानत्वार्थिका तृतीयाऽपि साध्यते। अत्र वेदनिषिद्धव्यवहारप्रयोजकत्वं वेदनिषिद्धत्वं वा

पापानुगुणत्वं न धातोर्न वा तृतीयाया अर्थ इति न शाब्दबुद्धिविषयः किं तु शाब्दानन्तरं मानान्तरगम्यं दाणस्तु दानमर्थः तत्स्वरूपसत्तापानुगुणमिहापेक्षितमत्रैवात्मनेपदं साधु तृतीयायाः संप्रदानत्वमर्थः दानसंप्रदानत्वयोः स्वरूपं चतुर्थीविवरणे वक्ष्यते एवं दासीसंप्रदानकदानकर्ता कासुक इति शाब्दबोधः पापाननुगुणदानेतु भार्यायै संयच्छतीति चतुर्थीपरस्मैपदयोरेव साधुत्वमिति । फलोपहितार्थकधातुयोगे कालाध्वशब्दात्तृतीयेति ज्ञापयितुम् । "अपवर्गे तृतीये"त्यनुशासनम् । अपवर्गे फलप्राप्तौ सत्यां कालाध्वशब्दाभ्यामत्यन्तसंयोगेऽर्थे तृतीया भवतीत्यर्थकं अपवर्गः फलं यदिच्छाप्रयोज्याचारविषयः क्रिया तत्फलं प्राप्तिस्तदुपधानं तथा च यत्र फलोपहितो धात्वर्थस्तत्रात्यन्तसंयोगार्थिका तृतीया अत्यन्तसंयोगः कालिकं दैशिकं वा व्यापकत्वं द्वितीया विवरणोक्तं स्मर्तव्यम् । एवमन्हा क्रोशेन वाऽनुवाको ऽधीत इत्यत्राध्ययनमुच्चारणमनुसंधानं वा धात्वर्थः दृढसंस्कारोपहितमध्ययनमिह धातुनोपस्थाप्यते तत्र धात्वर्थे तृतीयार्थोऽत्यन्तसंयोगो ऽन्वेति तथा चाहर्व्यापकस्य क्रोशव्यापकस्य वा दृढसंस्कारोपहिताध्ययनस्य कर्मानुवाक इति शाब्दबोधः । दैशिकव्यापकत्वं कर्तृघटितपरम्परासंसर्गावच्छिन्नमिह बोध्यमिति । यत्र फलोपहिता न क्रिया तत्र मासमधीतोऽपि नाभ्यस्तो ऽनुवाक इति द्वितीयैव प्रमाणम् । अत्र फलानुपहितमेवाध्ययनादिकं धात्वर्थः अत्यन्तसंयोगमात्रं तृतीयार्थः अपवर्गस्तु व्यञ्जनागम्यः दिवसेन भवानयुङ्क्ते-

त्यत्र दिवसाभिव्यापकं भवत्कर्तृकमतीतयुद्धमिति प्रथमबोधः विजयफलकं तथाविधयुद्धमिति वैयञ्जनिकबोध इत्यालङ्कारिकाः । तन्न सुन्दरं तव शत्रुर्दिवसमयुद्ध न तु दिवसेनेत्यत्रान्वयबोधानुपपत्तेः फलानुपहितक्रियामात्रस्य धात्वर्थत्वे युद्धे दिवसादिव्यापकत्वशत्रुकर्तृकत्वयोरवगमेन तदेकतरस्यापि निषेधप्रतीतेरसम्भवात् तस्मात्कालादिशब्दोत्तरतृतीयाः समभिव्याहारे फलोपहितक्रियायां धातुर्लाक्षणिक इति न तु दिवसेनेत्यत्र विजयफलकयुद्धं धात्वर्थः तथा च विजयफलकदिवसाभिव्यापकयुद्धे शत्रुकर्तृकत्वाभावस्य शत्रौ तथाविधयुद्धकर्तृत्वाभावस्य वा प्रतीतिसम्भवान्निषेधप्रतीत्युपपत्तिः दिवसाभिव्यापकयुद्धे शत्रुकर्तृकत्वप्रतीतेः शत्रौ तथाविधयुद्धकर्तृत्वप्रतीतेर्वा विरोधाभावात् घटवान् नीलघटाभाववानिति वदिति पदवाक्यरत्नाकरे गुरुचरणाः ।

इति कारकतृतीयार्थनिर्णयः ।

नामार्थान्वयिनस्तृतीयार्था अकारकतया संज्ञायन्ते तत्र नानार्थिकां तृतीयां ज्ञापयति । "प्रकृत्यादिभ्य उपसंख्यानमि"ति वार्त्तिकं प्रकृत्या चारुत्वत्र सुखजनकस्य साक्षात्कारस्य ज्ञानसामान्यस्य वा विषयेण धर्मेण विशिष्टश्चारुपदार्थः चारुपर्याया अभिरामहृद्यसुन्दरमञ्जुलादयः । मनसो ऽभिराम इत्यत्र षष्ठ्यर्थो जन्यत्वं तथाविधे साक्षात्कारे ज्ञानसामान्ये वाऽन्वेति मनोऽभिराम इत्यत्राभिरामशब्दस्य सुखजनकमानसविषयधर्मविशिष्टे लक्षणा मनःपदं तात्पर्यग्राहकम् । प्रकृतिपदार्थस्तु स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्म-

ानसाधारणो धर्मः भवति च सतो जातिः प्रकृतिरि-
त्यादौ जात्यादिस्तथा असाधारण्यविशेषणात् घटस्य
गुणो जातिर्वा प्रकृतिरिति न प्रयोगः प्रयोगस्तु कम्बु-
ग्रीवादिमत्वं प्रकृतिरिति । जलस्य शैत्यं पृथिव्या गन्ध-
तेजस औष्ण्यं प्रकृतिरित्यादौ शैत्यगन्धौष्ण्यानां संग्र-
हाय स्थूलकालावच्छिन्नत्वं स्वाश्रयनिष्ठात्यन्ताभावे वि-
शेषणं देयमिति । यदि च संयोगो द्रव्यस्य मत्सरः ख-
लस्य चैतन्यमात्मनः प्रकृतिरित्यादिप्रयोगस्तदा देशान-
वच्छिन्नविशेषणतया स्वाश्रये स्थूलकालावच्छेदेन वर्त-
मानस्यात्यन्ताभावस्य प्रतियोगितानवच्छेदकधर्मवानसा-
धारणो धर्मः प्रकृतिरिति द्रव्ये वृक्षादौ मूलाद्यवच्छेदेन
संयोगस्य खले मत्सरस्य आत्मनि ज्ञानस्य घटाद्यवच्छे-
देन स्थूलकालावच्छेदेन वर्तमानोऽप्यत्यन्ताभावो न दे-
शानवच्छिन्नविशेषणतयाऽस्तीति नासंग्रहः । वस्तुतस्तु
भूयःकालिकस्वाश्रयनिरूप्यसत्तावांस्तादृशो धर्मः प्रकृ-
तिस्तावतैव सर्वसामञ्जस्यात् यदि च पृथिव्या गन्धप्रा-
गभावो रक्तप्रागभावो वा गन्धनाशो रक्तनाशो वा प्रकृ-
तिरिति न प्रयोगस्तदा स्वसंबन्धिनि प्रतियोगिजातीय-
समानकालिकस्य विद्यमानस्य नाशस्य प्रागभावस्य
चाप्रतियोगी तादृशो धर्मः प्रकृतिरिति तथाविधनाश-
प्रागभावप्रतियोगिनौ प्रागभावनाशौ न तथा संयोगम-
त्सरज्ञानानां नाशप्रागभावे स्वसंबन्धिनि विद्यमानौ न
प्रतियोगिजातीयासमानकालिकाविति न तेषामसं-
ग्रहः । यद्वा स्वसंबन्धितावच्छेदकसमनियतो धर्मः प्र-
कृतिः समनियमघटकव्यापकत्वद्वये प्रतियोगिवैयधिक-

रणं निवेशनीयं तच्च प्रतियोगिकालावच्छेदेन प्रतियोग्यधिकरणे वर्तमानेभ्योऽन्यत्वं तेन द्रव्यस्य संयोगः संयोगवतो द्रव्यत्वं प्रकृतिरित्युपपद्यते प्रतियोगिकालावच्छिन्नत्वस्य निवेशात् प्रागभावनाशयोर्न प्रकृतित्वं प्रागभावनाशयोरत्यन्ताभावस्तत्कालावच्छेदेन तदधिकरणे न वर्तमान इति तयोर्न संबन्धितावच्छेदकत्वव्यापकत्वं चित्ररूपाद्यनभ्युपगमाद्वैशिकाव्याप्यवृत्तेर्गन्धादेरत्यन्ताभावस्य प्रतियोगिकालेऽपि सत्वान्न व्यापकत्वहानिरिति चित्राभ्युपगमे तु वस्तुतः कल्पोऽनुसरणीय इति प्रकृतिपदोत्तरतृतीयायास्तादात्म्यमर्थस्तच्चापरपदार्थतावच्छेदकेऽन्वयितावच्छेदके वाऽन्वेति इत्थं च प्रकृत्यभिन्नचारुत्ववानिति वाक्यार्थबोधः । एवं नाम्ना सुतीक्ष्णश्चरितेन दान्त इत्यत्रापि तृतीयायास्तादात्म्यमर्थः सुतीक्ष्णपदस्य सुतीक्ष्णपदप्रतिपाद्ये लक्षणा नाम वाचकचरितमाचारस्य प्रयत्नस्य विषयः दम इन्द्रियनिग्रहादिः तथा च नामाभिन्नसुतीक्ष्णपदप्रतिपाद्यः चरिताभिन्नदमशील इत्यन्वयबोधः सुरथो नाम राजाऽभूदित्यादौ नामेति तादात्म्यार्थकलुप्ततृतीयान्तं सम्भावनार्थकं वाऽव्ययं गोत्रेण गार्ग्य इत्यादौ तृतीयायास्तादात्म्यमर्थः गोत्रशब्दार्थस्तु वंशप्रवर्तक पुरुषो ब्रह्मर्षिः वंशपदार्थस्तु प्रवर्तकस्याप्रवर्तकस्य वा पुरुषस्योत्तरकालिकः स्वारम्भकशुक्लपरमाणुभिः परम्परयाऽऽरब्धमाणः उत्तरकालिकत्वनिवेशात्पराशरस्य वंशो वसिष्ठ इति न प्रयोगः किं तु वसिष्ठस्य पराशर इति प्रवर्तकशब्दार्थस्तु दर्शितवंशत्वस्वरूपशक्यसंबन्धेन स्वसंज्ञाशब्दस्य नि-

रूढोपचारकः तथा निरूढोपचारका यथा गौतमा गर्गाः शाण्डिल्या इत्यादौ गौतमादयः पुरुषाः स्ववंशे स्वसंज्ञोपचारकाः ब्रह्मर्षिशब्दार्थस्तु ऋषिस्वरूपो ब्राह्मणः एवं वंशमात्रार्थकत्वे तु चैत्रमैत्रगोत्रा एते इति प्रयोगरूढ्यारणार्थमुपात्तोऽपि प्रवर्तकत्वे विशेषणे एते रघवो यदवः कुरवो रघुयदुकुरुगोत्रा एते इति प्रयोगवारणाय ब्रह्मर्षित्वं विशेषणं न च दर्शितप्रयोगवारणाय ब्राह्मणत्वमेव विशेषणमस्तु किमृषित्वनिवेशेनेति वाच्यं दर्शितोपचारकत्वेऽपि न ब्राह्मणत्वमात्रं तत्त्वं तथासति प्रभाकराः कुमारिला उदयना एते इति प्रयोगप्रसङ्गः किं तु ऋषित्वं तदर्थमेवास्तु तत्प्रदर्शनं वस्तुतो गोत्रलक्षणे न तन्निवेश इति पत्न्यां पतिसगोत्रव्यपदेशो गौणधर्मशास्त्रातिदेशात् पितृसगोत्रव्यपदेशनिवृत्तिरपि तत एव अत एव कन्यादानवाक्यं पितृगोत्रघटितमेव गार्ग्यमित्यत्र तद्धितार्थोऽपत्यं तच्च वंश एव एवं तृतीयार्थाभेदस्य गर्गपदार्थेऽन्वयः तथा सति गोत्राभिन्नगर्गापत्यमिति शाब्दबोधः । धान्येन धनीत्यादौ धनपदार्थे तृतीयार्थाभेदान्वयः जात्या ब्राह्मण इत्यत्र जात्यभेदो ब्राह्मणेऽन्वीयमानः सविशेषणे हीतिन्यायेन ब्राह्मणत्वमादाय पर्यवस्यति न च तृतीयार्थोऽभेदः परार्थैकदेश एवान्वेतीति नियम इति वाच्यम् । ईदृशनियमे मानाभावात् यत्र पदार्थे सविशेषणे हीतिन्यायेनापि प्रथमतृतीयार्थोऽभेदो नान्वेतुमर्हति तत्रैव पदार्थस्यान्वयिनोऽन्वयितावच्छेदकस्य वैकदेशेऽन्वेति यत्र तु पदार्थेऽन्वेतुमर्हति तत्र पदार्थ एवान्वेति यथा पृथिव्यादीनां नवानां द्रव्यत्वेन

गुणत्वेन वा साधर्म्यमित्यत्र द्रव्यत्वाद्भेदस्तृतीयान्तार्थः साधर्म्यशब्दार्थे समानधर्मेऽन्वेति यथा वा वाजपेयेन यजेतेत्यादौ वाजपेयाद्भेदस्तृतीयान्ताऽर्थो धात्वर्थयागादावन्वेति एवमर्घादिकया सपर्यया पर्यपूपुजदित्यादौ विशेषणान्तरविशेषितसपर्यादितादात्म्यं धात्वर्थे शुद्धसपर्यादौ तृतीया बोधयति अवशेषितस्यैकधर्मावच्छिन्नस्य तादात्म्यसंसर्गेणान्वयो निराकाङ्क्षत्ववाधितो न तु तादात्म्यविशेषणको नितरां विशेषणान्तरविशेषितस्येति ननु धात्वर्थविशेषणे तृतीयाऽपि द्वितीयेव साधुत्वार्था तृतीयान्तार्थस्य द्वितीयान्तार्थस्येव तादात्म्यसंसर्गेणैव धात्वर्थेऽन्वयो न तु तादात्म्यविशेषणे इति चेत्तर्हि कथं सपर्यया पर्यपूपुजदित्यत्रान्वयोपपत्तिः न च विशेषणान्तरविशेषितस्यैकधर्मावच्छिन्नस्यापि तादात्म्येनान्वयो भवत्येव यथा प्रमाऽनुभव इत्यत्र प्रमाशब्दार्थस्य यथार्थानुभवस्यानुभवे यथा वा भूरूवेरा देशो राजन्वानित्यत्र सर्वसस्यवङ्गमेर्भुवि सुराजदेशस्य देशे तादात्म्यान्वयस्तथा प्रकृतेऽपि अर्घ्यदानादिसपर्यायाः सपर्यायां वाजपेयेन यजेतेत्यादौ वाजपेयादेर्धात्वर्थयागादौ तादात्म्यान्वय इति वाच्यं धात्वर्थविशेषणे द्वितीयाया एव साधुत्वज्ञापकानुशासनस्य सत्वेन तृतीयायास्तथानुशासनविरहात् प्रकृतानुशासनस्य तथात्वोपगमे प्रकृत्या चार्थित्यादेरनन्वयापत्तेः नामार्थयोस्तादात्म्यसंसर्गेणान्वये समानविभक्तिकत्वस्य तन्त्रत्वात् तृतीयायास्तादात्म्यार्थकत्वे तु प्रकृते तादात्म्यप्रकारकान्वयबोधसम्भवात् तथाऽन्वयबोधे समानविभक्तिकत्वस्यातन्त्रत्वात् अत एव द्रव्यत्वेन सा-

धर्म्यमित्यत्र द्रव्यत्वस्य समानधर्मे द्रोणैः षोडशभिः खारीत्यत्र षोडशानां द्रोणानां खारीपदवाच्ये तादात्म्यप्रकारकोऽन्वयबोधः । नन्वेवं कुटिलेन दण्ड इति कथं न प्रयोग इति चेत्कुटिलादिशब्दानां प्रकृत्यादिगणपठितशब्दापर्यायत्वादेवाप्रयोग इति । एवमर्घ्यादिना पर्यपूपुजदित्येतावतैव सामञ्जस्ये सपर्ययेत्यादिकमपुष्टार्थं न तु निराकाङ्क्षमिति । समवायेन लौहित्यवज्जपापुष्पं समवायिसंयोगेन स्फटिकश्चकलमित्यत्र तृतीयार्थस्तादात्म्यं मतुवर्थतावच्छेदके संबन्धेऽन्वेति तेजसा सूर्यो दानेन कल्पतरुरयमित्यादौ सूर्यादिपदस्य सूर्यादिसदृशे लक्षणा सूर्यसादृश्ये तेजसः कल्पतरुसादृश्ये दानस्य तादात्म्यं तृतीयार्थोऽन्वेति अथ वा समवायेन नीलः पटः कालिकेन स्यन्द इत्यादौ तृतीयान्तसमभिव्याहारः समवायकालिकादिसंसर्गकनीलविशिष्टशाब्दधियं जनयति यथा तथा प्रकृतेऽपि तेजसेत्यादि तृतीयान्तसमभिव्याहारस्तेजोदानादिस्वरूपतादात्म्यसंसर्गकसूर्यकल्पपादपादिविशिष्टशाब्दं जनयति अतः संसर्गानुवादिका तृतीयेति अवच्छेदकत्वमपि क्व चित्तृतीयार्थः यथा वन्हित्वेन वन्हेर्जनकत्वं जन्यत्वं प्रतियोगित्वं प्रकारत्वं विशेष्यत्वं वेत्यादौ तृतीयाया अवच्छेदकत्वमर्थः तच्चाधेयतासंबन्धेन प्रातिपदिकार्थेनान्वितं निरूपकत्वसंसर्गेण जनकत्वादावन्वेति । समवायेन ध्वंसो नास्तीत्यादाववच्छेदकतानिरूपकत्वस्वरूपमवच्छिन्नत्वं तृतीयार्थस्तच्च नञर्थोऽत्यन्ताभावे स्वाश्रयप्रतियोगितात्वसंबन्धेनान्वेति व्युत्पत्तिवैचित्र्येण तृती-

यार्थस्य संसर्गीभूता प्रतियोगितैव प्रतियोगिनो ध्वंस-पदार्थस्य नञर्थे संसर्गीभवति अथ वा अवच्छिन्नप्रतियोगिताकत्वं तृतीयार्थः तच्च स्वरूपेण संबन्धेन नञर्थेऽन्वेति व्युत्पत्तिवैचित्र्येण प्रतियोगिनोऽपि संसर्गीभवतीति वदन्ति । तृतीयार्थोऽवच्छिन्नत्वं संसर्गीभूतप्रतियोगिताविशेषणतया भासत इति स्वतन्त्राः । वस्तुतस्तु समवायेनेत्यादितृतीयान्तसमभिव्याहारः समवायाद्यवच्छिन्नप्रतियोगिताकत्वसंसर्गेण प्रतियोगिनो ध्वंसादिशब्दार्थस्य नञर्थान्वयबोधे हेतुरित्येव रमणीयमिति । इयमेव गतिः पटत्वेन घटो नास्ति शशीयत्वेन शृङ्गं नास्तीत्यादावपि बोध्या । क्वचिन्निरूपकत्वमपि तृतीयार्थः यथा धूमस्य धूमत्वेन वह्निव्याप्तिरित्यत्र निरूपकत्वं तृतीयार्थः तच्चाधेयतया प्रकृत्यर्थविशेषितं वह्निव्याप्तावन्वेति निरूपकत्वं तु व्यापकत्वलक्षणं घटकत्वमिति संप्रदायः । अतिरिक्तमित्यन्ये । एवमङ्कुरेणानेकान्त इत्यत्र वह्नावयःपिण्डेन धूमव्यभिचार इत्यत्र च घटितत्वं व्याप्यत्वलक्षणमतिरिक्तं वा निरूपकत्वं तृतीयार्थः तच्चानेकान्तपदार्थे व्यभिचारे धूमव्यभिचारे च प्रकृत्यर्थविशेषितमन्वेति । क्वचिद्दैशिकसंसर्गावच्छिन्नमाधेयत्वं तृतीयार्थः यथा समेनैति विषमेणैतीत्यादौ यदीयसकलावयवानां प्रत्येकं स्वसंयुक्तसंयोगादिपरम्पराणामूर्ध्वदिगवच्छिन्नानां तुल्यत्वं स भूभागः समो देशस्तदितरो विषमस्तथा च कर्तृघटितदैशिकपरम्परासंसर्गावच्छिन्नमाधेयत्वं तृतीयार्थः तच्च प्रकृत्यर्थेन समेन विषमेण च देशेन विशेषितं धात्वर्थगमनेऽन्वेति न चात्र समादि-

देशव्यापारस्य जन्यत्वेन संसर्गेण धात्वर्थगमनेऽन्वयात्करणे तृतीयेति वाच्यं करणत्वविवक्षायामिष्टत्वात् अविवक्षणे तु आधारस्याधिकरणसंज्ञया तत्कार्येण वा करणसंज्ञायास्तत्कार्यस्य वा वाधात् करणाधारकर्मणामिति भाष्यात् । न चैवं तृतीयार्थाधिकरणत्वस्य धात्वर्थेऽन्वयोपगमात् कारकत्वापत्तिरिति वाच्यं सर्वत्र धात्वर्थान्वयविरहात् नामार्थेनाप्यन्वयात् । अत एव शाखया कपिसंयोगी वृक्ष इत्यत्र श्वेतः खुरविषाणाभ्यामित्यत्र च तृतीयार्थाधेयत्वस्य शाखाविशेषितस्य कपिसंयोगे खुरविषाणविशेषितस्य श्वेतरूपे सविशेषणे हीति न्यायेनान्वयात् । रजतत्वेन पुरोवर्त्तिनं जानातीच्छति करोति द्वेष्टि वेत्यादौ प्रकारत्वं तृतीयार्थः तच्च धात्वर्थफले द्वितीयार्थे वा विशेष्यत्वे निरूपकतासंसर्गेणान्वेतीति वदन्ति। तत्र घट इति घटघटत्वसमवायान् जानातीत्यादिप्रयोगेण विशेष्यत्वस्य न धात्वर्थत्वं न वा द्वितीयार्थत्वं सम्भवति घट इति नियतार्थस्य धात्वर्थज्ञानेऽभेदान्वयेन तादृशज्ञानविशेष्यत्वस्य घटत्वसमवाययोरसम्भवात् विषयत्वं फलतया धात्वर्थो न तु द्वितीयार्थो भगवान् जानातीत्यादावनुपपत्तेरित्यस्य प्रागावेदितत्वात् तथा च तृतीयार्थः प्रकारत्वं रजतत्वादिप्रकृत्यर्थविशेषितं धात्वर्थे फले विषयत्वे व्यापारे ज्ञानादौ वा निरूपकत्वेन प्रतियोगित्वेन वा संसर्गेणान्वेति रजतत्वप्रकारतानिरूपितपुरोवर्तिविशेष्यताकत्वमाक्षेपेण परिशेषेण मनसा वा मानान्तरेणावगम्यते विशेष्यत्वस्य द्वितीयार्थतापक्षेऽपि तत्र तृतीयार्थप्र-

कारत्वस्य निरूपकतासंसर्गेणान्वयो न सम्भवति सुबर्थयोः परस्परान्वयस्याव्युत्पन्नत्वात् तृतीयार्थप्रकारत्वस्य धात्वर्थे ज्ञानादावेवान्वयात् प्रकारतानिरूपितविशेष्यताकत्वस्य मानान्तरादेवलाभ इति। एवं लक्षणस्वरूपप्रामाण्यादिभिरनुमाने निरूपणीये इत्यादौ शाब्दबोधस्तदनुकूलव्यापारश्च निरूपेरर्थः कर्मक्तस्तु विशेष्यो विषयो वाऽर्थः कर्मप्रत्ययस्थले व्यापारस्य विशेषणतया कर्मप्रत्ययार्थेऽन्वयः प्रकृते कर्मकृदर्थैकदेशेऽपि विशेष्यत्वे विषयत्वे वा शाब्दबोधस्य फलस्य विशेषणतयाऽन्वयो व्युत्पत्तिवैचित्र्यात् तथा चात्र तृतीयार्थप्रकारत्वस्य लक्षणादिविशेषितस्य शाब्दबोधेऽन्वयः प्रकारतानिरूपितविशेष्यताकत्वलाभः पूर्ववदेव कृदर्थैकदेशे विशेष्यत्वे विषयत्वे वा तृतीयार्थप्रकारत्वस्य निरूपकत्वेन संसर्गेणान्वय इति वदन्ति। तत्र कृदर्थैकदेशे धात्वतिरिक्तार्थस्यान्वयो न व्युत्पत्तिसिद्ध इत्यादिकं चिन्तनीयम्। के चित्तु फलविशिष्टं कर्म कृदर्थः फलस्य द्वेधा शाब्दबोधविषयत्वं तृतीयार्थप्रकारत्वस्य कर्मकृदर्थैकदेशे फलेऽन्वयस्तथा चात्र शाब्दबोधानुकूलव्यापारप्रयोज्यस्य लक्षणादिप्रकारकशाब्दबोधस्य विशेष्येऽनुमान इति शाब्दबोध इति वदन्ति। तदपि चिन्त्यं फलस्य द्वेधा शाब्दबोधविषयत्वस्याप्रामाणिकत्वात् व्युत्पत्तिवैचित्र्येणैव व्यापारविशेषणकफलविशेष्यकशाब्दबोधसम्भवेनान्वयोपपत्तिसम्भवात् फलादेः कर्मप्रत्ययार्थत्वासम्भवात् कृदर्थैकदेशे धात्वतिरिक्तार्थान्वयस्याव्युत्पन्नत्वाच्च। परिच्छिन्नत्वमपि क्व चित्तृतौ-

यार्थः यथा द्विद्रोणेन धान्यं क्रीणातीत्यादौ द्रोणो गुरुत्वत्वावान्तरजातिमान् परिमाणविशेषः द्विद्रोण इति पाचादित्वान्न स्त्रीत्वं द्विद्रोणत्वमपि द्रोणत्वावान्तरजातिविशेषो द्रोणद्वित्वं वा परिच्छिन्नत्वं तृतीयार्थः क्रयकर्मत्वे धात्वर्थफले ऽन्वेति परिच्छिन्नत्वं तु द्विद्रोणस्य स्वसमवायिन एकद्रव्यस्योभयद्रव्यस्य वाऽऽरम्भकपरमाणुत्वममनियतसंख्यासजातीयसंख्याव्यापकत्वं क्रयजनितस्वत्वस्य सकलेषु धान्यतदारम्भकेष्वेकस्याभ्युपगमात् परमाणुवृत्तित्वसम्भवेन स्वरूपेण समवायेन वा संबन्धेन तादृशसंख्यां प्रति साक्षादेव व्यापकत्वं यदि च स्वत्वस्य धान्यवृत्तित्वमुपेयते न तु तदारम्भकवृत्तित्वं तदा स्वाश्रयारम्भजननपरम्परासंबन्धेन तावत्परमाणुविश्रान्तेन व्यापकत्वं बोध्यम् । एवं द्विद्रोणसमवायिद्रव्यारम्भकपरमाणुसमनियतसंख्यासजातीयसंख्याव्यापकस्य स्वत्वस्यानुकूला क्रयक्रियेत्यन्वयबोध इति गुरुचरणाः । द्विद्रोणो गुरुत्वान्तरं समवायित्वं तृतीयार्थो धान्यपदार्थे धान्यराशावन्वेति धान्यराशेरतिरिक्तत्वात् एको महान् धान्यराशिरिति प्रतीतेरन्यथाऽवयविभावासिद्धिप्रसङ्गादित्येकदेशिनः । तच्चिन्त्यं यवधान्योभयघटितराशौ यवत्वधान्यत्वयोः स्वीकारे सांकर्यापत्तेः न च तत्र यवधान्योभयत्वजातिरतिरिक्तैव स्वीक्रियते न तु धान्यत्वं यवत्वं वेति न सांकार्यमिति वाच्यं यवाद्यर्थिनामप्रवृत्तिप्रसङ्गात् न च रुधिरास्थिमांसादीनां शरीरावयवत्ववत् यवादीनामपि तदवयवत्वाङ्गवति प्रवृत्त्युपपत्तिरिति वाच्यं तथाप्यनल्पानां यवधान्योभयत्वा-

द्विजातीनां राशितत्प्रागभावध्वंसानां च कल्पनापत्ते-
रनतिरिक्तत्वाभ्युपगमेन प्रदृत्याद्युपपत्तेरेको महानिति
प्रतीतिरौपाधिकोत्यन्यत्र विस्तरः। के चित्तु एकजा-
तीयमवनमनं प्रति द्विद्रोणस्वरूपगुरुत्वविशेषस्य तदाश्र-
यारम्भकपरमाणुसमसंख्यकपरमाणुगुरुत्वानां च वैक-
ल्पिकी कारणता तथा च तावत्परमाणुगुरुत्वं द्विद्रोण-
पदार्थः तृतीयार्थो वैशिष्ट्यं सामानाधिकरण्यं वा वैशि-
ष्ट्यं तु स्वाश्रयारभ्यत्वघटितपरम्परास्वरूपं धान्येषु सा-
मानाधिकरण्यं तु दर्शितपरम्परासंबन्धावच्छिन्नं सत्वे-
ऽन्वेतीति वदन्ति। तदपि न विचारसहम्। परमाणुगुरु-
त्वानामेवावनमनं प्रति हेतुत्वात् अवयविगुरुत्वस्य हेतु-
त्वे पलमितसर्षपप्रयुक्तावनमनतः तथाविधलोहपिण्ड-
प्रयुक्तावनमनस्य प्रकर्षप्रसङ्गात् पतनप्रकर्षप्रयोजकत्वे-
नावयविगुरुत्वस्याभ्युपगमात् कारणोत्कर्षस्य कार्योत्कर्ष-
प्रयोजकत्वादित्यन्यत्र विस्तरः। वस्तुतस्तु।

जालान्तरगते भानौ सूक्ष्मं यद्दृश्यते रजः।
प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते॥

इत्यादिना त्रसरेण्वादिघटितं माषसुवर्णनिष्कादि-
मानं मनुनोक्तं निष्कादिघटितं च द्रोणादिमानमेवमाढ-
कमितद्रव्यचतुष्टयस्यारम्भकपरमाणुसमसंख्यकपरमाणु-
गुरुत्वानि द्रोणस्तद्द्विगुणगुरुत्वानि द्विद्रोणस्तेषां गुरु-
त्वानां स्वाश्रयपरमाणुभिः परम्परयाऽऽरभ्यमाणत्वं संब-
न्धो धान्यादौ न च तावत्संख्यकाः परमाणवः परमाणुवृ-
त्तिस्तादृशी संख्या वा द्रोणपदार्थोऽस्तु धान्यादावुभयस्य
परम्परासंबन्धो भवतीति वाच्यं तावत्परमाणूनां पर-

माणुसंख्यायाश्च परम्परासंबन्धस्य तैजसावयवित्वेऽपि सम्भवात् तत्र द्रोणादिव्यवहारप्रसङ्गात् न च धान्यादौ तुलितत्वस्यैवाच्च व्यञ्जकस्याभावान्न द्रोणादिव्यवहार इति वाच्यम् । क्षेत्रादिपूरणस्य धान्यादाविवात्रापि व्यञ्जकस्य सम्भवात् तस्मात्तथाविधगुरुत्वानि द्रोणपदस्यार्थः यद्वशाद् द्रोणो ब्रीहिः द्रोणः पाषाण इत्युभयप्रतीतेरेकविषयत्वं तैर्गुरुत्वैर्दर्शितपरम्परया विशिष्टो निरूढलक्षणः यद्वशात् द्रोणमाषं भुङ्क्ते भीम इति प्रयोगः न च तैर्गुरुत्वैः संसृष्टेषु धान्येषु विशकलितेष्वपि द्रोणादिव्यवहारप्रसङ्ग इति वाच्यम् । व्यञ्जकाभावादप्रसङ्गाद् व्यञ्जकसत्वे त्विष्टत्वाद् अत एव द्रोणः काश्यां द्विद्रोणः प्रयागेऽयोध्यायां चेति पञ्चद्रोणो मम ब्रीहिरिति प्रतीतिव्यवहारौ एवं तृतीयार्थोऽन्यव्यवच्छेदः अन्यस्य द्विद्रोणाव्याप्यगुरुत्वत्वावच्छिन्नप्रतियोगितासंसर्गेण व्यवच्छेदेऽत्यन्तभावेऽन्वयः व्यवच्छेदस्य धान्येऽन्वयः एवकारस्थल इव व्यवच्छेदान्वयिनि धान्ये द्विद्रोणस्याप्यन्वयः तत्रान्यव्यवच्छेद इव संबन्धोऽपि तृतीयार्थः द्विद्रोणविशेषितस्य संबन्धस्य धान्येऽन्वयात् द्विद्रोणस्यान्वयबोध्य इति अतः पञ्चद्रोणेन क्रीयमाणे धान्ये द्विद्रोणेन धान्यं क्रीणातीति न प्रयोगः न वा द्रोणेन क्रीयमाणे द्विद्रोणेन क्रीणातीति प्रयोगः क्रीणातेस्तु फलतया प्रतिग्रहः व्यापारतया दानं चार्थः विक्रीणातेरपि फलव्यापारयोर्वैपरीत्येन तदुभयमर्थः प्रतिग्रहः स्वत्वेच्छा दानं स्वत्वस्वत्वनाशोभयेच्छा फलस्य स्वत्वेच्छायाः प्रयोज्यतया दाने फलस्य दानस्य प्रयोजकतया संबन्धेन

स्वत्वेच्छायामन्वयः अत एव भाविधान्यादिग्रहणार्थं-धनं प्रयुञ्जाने द्विद्रोणेन त्रिद्रोणेन वा धान्यं क्रीणात्यर्थमिति प्रयोगः भाविनि स्वत्वानुपगमेऽपि स्वत्वेच्छायाः सम्भवात् एवं मूल्यस्यागिमकाललभ्यत्वव्यवस्थायां निष्क-शतेनाश्वं क्रीणीत इति प्रयोगः क्रये धान्यादेः कर्मणः स्वत्वप्रकारतानिरूपितविशेष्यतया स्वत्वविषयतानिरू-पिताधारत्वसंसर्गावच्छिन्नविषयतया वा संबन्धेनाव-च्छिन्नाधेयत्वे द्वितीयार्थेऽन्वयः विक्रये तु स्वत्वनाशीय-विषयताघटितान्यतरसंबन्धावच्छिन्नमाधेयत्वं द्वितीया-र्थः शतेन क्रीणातीत्यत्र स्वत्वं व्यापारः करणतृतीया-र्थः स्वत्वस्य जन्यत्वेन संबन्धेन स्वत्वनाशेच्छायां दा-नेऽन्वयः स्वत्वे सत्येव त्यागो भवति न हि परकीये त्याग इति स्वत्वजन्यत्वं दाने स्फुटमिति शतेन विक्रीणीत-इत्यत्र स्वत्वनाशस्तृतीयार्थस्तस्य जन्यतया स्वत्वेच्छाया-मन्वयः स्वत्वोपहितेच्छायां स्वत्वनाशस्य हेतुत्वात्पर-कीयधने तादृशेच्छाविरहादिति स्वत्वनाशः स्वत्वेच्छा-जनक इति एवं द्विद्रोणेन धान्यं स्वर्णं माषेण क्रीणा-त्यर्थमित्यत्र द्विद्रोणान्यद्विद्रोणव्याप्यगुरुत्वाभाववद्द्वि-द्रोणधान्यवृत्तिस्वत्वेच्छाप्रयोज्यायाः सुवर्णमाषस्वत्व-जन्यायाः स्वत्वस्वत्वनाशोभयविषयकेच्छाया आश्र-योऽयमिति शाब्दबोधः। अकर्तुर्यस्य स्वत्वनाशः ततः प-ञ्चमी ध्रुवमपाय इति सूत्रेणेति वक्ष्यते। वैपणिकान्मौ-क्तिकं क्रीणातीत्यत्र स्वत्वनाशः पञ्चम्यर्थस्तस्य जनकतया फले स्वत्वेच्छायामन्वयः फलेऽप्यपादानत्वान्वय इत्यादि-कं वक्ष्यते। एवं विक्रयकर्मणः स्वामित्वं यत्र तत्र सप्तमी

मौक्तिकं विक्रीणीते राज्ञि नागरिके वेत्यादौ "सप्तम्यधिकरणे चे"ति सूत्रेणेत्यादिकं वक्ष्यते द्रोणपरिच्छित्तिमुक्तासंख्यापरिच्छित्तिः काशिकाद्यत्तावुदाहृता पञ्चकेन पशून् क्रीणाति साहस्रेण पशून् क्रीणातीत्यादि पञ्चकंपञ्चत्वसंख्या साहस्रं सहस्रत्वसंख्या अत्रापि अन्यव्यवच्छेदः संबन्धश्च तृतीयार्थः पञ्चत्वस्य सहस्रत्वस्य वा व्याप्यसंख्यात्वेनावच्छिन्नया प्रतियोगितया व्यवच्छेदेनान्वयः व्यवच्छेदस्य पञ्चत्वादिसंबन्धस्य च पशुष्वन्वयस्तेन षट्केन त्रिकेन वा क्रीयमाणेषु पशुषु पञ्चकेन पशून् क्रीणातीति न प्रयोगः क्व चित्क्रयकरणं तृतीयार्थः यथा त्रिभिः पारावताः पञ्चेत्यादि अत्र व्यापारः क्रयस्तृतीयार्थः व्यापारस्य जन्यत्वेन क्रयस्य कर्मत्वेन संबन्धेन पारावतेष्वन्वयः । सहशब्दयोगेऽपि नानार्थिकांतृतीयां ज्ञापयति । "सह युक्तेऽप्रधाने" इति सूत्रं सहार्थेन युक्ते तृतीया भवति सहयोगेऽप्रधानेऽप्रधानक्रियाकारके प्रधानकारकसजातीये भवतीत्यर्थकं सहार्थः सामानाधिकरण्यं तच्च दैशिकेन कालिकेन दैशिककालिकोभयेन च संबन्धेन घटितत्वात् त्रिविधं वह्निना सह धूमो भस्म वेत्यत्र संयोगिसंयुक्तत्वं सहार्थः तृतीयायाः प्रतियोगित्वमर्थः आद्यसंयोगेऽन्वेति एवं वह्निप्रतियोगिताकसंयोगवत्संयुक्तो धूम इत्यन्वयबोधः । रूपेण सह रस इत्यत्र समवायिसमवेतत्वं सहार्थः तृतीयार्थस्य प्रतियोगित्वस्याद्यसमवायेऽन्वयः । द्रव्यत्वेन सह धूम इत्यत्र समवायिसंयुक्तत्वं सहार्थः प्रतियोगित्वस्य समवायेऽन्वयः वह्निना सह धूमसंयोग इत्यत्र संयोगि-

समवेतत्वं सहार्थः प्रतियोगित्वं संयोगेऽन्वेति । कालिकेन यथा जातौपुष्पेण सह नीपपुष्पमित्यत्र कालस्वरूपेण कालिकविशेषणतासंबन्धेनाधिकरणे तेन संबन्धेनाधेयत्वं सहार्थः कालिकविशेषणतयाऽन्वयिप्रतियोगित्वं तृतीयार्थः अथ वा काल एव सहार्थः कालिकाधिकरणत्वस्य तृतीयार्थस्य काले कालस्य कालिकाधेयतासंबन्धेन नीपपुष्पेऽन्वयः । दैशिककालिकोभयेन यथा पुत्र्या सह यजमान इत्यत्र संयोगसंयुक्तत्वं कालश्चोभयं सहार्थः प्रतियोगित्वं कालिकाधिकरणत्वं चोभयं तृतीयार्थः प्रतियोगित्वस्याद्यसंयोगेऽन्वयः कालिकाधिकरणत्वस्य काले कालस्य कालिकाधेयतया यजमानेऽन्वयः एवं भारमनुद्वहत्सु सह गच्छत्सु पुत्रेषु सहैव दशभिः पुत्रैर्भारं वहति गर्दभीत्यत्रापि दर्शितोभयं सहार्थः तृतीयार्थोऽपि प्रतियोगित्वकालिकाधिकरणत्वोभयमेव पूर्ववदन्वयो बोध्यः । सहयोगे कारिकायामुदाहरणानि । यथा पुत्रेण सह स्थूल इत्यत्र स्थूलत्वं तृतीयार्थः तत्र पुत्रस्याधेयतयाऽन्वयस्तृतीयार्थस्य स्थूलत्वस्य कालिकाधिकरणतया सहार्थे काले कालस्याधेयतया पदार्थैकदेशे स्थूलत्वेऽन्वयः एवं पुत्रस्थूलत्वसमानकालिकस्थूलत्ववान् पितेत्यन्वयबोधः पुत्रेण सह गोमान् पितेत्यत्र स्वामित्वं तृतीयार्थः तस्य निरूपकतासंबन्धावच्छिन्नसामानाधिकरण्ये सहार्थे प्रतियोगितयाऽन्वयः सहार्थस्य मतुबर्थैकदेशे गोविशेषिते स्वामित्वेऽन्वयः एवं पुत्रस्वामित्वसमानाधिकरणगोस्वामित्ववान् पितेत्यन्वयबोधः अप्रधानेऽश्रेष्ठे वस्तुभूते प्रकृत्यर्थे सतीत्यर्थः तेनाचार्येण स-

हेति न प्रमाणं प्रमाणं च शिष्येण सहाचार्यस्य गौः अत्र तृतीयार्थः स्वत्वं सहार्थः सामानाधिकरण्यं षष्ठ्यर्थः स्वत्वं तृतीयार्थस्य सहार्थे तस्य च षष्ठ्यर्थे तस्य गव्यन्वयः एवं शिष्यस्वत्वसमानाधिकरणाचार्यस्वत्ववती गौरित्यन्वयबोधः क्व चित्संबन्धमात्रं तृतीयार्थः यथा वज्रेण सहेन्द्र इत्यत्र संयोगः सहार्थः प्रतियोगित्वं तृतीयार्थः एवं वज्रप्रतियोगिताकसंयोगवानिन्द्र इत्यन्वयबोधः गन्धेन सह पृथिवीत्यत्र सहार्थः समवायः शेषं पूर्ववत् । एवं दक्षिणाभिः सहेत्यहमित्यत्र सहार्थः संबन्ध इति नापरामृष्टे यज्ञे दक्षिणाप्रतियोगिताकोऽन्वेति यज्ञस्यार्थं प्रयोक्तरि भगवति तादात्म्यान्वयः दक्षिणाया यज्ञे संबन्धस्तु विहितकालिकस्वविषयकत्यागप्रयोज्यप्रतिष्ठावत्वं प्रतिष्ठा तु फलजनकत्वमिति एवं मुद्रया सह कुण्डली देवदत्त इत्यत्र तृतीयार्थः संबन्धः स चात्र संयोगः सहार्थः समानकालिकत्वं तच्च काल एव तस्य इन्प्रत्ययार्थैकदेशे संबन्धेऽन्वयः इत्थं मुद्रासंयोगसमानकालिककुण्डलसंयोगवान् देवदत्त इत्यन्वयबोधः यदि च तिङर्थविशेषणधात्वर्थस्यैव तद्धितार्थविशेषणतदर्थतावच्छेदकसंबन्धादेः पुत्रेण सह स्थूलः पितेत्यादौ नामार्थतावच्छेदकस्य विशेषणस्य स्थूलत्वादेः सहार्थे विशेष्यतया विशेषणतया वाऽन्वयोऽभ्युपेयते तदा तृतीयायाः संबन्धान्वयि स्थूलत्वान्वयि चाधेयत्वमर्थः तृतीयान्तार्थविशेषितयोः संबन्धस्थूलत्वयोः सहार्थे विशेषणत्वमिति । ननु सहपदस्य तृतीयायाश्चार्थस्य पदार्थैकदेशेऽन्वयो न युज्यतेऽयुत्पत्तेः किं तु पुत्रेण सह स्थूलः

पिता, कन्यया सह रमणीयो वर इत्यत्र पदार्थयोः स्थूलरमणीययोस्तादात्म्येन पितृवरान्वयिनोः सहार्थे विशेषणतया विशेष्यतया वाऽन्वयः विशेषणत्वापन्नयोस्तयोस्तृतीयार्थोऽभेदोऽन्वेति एवं पुत्राभिन्नस्थूलसमानकालिकस्थूलः पितेति कन्याभिन्नरमणीयसमानकालिकरमणीयो वर इति चान्वयबोधो भवति स्थूलयो रमणीययोश्च समानकालिकत्वे भासमाने स्थूलत्वयो रमणीयत्वयोश्च समानकालिकत्वं भासते विशिष्टान्वयबोधसामग्रीबलादिति चेत् एवमन्वयोपगमेऽपि नाभिमतनिर्वाहः सहार्थविशेषणतावच्छेदकयोः स्थूलत्वरमणीयत्वयोः समानकालिकत्वभानायोगात् विशिष्टान्वयस्थले हि यद्धर्मविशिष्टे विशेषणस्यान्वयस्तत्र विशेष्येऽबाधेऽबाधेऽपि वा सति तद्धर्मविशेषणस्यान्वयो भवति यथा शिखी विनष्ट इत्यत्र विनष्टतादात्म्यं शिखायां यथा वा भूवादिर्धातुरित्यत्र तादात्म्यं सुब्यप्यन्वेति न तु विशेषणतावच्छेदके विशेष्यस्य क्वाप्यन्वयः व्युत्पत्तिविरहात् न च भास्तु विशेषणतावच्छेदके स्थूलत्वे समानकालिकत्वान्वय इति वाच्यम् । तथा सति कालान्तरेण स्थूलेऽपि पुत्रे तथाविधप्रयोगप्रसङ्गात् यदपि सहार्थतृतीयार्थयोरेकदेशान्वयो न व्युत्पन्न इति । तदपि न सुन्दरम् । एकदेशान्वयस्यावश्यकत्वात् तथा हि पुत्रेण सह गोमान् पितेत्यत्र पुत्राभिन्नगोमतः समानकालिकत्वं गोमति भासते चेत्तर्हि पुत्रस्य गवान्तरस्वामित्वेऽपि तथा प्रयोगप्रसङ्गः दर्शितान्वयस्य तावतापि सम्भवात् तस्मात्सहार्थविशेषणत्वापन्ने मतुवर्थतावच्छेदके स्वामित्वेऽन्वयिता

वच्छेदके गोस्वामित्वे चैकदेशे तृतीयार्थाधेयत्वस्यान्वयः । गोस्वामित्वे एकदेशे सहार्थस्य विशेषणतयाऽन्वयः सहार्थः निरूपकतासंबन्धघटितसामानाधिकरण्यं प्रतियोगित्वसंबन्धेन स्वामित्वस्य सामानाधिकरण्ये तस्य स्वरूपेण गोस्वामित्वेऽन्वयितावच्छेदके तद्विशिष्टस्य तादात्म्येन पितर्यन्वयः न चात्र भवत्वेकदेशान्वयस्तावता सर्वत्र न तत्सम्भवः पुत्रेण सह स्थूल इत्यत्र पुत्राभिन्नस्य स्थूलत्वविशिष्टस्य समानकालिकत्वे विशेणतयाऽन्वयात् स्थूलत्वस्या[illegible]न्वयः विशेषणान्वये सत्येव विशिष्टान्वयस्य भावादित्येतावता सामञ्जस्यान्नात्रैकदेशान्वय इति वाच्यं यत्र हि स्थूलत्वोपलक्षितः स्थूलपदेन प्रतिपादितस्तत्र विशिष्टान्वयबलादपि न स्थूलत्वसमानकालिकत्वलाभ इत्येकदेशान्वय आवश्यक इति । एवं शिष्यैः सह जटावन्तो मुनयः, यज्ञदत्तगृहैः सह काकवन्तो देवदत्तगृहा इत्यादावेकदेशान्वयं विना नाभिमतनिर्वाह इति एवं सह दिवसनिशाभ्यां दीर्घाः श्वासदण्डा इत्यत्र दीर्घत्वं कालिकं दैशिकं च बहुतरकालसंबन्धः कालिकं यद्वशाद्दीर्घमायुरिति प्रयोगः बहुतरदेशसंबन्धो दैशिकं यद्वशाद् दीर्घः पन्था इति प्रयोगः दीर्घत्वं स्वजातीयापेक्षया बोध्यं दिवसो ग्रीष्मे दीर्घः निशा हेमन्ते दीर्घा विरहिश्वासो बहुतरवायुमण्डलगामितया दीर्घः एवं दीर्घपदोपस्थापितयोः दीर्घत्वयोः कालिके तृतीयार्थाधेयत्वस्य दैशिके विशेष्यतया श्वासस्यान्वयो योग्यताबलात्सहार्थः एवं दिवसवृत्तेर्वा बहुतरकालसंबन्धस्य समानकालिको यो बहुतरदेशसंबन्धस्तद्व-

तः श्वासैर्दण्डा इत्यन्वयबोधः । अत्र दण्डस्य घटिकाया दिवसदीर्घत्वसमानकालिकं दीर्घत्वं विरुद्धमिति दण्डस्य चतुर्हस्तदेशसंबन्धवतः दिवसघटकक्षणसमसंख्यकपरमाणुसंबन्धरूपं दीर्घत्वं विरुद्धमिति विरोधालङ्कारः । एकानुपूर्वीकशब्दप्रतिपाद्ययोर्भिन्नयोरर्थयोरपि सहार्थे विशेषणतया विशेष्यतया चान्वयः । यथा

दोषायोगमहस्थितिस्फुटरसश्रीकायहृद्यः समं ।
चन्द्रेणैष नृपो बुधोदयगुरुप्रीतः कविः प्रीतिमान् ॥
पुत्रोऽस्यापि समं बुधेन सततं मित्रान्तिकासादनः ।
प्रीतः प्राप्तकराङ्गतोदयगुणोऽत्युच्चः श्रितः सौम्यताम्॥

अत्र रात्रियोगेन या तेजःस्थितिस्तच्च स्फुटरसा या श्रीः तद्वता कायेन हृद्यत्वमेकं दोषराहित्येनोत्सवस्थित्या च स्फुटा रसा पृथिवी यत्रेदृशलक्ष्मीको योऽयः शुभावहो विधिस्तेन हृद्यत्वमपरमेवं दलान्तरे ऽप्यर्थद्वयं बोध्यमिति । दर्शितयोर्हृद्यत्वयोः सहार्थे समानकालिकत्वे विशेषणविशेष्यभावेनान्वयः तत्र विशेषणे हृद्यत्वे तृतीयान्तार्थस्य चन्द्राधेयत्वस्यान्वयः विशेष्यहृद्यत्वस्य विशेषणतया नृपेऽन्वय इति पुत्रेण सहागत आगच्छति वेत्यादौ कर्तृत्वं कारकं क्तप्रत्ययार्थतावच्छेदकमाख्यातस्य वा शक्यं तृतीया ऽभिधत्ते धात्वर्थे आगमनं कालिकत्वे विशेषणतया विशेष्यतया चान्वेति विशेषणे धात्वर्थे तृतीयार्थकारकस्यान्वयः विशेष्यधात्वर्थस्य कृदर्थैकदेशे तिङर्थे वा कर्तृत्वे विशेषणतयाऽन्वयः । एवं पुत्रकर्तृताकागमनसमानकालिकातीतागमनकृतिमदभिन्नः तथाविधविद्यमानागमनकृतिमान्वा पितेत्यन्वयबोधः

प्रधानेऽतीतत्वान्वितेऽतीताया विद्यमानत्वान्विते विद्यमानाया गुणक्रियायाः समानकालिकत्वं भासत इति न काऽप्यनुपपत्तिः । प्रधानक्रियाकारकसजातीयं कारकं तृतीयार्थः कर्तृत्वादिकं तत्र कर्तृत्वमुदाहृतमन्यदुदाह्रियते कर्मत्वं यथा हिरण्येन सह गां लभते इत्यत्र लभतेः स्वत्वं व्यापारश्चार्थः द्वितीयातृतीययोराधेयत्वं कर्मत्वमर्थः सहार्थः समानकालिकत्वमेवं हिरण्यवृत्तिस्वत्वानुकूलव्यापारसमकालिकगोवृत्तिस्वत्वानुकूलव्यापाराश्रयत्वं वाक्यार्थः । करणत्वं यथा तृणेन सह काष्ठेन पचतीत्यत्र तृतीययोः करणत्वमर्थः तथा च तृणकरणताकपाकसमकालिककाष्ठकरणताकपाककृतिर्वाक्यार्थः । ऋत्विग्भिः सह गुरवे ददातीत्यत्र चतुर्थीतृतीययोः संप्रदानत्वमर्थः तथा च ऋत्विक्संप्रदानताकदानसमकालिकगुरुसंप्रदानताकदानाश्रयत्वं वाक्यार्थः । कोटरेण सह तरोः पततीत्यत्र कोटरापादानताकपतनसमकालिकतर्वपादानताकपतनकृतिर्वाक्यार्थः । सपत्नीभिः सह कान्तस्य लसतीत्यत्र सपत्नीसंबन्धिलाससमकालिककान्तसंबन्धिचासाश्रयत्वं वाक्यार्थः । पीठेन सह गृहे आस्ते इत्यत्र पीठाधिकरणताकासनसमकालिकगृहाधिकरणताकासनाश्रयत्वं वाक्यार्थः । सहार्थविशेषणविशेष्ययोः धात्वर्थयोरुभयोस्तृतीयाभिन्नविभक्त्यन्तार्थः सर्वोऽन्वेति तृतीयान्तार्थो विशेषणे तेन पुत्रस्य ग्रामगमने पितुर्नगरगमने पुत्रेण सह नगरं गच्छति पितेति न प्रयोगः । यत्र कर्मत्वादिकारकस्य तृतीयार्थस्य गुणक्रियायामन्वयो न कर्तृत्वस्य तत्र प्रधानक्रियाकर्तुरेव

कर्तृत्वमवसीयते गुणक्रियाकारकानभिधाने प्रधानकारकस्य प्रत्ययाभिहितस्य गुणक्रियायामन्वयात् । तदुक्तम् ।

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् ।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ॥
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।
गुणे यदा तदा तद्वदनुक्ताऽपि प्रतीयते ॥

इति हिरण्येन सह गां लभत इत्यादौ गोलब्धृकर्तृकत्वं हिरण्यलाभे प्रतीयते अतो न चैत्रेण हिरण्ये मैत्रेण गवि लभ्यमानायां हिरण्येन सह गां लभते मैत्र इति प्रयोगः अत एव समानकर्तृकत्वादिकं सहार्थ इति निरस्तम् । दर्शितरीत्याऽतिप्रसङ्गनिरासात् समानकर्तृकत्वादौ च शक्त्यन्तरकल्पनाया अन्याय्यत्वाच्च पत्न्या सह यजत इत्यत्र पतिपदस्याध्याहारे पत्नीसाहित्यं पत्युर्विशेषणं यदि च नाध्याहारस्तदाऽपि साहित्यद्वारकं कर्तृत्वं पत्न्या मन्तव्यं पत्नीसाहित्यस्य शौचवदधिकारत्वात् यत्कर्त्तव्यं तदनया सहेत्यभिधानात् । अत्रापि पत्येत्यध्याहारः । यदि च नाध्याहारस्तदाऽपि कर्तव्यत्वे कृतिविषयत्वे धात्वर्थकृतौ साहित्यद्वारकं कर्तृत्वं पत्न्या इति एवमन्वयबोधोपपादनेऽपि पत्येत्यध्याहारं विना मुख्यकर्तव्यताकाङ्क्षाया अनिवृत्तिः । भाट्टानां मते कर्तृत्वादिकमखण्डमतिरिक्तमिति पत्न्या अपि कर्तृत्वं निराबाधमिति । के चित्तु पुत्रेण सहागत आगच्छति चैत्रादौ आगमनसमानकालिकागमनेन कर्तृतासंबन्धेन विशिष्टस्तथाविधागमनं च सहशब्दस्यार्थः विशिष्टस्य तादात्म्येन तथाविधागमनस्य कर्तृतया संब-

न्येन प्रथमान्तार्थे पितर्यन्वयस्तत्रैवागतशब्दार्थस्यागमन-कर्तुरभेदेनागच्छतीति तिङन्तार्थ आगमनकर्तृत्वस्य यथा योगमन्वयः । न चैवं सहशब्दार्थान्वयादेवागमनलाभे आगत आगच्छतीतिशब्दप्रयोगो व्यर्थ इति वाच्यम् । तत्तत्प्रत्ययान्तधातुसमभिव्याहारेणैव सहशब्दस्य क्रियातद्विशिष्टोपस्थापकत्वात् । एवं तृतीयार्थः कर्तृत्वं समानकालित्वविशेषणीभूतधात्वर्थे सहार्थैकदेशेऽन्वेति सहशब्दस्य निपातत्वात्तदर्थस्य भेदान्वयो नामार्थेऽपि न विरुद्धः न च यशसा सह मूर्च्छतीह शत्रुरित्यत्र तिङन्तेन मोहकर्तृत्वस्योपस्थापनात् सहशब्देन मोहसमानकालिकमोहाभिधाने मोहे यशःकर्तृकत्वबाधादन्वयानुपपत्तिरिति वाच्यम् । तिङर्थान्वितमोहोपस्थितावपि मूर्च्छतियोगे सहशब्दो हि पुत्रैः सह मूर्च्छति शत्रुरित्यत्र मोहसमानकालिकमोहः यशसा सह मूर्च्छति श्रीरित्यत्र वृद्धिसमानकालिकवृद्धिः रिपुणा सह मूर्च्छति यश इत्यत्र मोहसमानकालिकवृद्धिः प्रकृते वृद्धिसमानकालिकमोह एते सहार्थास्तथा च सहार्थैकदेशे वृद्धौ यशःकर्तृकत्वस्याबाधनात् नान्वयानुपपत्तिरिति वदन्ति । तन्न विचारसहम् । सहशब्दस्य समानकालिकत्वशक्त्यैव निर्वाहे धातुभेदेन तदर्थभेदेन तत्तत्प्रत्ययभेदेनानन्तशक्तिकल्पनाया अन्याय्यत्वात् यच्च धातोर्नानार्थस्तत्र समानकालिकत्वे विशेषणतया विशेष्यतया चान्वये योग्यता तन्नमिति वक्ष्यते । यत्र च न नानार्थः शब्दः तृतीयाभिन्नप्रकृतिस्तत्र तृतीयार्थभिन्नकारकान्विता नामार्थव्यक्तिरेवैव कारकद्वारा क्रियान्वयिनी तेन पितरि नन्दिग्रामं ग-

च्छति ग्रामान्तरं च पुत्रे पुत्रेण सह ग्रामं गच्छतीति न प्रयोगः अत एव पुत्रेण सह गां लभत इत्यत्र एकस्यामेव गवि पितुः पुत्रस्य च स्वत्वं प्रतीयते एवं हिरण्येन सह गां पुत्रेण सह लभते पितेत्यत्र सहार्थद्वयस्यार्थबोधः तत्र हिरण्यकर्मकलाभसमानकालिकगोकर्मकलाभः द्वितीयसहार्थे विशेषणतया विशेष्यतया वाऽन्वेति तत्र पुत्रकर्तृकत्वं हिरण्यलाभे प्रथमसहार्थस्य विशेषणे विशेष्ये गोलाभे चाऽन्वेति द्वितीयसहार्थस्य विशेष्ये गोलाभे विशेष्यतावच्छेदकांशे हिरण्यलाभे च पितृकर्तृताकत्वमन्वेति व्युत्पत्तिवैचित्र्यात् । ननु हिरण्येन सहेत्यत्र सहार्थकर्मत्वं तदन्वयिनिरूपितत्वं तृतीयार्थः पुत्रेण सहेत्यत्र सहार्थः कर्तृत्वं तदाधेयत्वं तदन्वयिनिरूपितत्वमेव तृतीयार्थः सूत्रेणापि कर्मत्वकर्तृत्वादियोगे तृतीयाऽनुशिष्यते अप्रधाने इति प्रकृत्यर्थस्य तथात्वं सूचयति एवं लाभे हिरण्यकर्मत्वगोकर्मत्वपुत्रकर्तृत्वानामन्वयः तथा च पुत्रकर्तृताकहिरण्यकर्मताकगोकर्मताकलाभकर्ता पितेति शाब्दबोधः एतावता सर्वसामञ्जस्ये सहस्य समान कालिकत्वादौ शक्तिर्न कल्प्यते मानाभावात् न वा धात्वर्थस्य सहार्थे विशेषणतया विशेष्यतया चान्वयः व्युत्पत्त्यन्तरकल्पनागौरवादिति चेन्न सहस्य कर्मत्वादिशक्तिकल्पनायां क्षुत्रेण सहोपानहौ दधातीत्यत्रैकस्यां धारणक्रियायामुपानच्छत्रयोः कर्मत्वासम्भवेनानन्वयापत्तेः पुत्रेण सहागच्छतीत्यत्र पितापुत्रकर्तृत्वयोरेकत्वासम्भवेनानन्वयाच्चेश्च तस्मात्सहस्य समानकालिकत्वशक्तेः क्लृप्ततया व्युत्पत्त्यन्तरकल्पनं न न्याय्यं न च क्व समान-

कालिकत्वे शक्तिः क्लृप्तेति वाच्यम् । गर्जितेन सह वृष्टिः श्यामाकमञ्जरीभिः सह कङ्गुमञ्जरीत्यत्र सहस्य समानकालिकत्वार्थत्वं विनाऽन्वयस्य दुरुपपादत्वादिति एवं यत्र भिन्नकर्तृकयोः क्रिययोरेकव्यक्तिकर्मकत्वं न सम्भवति योग्यताविरहात् तत्रैकरूपेण नानाव्यक्तीनां कर्मत्वं यथा पुत्रेण सहौदनं भुङ्क्ते इत्यत्र पुत्रकर्तृकपितृकर्तृकयोर्भोजनयोरेकौदनव्यक्तिकर्मकत्वं न सम्भवति ओदनत्वेन नानौदनानामेव तत्र कर्मत्वमिति भिन्नरूपेण नानारूपकर्मत्वसंभवेऽपि पृथुकं पुत्रे ओदनं पितरि भुञ्जाने पुत्रेण सह पृथुकमोदनं तदुभयं वा भुङ्क्ते इति न प्रयोगः इत्येकरूपेणेत्युक्तम् । एवं पुत्रेण सह भुङ्क्ते इत्यत्र सहार्थः समानकालिकत्वं सामानाधिकरण्यस्वरूपं समानदेशत्वं चोभयस्मिन्नेव सहार्थे भोजनस्य विशेषणतया विशेष्यतया चान्वयः विशेषणे भोजने पुत्रकर्तृकस्यान्वयस्तेन विभिन्ने काले देशे च कालान्तरेणैकगृहे एककाले गृहान्तरे च भोक्तरि पुत्रे पितरि वा न तथा प्रयोगः । एवं पतितैः सह न भुञ्जीतेत्यत्र यद्येककालावच्छेदेनैकगृहे पतितापतितयोर्भोजने पतितभोजनमपतितं न दूषयति तदैकपाङ्क्त्यधिकरणकत्वस्वरूपं समानदेशत्वं प्रकृते बोध्यमिति पङ्क्तिस्तु परत्वविशेषापरत्वविशेषनिरूपकसजातीयाधिकरणं देशः संयोगघटितः परम्परया घटकेन स्वल्पेन स्वल्पतमेन संयोगेनाभिव्यङ्ग्यपरत्वविशेषोऽपरत्वविशेषः यदि च पुरुषाकृतिकाष्ठनिवेशेऽपि पङ्क्तिव्यवहारस्तदा साजात्यं समानाकारतया बोध्यमिति एवं पुत्रेण

सह पचतीत्यत्रापि समानदेशत्वं समानकालिकत्वं च सहार्थत्वेन देशकालयोर्वैषम्ये न तथाप्रयोगः । सूपेन सहौदनं पुत्रेण सह पचति पितेत्यत्र द्वेधा सहार्थान्वयस्तेन पुत्रकर्तृकसूपकर्मताकपाकसमानदेशकालिकौदनकर्मताकपाकसमानदेशकालिकसूपकर्मताकपाकसमानदेशकालिकौदनकर्मताकपाककृतिमान् पितेत्यन्वयबोधः । ननु "प्रासोष्ट शत्रुघ्नसुदारचेष्टमेका सुमित्रा सहलक्ष्मणेने"त्यत्र लक्ष्मणप्रसवसमानकालिकत्वं शत्रुघ्नप्रसवे बाधितमिति कथं सहार्थान्वयः न चाच स्थूलकालप्रथमजातो लक्ष्मणादिरेव ग्राह्य इति न समानकालिकत्वान्वयानुपपत्तिरिति वाच्यम् । तथासति "प्रासोष्ट बीभत्समुदारचेष्टमेका पृथा वायुसुतेन साकमि"त्यादिप्रयोगप्रसङ्गात् । प्रथमजातभीमादिस्वरूपकालमादाय समानकालिकत्वान्वयसम्भवादिति चेत् प्रकारान्तरेणात्र समानकालिकत्वसम्भवस्तथा हि सूतिमारुतोऽत्र कालो बोध्यः एक एव सूतिमारुतोऽयमजप्रसवहेतुः सूतिमारुतस्य प्रसवप्रयोजकत्वमुक्तं याज्ञवल्क्येन ।

नवमे दशमे मासि प्रबलैः सूतिमारुतैः ।
निस्सार्य्यते बाण इव यल्लक्ष्यिद्रेण स ज्वरः ॥

इति न च बहुवचनेन भूयसां सूतिमारुतानां प्रसवप्रयोजकत्वमुक्तं कथमेकसूतिमारुतः कालत्वेनोपादीयत इति वाच्यम् । एककालवर्त्तितया हि मारुतानामेकत्वमिष्यते य एव सूतिमारुता लक्ष्मणप्रसवे त एव शत्रुघ्नप्रसवे प्रयोजका न तु भिन्नाः कल्पनागौरवात् लक्ष्मणनिगमकाले लक्ष्मणस्य प्रतिबन्धकतया न शत्रुघ्न-

निर्गमः यथा एकेन पुरुषव्यापारेण कमलपत्राणां सूचिभेदने प्रथमपत्रभेदनकाले न द्वितीयपत्रभेदनं प्रथमपत्रस्य प्रतिबन्धकत्वादिति जरायुजशरीरस्य शरीरान्तरेऽन्तरवयवावच्छेदेन यः संयोगस्तत्प्रतिद्वन्द्वी विभागो व्यापारश्च षूङोऽर्थः प्रतिद्वन्द्वित्वं तु नाशकतावच्छेदकवैजात्यं सूतिमारुतसंयोगजक्रियाविशेषजन्यतावच्छेदकतया सिद्धं तद्वैजात्यवान् विभागः फलविधयाऽर्थस्तेन जरायुजशरीरस्य धातुनाऽनभिधानात्षूङो न सकर्मकत्वहानिः वैजात्यपरिचयार्थं जरायुजशरीरादिकथनं तेन व्याधिवशाद्भेदकादिप्रसवे प्रसूत इति प्रयोगवारणाय जरायुजशरीरोपादानं बालस्य क्रोडात् क्रोडान्तरगमने प्रसूत इति प्रयोगवारणाय शरीरेऽन्तरवयवावच्छेदेनेत्युक्तं तरुः फलानि सूते वसुधा भटान् सूते सहस्रपात् शनिं प्रासूतेत्यादौ षूङ उत्पत्तिस्तदनुकूलव्यापारश्चार्थ इति तदुपपत्तिः एवं प्रकृते लक्ष्मणवृत्तिविजातीयविभागानुकूलव्यापाराधिकरणसूतिमारुतकालिकस्यातीतस्य शत्रुघ्नवृत्तिविजातीयविभागानुकूलव्यापारस्याश्रयः सुमित्रेत्यन्वयबोधः । वैशम्पायनेन सह वेदं जैमिनिरधीत इत्यत्राधीङोऽर्थद्वयमुच्चारणं तदनुकूलश्रावणं चेत्येकोऽर्थः उच्चारणं तु वर्णोत्पत्त्यनुकूलतयोपलक्षितो विवृतादिः प्रयत्नः स तु विवृतत्वादिनैव धात्वर्थे निविशतेऽतो न सकर्मकत्वहानिः लिप्यादिना वर्णज्ञानादुच्चारणेऽधीत इति प्रयोगवारणाय श्रावणमुक्तं श्रावणस्य फलज्ञानविधया विवृतादिप्रयोजकत्वं वर्णस्य फलस्य साधनतया कण्ठताल्वादिसंयोगे तत्सा-

धनतया कण्ठादिक्रियायामिच्छा विहितादिप्रयत्नश्चेतीयं रीतिर्वर्णोत्पादे बोध्या अधीङो धातोरीप्सितार्थवशात्प्रयोगो यथा पञ्चाब्दिको ब्रह्मबटुर्वेदमधीत इत्यत्रानुपूर्वीविशेषविशिष्टो वर्णकलापो वेदः द्वितीयार्थः साध्यत्वाख्यं विषयत्वं साध्यत्वविषयत्वसंबन्धावच्छिन्नमाधेयत्वं वा विहितावन्वेति एवं वेदविषयताकस्य वेदाधेयस्य वा विहितादेरनुकूलश्रावणाश्रयः पञ्चाब्दिको ब्रह्मबटुरित्यन्वयबोधः । एवमुपाध्यायप्रतिवेशी बालो वा शुको वाऽधीत इति प्रयोगः सुपपादः । अर्थप्रतिपादकत्वेन ज्ञानं प्रतिपादकतासंबन्धेनार्थवत्तया ज्ञानं वा फलं तदनुकूलश्रावणं चेत्यपरोऽधीङोऽर्थः भवति हि विवरणवाक्यश्रवणानन्तरं विधियमाणवाक्ये विवरणार्थकत्वबुद्धिः सा शाब्दबोधः ज्ञानसामान्यं वा शाब्दबोधपक्षे इति शून्यवाक्ये पचति पाकं करोतीत्यादौ पचतीत्यत्र तिङः पचतिपदमर्थः धातुप्रयोगः साधुत्वार्थः प्रणयेदितिवत् विवरणवाक्यस्य पाककृतिरर्थः प्रतिपादकतासंसर्गेण पचतिपदेऽन्वेति यत्र चेतिसहितं वाक्यं पचतीति पाकं करोतीत्यर्थ इत्यादावित्युपस्थापितस्य पचतिपदस्य पाककृतेरित्युपस्थापितायास्तादात्म्येनान्वितेऽर्थपदार्थे प्रतिपाद्यतासंसर्गेणान्वयः एवमर्थं शब्दप्रतिपाद्यताग्रहकाले शब्देऽप्यर्थप्रतिपादकत्वं गृह्यते ज्ञानसामान्यपक्षे तु शाब्दानन्तरं प्रतिपादकत्वमानसस्यवान्नानुपपत्तिरिति । अर्थवत्तायाः शाब्दबोधस्यानुकूलत्वं च पदार्थस्मृतिद्वारा ज्ञानसामान्यस्यानुकूलत्वं स्मृतिशाब्दादिद्वारा श्रावणस्येति । एवं शास्त्रमधीत इत्यत्र

द्वितीयाया विशेष्यत्वं तत्संबन्धावच्छिन्नमाधेयत्वं वाऽर्थः शास्त्रदृत्यर्थत्वप्रकारकज्ञानानुकूलशाब्दाश्रयत्वं वाक्यार्थः वेदमधीते जैमिनिरित्यत्र द्विविधाध्ययनं धात्वर्थः वेदकर्मकाध्ययनाश्रयो जैमिनिरिति वाक्यार्थबोधः एवं द्विविधाध्ययने श्रावणान्वय्याख्यानसुपयोगः पञ्चम्यर्थं इति ज्ञापयति "आख्यातोपयोगे" इति सूत्रमित्यादिकं वक्ष्यते । व्यासाद्वेदमधीत इत्यत्र पञ्चम्यर्थो वाक्यं व्यासविशेषितं श्रावणेऽन्वेति सहाधीत इत्यत्र समानगुरुकत्वमपि सहार्थः तच्च सजातीयवाक्यविषयकत्वं साजात्यं च पुरुषप्रयोज्यतावच्छेदिकया कर्त्वादिव्याप्यजात्या बोध्यं तेन गुरुभेदेनैककाले एकवेदाध्ययने तथा न प्रयोगः एवं प्रदर्शितस्थले वैशम्पायनकर्तृताकस्य वेदविषयकविहितताद्यनुकूलस्य वेदविषयकार्थत्वप्रकारकज्ञानानुकूलस्य वा श्रावणस्य समानकालिकं विषयसजातीयवाक्यविषयकं च यद् वेदविषयकविहितताद्यनुकूलं वेदविषयकार्थत्वप्रकारकज्ञानानुकूलं वा श्रावणं तदाश्रयो जैमिनिरित्यन्वयबोधः । "आहारो हि मनुष्याणां जन्मना सह जायते" इत्यत्र कर्तृघटितं सामानाधिकरण्यं सहार्थः क्रिययोरन्वेति गर्भाशयविभागस्तदनुकूलव्यापारो वा जन्मशब्दार्थः पार्थिवद्रव्यप्रतियोगिककण्ठसंयोगस्तदनुकूलव्यापारो वाऽऽहारशब्दार्थः जन्माहारयोः कर्त्रोरेकशरीरवर्तित्वाद्भवतिक्रिययोः सामानाधिकरण्यं तथा च जन्मकर्तृताकोत्पत्तिसमानाधिकरणोत्पत्त्याश्रय आहार इत्यन्वयबोधः, जनिधातोरुत्पत्तिरर्थ इति न चात्र समानकालिकत्वं सहार्थ इति वाच्यम् । अनन्वया-

पत्तेः जन्मोत्पत्तेरनन्तरमेवाहारोत्पत्तेः सम्भवात् न चोत्तरकालिकत्वं सहार्थोऽस्त्विति वाच्यं तथासति पुत्रागमनोत्तरमागते पितरि पुत्रेण सहागत इति प्रयोगापत्तेः सामानाधिकरण्यस्य सहार्थत्वे तु यत्र क्रिययोः सामानाधिकरण्यं तत्र सहप्रयोग इष्ट एव एवं सहार्थे एकानुपूर्वीकतिङन्तप्रतिपाद्यो नानाविधो धात्वर्थो विशेषणतया विशेष्यतया चान्वेति विशेषणे तृतीयान्तार्थश्च यथा यशसा सह मूर्च्छतीह शत्रुरित्यत्र मोह उच्छ्रायस्य धातोरर्थः यशःकर्तृताकत्वसमुच्छ्राये तत् समानकालिकत्वे तन्मोहे स तिङर्थ आश्रयत्वे तच्छ्रयौ विशेषणतया ऽन्वेति योग्यतावलात् व्युत्पत्तिवैचित्र्याच्च । यशःकर्तृकसमुच्छ्रयसमानकालिकमोहाश्रयः शत्रुरित्यन्वयबोधः । नानाविधेऽपि धात्वर्थे एकानुपूर्वीकशब्दप्रतिपाद्यो नानाविधोऽर्थस्तृतीयाभिन्नविभक्त्यर्थेऽन्वेति तत्र योग्यतावशात् एकविधार्थान्वितो विभक्त्यर्थो विशेषणेऽपरविधार्थान्वितो विशेष्ये धात्वर्थेऽन्वेति व्युत्पत्तिवैचित्र्यात् यथा "कैरवं हृतवान् राजा भृङ्गेण सह सत्वरमि" त्यत्र धात्वर्थौ गमनं हननं च कैरवशब्दार्थः कुमुदं शत्रुश्च कुमुदकर्मत्वं गमने शत्रुकर्मत्वं हननेऽन्वेति एवं भृङ्गकर्तृताककुमुदकर्मताकगमनसमानकालिकशत्रुकर्मताकहननाश्रयो राजेत्यन्वयबोधः । तथाविधनानाविधार्थान्वितस्तृतीयाभिन्नविभक्त्यर्थः एकविधार्थान्वितः सहार्थस्य विशेषणेऽपरविधार्थान्वितो विशेष्ये एकविधेऽपि धात्वर्थेऽन्वेति यथा "देवाधिनाथेन सह क्षितीशो भृशं धराप्रीतिमसौ विधत्ते" इत्यत्र धराप्रीतिशब्दार्थः पर्वताप्रीतिः

पृथिवीरतिश्च तदुभयकर्मत्वमेकविधे धात्वर्थे विधानेऽन्वेति तथा च देवाधिनाथकर्तृताकपर्वताप्रीतिकर्मताकविधानसमानकालिकपृथिवीरतिकर्मताकविधानानुकूलकृतिमान् क्षितौश इत्यन्वयबोधः । तथाविधनानार्थान्वितततथाविधविभक्त्यर्थस्यैकैकं सहार्थस्य विशेषणे विशेष्ये समानानुपूर्वीकतिङन्तनानाविधधातुप्रतिपाद्ये नानाविधेऽप्यन्वयः यथा "शिशुः पयो धास्यति सागरैस्सह" इत्यत्र धास्यतिपदेन धयत्यर्थस्य पानस्य दधात्यर्थस्य धारणस्य भावित्वस्य कृतेश्च स्मृतिर्जन्यते पयःपदेन क्षीरनीरयोर्द्वितीयया कर्मत्वस्य तृतीयया कर्तृत्वस्येति । सागरकर्तृत्वं नीरकर्मत्वं च धारणे क्षीरकर्मत्वं पाने योग्यतावलाद्व्युत्पत्तिवैचित्र्याच्चान्वेति एवं सागरकर्तृताकनीरकर्मताकधारणसमानकालिकक्षीरकर्मताकभाविपानानुकूलकृतिमान् शिशुरित्यन्वयबोधः सहार्थान्विते विशेषणे विशेष्ये वा धात्वर्थे एकत्र कर्मत्वाद्यन्वययोग्योपस्थापकपदस्य न तिङन्तेन सहाकाङ्क्षा अत एव पयःपदेन क्षीरमात्रोपस्थितौ न तथा शाब्दबोधः न वा "क्षीरं शिशुर्धास्यति सागरैः सह" इति प्रयोगः । ननु शिशुः क्षीरं धास्यति पयो वेत्यत्र धास्यतिपदेन सह द्वितीयान्तस्य क्षीरपदस्य क्षीरमात्रोपस्थापकपयःपदस्य वा आकाङ्क्षाया दृष्टत्वात्प्रकृते कुतो नाकाङ्क्षा न च प्रकृते तिङन्तेन धारणस्याप्युपस्थापनेन धारणे क्षीरकर्मत्वान्वययोग्यतायाः विरहात् पानेऽपि न क्षीरकर्मत्वान्वयाकाङ्क्षेति वाच्यं तावताऽप्यर्थभेदेऽप्यभिन्नायाः शब्दधर्मस्वरूपाकाङ्क्षायाः अवैकल्यात् योग्यताविरहस्य

वक्तुमुचितत्वात् नानार्थस्यैकत्र योग्यताविरहेऽप्यपरत्रान्वयस्य दर्शनाच्च यथा सैन्धवो नील इत्यादौ तत्कुतो न दर्शितप्रयोगः पाने चौरकर्मत्वान्वयसम्भवादिति चेत् मैवं नानार्थशब्दस्यापि हि नानाविधार्थतात्पर्यनानाविधार्थान्वययोग्यार्थकेनैव पदेन सहाकाङ्क्षा अत एव लवणाश्वतात्पर्ये सति सैन्धवौ नीलाविति न प्रयोगः नीलान्वयासम्भवात् न च लवणेऽयोग्यत्वान्न नीलान्वयः आकाङ्क्षा तु वर्तत एवेति वाच्यं तथा सत्यश्वे नीलान्वयबुद्धिप्रसङ्गात् तस्मात् तात्पर्यविषयीभूतधास्यतिपदार्थे स्वार्थान्वयबुध्यभावप्रयोजकाभावप्रतियोगित्वस्वरूपाकाङ्क्षा द्वितीयान्तचौरपदे नास्ति चौरमितिपदे सत्यप्यन्वयबुद्धेरभावात् न चैवमग्निना सिञ्चतीत्यत्राप्याकाङ्क्षाविरहान्न शाब्दबोध इति वाच्यम्। अग्निपदस्य द्रवद्रव्यपरतायामाकाङ्क्षासम्भवादर्थभेदेनाकाङ्क्षाभेदाभावात् वह्निपरतायामप्याकाङ्क्षासत्वात् तात्पर्यविषयत्वस्यापरपदार्थविशेषणत्वात् आकाङ्क्षाग्रहधर्मिपदस्यार्थे तद्विशेषणत्वाविवक्षणात् अग्निनेति पदस्य धर्मित्वे नाकाङ्क्षाविरहः किं तु योग्यताविरहः पाकलाक्षणिकसिञ्चतिपदस्य धर्मित्वेऽप्यग्नितात्पर्यकस्याग्निनेतिपदेन सहाकाङ्क्षा सम्भवत्येवेति। यच्च चौरमितिपदस्य चौरनीरयोरुभयोरुपस्थापकत्वं तत्रोभयार्थकस्य पय इति पदस्येवाकाङ्क्षाया अवैकल्यात् चौरकर्मत्वस्य पाने नीरकर्मत्वस्य धारणेऽन्वयबोधो भवत्येवेति। यत्र द्वितीयान्तपदं विनैव सागरैः सहशिशुर्धास्यतीति प्रयोगः तत्र कर्मत्वान्वयबो-

धं विनैव शाब्दबोधः पानधारणोभयकर्मत्वान्वयोग्यार्थ-
कस्य पय इत्यादिद्वितीयान्तपदस्य तद्घटिताकाङ्क्षा-
याश्च विरहान्न कर्मत्वान्वयबोध इति गुरुचरणदर्शिता
रीतिरिति । दर्शितेषु श्लेषस्यलीयसहोक्त्यलङ्कारेषु एका-
नुपूर्वीकशब्दप्रतिपाद्ययोरर्थयोस्सर्वत्र तादात्म्यं व्यञ्जन-
या प्रतीयते वैयञ्जनिकबोधे बाधो न विरोधो अत एव
"सकलकलं पुरमेतज्ज्ञातं संप्रति सुधांशुबिम्बमिवे"त्यत्र
कलकलसाहित्यकलासाकल्ययोरभेदाध्यवसाये साधार-
णधर्मोपपत्त्योपमाप्रतीतिः तथा च पानधारणयोस्तादा-
त्म्याध्यवसायैक्ये सहार्थविशेषणविशेष्ययोरेकजातीय-
क्रिययोः क्षीरनीरयोस्तादात्म्याध्यवसायादेकजातीय-
ककर्मत्वान्वयः सागरकर्तृत्वस्य विशेषणे विशेष्ये तिङ-
र्थकर्तुः तत्र शिशोरन्वय इति रसविद्याविदः । पयः-
पदवाच्ये लक्षणा पयःपदवाच्यं कर्मत्वं पानधारणयोर-
न्वेतीति व्यञ्जनाविदेषिणः । "पुमान् स्त्रिये"ति सूत्रस्थ
स्त्रिया सहोक्तौ पुमान् शिष्यत इति व्याख्याने उक्तौ कर्म-
णोऽनभिधानात् क्तद्योगप्रयुक्तकर्मत्वार्थकषष्ठ्यन्तं पुंस
इति पदमध्याहार्यमथ वा प्रधाने शिष्धात्वर्थे शक्तिम-
तः पुंसो गुणे वच्धात्वर्थे उक्तौ शक्तिरनुक्ताऽपि प्रतीयते
यथा आहूय ब्राह्मणाय ददातीत्यत्रानुक्तमपि ब्राह्मण-
कर्मत्वमाख्याने प्रतीयते । तदुक्तम् ।

प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।
गुणे यदा तदा तद्वदनुक्ताऽपि प्रतीयते ॥

इति तथा च अनुक्तमपि कर्मत्वं पदाध्याहारे प्रका-
रतया अपरथा पुंसोऽन्वये संसर्गतयोक्तौ भासत इति न

काऽप्यनुपपत्तिः । शाब्दिकास्तु सहपदं व्यङ्ग्यकमेव क्रिययोः समानकालिकत्वादिः संसर्गमर्यादयैव भासते "वृद्धो यूने"ति निर्देशात् अतः पुत्रेणागच्छतीति वाक्यं प्रमाणमिति वदन्ति । तन्न सुन्दरम् । "सहयुक्तेऽप्रधाने" इत्यत्र सहयुक्तपदस्य वैयर्थ्यापत्तेः सहशब्दस्य निरर्थकत्वे योगासम्भवात् न चात्र सहशब्दसमभिव्याहार एव योग इति वाच्यं सहार्थेन योगे इति काशिकोक्तेरनुपपत्तेः साकंसार्द्धंसमंशब्दैर्योगे तृतीयानुपपत्तेः वृद्धो यूनेत्यत्र "प्रकृत्यादिभ्य" इति वार्त्तिकेन सिद्धा तृतीया तस्याः समभिव्याहारोऽर्थस्तथा च पुत्रशब्दसमभिव्याहारवान् वृद्धशब्द एकविभक्तौ शिष्यत इति सूत्रवाक्यार्थम् इतिनिर्देशस्य निरर्थकसहशब्दनिष्ठव्यङ्ग्यकत्वाज्ञापकत्वाच्च । दर्शितातिरिक्तोऽपि क्व चित्सहार्थः यथा समवायेन सह घटत्वं प्रतियोगितामवच्छिनत्तीत्यत्र निरूप्यत्वमवच्छेदकता चावच्छिद्यो धातोरर्थः निरूप्यत्वं च ज्ञानजन्यज्ञानविषयत्वं तच्च ज्ञानमात्रं फलविधयाऽर्थो द्वितीयान्तार्थस्य प्रतियोगित्वाधेयत्वस्य विषयतासंबन्धावच्छिन्नस्य फले ज्ञाने तस्य स्वजन्यज्ञानविषयत्वेन संबन्धेनावच्छेदकत्वेऽन्वयः सहार्थः समाननिरूपकत्वं तत्रापि निरूपकमात्रं सहार्थः निरूपकं च ज्ञानजनकज्ञानविषयः तत्रापि ज्ञानं विषयस्य सहार्थः ज्ञानविषययोरेकपदार्थयोरपि परस्परमन्वयः आधेयत्वलक्षणकर्तृत्वार्थकतृतीयान्तार्थस्य समवायाधेयत्वस्य प्रतियोगिताकर्मकेधात्वर्थे तस्य स्वविषयकज्ञानजनकत्वेन संबन्धेन ज्ञानस्य विषयतया विषये तस्य स्वविषयकज्ञानजन्यज्ञान-

विषयत्वेन तथाविधे धात्वर्थे तस्य तिङर्थाश्रयत्वे तस्य घटत्वेऽन्वयः । एवं समवायवृत्तेः प्रतियोगितावृत्तिज्ञानज्ञाप्यावच्छेदकत्वस्य ज्ञापकज्ञानविषयो यस्तद्विषयकज्ञानज्ञाप्यायाः प्रतियोगितावृत्तिज्ञानज्ञाप्यावच्छेदकतायाः आश्रयो घटत्वमिति शाब्दबोधः । अभावनिरूपकः प्रतियोगितावच्छेदकविशिष्टः प्रतियोग्येव प्रतियोगित्वतदवच्छेदकत्वनिरूपकः स तु निरूपकत्वेन सहार्थे निविशते न तु तत्त्वेन इति न चात्रापि समानकालिकत्वं सहार्थस्तत्रैव प्रतियोगिताकर्मकावच्छेदकस्य विशेषणतया विशेष्यतया चान्वय इति वाच्यम् । तथासति पटत्वेन सह घटत्वमवच्छिनत्तीति प्रयोगप्रसङ्गात् पटघटाभावप्रतियोगितावच्छेदकतयोः समानकालिकत्वबाधात् । ननु यथा पुत्रेण सह ग्रामं गच्छतीत्यत्र पञ्चम्यन्तकर्मकस्यैव धात्वर्थस्य विशेष्यत्वे सह प्रयोगः साधुस्तथात्रापि समवायेन सहेत्यत्र प्रतियोगिताव्यक्तेरेकस्योभयकर्मत्वाङ्गीकारेणोपपत्तिः पटत्वेन सह घटत्वमित्यत्रैकप्रतियोगित्वव्यक्तेरुभयकर्मत्वासम्भवान्नोपपत्तिरिति चेत् न महानसीयत्वेन सह वह्नित्वमवच्छिनत्तीत्यत्रैकप्रतियोगित्वव्यक्तेरुभयकर्मत्वासम्भवादसाधुत्वप्रसङ्गात् अवच्छेदकधर्मभेदेन प्रतियोगिताभेदात् । एवं चक्षुःप्रतियोगिकत्वेन संयोगे चाक्षुषकारणतामवच्छिनत्तीत्यत्रापि समाननिरूपकत्वं सहार्थः न तु समानकालिकत्वं तथासत्यनुद्भूतरूपत्वेन सह संयोगत्वमवच्छिनत्तीति प्रयोगप्रसङ्गात् न चात्रैकव्यक्तिकर्मकत्वसम्भवः कर्मणः कारणताया अवच्छेदकधर्मभेदेन भेदादवच्छेदकतायाः

व्यासज्यवृत्तित्वस्यान्यत्र दूषितत्वादिति कारणतायां निरूपकावन्वयव्यतिरेकौ तदवच्छेदकत्वनिरूपकाविति बोध्यम् । क्व चिद्भेदोऽपि सहार्थः यथा पटेन सह घटं साक्षात्करोतीत्यत्र तृतीयाद्वितीययोः कर्मत्वमर्थः तच्चाधेयत्वं सहार्थस्याभेदस्य विशेषणे तृतीयार्थविशेषे धात्वर्थे द्वितीयार्थोऽन्वेति । एवं घटवृत्तिलौकिकविषयताकसाक्षात्काराभिन्नघटवृत्तिलौकिकविषयताकसाक्षात्काराश्रयत्वं वाक्यार्थः न चात्र समानकालिकत्वं सहार्थः तथासत्यव्यवहितज्ञानभेदेन तथाप्रयोगप्रसङ्गात् न चेष्टापत्तिः तथासति रूपेण सह गन्धं साक्षात्करोतीति प्रयोगप्रसङ्गादिति । जात्या सह व्यक्तिं घटत्वेन सह घटं वा जानातीत्यत्र सामग्रीघटकसामग्रीकत्वं सहार्थः जातिवृत्तिविषयताकज्ञानसामग्रीघटकव्यक्तिवृत्तिविषयताकज्ञानाश्रयत्वं घटत्ववृत्तिविषयताकज्ञानसामग्रीकघटवृत्तिविषयताकज्ञानाश्रयत्वं च वाक्यार्थः न चात्र समानकालिकत्वमभेदो वा सहार्थस्तथासति जात्या सहाभावं घटत्वेन सहे पटं वा जानातीतिप्रयोगप्रसङ्गात् जात्यभावयोर्घटपटयोश्च समूहालम्बनसम्भवात् प्रत्यक्षे व्यक्तीन्द्रियसन्निकर्षो जातीन्द्रियसन्निकर्षघटकः अनुमितौ व्यापकताया ज्ञानं तदवच्छेदकत्वज्ञानघटकं शाब्दबोधे पदार्थस्योपस्थितिस्तदवच्छेदकोपस्थितिघटिकाप्रयोजिकेति घटकत्वं व्यापकत्वमिति प्रमायामीदृशसामग्री सम्भवति न तु भ्रमे अत एव भ्रमस्थले घटत्वेन सह पटं जानातीति सहपदघटितो न प्रयोगः किं तु सहपदशून्य एवेति । जात्या सह व्यक्तिं भासते इत्यत्र भासते-

विषयत्वमर्थः तिङ आश्रयत्वमर्थः इच्छायां भासते सुख-मित्यत्र सप्तम्यर्थस्याधेयत्वस्य यथाऽन्वयः तथा सप्तमीविव-रणे वक्ष्यते एवं चात्र सहार्थः प्रतियोगिसामग्रीघटक-सामग्रीकप्रतियोगित्वं न तु समानकालिकत्वं तथासति-ज्ञानभेदेनेच्छाज्ञानाभ्यां वा जातिव्यक्त्योरवभासे तथा-प्रयोगप्रसङ्गात् तृतीयायाः कर्तृत्वलक्षणमाधेयत्वमर्थः तथा च जातिवृत्तिविषयत्वप्रतियोगिसामग्रीकप्रतियो-गिकविषयत्वाश्रयो व्यक्तिरित्यन्वयबोधः । जातिव्यक्ति-विषयत्वयोः प्रतियोगिज्ञानमिच्छा वा तत्र जातिविषय-त्वप्रतियोगिकज्ञानसामग्रीघटकत्वं व्यक्तिविषयत्वप्रति-योगिज्ञानसामग्र्या दर्शितमेव इच्छाविषयताया ज्ञान-विषयत्वाधीनत्वात् जातिविषयकेच्छासामग्र्या व्यक्ति-विषयकेच्छासामग्रीघटितत्वमप्युपपन्नमेव न चात्राभि-न्नप्रतियोगिकत्वं सहार्थो लाघवादिति वाच्यं तथासति जातिव्यक्त्योः समूहालम्बने तथाप्रयोगप्रसङ्गादिति जा-त्या सह व्यक्तिमवगाहते बुद्धिरित्यत्रावगाहतेर्विषयताफ-लकप्रतियोगित्वव्यापारोऽर्थः तृतीयाद्वितीययोः कर्मत्व-लक्षणमाधेयत्वमर्थः तिङ आश्रयत्वमर्थः प्रयोजकसा-मग्रीघटकसामग्रीप्रयोज्यत्वं सहार्थः प्रधानक्रियाक-र्त्र्या बुद्ध्यैर्गुणक्रियायामपि कर्तृत्वेनान्वयः एवं बुद्धिक-र्तृकजातिवृत्तिविषयताप्रतियोगित्वप्रयोजकसामग्रीघट-कसामग्रीप्रयोज्यस्य व्यक्तिवृत्तिविषयताप्रतियोगित्वस्या-श्रयो बुद्धिरित्यन्वयबोधः । जातिविषयकज्ञानसामग्र्येव जातिविषयत्वप्रतियोगित्वप्रयोजिका एवं व्यक्तिविषय-कज्ञानसामग्र्येव व्यक्तिविषयत्वप्रतियोगित्वप्रयोजिके-

ति तयोश्च घटितघटकभावो दर्शित एवेति शैवालेन सह जलेन संयुज्यत बकः वामतटेन सह दक्षिणतटेन संयुज्यते नदीत्यादौ तृतीययोर्जन्यत्वलक्षणं हेतुत्वमर्थः न तु प्रतियोगित्वमर्थो बाधात् न वाऽऽधेयत्वं साक्षात्संसर्गावच्छिन्नाधेयत्वस्य धात्वर्थान्वयाव्युत्पत्तेः एकक्रियाप्रयोज्यत्वं सहार्थः एवं शैवालजन्यसंयोगप्रयोजकक्रियाप्रयोज्यजलजन्यसंयोगाश्रयो बक इति शाब्दबोधः । न चात्र समानकालिकत्वं सहार्थः तथासति वायुना सह शैवालेन सह संयुज्यते बक इति प्रयोगप्रसङ्गात् सहार्थे प्रयोज्यत्वप्रवेशात् शाखया सह वृक्षेण संयुज्यते कपिरित्यत्राप्युपपत्तिः । एवमन्यादृशोऽपि सहार्थः सुधीभिरूह्यः । इत्थं च "सहयुक्तेऽप्रधाने" इति सूत्रस्य सहार्थयोगे प्रधानक्रियान्वयिविभक्त्यर्थसजातीये गुणक्रियान्वयिन्यर्थे तृतीया भवतीत्यर्थः सहशब्दतुल्यार्थाः साकंसार्धंसमंशब्दा बोध्याः । अङ्गविकारार्थिकां तृतीयां ज्ञापयति । "येनाङ्गविकार" इति सूत्रम् । अस्यार्थः काशिकावृत्तौ अङ्गशब्दो अङ्गसमुदायिनि शरीरे वर्तते येनेति तदवयवो हेतुत्वेन निर्दिश्यते येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीयाविभक्तिर्भवति इति लक्ष्यत्वं प्रयोज्यत्वे विकृतस्य प्रयोजकत्वं विशेष्ये बाधे विकारे विशेषणे पर्यवस्यति तथा चावयवस्य प्रकृत्या लाभात्तृतीयाया विकारोऽर्थः यथा अक्ष्णा काण इत्यत्र चाक्षुषप्रयोजकगोलकद्वयाभाववान् तथाविधगोलकवान् काणपदार्थः गोलकस्य स्वच्छिद्रद्वारा चक्षुषो निर्गमेण संनिकर्षसम्पादनेन चाक्षुषप्रयोजकत्वं चक्षुषो गोलकान्तर्वर्तित्वात् न तु

तस्य कृष्णतारकावर्तित्वं कृष्णतारकाचाक्षुषापत्तेः आलोकविरहान्न गोलकान्तश्चाक्षुषमिति एवं सति काणपदार्थैकदेशे तथाविधगोलकद्वयाभावे तृतीयार्थविकारस्य प्रयोज्यत्वेनान्वय अक्षिपदं गोलकपरं तथा च गोलकविकारप्रयोज्यतथाविधगोलकद्वयाभाववान् तथाविधगोलकवानित्यन्वयबोधः अङ्गविकार इति शब्दस्य प्रयोजनं तृतीयार्थविकारस्यावयविशरीरभिन्नेऽन्वयो नेति तेनाक्षि काणमस्येत्यत्र न तृतीया तदर्थान्वययोग्यस्य शरीरस्य शब्देनालाभात् ननु तथाप्यक्ष्णा चैत्र इति प्रयोगः स्यात् चैत्रपदेन शरीरोपस्थापनात् न च चैत्रे तत्त्वे वा तृतीयार्थविकारस्य प्रयोज्यत्वान्वयासम्भवात् न तथाप्रयोग इति वाच्यम् । तथासति काणमित्यत्र काणपदस्य विकारवदर्थकतया अक्षिपदार्थे गोलकेऽभेदान्वययोग्यतया तृतीयार्थविकारप्रयोज्यत्वान्वययोग्यत्वादेव तृतीयाप्रसक्तिविरहादभेदेन प्रयोज्यप्रयोजकभावासम्भवादित्यङ्गविकारशब्दो निष्प्रयोजन एवेति चेन्न काणमित्यत्र काणपदस्य चाक्षुषाप्रयोजकार्थकया तदर्थतावच्छेदके तृतीयार्थविकारप्रयोज्यत्वान्वयसम्भवात् तृतीयाप्रसक्तेः तन्निषेधफलकत्वेनाङ्गविकारशब्दस्य सप्रयोजनकत्वसम्भवात् ननु तथासति चाक्षुषाप्रयोजकं गोलकं काणपदस्यार्थः तद्वत्यवयविनि शरीरे निरूढलक्षणाऽस्तु किं काणपदस्य नानार्थतयेति चेत् न हि काणपदस्य नानार्थत्वाभ्युपगमः किं तु तथाविधगोलकमेव शक्यं लक्ष्योऽवयवी लक्ष्यतावच्छेदकं तु न तथाविधगोलकवत्त्वमुत्खातैकगोलके काणपदाप्रयोगप्रसङ्गात्किं तु

पूर्वोक्तोभयधर्मवत्त्वमिति । ननु चाक्षुषप्रयोजकत्वं यदि चाक्षुषोपधानप्रयोजकत्वं तदा निमीलितैकलोचने काणपदप्रयोगापत्तेः यदि चाक्षुषस्य योग्यप्रयोजकत्वं तत्रापि प्रयोजकत्वमुपधायकत्वं तदापि पूर्वोक्तो दोषः निमीलने सति सन्निकर्षादेर्योग्यस्यानुपधानात् यदि योग्ययोग्यत्वं तदा पुष्पकादिना गोलकच्छिद्रमुद्रणे काणपदाप्रयोगप्रसङ्गः तत्र गोलके निर्गमद्वारकसंनिकर्षयोग्यतायाः सत्त्वात्पुष्पकाद्यपनये चाक्षुषसंनिकर्षयोः सम्भवादिति निरूढलक्ष्यतावच्छेदकमध्येकं न सम्भवतीति चेत् न अविकृतगोलकत्वस्यैव योग्यतात्वात् सपुष्पकगोलके तद्विरहादेव काणपदप्रयोगसम्भवात् विकारास्तु गोलकनिष्ठप्रत्यासत्त्या चाक्षुषप्रतिबन्धकतावच्छेदकतयाऽनुगमनीयाः अथ वा गोलकद्वयप्रयोज्यचाक्षुषाभावचाक्षुषोभयवत्त्वमवच्छेदकतासंबन्धेन काणपदस्य लक्ष्यतावच्छेदकं निमीलितैकलोचनेऽतिप्रसङ्गवारणायादृष्टद्वारकप्रयत्नावरुद्धगोलकवदन्यत्वेन तद्विशेषणीयं गोलकविकारादेर्दुरदृष्टजनकप्रयत्नसाध्यत्वात् काणेऽप्रसङ्गवारणायादृष्टद्वारकत्वं प्रयत्ने विशेषणं पूर्वं निमीलितैकलोचनस्य कालान्तरेण गोलकविकारे सति तथाविधगोलकवदन्यत्वस्य विकृतगोलके शरीरे सत्त्वात् आहारपरिणामादिना शरीरभेदादिति न काणपदाप्रसङ्गः यदि च काणस्याविकृतात्तिनिमीलने तथाविधगोलकवदन्यत्वविरहात् खापे चोभयघटकचाक्षुषस्य विरहात्काणपदाप्रसङ्ग इति विभाव्यते तदा तथाविधातथाविधगोलकद्वयवदन्यत्वविशेषणमुभयघटक-

त्वं च चाक्षुषप्रागभावस्य बोध्यमिति । यद्वा तथाविधप्रयत्नाप्रयोज्यत्वं चाक्षुषाभावे विशेषणं तत एव निमीलितैकलोचने नातिप्रसङ्गः यदि च रोगविशेषे कुपथ्यभोजनादिना पुष्पकाद्युत्पत्तिस्तदा गोलकविकाराप्रयोज्यत्वं प्रयत्ने विशेषणमतो नाप्रसङ्गः उभयघटकत्वं च चाक्षुषप्रागभावस्य चाक्षुषयोग्यत्वस्य वा योग्यत्वं च चक्षुर्निर्गमावरोधकशून्यच्छिद्रवत्वे सति चक्षुः संयोगिगोलकत्वं गोलके तथाविधगोलकसमवेतत्वं शरीरे बोध्यमवच्छेदकतासंबन्धेन शरीरे ज्ञानादेरुत्पादान्न चाक्षुषप्रागभावहानिरतः सुप्ते काणे न काणपदाप्रयोगः योग्यत्वस्य घटकत्वे तु स्थते ऽपि काणे शरीरस्य यावन्न सोष्मः शोषो वा तावत्काणपदप्रयोगो निष्प्रत्यूह एव तद्गोलकव्यक्तेः सत्त्वात् सोष्मशोषयोरनन्तरं तत्र काणशब्दो गौण इति एवं गोलकविकाराप्रयोजकयत्नाप्रयोज्यगोलकद्वयप्रयोज्यचाक्षुषाभाववत्त्वे सति चक्षुर्निर्गमावरोधकशून्यच्छिद्रवच्चक्षुःसंयोगिगोलकसमवेतः काणपदार्थः एवं तृतीयार्थो विकारः प्रयोज्यत्वेन दर्शितचाक्षुषाभावेऽन्वेति स च विकारः क्व चिद्गोलकनाशः यद्बलादुत्खातैकगोलके क्व चिच्चक्षुर्नाशः यद्बलात्प्रसन्नैकचाक्षुषाप्रयोजकगोलके मांसदृढ्यतैकगोलके च क्व चित्पुत्पकादिः यद्बलात्पुष्पकादिमदेकगोलके काणपदस्य प्रयोगः न च पुष्पकादिना चक्षुर्नाश एवेति वाच्यं पुष्पकाद्यपनये चाक्षुषानुत्पत्तिप्रसङ्गात् न च तत्र पुष्पकाद्यपनायकेन चक्षुरन्तरोत्पाद इति वाच्यं चक्षुर्नाशचक्षुरन्तरतदुत्पत्तिप्रागभावनाशानां क-

ल्पनापेक्षया पुष्पकादेश्चक्षुर्निर्गमप्रतिबन्धकत्वकल्पनाया एव लघुत्वात् यत्र तु पुष्पकाद्यपनयेऽपि न चाक्षुषं तत्र चक्षुरन्तरोत्पादकल्पनाऽपि न सम्भवति किं तु पुष्पकादिप्रयोजकव्यक्तिविशेषस्य चक्षुर्नाशकत्वकल्पनैव अन्यथानुपपत्तेः विकारास्तु चाक्षुषप्रतिबन्धकतावच्छेदकत्वोपलक्षितधर्मवत्तयाऽनुगतीकृता अतो नाननुगमः एवं काकस्य शापेन गोलकद्वयप्रयोज्यचाक्षुषाभावेन शप्तृप्रयोज्येन न काणत्वमत एवाविकृतगोलके काके न काण्यव्यवहारः न च शापस्यातीततया आधुनिककाकानां कथमेकनेत्रत्वमिति वाच्यम् । काकत्वसामान्यलक्षणया सकलकाकोपस्थितौ शापस्य सकलकाकविषयत्वात् शापविषयता स्वसंबन्धमात्रेणैकनेत्रत्वं प्रयोजयति । अथ वा शापकालिकैकनेत्रकाकजातीयप्रयोज्यत्वेनाधुनिककाकानामेकनेत्रत्वं यथा द्विनेत्रजातीयमनुष्यादिप्रयोज्यत्वेन मनुष्यादीनां द्विनेत्रत्वं न "चैषीकमस्त्रमुदपास्यदथैनमत्रणा काणीचकार चरमो रघुराजपुत्र" इति कथं प्रयोग इति वाच्यम् । एषीकास्त्रप्रयुक्तगोलकोपघातस्यापि तथाविधचाक्षुषाभावप्रयोजकत्वात् विकारस्य स्वसंबन्धिगोलकप्रयोज्यचाक्षुषं प्रति प्रतिबन्धकत्वात् तादृशचाक्षुषाभावोऽपि चाक्षुषस्यैकदा गोलकद्वयप्रयोज्यत्वाभाव इव गोलकद्वयप्रयोज्यचाचाक्षुषाभावं प्रयोजयति तथा चात्र तृतीयार्थ ऐषीकास्त्रप्रयुक्तोपघातस्तत्प्रयोज्यत्वं गोलकद्वयप्रयोज्याचाक्षुषाभावे काकनिष्ठेऽबाधितमिति । अत एव काणमैषीकेणाहनदिति नोक्तमुक्तं च काणीचकारेति अत एव

गोलकविकारप्रयोजकत्वं प्रयत्नविशेषणमर्थवत् अन्यथाऽत्र काणत्वानुपपत्तेः शापस्तु न गोलकविकारप्रयोजकः गोलकचक्षुःसंयोगस्यानुत्पादो न विकारः विकारगणापठितत्वात् नाशस्तु गणितत्वाङ्गवति विकार इति यदि चानुत्पादोऽपि विकारस्तदा विकारप्रयोजकत्वात् शापोऽपि विकारस्तृतीयार्थः प्रयोजत्वेन तथाविधचाक्षुषाभावेऽन्वेति सर्वे काकाः काणा इति प्रयोगोऽपीष्यत एवेति । एवं पादेन खञ्ज इत्यत्र पादद्वयप्रयोजप्लुतान्यगत्यभाववत्त्वे सति प्लुतान्यगतियोग्यपादवान् खञ्जपदार्थः खञ्जस्यापि प्लुतगतिमत्त्वादप्रसङ्गवारणाय सत्यन्तमुपात्तं विकृतोभयपादवत्यतिप्रसङ्ग वारणाय विशेष्यदलं पादस्य प्लुतान्यगतियोग्यत्वं च विजातीयसंयोगवदवयवारब्ध्यत्वं प्लुतान्यप्रयोजकमारम्भकसंयोगगतं वैजात्यमेवावश्यकत्वाद्यद्विरहाज्जातमात्रबालस्यापि विसदृशपादाद्यवयवत्त्वमालक्ष्यते । एवं तृतीयार्थो विकारः स चाच क्व चिदामवातसंयोगः क्व चिदारम्भकसंयोगनाशकखड्गादिप्रहारः क्व चिद्रुधिरास्थिमांसाद्यवयवनाशप्रयोजको रोगविशेष ईदृश आहाराभावश्च क्व चिदारम्भकसंयोगनाशकवायुप्रयोजकः खल्याद्याहारः तृतीयार्थः प्रयोजत्वेन तथाविधगत्यभावेऽन्वेति । एवं पादविकारप्रयुक्तपादद्वयप्रयोजप्लुतान्यगत्यभाववान् प्लुतान्यगतियोग्यपादवानित्यन्वयबोधः । विकारास्तु तथाविधगतिप्रतिबन्धकतावच्छेदकत्वोपलक्षितधर्मवत्तयाऽनुगमनीयाः क्व चित् शापोऽपि विकारः अत एव सौरिः पादेन खञ्ज इति व्यवहारः

एवं पाणिना कुणिरित्यत्र कुणिपदार्थः कुकरत्वं तच्च करद्वयप्रयोज्यकार्यभाववत्त्वे सति तथाविधकार्ययोग्यपाणिमत्त्वं तथाविधकार्यं तु धनुःप्रहरणादितान्त्रिकसुद्रादियोग्यत्वं च पाणेः पादवद्बोध्यम्। तृतीयार्थो विकारः स चाङ्गुलीगलनादिः एवं पाणिविकारप्रयोज्यकरद्वयप्रयोज्यकार्याभाववान् तथाविधकार्ययोग्यपाणिमानित्यन्वयबोधः यदि च पाणिभ्यां कुणिरिति प्रयोगस्तदा करद्वयप्रयोज्यकार्याभाववत्त्वमेव कुणित्वं बोध्यमिति। एवं कार्याभावस्याङ्गिविकारत्वोपगमे "तान्यक्ष्णावधिराणि पन्नगकुलान्यष्टावि"ति प्रयोगस्तत्र वधिरत्वं श्रावणप्रत्यक्षाभावः पन्नगस्याक्ष्णिगोलकं श्रवणेन्द्रियाधिष्ठानं तत्र गोलकावच्छिन्ने श्रोत्रे शब्दानुत्पादो गोलकस्य विकारस्तृतीयार्थः तस्य प्रयोज्यत्वेन श्रावणाभावेऽन्वयः एवं नेत्राभ्यामन्ध इति प्रयोगोऽपीष्ट एव चाक्षुषाभावे अन्धत्वे नेत्रद्वयविकारस्य प्रयोज्यतयाऽन्वयः। एवं नासिकया घ्रातेत्यत्र नासिकाया विकारः घ्राणसन्निकर्षप्रयोजकनिर्गमप्रतिबन्धकः कफादिः क्व चिद् घ्राणनाशश्च तस्य प्रयोज्यत्वेन घ्राणजाभावेऽघ्रातत्वेऽन्वयः। एवं जिह्वया रसयितेत्यत्र रसननिर्गमप्रतिबन्धको रोगादिः क्व चिद्रसननाशः क्व चित् स्वनाशश्च जिह्वाया विकारस्य च रासनाभावेऽरसयितृत्वेऽन्वेति एवं त्वचाऽस्पृशकइत्यत्र त्वचश्चर्मणो विकारः स्पर्शनेन्द्रियनिर्गमप्रतिबन्धको गजचर्मादिरोगः क्व चित्स्पर्शननाशश्च स च प्रयोज्यत्वेन स्पार्शनाभावेऽस्पृशकत्वेऽन्वेति। एवं श्रोत्रेण वधिर इत्यत्र श्रोत्रं कर्णशष्कुली तस्याः स्वावच्छिन्ने न-

भसि शब्दानुत्पादः पूर्वोक्त एव स च रोगविशेषाद्दृष्ट-विशेषविरहेण वा यथायोग्यं प्रयुज्यत इति । अवयवस्य नाशस्वरूपाऽपचय इवोपचयोऽपि विकारः अत एव "स वाल आसीद्वपुषा चतुर्भुजो सुखेन पूर्णेन्दुमुखस्त्रिलोचन" इत्यत्र तृतीययोरुपचयोऽर्थः स च प्रयोज्यत्वेन भुजचतु-ष्टयसंबन्धेऽन्वेति वपुःपदं पूर्वकायपरमिति वदन्ति । तत्र जानुभ्यामूर्ङ्चुः संङ्चुर्वेति उदरेण पिचण्डिल इति च प्रयोगेऽभ्युपगमवादः तृतीयार्थोपचयस्यान्वयसम्भवात् यदि चोपचयोऽर्थो नाभ्युपेयते तदा चतुर्भुजशब्दस्य चतु-स्संख्यकभुजसमवेतोऽर्थस्तत्र तृतीयार्थोऽभेदो वपुर्विशेषि-तोऽन्वेति वर्णेन लोहित इतिवत् सुखविशेषितमाधेयत्वं तृतीयार्थो लोचनत्रयेऽन्वेति अवयवस्याप्यवयविवृत्तित्वं वृक्षे शाखेतिप्रतीतेः वपुषा सुखेनेत्युभयत्र तृतीया "प्रकृ-त्यादिभ्य" इतिवार्त्तिकेन सिध्यति । उपलक्षणे तृतीयां ज्ञापयति । "इत्थंभूतलक्षणे" इति सूत्रम् । अस्यार्थः कं चित्प्रकारं प्राप्तः इत्थंभूतः तस्य लक्षणमित्थंभूतलक्षणं तत्र तृतीयाविभक्तिर्भवतीति काशिका प्रकारो द्विविधः विशेषणमुपलक्षणं च स्वसमानकालिकबुद्धिप्रकारो विशे-षणं स्वासमानकालिकबुद्धिप्रकार उपलक्षणं यथा गुरु-णा टीका कुरुणा क्षेत्रमित्यत्र कुरुर्गुरुः तथा चात्र विद्य-मानकालनिष्ठस्य ध्वंसस्य कादाचित्काभावस्य वा प्रति-योगित्वं संबन्धश्च तृतीयार्थः प्रतियोगित्वं प्रकृत्यर्थे वि-शेषणतया संबन्धो विशेष्यतयाऽन्वेतीति एवमविद्यमान-स्य गुरोष्टीका कुरोः क्षेत्रमित्यन्वयबोध इति के चित् । अत एव सूत्रे इत्थंभूतेत्यत्राऽतीतार्थको निष्ठाप्रत्ययोऽती-

तस्य लक्षणे संबन्धे तृतीया भवतीतिसूत्रार्थाभिप्रायेण प्रत्यक्षालोकेऽतीतार्थान्यप्रत्ययेनासत्त्वबोधनादिति मिश्रैरेतन्मतोत्तम्भकतयोक्तः । अन्ये तु विद्यमानस्योपरि भाव्यतः काकादेरुपलक्षणत्वमित्यन्यथाविशेषणोपलक्षणलक्षणं तथा हि यस्यां बुद्धौ यो यत्र प्रकारः स तत्र विशेषणं विशेषणोपस्थापकमविशेषणमुपलक्षणं यथा काकेनोपस्थापितः संस्थानविशेषः देवदत्तगृहे विशेषणीभूय भासते तत्प्रतीतावुपलक्षणं काकः एवं जटयोपस्थापितो विषयभोगाभावः तापसविशेषणम् एवं काकेन देवदत्तगृहा इत्यत्र काकज्ञानजन्यज्ञानविषया देवदत्तगृहा इति जटाभिस्तापस इत्यत्र जटाज्ञानजन्यज्ञानविषयस्तापस इति चान्वयबोध इति वदन्ति तदत्र मते ज्ञानजन्यज्ञानं तृतीयार्थ इति तत्र प्रतियोगिना घटेनाभाव इत्यत्र तृतीयाऽनुपपत्तिः प्रतियोगिनोऽभावविशेषणानुस्थापकत्वात् तदुक्तं प्रत्यक्षमणौ "प्रतियोगिनाऽभावे धर्मान्तरानुपनयनाच्चेति" । शिवादित्यमिश्रास्तु साक्षात्संबद्धं विशेषणं परम्परासंबद्धमुपलक्षणं तदुक्तम् ।

व्यावर्तनीयमधितिष्ठति यद्धि साक्षादेतद्विशेषणमतो विपरीतमन्यत् । दण्डी पुमानिति विशेषणमत्र दण्डः पुंसो न जातिरनुदण्डमसौ च तस्येति ।

अनुदण्डं दण्डमनुगता जातिर्न पुंसो विशेषणं किं त्वसौ तस्य दण्डस्येत्यर्थः उपरिभ्रमत्काकादिकं परम्परासंबद्धमुपलक्षणमित्याहुः । तत्र जटाभिस्तापसो दण्डेन पुरुष इत्यत्र जटादण्डयोः साक्षात्संबद्धयोरुपलक्षणत्वानुपपत्तिरत एव मणौ साक्षात्संबन्धेऽप्युपलक्षणत्वादि-

त्युक्तम् । मणिकृदनुयायिनस्तु विशेषणमुपलक्षणमन्याद्दशमेव तथा हि यत्रैकस्माव्यावृत्तेरनुयोगिता प्रतियोगिता चैकधर्मावच्छिन्ना तत्र व्यावृत्तेरनुयोगितावच्छेदकत्वेन प्रतियोगितावच्छेदकीभूताभावप्रतियोगित्वेन प्रतीयमानत्वं विशेषणपदप्रवृत्तिनिमित्तं यथा दण्डी पुरुष इतिनिश्चयानन्तरमदण्डपुरुषव्यावृत्तो दण्डी पुरुष इति निश्चयो जायते तत्र पुरुषत्वेनैकेनावच्छिन्ना प्रतियोगिताऽनुयोगिता चैकस्माव्यावृत्तेः तदनुयोगिता दण्डेनाप्यवच्छिद्यते तत्प्रतियोगितावच्छेदकीभूतदण्डाभावप्रतियोगित्वं च दण्डे प्रतीयते दण्डी पुरुष इत्यादौ दण्डः पुरुषविशेषणं यत्र तु प्रतियोगित्वानुयोगित्वयोर्नैकधर्मावच्छिन्नत्वं तत्र पद्मत्वावच्छेदेन कुसुमान्यपद्मादिव्यावृत्तेः प्रत्ययेऽपि कुसुमत्वं न विशेषणं पद्मस्येति । इदं तु विशेषणत्वमेकधर्मविशिष्टेऽपरविशेषणस्य बोध्यं सामान्यतो विशेषणत्वं तु व्यावृत्त्यधिकरणतावच्छेदकतया व्यावृत्तिप्रतियोगितावच्छेदकीभूताभावप्रतियोगितया च प्रतीयमानत्वं यथा दण्डीत्यत्रैकस्या एव व्यावृत्तेः प्रतियोगितावच्छेदकाभावप्रतियोगितयाऽधिकरणतावच्छेदकतया च दण्डो व्यावृत्तिबुद्धौ भासते सामान्यतो विशेषणत्वमपि दण्डस्य दण्डी पुरुष इत्यत्र सम्भवति अत एव मणौ दण्डी पुरुष इति ज्ञानानन्तरं दण्डवत्यदण्डव्यावृत्तिरवगम्यत इति प्रत्याय्य व्यावृत्त्यधिकरणता पुरुषस्य दण्डेनावच्छिद्यते न पुरुषत्वेनातिव्याप्तेरित्युक्तं सामान्यतो विशेषणत्वं व्यतिरेकिधर्ममात्रस्य सम्भवति केवलान्वयिनि धर्मे व्यावृत्तेर-

प्रसिद्ध्या विशेषणत्वसामान्याभाव इति । प्रतीयमानत्वगर्भं विशेषणत्वं व्याहत्तेर्बुद्धौ न विषयः किं तु तदनुव्यवसायादौ काकवन्तो देवदत्तगृहा इत्यत्र देवदत्तस्वत्वशून्यगृहव्याहत्तिः संस्थानविशेषवत्त्वावच्छेदेन प्रतीयते न तु काकवत्त्वं तदवच्छेदकत्वं तदसत्त्वकालेऽपि दर्शितव्याहत्तेः प्रतीतेश्च सत्त्वान्न्यूनवृत्तित्वादिति काको न विशेषणमपि तु व्याहत्तिबुद्धिप्रकारतया व्याहत्त्यवच्छेदकोपस्थापकतया वा व्यावर्तकतयोपलक्षणं तथा च व्याहत्त्यधिकरणतानवच्छेदकत्वे सति व्यावर्तकत्वमुपलक्षणत्वमत एव मणौ प्रत्याय्य व्याहत्त्यधिकरणतावच्छेदकत्वे सति व्यावर्तकं विशेषणं तदन्यद्व्यावर्तकमुपलक्षणमित्युक्तं व्याहत्त्यधिकरणतायाऽवच्छेदकत्वं स्वरूपसंबन्धविशेषः अत एव तदवच्छेदकत्वं संयोगादाविव तेन समं स्वरूपसंबन्धविशेष इति मिश्रैरुक्तं व्यावर्तकत्वं व्याहत्तिबुद्धिप्रयोजकबुद्धिविषयत्वं व्याहत्त्यबोधकालेऽपि विशेषणत्वबुद्धिप्रसङ्गवारणार्थमुपात्तम् । अत एव मणौ व्याहत्त्युल्लेखानन्तरमेव विशेषणत्वबुद्धिरित्युक्तं न च व्याहत्तेरबोधकाले तदवच्छेदकत्वाग्रहसम्भवेनैव विशेषणत्वबुद्ध्यैव प्रसङ्ग इति वाच्यम् । शब्दादिना तदवच्छेदकत्वग्रहसम्भवात् । अत एवादण्डव्याहत्त्यधिकरणतावच्छेदको दण्ड इति शब्दादवगमेऽपि तद्वत्यदण्डव्याहत्त्यप्रतीतेः सर्वसिद्धत्वादिन्द्रियासंनिकर्षादिना प्रत्यक्षादिसामग्र्यभावादिति मिश्रैरुक्तं एवमीदृशविशेषणत्वाभावाद्व्यावर्तकमुपलक्षणं वस्तु सत्युपलक्षणे प्रातिपदिकेनोपस्थापिते संबन्धमात्रं तृतीयार्थः काकेन देवद-

त्तगृहा इत्यत्र काकसंबन्धिनो देवदत्तगृहा इत्यन्वयबोधः प्रमेयत्वादेरव्यावर्तकत्वादुपलक्षणत्वमपि न सम्भवतीति प्रमेयत्वेन घट इति न प्रयोगः अत एव प्रकारो द्विविध इत्यत्र प्रकारपदं व्यावर्तकपरतया मिश्रैर्व्याख्यातं यत्तु पशुना रुद्रं यजेतेत्यत्र पशुगतमेकत्वं विशेषणं ग्रहं संमार्ष्टीत्यत्र ग्रहगतमेकत्वमुपलक्षणमिति छान्दसानां व्यवहारः स च विशिष्टान्वयनिबन्धनः पशुनेत्यादौ तृतीयार्थकर्मत्वे पशोरेकत्वविशिष्टस्यान्वयः यथा चैकत्ववैशिष्ट्यं पशौ तथोपपादितं वचनार्थविवरणे ग्रहमित्यादावेकत्वविशिष्टस्य ग्रहस्य संमार्गकर्मत्वेनान्वय इति विशिष्टान्वये पशोरेकत्वावच्छिन्नप्रतियोगिताकः संसर्गो भासत इत्येकः पक्षः । एकत्वे पशौ च प्रकारता पर्याप्तेति द्वितीयः । एकत्वावच्छिन्ना पशु प्रकारताश्रय वा पशुविशेष्यतया कर्मतादिविशेष्यतया च साक्षात्परम्परासंबन्धद्वयावच्छिन्नमेकमेवैकत्वप्रकारत्वं निरूप्यत इति तृतीयः । तथा चेदृशविशिष्टविषयतापन्नो विशेषणमनापन्न उपलक्षणमिति । अत एव मणावुद्देश्यान्वयप्रतियोगी धर्मो विशेषणं तदन्यदुपलक्षणमिति सिद्धान्तपर्यवसानं काकवन्तो देवदत्तगृहा इत्यत्र उद्देश्याया देवदत्तस्वत्वशून्यगृहवृत्तेरन्वयितावच्छेदकत्वं काकस्य न सम्भवतीति काको न विशेषणं यदि चाकाकवृत्तिरुद्देश्या तदा विशेषणमेव । एवं ग्रहमित्यादावेकत्वविशिष्टग्रहकर्मत्वस्य संमार्गेऽन्वयो नोद्देश्यः किं तु प्रस्तुतसकलग्रहकर्मत्वस्येत्येकत्वं न विशेषणम् । एवमुक्तविशेषणं क्वचित्प्रमेयत्वस्यापि प्रमेय

इति प्रमेयं जानातीत्यत्र प्रमेयत्वविशिष्टकर्मत्वस्य ज्ञा-
नेऽन्वयादन्यथा प्रमेय इति ज्ञानाभेदान्वयानुपपत्तेरत
एव न हि प्रमेयत्वविशिष्टं प्रमेयपदशक्यमित्यत्र प्रमेय-
त्वं न विशेषणं प्रमेयत्वस्याशक्यत्वापत्तेरिति मिश्रैरु-
क्तम् । यदा दण्डविशिष्टपुरुषस्यान्वयो न विवक्षितस्त-
दा दण्डो न विशेषणं किं तूपलक्षणमत एव दण्डेन
पुरुषमानयेत्यादिः प्रयोग इतीदृशोपलक्षणे वस्तुभूते प्र-
कृत्यर्थे सति संबन्धमात्रार्थिका तृतीया भवतीत्याहुः ।
ननु तृतीयायाः संबन्धमात्रार्थकत्वे प्रमेयत्वेन द्रव्यत्वेन
वा पुरुषमानयेत्यादिकः कुतो न प्रयोग इति चेन्न स-
एव हि संबन्धस्तृतीयार्थो य उद्देश्यान्वयप्रतियोगी भ-
वति अन्यथा उपलक्षणतृतीयान्तप्रयोगस्य वैयर्थ्यापत्तेः
प्रमेयत्वादेस्तु न तादृशः संबन्धः पुरुषादाविति तत्र
प्रमेयत्वादिकं नोपलक्षणमिति काकेन देवदत्तगृहा
इत्यत्र काकस्य स्वप्रयोज्यसंस्थानविशेष उत्तृणत्वं सं-
बन्धस्तृतीयार्थस्तस्य देवदत्तस्वत्वशून्यगृहव्यावृत्तेरुद्दे-
श्याया अन्वयितावच्छेदकत्वात् अत एव काकपदेनो-
पस्थाप्यः काक इव तत्संबन्धस्तु मतुपा बोधितः काक-
कारितसंस्थानविशेष इति मिश्रैरुक्तं जटाभिस्तापस इ-
त्यत्र जटानां स्वप्रयोजककेशासंयमप्रयोजकव्रतवत्त्वं सं-
बन्धस्तृतीयार्थः व्रतस्य केशासंयमप्रयोजकत्वं तु केश-
संयमस्य निषिद्धतया केशसंयमेन कर्तव्यजपादिकर्मणः
कालातिपातशङ्कया यदि च संयतकेशोऽपि तापसस्त-
दा केशसंयमादिस्तस्य न कर्तव्यजपादिविरोधीति तदा
स्वप्रयोजकीभूताभावप्रतियोगिकेशसंयमाप्रयोजितावै-

गुण्यकव्रतं संबन्धस्तृतीयार्थः अवैगुण्यमनिष्पन्नत्वं कर्तव्यजपादिलोपविरहो वा केशसंयमप्रयुक्तजपादिलोपस्य विषयासक्ते केशिनि सम्भवान्नाप्रसिद्धिः केशसंयमप्रयुक्तजपादिलोपविरहस्य संयतासंयतकेशयोर्व्रते समानत्वादिति दर्शितव्रततत्वमेव तापसव्यावृत्ते रुद्देश्याया अन्वयितावच्छेदकं तस्य जटायाः सत्त्वासत्त्वदशायामप्यविकलत्वात् । अत एव संस्थानविशेषवत्त्वादिनेति मूले व्रतविशेषवत्त्वादिरादिपदार्थ इति दर्पणे ठक्कुराः । व्रते विशेषो जटासंबन्धतावच्छेदको दर्शित एव गुरुणा टीकेत्यत्र विवरणवाक्यं टीकाशब्दार्थः गुरुप्रयोजिता तत्सजातीया वाऽनुपूर्वी संबन्धस्तृतीयार्थः स च टीकान्तरव्यावृत्ते रुद्देश्याया अन्वयितावच्छेदको भवत्येवेति कुरुणा क्षेत्रमित्यत्र कुरोः स्वरूपसत्त्वेचपरमाणुभिरारब्धत्वं संबन्ध स्तृतीयार्थः स च क्षेत्रान्तरव्यावृत्ते रुद्देश्याया अन्वयितावच्छेदको भवत्येवेति दण्डेन पुरुषमानय इत्यत्र दण्डस्य स्वसंयोगप्रागभावनाशस्संबन्धस्तृतीयार्थः स च दण्डसत्त्वासत्त्वदशायामप्यविकल इति गृहीतदण्डपुरुषव्यावृत्ते रुद्देश्याया अन्वयितावच्छेदको भवति न चाचोपलक्षणतृतीयाया अत्यन्ताभावसंबन्धश्चार्थस्तथा च पुरुषे दण्डात्यन्ताभावो दण्डसंबन्धश्च प्रतीयत इति वाच्यं दर्शितव्यापकानन्तरं दण्डसहितपुरुषानयने दर्शितवाक्यस्याप्रामाण्यप्रसङ्गात्पुरुषे दण्डदण्डात्यन्ताभावासत्त्वात् जटाभिस्तापस इत्यत्र जटाया विद्यमानतया तदत्यन्ताभावस्य तापसे बोधयितुमशक्यत्वाच्च । एवं काशिकायामुदाहृतमपि भवान् कमण्ड-

लुना क्वाक्मद्राक्षीत् क्वाचेणोपाध्यायं शिक्षया परिव्राजकामिति तवाध्ययनशीलः क्वावशब्दार्थः कमण्डलोः स्वप्रयोज्याचमनसजातीयमध्ययनपूर्वाङ्गाचमनं संबन्धस्तृतीयार्थः "पीत्वाऽपोऽध्येष्यमाणश्चे"ति स्मृतेराचमनमध्ययनपूर्वाङ्गं भवति तथाविधाचमनमच्छाचव्यावृत्तेरन्वयितावच्छेदकं भवत्येव न हि संबन्धस्य तृतीयार्थतावच्छेदकरूपेणैवान्वयितावच्छेदकं किं तु यदेव लघुभूतमनतिप्रसक्तं तेन रूपेण अत एव काकप्रयोज्योक्तृगत्वत्वेनोक्तृगत्वस्य तृतीयार्थत्वेऽप्युक्तृगत्वत्वेनैवान्वयितावच्छेदकत्वं क्वात्रस्य स्वाध्ययनप्रयोजकमध्यापनं संबन्धस्तृतीयार्थः अध्यापनं वाक्यविशेषः उपाध्यायोऽध्यापनयोग्यः योग्यत्वं तु अध्यापनवाक्यतदर्थगोचरदृढसंस्कारवत्त्वे सति वक्तृत्वं वक्तृत्वोपादानादवगतशास्त्रार्थस्य मूकस्य व्युदासः एवमध्यापनमुपाध्यायान्यव्यावृत्तेरन्वयितावच्छेदकं भवत्येव शिखायास्तत्संयोगस्य वा विहितो ध्वंसः संबन्धस्तृतीयार्थः विहितशिखाध्वंसः परिव्राजकोऽन्यतुर्याश्रमिणोऽन्यस्य व्यावृत्तेरन्वयितावच्छेदको भवति विहितत्वोपादानाद्यवने शिखाध्वंसस्य सत्त्वेऽपि नावच्छेदकत्वहानिः । यदि च सौगतपरिव्राजको लक्ष्यस्तदाविहितभिक्षाशीलः परिव्राजकशब्दार्थः विहितत्वं तु कालान्तरभाविफलसाधनताबोधकविधिवाक्यविषयत्वं तादृशविधिवाक्यं वेदः सौगतागमश्च तथासति विहितशिखाध्वंसः सशिखस्य विहितभिक्षाशीलस्य ब्रह्मचर्यादेर्व्यावृत्तेरन्वयितावच्छेदको भवतीति प्राचीनमतानुसारी पन्थाः वस्तुतस्तु गुरुणा कुरुणा शिखयेत्यत्र दर्शित एवार्थः का-

केन देवदत्तगृहा इत्यत्र समासेन गृहे देवदत्तस्वत्वस्य बोधने तच्छून्यगृहव्याप्तत्तिप्रतीतेस्तत एव सम्भवात् तृतीयान्तस्य वैयर्थ्यमेव काकेन गृहा देवदत्तस्येत्यत्र काकस्य गृहे अन्तःप्रवेशप्रागभावनाशः संबन्धस्तृतीयार्थः स च काके प्रविष्टेऽन्यत्र गते चाविकल इति अन्तरप्रविष्टकाकस्य गृहस्य व्याप्तत्तेरन्वयितावच्छेदको भवति सा व्याप्तत्तिः समनियताभावानामैक्ये स्वरूपभेदेऽपि लिङ्गतया देवदत्तस्वत्वशून्यगृहव्याप्तत्तिं गमयति कमण्डलुना जटाभिरित्यत्र स्वसंयोगप्रागभावनाशः संबन्धस्तृतीयार्थः स च तयोः सत्त्वासत्त्वदशायामविकल इति । अधृतकमण्डलोश्छात्रस्याधृतजटस्य तापसस्य व्याप्तत्तेर्यथायोग्यमन्वयितावच्छेदको भवति अत एव इह न भवति कमण्डलुपाणिश्छात्र इति लक्षणस्य समासान्तर्भूतत्वादिति काशिका समासे तृतीया निषेधिका संगच्छते लक्षणं संबन्धः स च नाचमनरूपः पाणौ कमण्डलोः सम्भवतीति न समासेन बोधयितुं शक्य इति तृतीयानिषेधानुपपत्तिः दर्शितसंबन्धस्तु कमण्डलोः पाणौ सम्भवतीति समासेन बोधित इति तृतीयानिषेधोपपत्तिरुक्तार्थानामप्रयोग इति न्यायादिति । छात्रेणेत्यत्र छात्रस्य स्वाध्ययने छात्रप्रयोज्यनिवासप्रागभावनाशाधिकरणदेशाधिष्ठातृत्वमुपाध्याये संबन्धस्तृतीयार्थः स च छात्रनिवाससत्त्वासत्त्वदशायामविकल इति अच्छात्रस्य छात्राकृतनिवासदेशाधिष्ठातुरुपाध्यायस्य व्याप्तत्तेरन्वयितावच्छेदको भवति एवमनया रीत्याऽन्यत्रापि सुधीभिरूह्यः संबन्ध इति । यत्तु वैशिष्ट्यं तृतीयार्थः यस्य वै-

शिष्टं विद्यमानतया प्रतीयते तद्विशेषणं यस्याविद्यमानतया तत्तूपलक्षणमिति तन्न अविद्यमानस्य वैशिष्ट्यस्य तृतीयाशक्त्यैवापि बोधयितुमशक्यत्वात् योग्यताविरहात् श्यामेन घट इत्यत्र वैशिष्ट्यस्य समवायस्य रक्ततादशायामपि विद्यमानत्वात् श्यामस्योपलक्षणत्वानुपपत्तेः जटाभिस्तापस इत्यत्र तत्संबन्धस्य विद्यमानत्वादुपलक्षणत्वानुपपत्तेः यदपि संबन्धमात्रं तृतीयार्थः संबन्धो यस्य विद्यमानस्य प्रतीयते तद्विशेषणं यस्याविद्यमानस्य तत्र मतुबादेर्बाधात्तृतीयैवेति तदुपलक्षणमिति तदपि न सुन्दरं घटो विनाशीत्यत्राविद्यमानस्य नाशस्येन्प्रत्ययेन संबन्धबोधनात् न चात्र प्रत्ययस्याधुत्वार्थः धात्वर्थो नाशः जानातीत्यादाविव प्रथमान्तार्थे साक्षादेवान्वयीति वाच्यं तथासति विनाशी न स्यास्यतीत्यत्रान्वयबोधानुपपत्तेः भाविस्थितिकर्तृत्वाभावस्य विनाशे बोधयितुमशक्यत्वात् किं चोत्पत्तिकालिको घटो गन्धवानित्यत्राविद्यमानस्य गन्धस्य संबन्धो मतुपा बोध्यते तदनुपपत्तिः जटाभिस्तापस इत्यत्र विद्यमानाया जटायास्तृतीयया संबन्धबोधने उपलक्षणत्वानुपपत्तिश्च श्यामेन घट इत्यत्र श्यामस्य स्वप्रागभावनाशः संबन्धः स चाजातश्यामघटव्यावृत्तेरन्वयितावच्छेदको भवति घटेनाभाव इत्यत्र घटस्य स्वप्रतियोगितानिरूपितानुयोगित्वं संबन्धस्तृतीयार्थः स च घटाप्रतियोगिकाभावव्यावृत्तेरन्वयितावच्छेदको भवति । न चात्र दर्शितसंबन्धेन घट एवान्वयितावच्छेदकोऽस्त्विति वाच्यं घटस्यातीतत्वेऽपि व्यावृत्तिबुद्धेरुदयादिति ।

कलङ्कणितगर्भेण कण्ठेनाघूर्णितेक्षणः ।
पारावतः परिक्रम्य रिरंसुश्चुम्बति प्रियाम् ॥

इत्यत्र तृतीयार्थं आधेयत्वं तथाविधकण्ठे समवेते पारावते परिभ्रमणोत्तरप्रियाचुम्बनकर्तृत्वान्वय इति आधेयत्वे तृतीया "प्रकृत्यादिभ्य" इति वार्त्तिकसिद्धेति हेतुत्वार्थिकां तृतीयां ज्ञापयति "हेतौ" इति सूत्रं हेतावर्थे तृतीया स्यादित्यर्थकं हेताविति भावप्रधानो निर्देशः तथा च हेतुत्वं तृतीयार्थस्तच्च द्विविधं कारणत्वं ज्ञापकत्वं च कारणत्वं च साक्षात्परम्परासंबन्धाभ्यामिच्छन्नं द्विविधं तत्र साक्षाद्यथा तन्तुभिस्तन्तूनां मिलनेन वा पटः पाकेन सौरभं माधुर्यं रक्तिमा वा चीरस्येति परम्परया यथा दण्डेन घटः वह्निना धर्मः ओदनेन तृप्तिः यागेन स्वर्गः अनुभवेन स्मरणं चेति अत्र प्रकृत्यर्थस्याधेयतया तृतीयार्थे हेतुत्वे तस्य निरूपकतया कार्ये पटादावन्वयः तथा च तन्तुवृत्तिकारणतानिरूपको घट इत्याकारकोऽन्वयबोधः यदत्र निर्व्यापारसाधनं हेतुस्तृतीयार्थस्तस्योदाहरणं दण्डेन घट इति शाब्दिकमतं तल्लौकिकपदार्थानामप्यनभिज्ञानं सूचयति चक्रभ्रमिद्वारैव दण्डो घटोत्पादक इति सकललोकावधारणविरोधादिति । ज्ञापकत्वं यथा धूमेन वह्निरित्यादि अत्रापि प्रकृत्यर्थस्याधेयतया तृतीयार्थे ज्ञापकत्वे तस्य निरूपकतया ज्ञाप्ये वह्न्यादावन्वयः तथा च धूमवृत्तिज्ञापकतानिरूपको वह्निरित्यन्वयबोधः । मणिकृतस्तु ज्ञापकत्वं न तृतीयार्थः तथासति चक्षुषा रूपमिति प्रयोगप्रसङ्गात् किं तु धूमेन वह्निरित्यत्र धूमपदं धूमज्ञाने वह्निपदं वह्निज्ञाने ज्ञाय-

मानवङ्गौ वा लाक्षणिकं तृतीयार्थो हेतुत्वं तस्य निरूपकतया लक्ष्यैकदेशे ज्ञायमानविशेषणे ज्ञानेऽन्वयः तथा च धूमज्ञानवृत्तिहेतुतानिरूपकज्ञानविषयो वह्निरित्यन्वयबोधः चेष्टाविशेषेण पचतीत्यत्र विशेषशब्दस्य चेष्टाविशेषज्ञाने तिङो ज्ञायमानकृतौ लक्षणा तथा च चेष्टाविशेषज्ञानवृत्तिहेतुतानिरूपकज्ञानविषयः पाककृतिरित्यन्वयबोधः । विभक्त्यर्थयोः परस्परं नान्वय इत्यप्रामाणिकमेव प्रामाणिकं चेत्सुबर्थयोरेव तथात्वं एवमन्यत्रापि ज्ञाने लक्षणा यथा प्रत्यक्षोपजीवकत्वेन निरूप्यते इत्यादौ त्वप्रत्ययस्य प्रत्यक्षोपजीवकत्वज्ञाने लक्षणा लक्ष्यमाधेयत्वेन तृतीयार्थहेतुत्वे तच्च निरूपकतया निरूपणेऽन्वेति प्रत्यक्षोपजीवकत्वसङ्गतेर्ज्ञानं तज्जिज्ञासाया जिज्ञापयिषाया वा प्रयोजकतया निरूपणजनकम् एवं वेदेन प्रवर्तते इत्यत्र वेदपदस्य वेदज्ञाने लक्षणा वेदज्ञानस्य वेदार्थे इष्टसाधनत्वगोचरज्ञानप्रयोजकतया प्रवृत्तिजनकत्वमित्याहुः । एकदेशिनस्तु न जनकत्वं न वा ज्ञापकत्वं तृतीयार्थस्तथासति घटो न रासभेणेतिवत् घटो न दण्डेनेति प्रयोगप्रसङ्गात् स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकस्य दण्डहेतुत्वाभावस्य घटेऽपि सत्त्वात् निरूपकतासंबन्धस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वादिति जन्यत्वं ज्ञाप्यत्वं च तृतीयार्थ इत्याहुः तच्चिन्त्यं वृत्तिनियामकसंबन्धस्य प्रतियोगितानवच्छेदकत्वे युक्तेर्द्वितीयाविवरणे दर्शितत्वात् अन्यथा प्रकृतेऽपि घटो न पारिमाण्डल्येनेत्यत्रान्वयबोधानुपपत्तेः पारिमाण्डल्यजन्यत्वस्या-

प्रसिद्धतया तदभावबोधासम्भवात् वृत्तिनियामकस्य तथात्वे तु तृतीयार्थे हेतुत्वे आधेयतया जन्यत्वे निरूपकतया संबन्धेन प्रकृत्यर्थाभावस्य नञा बोधनसम्भवाद्न्वयबोधोपपत्तिः गगनं न पारिमाण्डल्येनेत्यादिवाक्यमयोग्यमेव योग्यं चेत्तदा नञा द्वेधा ऽभावो बोध्यते अतः प्रकृत्यर्थाभावविशिष्टजन्यत्वस्याभावो गगने प्रतीयते गगनमन्धो न पश्यतीत्यत्र द्वेधा नञर्थबोधवत् वस्तुतस्तु हेताविति सूत्रे हेतुपदेन हेतुत्वस्य प्रतिपादनाद् हेतुत्वं तृतीयाऽर्थः न हि हेतुपदस्य ज्ञाप्यं ज्ञापकं वा शक्यं येन तत्त्वं प्रतीयेत सूत्रे लक्षणाकल्पने प्रयोजनविरहः कोशादिज्ञापकाभावेन रूढिविरहश्च परिपन्थी धूमेन वन्हिरित्यादिप्रयोगो न वृत्तिग्रन्थादौ दृष्टचर इति काशिकायां धनेन कुलं कन्यया शोकः विद्यया यश इत्युदाहृतं तत्र कुलस्य सन्तानस्य हेतुत्वं धनस्य दारपरिग्रहादिप्रयोजकतया कन्यायाः शोकहेतुत्वं विश्लेषप्रयोजकदानप्रयोजकतया विद्याया यशोहेतुत्वमध्यापनादिप्रयोजकतया बोध्यमिति फलमपीह हेतुः फलं कार्यं तथा च तृतीयार्थे हेतुत्वे यथाऽऽधेयतया तथा निरूपकतया ऽपि प्रकृत्यर्थस्यान्वयः कार्यस्य हेतुतानिरूपकत्वात् अथ वा तृतीयार्थे जन्यत्वे यथा निरूपकतया तथाऽऽधेयतयाऽपि प्रकृत्यर्थस्यान्वयः कार्यस्याधिकरणत्वात् फलं हेतुर्यथाऽध्ययनेन वसतीत्यत्राध्ययननिरूपितहेतुताकोऽध्ययनजन्यतानिरूपको वा वासो वाक्यार्थः ।"अलं महीपाल तव श्रमेणे"त्यत्र फलोद्देश्यककृतिविषयः फलाजनकोऽलंपदार्थः निष्फलस्य कृतिविषयस्य श्रमजनकत्वं

निराबाधमिति श्रमजन्यतानिरूपकत्वमलंपदार्थेऽन्वेति अतः फलहेतुतायां नामार्थान्वयान्न कारकत्वमिति एवं दुःखेनाधीतं दुःखेनार्जितं दुःखेन विद्या दुःखेन धनं श्रमेण यदुपार्जितमित्यत्र फलहेतुत्वान्वयोऽनया रीत्या बोध्यः निर्वाणेन सुगतमुपास्ते जाल्म इत्यत्र ,निर्वाणपदेस्य ल्युट्प्रत्ययस्य वा निर्वाणज्ञाने लक्षणा तस्य फलेच्छाचिकीर्षाप्रवृत्तिप्रयोजकतया सुगतोपासनजनकत्वं प्रत्यक्षोपजीवकत्वज्ञानस्य निरूपणजनकत्ववदिति नात्र फलहेतुत्वमिति । फलवाचकस्य हेतुपदसामानाधिकरण्ये षष्ठीं ज्ञापयति । "षष्ठीहेतुप्रयोगे" इति सूत्रे हेतुपदप्रयोगे षष्ठीविभक्तिर्भवतीत्यर्थकं तृतीयाऽपवादः हेतुशब्दस्य हेतुतानिरूपको जन्यताऽऽश्रयो वाऽर्थः षष्ठ्या हेतुत्वं जन्यत्वं वाऽर्थः हेतुशब्दप्रयोगे षष्ठी यद्याऽध्ययनस्य हेतोर्वसति अत्र हेतोस्तादात्म्येनाध्ययने तस्य षष्ठ्यर्थे तस्य वासेऽन्वयः तथा च हेतुतानिरूपकाभिन्नाध्ययननिरूपितहेतुताश्रयो हेतुतानिरूपकाध्ययननिष्ठजन्यतानिरूपको वा वासो वाक्यार्थः एवमन्नस्य हेतोर्भुंक्तस्य हेतोर्वा वसतीत्यादावप्यन्वयो बोध्यः हेतुपदसामानाधिकरण्यं कर्मधारयेऽपि भवति सूत्रे प्रयोगशब्दस्य सामानाधिकरण्यार्थकत्वात् तथा चाध्ययनहेतोर्वसतीत्यपि प्रमाणम् अत्राध्ययनस्य तादात्म्येन हेतुपदार्थे हेतुतानिरूपके तस्य निरूप्यतया षष्ठ्यर्थे हेतुत्वे विशेष्यविशेषणभाववैचित्र्येणान्वयो ज्ञानवतां ज्ञानमित्यत्रेव निष्प्रत्यूहः हेतुशब्दसमानाधिकरणसर्वनाम्नस्तृतीयां प्रतिप्रसवे । "सर्वनाम्नस्तृतीया चे"ति सूत्रम् । हेतुशब्दप्रयोगे सर्वनाम्न-

स्तृतीया भवति चकारात्षष्ठ्यपीत्यर्थकम् । तृतीयाषष्ठ्यो-
र्हेतुत्वमेवार्थः इयौ विभक्तिर्यथा केन हेतुना वसति कस्य
हेतोर्वसति अत्र किमः जिज्ञासाप्रकारत्वोपलक्षित-
धर्मवानर्थः जिज्ञासा तु अवगतधर्मावान्तरधर्मप्रकारक-
ज्ञानेच्छा बोध्या येन हेतुना यस्य हेतोर्वा वसति तद-
स्यातिरमणीयमध्ययनं अत्र यच्छब्दस्य समभिव्याहृत-
धर्मावान्तरधर्मवानर्थः समभिव्याहृतो धर्मः हेतुत्वं त-
दवान्तरो धर्मः अध्ययनं अत एव तच्छब्दस्याध्ययनसा-
मानाधिकरण्यं येन वसतीत्यादौ समभिव्याहृतो धातु-
रेव समभिव्याहारः सुबन्ततिङन्तपदे बोध्यः धात्वर्थं
तृतीयार्थो हेतुत्वं विशेषणतया धर्म एवेति नानुपपत्तिः
यदधीते तेन हेतुना तस्य हेतोर्वा वसति अध्यधीतेस्ते-
न हेतुना तस्य हेतोर्वा वसति वेत्यादौ तच्छब्दस्य य-
च्छब्दार्थान्वितपदान्तरार्थतावच्छेदकत्वोपलक्षितधर्मवा-
नर्थः पूर्वबुद्धिप्रकारत्वोपलक्षितधर्मवान्वाऽर्थः एवं हेतुश-
ब्दार्थस्य सर्वनामार्थे तस्य तृतीयार्थे षष्ठ्यर्थे वा हेतुत्वे
तस्य धात्वर्थेऽन्वयः पूर्वोक्तरीत्या बोध्यः । निमित्तकारण-
हेतुषु सर्वासां प्रायदर्शनमिति वार्त्तिकम् । निमित्तादि-
शब्दप्रयोगे सर्वनाम्नः सर्वा विभक्तयो भवन्तीत्यर्थकं तेन
किं निमित्तं केन निमित्तेन कस्मै निमित्ताय कस्य नि-
मित्तस्य कस्मिन् निमित्ते वा वसतीत्यत्र विभक्तीनां हे-
तुत्वमर्थोऽन्वयः पूर्ववत् एवं कारणादिशब्दप्रयोगे बोध्यं
कारणादुपादानं पर्यायग्रहणार्थं तेन किं प्रयोजनं केन
प्रयोजनेन वा वसतीत्यादि बोध्यम् । अर्थान्तरे तृ-
तीयां ज्ञापयति । "प्रसितोत्सुकाभ्यां तृतीया च" इति

सूत्रम् । प्रसितोत्सुकाभ्यां योगे तृतीया भवति चकारात्सप्तम्यपीत्यर्थकम् । प्रसित उत्सुको वा हरिणा प्रसित उत्सुको वा हरौ प्रसितः प्रसक्त आसक्तः लयवानिति यावत् लयो धारापन्नं ज्ञानं तादृगिच्छा वा उत्सुक उत्कण्ठावान् उत्कण्ठा उत्कटेच्छा एवं तृतीयासप्तम्योर्विषयत्वमर्थस्तस्य प्रतियोगितया लये उत्कण्ठायां चान्वयस्तथा च हरिविषयताप्रतियोगिलयवान् हरिविषयताप्रतियोग्युत्कण्ठावानिति चान्वयबोधः एवं केशैः केशेषु वा प्रसितः केशैः केशेषु वा उत्सुकः इति काशिकोदाहरणे अनया रीत्याऽन्वयो बोध्याः । पुनरर्थान्तरे तृतीयां ज्ञापयति । "नक्षत्रे च लुपि" इति सूत्रम् लुप्ततद्धितान्तार्थे वर्तमानात् नक्षत्रविशेषार्थकशब्दात्तृतीयासप्तम्यौ भवत इत्यर्थकं विशेषार्थकादश्विन्यादिशब्दात् तद्धिताणौ युक्तः कालोऽर्थः तद्धितस्य लोपेऽनुसन्धानेनाश्विन्यादिशब्दस्य निरूढलक्षणया वाऽश्विनीयुक्तः कालः प्रतीयते । एवं पुष्येण पुष्ये वा पायसमश्नीयात् पुष्येण पुष्ये वा चौरमस्य इत्यत्र पुष्यपदस्य पुष्ययुक्तः कालोऽर्थः तृतीयासप्तम्योरुत्पत्तिरर्थः पुष्ययुक्तकालोत्पत्तिकत्वं पायसभोजने चौरे चान्वेति । एवं "मूलेनावाहयदेवीं श्रवणेन विसर्जयेदि" त्यत्रावाहनमधिष्ठानफलको व्यापारः अधिष्ठानं संबन्धः स च संयोगादिस्तद्रहितो वा संबन्धाभावस्तद्रहितोऽनधिष्ठानं तत्फलको व्यापारो विसर्जनं मूलयुक्तकालोत्पत्तिकत्वम् आवाहने श्रवणयुक्तकालोत्पत्तिकत्वं विसर्जनेऽन्वेति अत्र साधुनिपुणेति सूत्रादनुवर्तमानतया सप्तम्या अधिकरणार्थकत्वं निर्युक्तिकं

न च तथासति साधुनिपुणसूत्रप्रतिपादिताऽर्चा सप्तमी-तृतीययोरर्थोऽस्त्विति वाच्यम् । तथासति केशैः केशेषु वा पुष्येण पुष्ये वेति दर्शितोदाहरणोऽर्चाबाधात्सप्तम्याद्यर्थानन्वयप्रसङ्गात् तस्मादन्तराऽन्तरेणयुक्ते इति सूत्रमिव प्रकृतसूत्रद्वयमपि विभक्तेर्विधायकं न तु तदर्थप्रतिपादकमिति न वाऽधिकरणार्थकत्वं सप्तम्याः सम्भवति तथासति कृत्तिकादिकृते चौरेऽपि पुष्येण पुष्ये वा चौरमस्येति प्रयोगप्रसङ्गात् चौरस्य क्षुरजन्यकेशनाशस्य कृत्तिकाकृतस्य पुष्येऽपि प्रवृत्तेरिति । सदृशशब्दादियोगे तृतीयां ज्ञापयति । "तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्" इति सूत्रं तुल्यार्थैः शब्दैर्योगे तृतीया षष्ठी च भवतीत्यर्थकं चन्द्रेण चन्द्रस्य वा तुल्यं मुखमित्यादौ-सादृश्याश्रयः तुल्यशब्दार्थः सादृश्यान्वयिप्रतियोगित्वं तृतीयाषष्ठ्योरर्थस्तत्र यदि सादृश्यमतिरिक्तः पदार्थस्तदा तत्प्रतियोगित्वमपि तथेति चन्द्रप्रतियोगिताकसादृश्याश्रयो मुखमित्यन्वयबोधः यदि च वृत्तिमद्धर्मो भेदश्च द्वयं सादृश्यं तदा तृत्यन्वयिनिरूपकत्वस्वरूपं प्रतियोगित्वं प्रतियोगितानिरूपिताऽनुयोगिता च द्वयं तृतीयाषष्ठ्योरर्थः तथा च चन्द्रप्रतियोगितानिरूपिताऽनुयोगिताकभेदाश्रयः चन्द्रनिरूपकवृत्तिमद्धर्माश्रयश्च मुखमित्यन्वयबोधः । प्रतियोग्यनुयोगिभावे तृतीया प्रकृत्यादिवार्त्तिकसिद्धाऽन्यत्रापि दृश्यते घटेन हीनं शून्यं रहितं वा भूतलमित्यादौ हीनार्थपदार्थैकदेशेऽभावे तृतीयार्थः प्रतियोग्यनुयोगिभावोऽन्वेति यत्र भेदाघटितसादृश्याश्रयस्तुल्यादिपदार्थः मुखेन तुल्यं मुखं तस्या इ-

त्यादौ तत्रापि इत्यन्वयिनिरूपकत्वार्थिका तृतीया सुखनिरूपकवृत्तिमद्धर्माश्रयो सुखमित्यन्वयबोधः तुल्यपदस्य भेदांशपरीहारेण सधर्मभावे लक्षणायाः प्रयोजनं सुखं निरुपमर्मितिबोधः । स मानसः वैयञ्जनिकः शाब्दो वेत्यन्यदेतत् । सूत्रे अतुलोपमाभ्यामिति तुलोपमाशब्दाभ्यां योगे तृतीया न भवतीत्यर्थकं तेन चन्द्रेण तुलोपमा वेति न प्रयोगः ननु "तुलां पदाऽऽरोहति दन्तवाससे"ति "स्फुटोपमं भूतिसितेन शंभुने"ति च कथं तर्हि प्रयोग इति चेत् दन्तवाससेति करणतृतीया तुलायामारोहणं तुलाप्रकारकज्ञानमेव तत्र दन्तवाससो ज्ञानं व्यापारो जन्यतयाऽन्वेति प्रतियोगिज्ञानं विना सादृश्यबुद्धेरसम्भवात् दन्तवाससो ज्ञानजन्यतुलाप्रकारकज्ञानं वाक्यार्थः शम्भुनेति हेतुतृतीया स्फुटशब्दार्थोऽभिव्यक्तस्तवाभिव्यक्तौ शम्भुहेतुकत्वमन्वेति तथा च शम्भुहेतुकाभिव्यक्तिमद्भिन्नोपमाऽऽश्रयाभिन्नं नारदमित्यन्वयबोधः शम्भोः प्रतियोगिनो ज्ञानद्वारोपमाऽभिव्यक्तिहेतुत्वं सूत्रेऽतुलेत्यादिना प्रतियोगित्वार्थकतृतीयाया एव निषेधः तुल्यशब्दपर्यायाः सदृशसंनिभसमानादयः शब्दाः एषां योगे तृतीयां ज्ञापयितुं सूत्रेऽर्थग्रहणम् । केचित्तु चन्द्रेण सहोपमीयते तुल्यते इत्यादौ सहार्थस्तदीयत्वादिः समानकालिकत्वादेरसम्भवात् अत एव "तदुत्तमाङ्गजैः समं चमर्यैव तुलाभिलाषिणे"ति श्रीहर्षः एवं चैत्रेण सह संयुज्यते समवैति वेत्यत्र निरूपकत्वं सहार्थः निर्वैरेण सह वैरायते निर्मत्सरेण सह स्पर्धत इत्यादौ विषयविषयिभावः सहार्थः सहयुक्ते तृतीयासा-

धुत्वार्थिकेत्याहुः । तन्न विचारसहं सहयुक्ततृतीयाया निरर्थकत्वे पुत्रेण सहागच्छतीत्यत्र पुत्रकर्तृत्वानवगमप्रसङ्गात् न च दर्शिस्थले तृतीया निरर्थिकेति वाच्यं तत्रापि सार्थकत्वात् तथा हि चन्द्रेण सहेत्यत्र तृतीयार्थं आधेयत्वं सहार्थोऽभेदश्चैत्रेणेत्यत्रापि तथैव निर्वैरेणेत्यत्र तृतीयार्थ एव विषयविषयिभावः सहार्थो ऽभेद एव सहपदं विना क्रियायां यत्कारकार्थिकविभक्तिर्यत्पदासज्यते सह योगे तत्कारकार्थिका वा तृतीया तत्पदाङ्गवति सहार्थविशेषणक्रिया साकाङ्क्षेति सहयुक्तसूत्रस्यार्थ इति निर्वैराय वैरायत इति सहशून्यप्रयोगे चतुर्थ्या विषयविषयिभावोऽर्थ इति सहयुक्ततृतीयायाः स एवार्थः एवं ग्रामेण सह गृहं गच्छतीत्यत्र सहपदं विना ग्रामपदाद् द्वितीयैवेत्यतः सहयुक्ते कर्मत्वार्थिकात् तृतीयेति चन्द्रेणेत्यत्राधेयत्वं कर्मत्वं प्रधाने कर्मतिङ्योगात् चैत्रेणेत्यत्र कर्तृत्वं कर्तृतिङ्योगात् विषयत्वं संप्रदानत्वमिति दर्शिस्थलेऽन्वयः स्वयमूहनीयः । मासेन यजते दर्शेन पौर्णमासेन वेत्यादौ मासदस्य मासनाशोऽर्थः तस्य कालविधयाऽङ्गत्वेन प्रयोजकतया यागहेतुत्वमिति मासेनेति हेतुतृतीया अथवा प्रकृत्यादिवार्त्तिकेनाधेयत्वार्थिकातृतीयेति ।

इति विभक्त्यर्थनिर्णयेऽकारकतृतीयार्थनिर्णयः ।

इति तृतीयाविवरणं समाप्तम् ।



अथ चतुर्थी ।

ङेभ्यांभ्यसिति त्रयः प्रत्ययाः । तत्र सुमनसे ददातीत्यादौ श्रूयमाणत्वादेकारस्य तत्त्वेन भ्यामित्यस्य भ्यास्त्वेन भ्यसो भ्यस्त्वेन वाचकत्वम् । ङकारोऽनुबन्धः क्वचिदप्यश्रूयमाणत्वान्न वाचकताकुक्षिप्रविष्ट इति अनुशासनसिद्धाश्चतुर्थ्या अर्थाः अनुशासनं च "चतुर्थी संप्रदान" इति । तत्र संप्रदानं संप्रदानत्वं वार्थ इति वक्ष्यते । अत्राप्यनभिहिते इत्यधिकारस्तेन दानीयो ब्राह्मण इत्यादौ न चतुर्थी । संप्रदानपदसंकेतग्राहकं सूत्रम् । "कर्मणा यमभिप्रैति स संप्रदानमि"ति । कर्मणा करणभूतेन कर्ता यमर्थमभिप्रैति तत्कारकं संप्रदानसंज्ञं भवतीत्यर्थकम । कर्मणा धात्वर्थफलवता गवादिना स्वामित्वेनोपाध्यायादेरभिप्रायविषयीकरणात् उपाध्यायादेः संप्रदानत्वं निरपवादमित्युध्यायाय गां ददातीत्युपपद्यते । "क्रियाग्रहणमपि कर्तव्यमि"ति वार्त्तिकम् । क्रियया ऽपि यमभिप्रैति स संप्रदानमित्यर्थकं क्रियापदं चात्र क्रियाप्रयोज्यफलपरं फलं च धात्वर्थभिन्नं बोध्यम् अत एव श्राद्धाय निगर्हते युद्धाय संनह्यते इत्युपपद्यते । अत्र निगर्हतेर्गर्हामात्रमर्थः प्रयोज्यफलं विषयत्वं संनह्यतेः संनाहः सज्जीभाव एवार्थः प्रयोज्यफलं युद्धे प्रवृत्तिः विरहाविषयत्वं श्राद्धे संनहनानन्तरप्रवृत्तिर्युद्धे इति श्राद्धयुद्धयोः संप्रदानत्वमिति सूत्रे धात्वर्थफलवतः कर्मणः संबन्धितया संप्रदानत्वं वार्त्तिके धात्वर्थान्यफलसंबन्धितया संप्रदानत्वमिति सूत्रवार्त्तिकयोर्नैकतरवैयर्थ्यं वस्तुतस्तु सूत्रे कर्मपदं क्रियापरं क्रिया च

फलव्यापारोभयरूपा व्यापारमात्ररूपा च बोध्या । तत्र धात्वर्थफलसंबन्धिनया धात्वर्थान्यफलेन संबन्धेन व्यापारसंबन्धितया चाभिप्रायविषयत्वं संप्रदानत्वमिति । अत एव पत्ये शेते प्रौढवधूरित्यत्र पतिप्रीतिः शयनफलं प्रीत्या संबन्धेन शयनसंबन्धितयाऽभिप्रायविषयत्वं पत्युः संप्रदानत्वमिति तत्रेदृशं संप्रदानत्वं न चतुर्थ्यर्थः व्यापारादीनामन्यलभ्यत्वात् किं त्वन्योदृशमेव तथा हि विप्राय गां ददातीत्यत्र ददातेः स्वत्वध्वंसानुकूलो व्यापारोऽर्थः उत्सर्गेऽपि ददातिर्मुख्य एव अत एव गोमिथुनमादाय कन्यां ददाति पितेति दीनारमादाय मौक्तिकं ददाति वणिगिति विक्रियेऽपि ददाति प्रयोगः व्यापारस्त्यागः स च न ममेत्याकार उपेक्षासाधारणेन रूपेण स्वत्वनाशं प्रति जनको न स्वत्वं प्रति प्रमाणाभावात् ।

सप्त वित्तागमा धर्म्या लाभो दायः क्रयो जयः ।
प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एवच ॥

इत्यत्र "याजनाध्यापनप्रतिग्रहैर्वाच्छ्रुतौ धनमर्जयेदि" त्यत्र च प्रतिग्रहस्यैव स्वत्वोपायत्वेनाभिधानात् प्रतिग्रहोऽपोदं ममेत्याकारोऽनुमितिस्वरूपः समित्कुशाद्युपादानसाधारणेन रूपेण स्वत्वं प्रति जनकस्तत्पुरुषीयत्वं प्रति तत्पुरुषस्वीकारस्य विशेष्यतया हेतुत्वात् तथा च स्वत्वमात्रं चतुर्थ्यर्थस्तत्र प्रकृत्यर्थस्य निरूपकतया स्वत्वस्य जनकतया स्वत्वध्वंसेऽन्वयाद्विप्राय गां ददाति राजेत्यत्र विप्रनिरूपितस्वत्वजनकगोनिष्ठस्वत्वध्वंसजनकत्यागाश्रयो राजेत्यन्वयबोधः व्यधिकरणस्वत्वं प्रति गोनिष्ठस्वत्वध्वंसस्याजनक-

त्वात् स्वत्वे गोवृत्तित्वमर्थाल्लभ्यते तेन पुत्रस्य राज्यकामनया गवि पुत्राय गां ददातीति न प्रयोगः इति वदन्ति । तन्न विचारसहं स्वत्वध्वंसानुकूलव्यापारस्य ददात्यर्थत्वे उपेक्षायामपि ददाति प्रयोगापत्तेः प्रतिग्रहस्य समित्कुशादुपादानसाधारणेन रूपेण स्वत्वजनकत्वेनोद्देश्येन त्यक्तेऽन्यस्योपादाने स्वत्वोत्पत्तिप्रसङ्गात् उपादानमात्रस्य स्वत्वजनकत्वे नाष्टिकहिरण्यादावप्युपादानमात्रे स्वत्वोत्पत्तिप्रसङ्गात् तस्माद्दानमेव स्वत्वकारणम् । अत एवान्योद्देशेन त्यक्तेऽन्यस्योपादाने न स्वत्वप्रसङ्गः वचने प्रतिग्रहस्य गणनं दानोपलक्षकमेव उपादानेन स्वत्वे जननीये समित्कुशादीनां तादात्म्यमिव दानमपि विशेषसहकारि तथा च तत्पुरुषीयस्वत्वप्रकारतानिरूपितविशेष्यतासंसर्गेण त्यागस्तत्पुरुषस्वत्वं प्रति कारणं स्वत्वध्वंसो व्यापारः स्वत्वजनकत्यागो ददात्यर्थस्तत्र ब्राह्मणाय गां ददातीत्यत्र निरूपकत्वं स्वामित्वं वा चतुर्थ्यर्थः ब्राह्मणनिरूपितस्य ब्राह्मणनिष्ठस्वामित्वनिरूपितस्य वा स्वत्वस्य स्वत्वध्वंसव्यापारेण जनकस्त्यागो वाक्यार्थः अथ वा स्वत्वोद्देश्यकस्त्यागे ददात्यर्थः चतुर्थ्याः पूर्वोक्त एवार्थः अत एव संप्रदानास्वीकृतस्याप्युत्सर्गे स्वत्वानुपहिते च ददातिप्रयोगोऽप्युपपद्यते यत्तु उत्सर्गेण समनन्तरमेव संप्रदानस्वत्वं जन्यते न चैवमस्वीकृतेऽपि संप्रदानस्वत्वापत्तिरिति वाच्यम्। दानेन स्वत्वजनने वैमत्यस्य प्रतिबन्धकत्वात् अस्वीकृते तत्सत्त्वात् अत एव तदुद्देशेनोत्सृष्टे तस्मिन्प्रतिगृह्यैव मृते तत्पुत्रादीनां स्वत्वोत्पत्तिरुपपद्यते तद्यक्तिमरणजन्यस्व-

त्वध्वंसद्वारेण तद्भक्तिमरणस्य वा तत्पुत्रस्वत्वं प्रति जनकत्वात् एवमपुत्रव्यक्तिमरणजन्यस्वत्वध्वंसस्य तत्पत्नीस्वत्वं प्रति जनकत्वम् "अपुत्रस्य धनं पत्न्यभिगामी"ति विष्णुस्मरणात् । ऋतुमवेक्ष्य मृते पितरि जातमपि स्त्रीस्वत्वं पुत्रोत्पत्त्या नाश्यते स्वजन्मजनितमातृस्वत्वनाशः मातृस्वत्वनाशद्वारेण स्वजन्म वा स्वस्वत्वं प्रति कारणं पुत्रोत्पत्तिपूर्वं माता विक्रीते न पुत्रस्वत्वं जन्मजनितमातृस्वत्वनाशविरहादित्यवश्यमुत्सर्गेणाव्यवधानेन पुंसो व्यवहितस्यापि स्वत्वं जन्यत इति मतं तन्न एवमपि मृतं प्रोषितं वोद्दिश्य त्यक्ते तत्पुत्रस्य स्वत्वानुत्पादप्रसङ्गात् उत्सर्गे व्यवस्थान्तरस्यावश्यमाश्रयणीयत्वात् । अन्यथा ब्राह्मणमात्रमुद्दिश्य त्यक्ते तुलापुरुषादौ ब्राह्मणसामान्यस्वत्वप्रसङ्गात् परस्वे दातुर्विभज्य वितरणेऽनधिकारप्रसङ्गाच्च तस्मादुत्सर्गेण स्वत्वे जननीये प्रतिपादनं सहकारीति नाव्यवहितमेव स्वत्वोत्पत्तिरिति इत्थं च स्वत्वनिरूपकत्वं संप्रदानत्वं तत्र स्वत्वं ददात्यर्थान्तर्गतं निरूपकत्वं चतुर्थ्यर्थ इत्येवं संप्रदानमित्यन्वर्थसंज्ञा अत एव संप्रदानमित्यन्वर्थसंज्ञाबलाद्दानस्य कर्मणेति विज्ञायत इति काशिकाद्वृत्तिरिति प्राञ्चः । वस्तुतस्तु स्वत्वध्वंसजनकः स्वत्वोद्देश्यकस्त्यागो ददात्यर्थः स च त्यागो नेदं मम किं त्वस्य स्यादित्याकारस्तादृशत्यागरूपेच्छाविषयत्वं संप्रदानत्वमत एव सूत्रे अभिप्रैतीत्यत्र दानस्य कर्मणेतिशेषपूरणं विषयत्वमुद्देश्यतावच्छेदकत्वं तदेव चतुर्थ्यर्थ इच्छान्वयिब्राह्मणस्य स्यादित्यत्र षष्ठ्यर्थस्वत्वनिष्ठोद्देश्यताश्रय अवच्छेद-

कत्वस्य ब्राह्मणे सत्त्वात् तत्रोद्देश्यतावच्छेदकतायाः स्वनिरूपितस्वत्वनिष्ठोद्देश्यताप्रतियोगित्वेन संबन्धेन त्यागरूपेच्छायामन्वयस्तत्र लाघवादवच्छेदकत्वमात्रं चतुर्थ्यर्थस्तच्च दर्शितसंबन्धेन त्यागेऽन्वेति । एवं ब्राह्मणाय गां ददाति राजेत्यत्र ब्राह्मणनिष्ठावच्छेदकताकगोवृत्तिस्वत्वनिष्ठोद्देश्यताकस्वत्वध्वंसजनकत्यागाश्रयो राजेत्यन्वयबोधः वार्त्तिकेन तु धात्वर्थान्यफलसंबन्धितया अभिप्रेतत्वं संप्रदानत्वं ज्ञापितं तत्र वृक्षायोदकं सिञ्चतीत्यत्र पुष्टीच्छाप्रयोज्योऽपि वृक्षे सेकः तत्र धात्वर्थे पुष्टिविषयत्वमन्वेति न त्विच्छायामित्यभिप्रायो न चतुर्थ्यर्थोऽभिप्रैतीति स्वरूपकीर्तनमात्रं यदि च ज्ञानेच्छे व्यापारतया न धात्वर्थः किं तु तत्प्रयोज्यः प्रयत्नस्तदा वृक्षायेत्यत्र चतुर्थ्यर्थपुष्टिरुद्देश्यतया धात्वर्थे द्रवद्रव्यप्रतियोगिकसंयोगानुकूलव्यापारे प्रयत्नेऽन्वेति पुष्टिरुपचयः स च वृक्षावयवनिष्ठारब्धकसंयोगसामानाधिकरण्यं तथा च वृक्षसंबन्धिपुष्ट्युद्देश्यकः जलवृत्तिद्रवद्रव्यप्रतियोगिकसंयोगानुकूलः प्रयत्नो वाक्यार्थः एवं यदग्नये च प्रजापतये च सायमग्निहोत्रं जुहोतीत्यत्र जुहोत्यर्थे वह्निसंयोगानुकूलप्रक्षेपस्य समानकालिके त्यागेऽनुकूलप्रयत्ने वा चतुर्थ्यर्थस्यान्वयः तथावच्छेदकत्वस्य चतुर्थ्यर्थस्य यत्पदार्थनिष्ठस्वत्वोद्देश्यताद्वारा त्यागेऽन्वयः प्रीतेर्वा चतुर्थ्यर्थस्योद्देश्यतया प्रयत्ने प्रयत्नत्यागैकतरान्वयः विप्रायान्नं निर्वपतीत्यत्र धात्वर्थेऽधिश्रितपात्रप्रक्षेपानुकूले प्रयत्ने विप्रविशेषितस्य चतुर्थ्यर्थस्य भोजनस्योद्देश्यतयाऽन्वयः खण्डिकोपाध्यायः शिष्याय चपेटां ददाती-

त्वत्ताहन्यमानः करश्चपेटार्थः अभिघातफलकप्रयत्नो ददात्यर्थः तत्र प्रयत्ने चतुर्थ्यर्थस्य व्यधायाः शिष्यविशेषिताया अन्वयः इत्थं दर्शितानां चतुर्थ्यर्थानां सन्दर्शितेन संसर्गेण धात्वर्थ एवान्वय इति कारकत्वं निष्प्रत्यूहमिति शाब्दिकास्तु ददातेः स्वत्वध्वंसः स्वत्वं च फलविधयार्थः त्यागो व्यापारविधया फलद्वयमेकेन कर्मणा साकाङ्क्षमिति गवादेः कर्मणस्तत्रान्वयः तेन पुत्रराज्यकामनया दीयमानायां गवि राज्यं ददातीति न प्रयोगः चतुर्थी तु धात्वर्थफलान्वयिप्रीत्यादिफलान्तरमभिधत्ते तेन ब्राह्मणाय गां ददातीत्यत्र गोदृत्तेः ब्राह्मणप्रीतिजनकस्वत्वस्य स्वध्वंसस्य चानुकूलत्यागो वाक्यार्थः प्रीतिमजनयत्यपि स्वत्वे यदि ददातीति प्रयोगस्तदा प्रीतीच्छा चतुर्थ्यर्थः सा स्वोद्देश्यप्रीतिजनकत्वेन संबन्धेन धात्वर्थफले स्वत्वेऽन्वेति प्रीतीच्छायां प्रकृत्यर्थस्य ब्राह्मणादेः प्रीतिनिष्ठविशेष्यतानिरूपितसमवेतत्वनिष्ठप्रकारतावच्छेदकतया प्रीतिनिष्ठोद्देश्यतावच्छेदकतया संबन्धेनान्वयः अत एव कर्मणा यमभिप्रैतीति सूत्रेण कर्मफलगोचराभिप्राय एव चतुर्थ्यर्थतया सूचितः चतुर्थ्यर्थस्य प्रीत्यादेर्जनकत्वेन तदिच्छाया वा स्वोद्देश्यजनकत्वेन संबन्धेन क्व चिद्धात्वर्थफलेऽन्वयः यथा ब्राह्मणाय गां ददातीत्यत्र यथा वा यदग्नये जुहोतीत्यत्र अग्निप्रीतेस्तदिच्छाया वा होमफले वह्निसंयोगे वृक्षायोदकं सिञ्चतीत्यत्र वृक्षपुष्टेस्तदिच्छाया वा जलस्य संयोगे विप्रायान्नं निर्वपतीत्यत्र विप्रभोजनस्य तदिच्छाया वाऽन्नविक्लित्तौ खण्डकोपाध्यायः शिष्याय चपेटां ददातीत्यत्र

शिष्यव्यथायास्तदिच्छाया वाऽभिघाते नयतिना फल-
तया संयोगाविवक्षायां कर्मानुकूलव्यापारेऽभिहिते अ-
जां ग्रामाय नयतीत्यत्र ग्रामसंयोगस्य तदिच्छाया वा
कर्मणि यत्र तु संयोगोऽपि फलतया विवक्षितस्तत्र परया
कर्मसंज्ञया संप्रदानसंज्ञाबाधात् अजां ग्रामं नयतीत्येव
प्रमाणमेवं गमनजन्यसंयोगस्य गमिकर्तरि सत्वेऽपि प-
रया कर्तृसंज्ञया संप्रदानसंज्ञाबाधान्न कर्तरि चतुर्थीति
क्व चिच्चतुर्थ्यर्थः प्रधानक्रियायामन्वेति यथात्मने वै पुत्रः
प्रियो भवतीत्यत्र चतुर्थ्यर्थस्यात्मप्रीतेस्तदिच्छाया वा
पुत्रप्रियभावे पत्ये शेते प्रौढवधूरित्यत्र पतिप्रीतेस्तदि-
च्छाया वा शयने गमेः स्यन्दरूपव्यापारमात्रार्थकत्वे ग्रा-
माय गच्छतीत्यत्र ग्रामसंयोगस्य तदिच्छाया वा जनक-
त्वेन स्वोद्देश्यजनकत्वेन वाऽन्वयः अतो गत्यर्थकर्मणि
विभाषा चतुर्थीविधिः प्रत्याख्येयः शुद्धस्यन्दार्थकगमेर्योगे
संयोगस्य चतुर्थ्यर्थतया ग्रामाय गच्छतीतिप्रयोगस्या-
व्युपपन्नत्वात् यत्रापि धातोर्व्यापारमात्रमर्थः फलाविव-
क्षा वा तत्र संप्रदानतासम्भवे वा ग्रामाय चलति स्यन्द-
ते वा तण्डुलायौदनाय वा पचतीतिप्रयोगोऽपीष्ट एव
संयोगस्य विक्लित्त्यादेः फलस्य चतुर्थ्या प्रतिपादनादिति
वदन्ति । तन्न विचारसहं तथा हि ददातियोगे प्रीति-
र्न चतुर्थ्यर्थः प्रीत्यजनकेऽपि दाने चतुर्थीप्रयोगात् नापि
प्रीतीच्छा गौरवात् दर्शितसंबन्धेन तस्याप्यनन्वयात् न
च प्रीतिजनकत्वेच्छा चतुर्थ्यर्थस्तस्याः प्रीतिविषयतानि-
रूपितजनकत्वविषयतानिरूपितविषयतया ददातिफले
स्वत्वेऽन्वय इति वाच्यम् । अतिगौरवात् पत्नीप्रीतिज-

नके श्वशुराय दाने पत्न्यै ददातीतिप्रयोगापत्तेश्च एवं जुहोतियोगे कृत्तिकादेवताकहोमे वह्निप्रीतिजनके वह्नये जुहोतीतिप्रयोगापत्तेः विष्णुप्रीत्यर्थं क्रियमाणे दाने होमे च विष्णवे ददाति जुहोति वेति प्रयोगापत्तेश्च न च तवापि जुहोत्यर्थप्रयत्ने विष्णुप्रीतेरुद्देश्यत्वाज्जुहोतियोगे विष्णवे जुहोतीतिप्रयोगापत्तिरिति वाच्यम् । यतो यद्देवताको होमस्तत्प्रीतिरेव जुहोत्यर्थप्रयत्नस्योद्देश्येति विष्णुप्रीतिस्तु होमदेवताप्रीतेः फलमिति विष्णुप्रीतीच्छाया दर्शितविषयतासंबन्धेन ददातिफले गोनिष्ठविप्रस्वत्वे जुहोतिफले हविर्निष्ठवह्निसंयोगे सत्त्वात् दर्शितप्रयोगो दुर्वार इति न च संबन्धघटकविषयताधिकरणं जनकत्वं साक्षाज्जनकत्वं विवक्षितमिति न दर्शितप्रयोग इति वाच्यम् । तथासति गोनिष्ठविप्रस्वत्वमपि विप्रीयस्य प्रीतिपदार्थस्य सुखस्य न साक्षाज्जनकमिति विप्राय गां ददातीतिप्रयोगानापत्तेः गोनिष्ठस्वत्वस्य दुग्धादानादिद्वारा विप्रसुखजनकत्वात् । एवं वृक्षायोदकमित्यत्रापि पुष्टीच्छा न चतुर्थ्यर्थः गौरवात् वृक्षपुष्टीच्छया क्रियमाणे कूपखनने जलोत्पादनेन वा वृक्षाय कूपं खनति जलमुत्पादयति वेतिप्रयोगापत्तेश्च आत्मने वै पुत्रः प्रियो भवतीत्यत्रात्मप्रीतीच्छा न चतुर्थ्यर्थः पुत्रप्रियभावस्यात्मप्रीतीच्छाऽप्रयोज्यत्वात् नाप्यात्मप्रीतिर्भवत्यर्थानन्वयात् तस्माद्यथात्मने वै पुत्रः प्रिय इत्यत्र क्रियाशून्यवाक्ये तादर्थ्यचतुर्थ्या उपकारकत्वमर्थः प्रियपुत्रेऽन्वेति तथा दर्शितवाक्येऽपि पत्ये शेते इत्यत्र पतिप्रीतीच्छा न चतुर्थ्यर्थः गौरवात् पतिप्रीतीच्छया क्रि-

थमाणो शयनानुकूलपल्यङ्कस्थापने पत्ये पल्यङ्कं स्थापयतीति प्रयोगापत्तेः तस्माद्यथा दृक्षपुष्टिः सेचनप्रयत्ने तथा पतिप्रीतिरपि शयनप्रयत्ने उद्देश्यित्वेनान्वेति अतः पुष्टिप्रीत्योरजनकयोः सेचनशयनयोर्न दर्शितप्रयोगानुपपत्तिः अजां ग्रामाय नयतीत्यत्र ग्रामसंयोगो न चतुर्थ्यर्थः ग्रामसंयोगाजनके नयत्यर्थे दर्शितप्रयोगानुपपत्तेः नापि तदिच्छा ग्रामसंयोगेच्छया अजाग्रहणे अजां ग्रामाय गृह्णातीति प्रयोगापत्तेर्गौरवाच्च गमेः शुद्धस्यन्दार्थकत्वे संयोगस्तदिच्छा वा चतुर्थ्यर्थस्तत एव ग्रामाय गच्छतीति प्रयोगोपपत्तिरिति गत्यर्थकर्मणि चतुर्थीविधिः प्रत्याख्येय इत्यपि न युक्तं फलस्य संयोगस्य धातुलभ्यस्य चतुर्थ्या प्रतिपादनासंभवात् न च फलाविवक्षायां प्रतिपादनसम्भव इति वाच्यम् । तथा सति धारणसंयोगाविवक्षायां दण्डाय दधातीतिप्रयोगापत्तेः ग्रामाय चलति स्पन्दते चेत्यत्र चलतिस्पन्दत्योः स्पन्दमात्रार्थकतया संयोगरूपफलावाचकत्वात् चतुर्थ्या संयोगस्वरूपफलप्रतिपादनसम्भव इति ग्रामस्य धात्वर्थान्यफलसंबन्धितयाऽभिप्रेततया सम्भवत्येव संप्रदानत्वं तण्डुलायोदनाय वा पचतीत्यपप्रयोग एव यदि च प्रयोगस्तदा तण्डुलोपकारकत्वस्योदनजनकत्वस्य चतुर्थ्या प्रतिपादनेनेयं तादर्थ्यचतुर्थीति यदि च दण्डाय दधातीत्यादिबहुतरापप्रयोगोच्छेदापत्तेः धातोः फलाविवक्षायां कर्मणि संप्रदानचतुर्थीति मन्यते तदाऽपि गत्यर्थकर्मणि चतुर्थीविधेर्न प्रत्यख्यानं यतः चतुर्थी द्वितीयया सह वैकल्पिको ग्रामादिप्रकृत्यर्थविशेषितमाधेयत्वं सं-

योगस्वरूपफलत्वान्वय्यभिधत्ते संप्रदानचतुर्थी तु फलमेवाभिधत्ते न तु फलान्वय्याधेयत्वमिति गत्यर्थकर्मणीतिसूत्रव्याख्याने वक्ष्यते नापि संयोगेच्छा चतुर्थ्यर्थस्तथा सति ग्रामसंयोगेच्छया यानारोहणे ग्रामाय गच्छतीतिप्रयोगापत्तेः किं च संयोगेच्छार्थकत्वेऽपि चतुर्थ्या न कर्मत्वार्थकत्वं येन प्रत्याख्यानं स्यादत एव गत्यर्थकर्मणीतिसूत्रे कर्मणीत्युक्तमित्यग्रे व्यक्तीभविष्यतीति । देवदत्ताय रोचते मोदक इत्यादौ देवदत्तादेः संप्रदानत्वं ज्ञापयति । "रुच्यर्थानां प्रीयमाण"इति सूत्रम् । रुच्यर्थानां योगे प्रीयमाणो योऽर्थस्तत्कारकं संप्रदानसंज्ञकं भवतीत्यर्थकं विषयकर्तृकोऽभिलाषो रुचिः तदर्थाः रुच्यर्थाः अत एवान्यकर्तृकोऽभिलाषो रुचिरिति काशिका प्रीयमाणः रुचिकर्तृविषयप्रीतिमान् भवति हि रोचते मोदक इत्यत्र रुचिकर्ता विषयो मोदकस्तत्प्रीतिमान् देवदत्त इति तस्य संप्रदानत्वं प्रीतिश्चात्र सुखत्वेन सुखजनकत्वे न वा अभिलाषस्तद्वान् तत्समवायी तथा चायमेवाभिलाषो रुचिस्तत्समवायित्वं समवेतत्वं वा चतुर्थ्यर्थः देवदत्ताय रोचते मोदक इत्यत्र देवदत्तसमवेताभिलाषविषयो मोदक इत्यन्वयबोध इति संप्रदायः । वस्तुतस्तु रुचिरुत्कटेच्छा उत्कटत्वं च द्वेषप्रतिबन्धकतावच्छेदको जातिविशेष इत्यन्यत्र विस्तरः । रुच्यर्थाः रोचत्यादयः तदर्थकर्तृत्वं विषयस्येति रोचते इत्यादावाख्यातस्य विषयत्वमर्थ इति प्रीयमाणशब्दार्थः प्रीतिमान् प्रीतिः सुखं तथा च चतुर्थ्यर्थः सुखं तस्य सामानाधिकरण्योद्देश्यित्वाभ्यां संबन्धा-

र्थां रुचावन्वयः सामानाधिकरण्यनिवेशात् देवदत्तस्यान्यदीयसुखेच्छाविषय मोदके न तथाप्रयोगः। एवं देवदत्ताय रोचते मोदक इत्यत्र देवदत्तसुखस्य समानाधिकरणोद्देश्यिनी योत्कटेच्छा तद्विषयो मोदक इत्यन्वयबोधः। अत एव सूत्रे प्रीयमाणशब्दोपादानमर्थवदन्यथा रुच्यर्थानां रुचिमानित्येव मुनिः सूत्रयेत्तावतैव समवायित्वस्य समेवतत्वस्य वा चतुर्थ्यर्थता सम्भवादिति प्रीयमाणग्रहणं तु देवदत्ताय रोचते मोदकः पथि इत्यत्र पथः संप्रदानतानिषेधार्थमिति। कतिपयधातुयोगे क्ष्मीप्स्यमानस्य संप्रदानता ज्ञापयति। "श्लाघन्हुङ्स्थाशपां क्ष्मीप्स्यमानः" इति सूत्रं श्लाघिर्ह्नुतिस्थितिः शपिस्वामीषां धातूनां योगे क्ष्मीप्स्यमानो योऽर्थस्तत्कारकसंज्ञं भवतीत्यर्थकं क्ष्मीप्स्यमानो ज्ञापयितुमभिप्रेत इति काशिका क्ष्मीप्स्यमानग्रहणं देवदत्ताय श्लाघते पथि इत्यत्र पथः संप्रदानतानिषेधार्थमिति अत्र श्लाघेरुत्कर्षप्रकारकप्रतिपत्त्यनुकूलो व्यापारः शब्दो वाऽर्थः ह्नुतेरदर्शनानुकूलो व्यापारो र्थस्तिष्ठतेस्तङ्लस्य प्रकाशानुकूलो व्यापारः संमुखावस्थानादिरर्थः शपेरपकर्षप्रतिपत्त्यनुकूलो व्यापारः शब्दो वाऽर्थः नरपतये श्लाघते इत्यत्रोत्कर्षप्रकारकप्रतिपत्तिस्वरूपे फले विशेष्यत्वस्वरूपे फले विशेष्यत्वस्वरूपं विशेष्यतासंबन्धावच्छिन्नाधेयत्वस्वरूपं वा कर्मत्वं वा चतुर्थ्यर्थोऽन्वेति जाराय निह्नुते इत्यत्रादर्शने विषयतासंबन्धावच्छिन्नप्रतियोगिताके चाक्षुषप्रतियोगिके ज्ञानसामान्यप्रतियोगिके वा

अभावे चाक्षुषविषयत्वाभावे वा फले विशेषणतासंबन्धावच्छिन्नाधेयत्वस्वरूपं कर्मत्वमन्वेति जन्मारभ्ये कस्मिंश्चिते इत्यत्र प्रकाशे ज्ञानस्वरूपे फले समवेतत्वस्वरूपं कर्मत्वमन्वेति शक्राय शपते इत्यत्रापकर्षप्रकारकप्रतिपत्तौ फले विशेष्यत्वं विशेष्यतासंबन्धावच्छिन्नाधेयत्वं वा कर्मत्वमन्वेति इति कर्मसंज्ञापवादार्थं संप्रदानसंज्ञाविधानमिति वदन्ति । वस्तुतस्तु सूत्रे ज्ञीप्स्यमानग्रहणात् ज्ञानेच्छा चतुर्थ्यर्थो ज्ञायते तत्र ज्ञानस्य धातुना लाभे सतीच्छामात्रं चतुर्थ्यर्थः अन्यथा "संप्रदाने चतुर्थी"ति सूत्रानन्तरं श्लाट्यङ्क्रुङ्स्थाशपां कर्मणीत्येव मुनिः सूत्रयेत् ज्ञीप्स्यमानशब्दवैयर्थ्यं च स्यात् किं च कर्मसंज्ञापवादाभ्युपगमे "अपन्हुवानस्य जनाय यन्निजामधीरतामस्य कृतं स्मरेण यदी"त्यादौ कर्मप्रत्ययद्वितीयादेरनुपपत्तिप्रसङ्गः देवदत्ताय श्लाघत इत्यादौ देवदत्तादेः श्लाघतिकर्मत्वेऽपि निरवकाशया संप्रदानसंज्ञया कर्मसंज्ञाबाधात् ज्ञीप्स्यमानभेदस्य द्वितीयार्थस्यानन्वयात् वा श्लाघतियोगे न द्वितीयादिकर्मप्रत्ययः किं तु ज्ञीप्स्यमानार्थिका चतुर्थी तच्चेच्छा चतुर्थ्यर्थः अत एव देवदत्ताय श्लाघते देवदत्तं श्लाघमानस्तां श्लाघां तमेव ज्ञापयितुमिच्छतीत्यर्थ इति काशिका । तच्चेच्छायां उत्कर्षप्रकारकज्ञानरूपफलस्योद्देश्यतया देवदत्तादेः प्रकृत्यर्थस्य समवेतत्वसंसर्गावच्छिन्नायास्तादृशज्ञानरूपफलनिष्ठोद्देश्यतावच्छेदकतायाः प्रतियोगित्वेन संबन्धेन तादृशज्ञाननिष्ठविशेष्यितानिष्ठोद्देश्यतावच्छेदकतानिरूपितावच्छेदकतायाः प्रतियोगित्वेन संबन्धेन चा-

निह्नपितावच्छेदकतायाः प्रतियोगित्वेन संबन्धेन चान्वयः देवदत्तस्य देवदत्तविशेष्यताकोत्कर्षप्रकारकज्ञानं भवत्विच्छायां ज्ञाननिष्ठोद्देश्यतानिह्नपितसमवेतत्वसंसर्गावच्छिन्नदेवदत्तनिष्ठावच्छेदकताप्रतियोगित्वं तथाविधोद्देश्यतानिह्नपितविशेष्यतानिष्ठावच्छेदकतानिह्नपितदेवदत्तनिष्ठावच्छेदकताप्रतियोगित्वं चेति संबन्धद्वयं निराबाधमिति । अन्यविशेष्यकोत्कर्षप्रकारकदेवदत्तज्ञानस्य देवदत्तविशेष्यकोत्कर्षप्रकारकान्यदीयज्ञानस्य चेच्छायां न तथाप्रयोगः संबन्धद्वयेनेच्छायामन्वयाभावात् यत्र च श्लाघतिः सकर्मकस्तेन पण्डिताय नरपतिः श्लाघत इति प्रयोगस्तत्र समवेतत्वसंसर्गावच्छिन्नतादृशज्ञानोद्देश्यतावच्छेदकताप्रतियोगित्वेन संबन्धेनैव चतुर्थ्यर्थेच्छायां प्रकृत्यर्थस्य तादृशज्ञानरूपफले प्रकृत्यर्थविशेषितस्य द्वितीयार्थस्य विशेष्यत्वस्य विशेष्यत्वसंबन्धावच्छिन्नाधेयत्वस्य वाऽन्वय इति एवं देवदत्ताय निन्हुते इत्यादौ श्रुतिफले ऽदर्शने चतुर्थ्यर्थस्येच्छाया इच्छायां तु विशेषणतासंबन्धावच्छिन्नाधेयत्वसंसर्गावच्छिन्नाया अदर्शननिष्ठोद्देश्यतावच्छेदकतायाः प्रतियोगित्वेन संबन्धेन प्रकृत्यर्थस्यान्वयः अधीरतां जनाय निन्हुत इत्यादर्शनप्रतियोगिनि दर्शने फलैकदेशे निन्हवे दर्शनमभावश्चेत्युभयार्थकत्वे फले दर्शने द्वितीयार्थस्य विशेष्यत्वस्य तत्संबन्धावच्छिन्नाधेयत्वस्य वाऽन्वयः वस्तुतः सतोऽसत्त्वेन प्रतिपादनं निन्हुतिरतो गगनं निन्हुत इति न प्रयोगः तथा च सत्त्वप्रकारकप्रतिपत्त्यनुकूलो व्यापारो न्हुतेरर्थः अत एव श्रौष्यमानता चतुर्थीप्रकृत्यर्थस्य संपद्यते एव

मसत्त्वप्रकारकप्रतिपत्तौ पूर्ववत् चतुर्थ्यर्थस्य द्वितीयार्थस्य चान्वयः अनिष्टवत्ताप्रतिपत्त्यनुकूलो व्यापारः शपेरर्थस्तत्रानिष्टवतः प्रतिपाद्यस्य प्रतिपत्तीच्छायां संप्रदानसंज्ञया कर्मसंज्ञाबाधात् क्ष्नीप्स्यमानभेदस्य द्वितीयार्थस्यानन्वयाद्वा न द्वितीया यथा शक्राय शपते दुर्वासा इत्यत्र चतुर्थ्यर्थस्येच्छाया अनिष्टप्रतिपत्ताविच्छायां प्रकृत्यर्थस्य च पूर्ववदन्वयः यत्र च शापकर्तुः शापकर्मणि न क्ष्नीप्सा तत्र द्वितीया यथा"मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप से"ति कर्मणस्य क्ष्नीप्स्यमानतायां चतुर्थीप्रयोगोऽपीष्ट एव यथा पित्रे पुत्रं शपते गुरवे शिष्यं शपत इति यत्र च शुद्ध्यशुद्धिज्ञानं शपरेर्थस्तत्र न चतुर्थी न वा द्वितीया शुद्ध्यशुद्धिकर्मावरोधो द्वितीयाबाधकः अनिष्टप्रतिपत्त्यर्थकस्यैव क्ष्नीप्स्यमानतायामेव चतुर्थ्याः साधुत्वमिति किं तु हेतुत्वार्थिका तृतीया यथा पुत्रेण दारैर्वा शपतीति अत एव ।

आचम्य चाम्बु तृषितः करकोशपेयं
भावानुरक्तललनासुरतैः शपेयम् ।
जीयेय येन कविना यमकैः परेण
तस्मै वहेयमुदकं घटखर्परेण ॥

इति घटखर्परः । शुद्धाशुद्धी सत्यासत्यप्रतिज्ञे बोध्ये तदन्यस्य तिष्ठतेः स्वप्रकाशानुकूलोऽव्यवहितावस्थानादिरर्थः प्रकाशः चाक्षुषं ज्ञानसामान्यं वेत्यन्यदेतत् । तत्र क्ष्नीप्स्यमानस्य चतुर्थीप्रकृतिता यथा कृष्णाय तिष्ठते गोपीत्यादावत्र चतुर्थ्यर्थ इच्छायां समवेतत्वसंसर्गावच्छिन्नायां प्रकाशनिष्ठोद्देश्यतानिरूपितावच्छेदकतायां

प्रतियोगित्वेन संबन्धेनान्वयः इच्छाया उद्देश्यतया प्रकाशे तस्यानुकूलतया अव्यवहितावस्थानादौ तस्य तिङर्थे आश्रयत्वेऽन्वय इति यत्र तङन्तस्यापि तिष्ठतेः स्थेयविनिवेदनमर्थः स्थेयो मध्यस्थो निर्णायक इति यावत् । तत्र क्ष्नीप्स्यमानेऽपि न चतुर्थी अत एव "संशय्य कर्णादिषु तिष्ठते यः" इति भारविरत्र समानदेशत्वसंबन्धावच्छिन्नाधेयत्वं यत्पदार्थे कर्तरि विद्यमानत्वं कर्तृघटितपरम्परासंसर्गावच्छिन्नं सप्तम्यर्थो विनिवेदने व्यापारारेऽन्वेति तथा च संशयानन्तरितस्य कर्णाद्यधिकरणस्य निर्णायकविनिवेदनस्य कर्ता य इत्यन्वयबोधः कर्णादेर्निर्णायकत्वं विनिवेद्यत्वं च मानान्तरवेद्यमिति । धारयतेर्योगे उत्तमर्णस्य संप्रदानतां ज्ञापयति । "धारेरुत्तमर्णः" इति सूत्रं धारयतेर्योगे उत्तमर्णो योऽर्थः तत्कारकं संप्रदानसंज्ञं भवतीत्यर्थकम् उत्तममृणं यस्य स उत्तमर्णः यदीयं धनं स स्वामी प्रयोक्ता उत्तमर्ण इति काशिका देवदत्ताय शतं धारयतीत्यत्र ऋणत्वनिरूपिताधमर्ण्यत्वं धारयतेरर्थः उत्तमर्णत्वं स्वामित्वविशेषः चतुर्थ्यर्थः फलीभूतऋणत्वाश्रयताशतस्य कर्मत्वमेवं देवदत्तनिष्ठोत्तमर्णत्वनिरूपितशतवृत्तिऋणप्रतियोगिकाधमर्ण्यत्वाश्रयत्वं वाक्यार्थः ऋणत्वाधमर्ण्यत्वे स्वत्वस्वामित्ववदतिरिक्तपदार्थावेवानुगतप्रतीतिव्यवहारयोरविशेषात्स्वत्वाभाव एव ऋणत्वमिति चेत् ऋणत्वाभाव एव स्वत्वमित्यपि किन्न स्यात् । यदि चोद्धारनाश्यपापविशेषस्य साधनं विनियोग ऋणत्वं तदा पापासाधनविनियोग एव स्वत्वमिति स्यात्

अविनियोगकाले स्वव्यवहारऋणव्यवहारेण तुल्ययोगक्षेमः शास्त्रमपि ऋणत्वे स्वत्वे च तुल्यं शास्त्रस्याननुगतप्रवृत्तितिमित्तकऋणपदघटितत्वमिव तादृशस्वपदघटितत्वमपि तदेतदन्यत्र विस्तृतमिति वदन्ति । वस्तुतस्तु उद्धारनाश्यपापजनकग्रहणाश्रितव्यापारो धारयतेरर्थः फलीभूतग्रहणाविषयतया शतादीनां कर्मत्वमुत्तमर्णः प्रयोक्ता प्रयोगः कलाजिघृक्षा तज्जनकज्ञानजन्यसंस्कारः उपकारकता कीर्त्तिजनकः पुण्यविशेषो वा स च चतुर्थ्यर्थः तथाविधपापवानधमर्णः एवं देवदत्तनिष्ठकलाजिघृक्षादेः प्रयोज्यं यत्तथाविधं शतकर्मकग्रहणं तत्प्रयोज्यव्यापारो भोजनादिस्तदाश्रयत्वं वाक्यार्थः ऋणमपि तथाविधग्रहणकर्मबोध्यम् ऋणं धारयतीत्यत्र ग्राह्यं गृह्णातीत्यत्रेवान्वयो बोध्यः एवमर्थान्तरेऽपि धारयतेः प्रयोगे चतुर्थी दृश्यते यथा।

सेवनवेतनमृणमिह
मह्यं दीनाय धारयसि ।
अतिचण्डि चण्डखण्डिनि
वदाम्यपर्णोऽतिभीतितो भवतीम् ॥

इत्यत्र धारयतेरभीष्टफलदानानुकूलव्यापारोऽर्थः ऋणपदलक्ष्यमवश्यदेयं वेतनपदलक्ष्यं साध्यम् एवं सेवनसाध्यावश्यदेयकर्मको योऽभीष्टप्रयोजकदानानुकूलो व्यापारस्तदाश्रयस्त्वमित्यन्वयबोधः मह्यमित्यत्र चतुर्थ्यर्थः पुण्यविशेषः स प्रयोज्यत्वेन व्यापारेऽन्वेति एवं ग्राह्यं गृह्णातीतिवत् उत्तमर्णाय धारयति अधमर्णो धारयतीत्यादौ विशेषणविशेष्यभावव्यत्यासेनान्वयो बोध्यः सूत्रे

उत्तमर्णग्रहणं देवदत्ताय शतं धारयति ग्रामे इत्यत्र ग्रामस्य संप्रदानतानिषेधार्थमिति स्पृहेर्योगे चतुर्थीं ज्ञापयति । "स्पृहेरीप्सितः" इति सूत्रं स्पृहेर्योगे ईप्सितो योऽर्थस्तत्कारकं संप्रदानसंज्ञं भवतीत्यर्थकम् । ईप्सित इत्यत्राभिप्रेत उच्यत इति काशिका पुष्पेभ्यः स्पृहयति रसिक इत्यत्र स्पृहेरभिलाषोऽर्थः चतुर्थ्या विषयत्वमर्थः एवं पुष्पविषयताकाभिलाषाश्रय इत्यन्वयबोधः।

स्त्रीषु प्रवीरजननी जननी तवैव
देवी स्वयं भगवती गिरिजाऽपि यस्यै ।
त्वद्दोर्वशीकृतविशाखमुखावलोक-
व्रीडाविदीर्णहृदया स्पृहयांबभूव ॥

इत्यत्र रेणुकासदृशी भवेयमित्यभिलाषस्तत्र रेणुकाविषयत्वस्यानपायान्न चतुर्थ्या अनुपपत्तिः यदि च विषयत्वमात्रं न चतुर्थ्यर्थः तथासति पुष्पत्वं स्पृहयतीति प्रयोगापत्तेः किं तूद्देश्यत्वं तच्च दर्शिताभिलाषे न रेणुकायाः किं तु तत्सादृश्यस्येति यस्यै भगवती स्पृहयतीत्यत्र चतुर्थी नोपपद्यत इति विभाव्यते तदा स्वीक्रियतां तादात्म्येनोद्देश्यप्रकारकोऽभिलाषः ब्राह्मणोऽहं स्यामितीच्छाकारदर्शनात् ब्राह्मण इष्टसाधनं ब्राह्मणोऽहमिति ज्ञानद्वयेन विशिष्टज्ञानेन वा तथाविधेच्छाजननसम्भवात् तथा च रेणुका भवेयमित्यभिलाष एव स्पृहा तत्र रेणुकाया उद्देश्यत्वं निराबाधमिति चतुर्थ्या नानुपपत्तिरिति संप्रदायः । वस्तुतस्तु पुष्पेभ्यः स्पृहयतीत्यत्र पुष्पादीनां सिद्धत्वादुद्देश्यत्वं न सम्भवतीति नोद्देश्यत्वं चतुर्थ्यर्थः किं तु सूत्रे ईप्सितशब्दोपादानात् ई-

श्राविषयः प्रतीयते ईप्सा आप्तीच्छा आप्तिः संबन्धस्तथा चाप्निश्चतुर्थ्यर्थः स च संबन्धः पुष्पेभ्य इत्यत्र स्वत्वं संयोगश्च रेणुकायै इत्यत्र तादात्म्यसंबन्धस्तूद्देश्यितया स्पृहायामन्वेति तथा च पुष्पसंयोगस्पृहाश्रयः रेणुकातादात्म्यस्पृहाश्रय इत्यन्वयबोधः कान्तस्य स्पृहे इत्यत्र शेषषष्ठ्या विषयत्वमर्थः स्पृहायामन्वेति यथा घटज्ञानं घटत्वस्य यथा वा घटेच्छा घटत्वस्येत्यादाविति । ननु स्पृह ईप्सायामित्यनेन स्पृहेरिच्छार्थकत्वं तच्चेच्छामात्रार्थकत्वे फलावाचकत्वादकर्मकत्वं विषयतारूपफलवाचकत्वेऽपि विषये निरवकाशया संप्रदानसंज्ञया कर्मसंज्ञाबाधात् ईप्सितभेदस्य कर्मप्रत्ययार्थस्यानन्वयाद्वा कर्मप्रत्ययानुपपत्तेः स्पृहणीयगुणैरित्यादिप्रयोगो अनुपपन्न इति चेत् दानीयो ब्राह्मण इत्यादिप्रयोगदर्शनात् संप्रदानेऽप्यनीयरः प्रवृत्तेः स्पृहणीय इत्यत्र कृत्यप्रत्ययस्य संप्रदानार्थकत्वं न तु कर्मार्थकत्वं एतेन"परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत्"इत्यपि समाहितं हरदत्तस्तु यच्चेच्छामात्रार्थकत्वात् फलावाचकः स्पृहिस्तत्र विषयत्वमुद्देश्यत्वं वा चतुर्थ्यभिधत्ते यत्र च विषयतास्वरूपफलवाचकस्तत्र कर्मप्रत्ययो निरपवाद एव अत एव "स्पृहयन्ति गुणान्मनोषिणः परिवादं तु परस्य दुर्जनाः" इति एवं स्पृहणीय इति कर्मण्येव कृत्यप्रत्ययः यत्र च विषयता शेषत्वेन विवक्षिता तत्र शेषषष्ठ्येव यथा"कुमार्य इव कान्तस्य तस्यन्ति स्पृहयन्ति चे"तीत्याह वस्तुतस्तु यत्र स्पृहेरुत्कटेच्छार्थस्तत्रैवाप्निश्चतुर्थ्यर्थः यत्र चे-

च्छासामान्यमर्थः तत्र चतुर्थ्या अप्रसक्तेर्न कर्मप्रत्ययानुपपत्तिः उत्कटेच्छार्थकतया रुच्यर्थकत्वेऽपि स्पृहेर्योगे ईप्सिते चतुर्थीविधानं प्रीयमाणे निषेधमपि सूचयति अतस्तेभ्य पुष्पेभ्यः स्पृहयतीति न प्रयोग इति ईप्सितग्रहणं तु प्रीयमाणे अधिकरणे च संप्रदानतानिषेधार्थमतः पुष्पेभ्यो वने स्पृहयतीत्यत्र वनस्य न संप्रदानतेति । क्रुधाद्यर्थकानां योगे चतुर्थीं ज्ञापयति । "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप इति सूत्रं क्रोधाद्यर्थकानां योगे यं प्रति कोपस्तत्कारकं संप्रदानसंज्ञं भवतीत्यर्थकं यत्र येन वेत्यपहाय सूत्रे यं प्रतीत्युक्त्या चतुर्थ्या नानाविधोऽर्थो ज्ञाप्यते अत एव क्रोधस्तावत् कोपः एव द्रोहाद्योऽपि कोपप्रभवा एव गृह्यन्ते तस्मात्सामान्येन विशेषणं यं प्रति कोप इति काशिका । कोपप्रभवानां द्रोहादीनां ग्रहणाल्लोभादिप्रभवद्रोहाद्यर्थकधातुयोगे न चतुर्थीति ज्ञाप्यते क्रोधमात्रार्थकाः फलावाचकत्वात् अकर्मकाः क्रुधिकुप्यादयः क्रोधोऽमर्षः द्वेष इति यावत् । देवदत्ताय क्रुध्यति कुप्यति वेत्यादौ चतुर्थ्या इष्टतालक्षणं विषयत्वमर्थः तथा च देवदत्तविषयताकद्वेषाश्रयत्वं वाक्यार्थः । द्विषस्तु इष्टतालक्षणफलं द्वेषं चाभिधत्त इति न क्रुधिपर्यायस्तद्योगे न चतुर्थी किन्तु द्वितीया अत एव शत्रुं द्वेष्टीत्येव प्रमाणं द्रुहेरिष्टाचरणमर्थः देवदत्ताय द्रुह्यतीत्यत्र चतुर्थ्या द्वेषान्वयिसमवेतत्वमर्थस्तथा च देवदत्तसमवेतद्वेषविषयाचाराश्रयत्वं वाक्यार्थः ईर्ष्यतेः परक्रियागोचरो द्वेषोऽर्थः चतुर्थ्याः क्रियान्वयिसमवेतत्वमर्थः देवदत्ताय ईर्ष्यते इत्यत्र द्वे-

वदत्तसमवेतक्रियागोचरद्वेषाश्रयत्वं वाक्यार्थः यत्र तु क्रिया फलविधयेष्यतिनोच्यते तत्र क्रियाविषये कर्मणि द्वितीयैव प्रमाणं यथा भार्यामीर्ष्यति मैनामन्यो द्राक्षीदिति भार्याविषयकमन्यकर्तृकदर्शनं न सहत इति तदर्थः असूयतेरसूयार्थः सा च परगुणे दोषारोपः देवदत्तायासूयतीत्यत्र चतुर्थ्याः संबन्धित्वं समवेतत्वं वार्थः तथा च देवदत्तसंबन्धिगुणं दोषत्वेनारोपयतीत्यर्थः वादिने असूयतीत्यत्र वादिसमवेतज्ञानं भ्रमत्वेन ख्यापयतीत्यर्थ इति संप्रदायः । वस्तुतस्तु क्रुध्यत्यादेः क्रोधोऽर्थः स चामर्षस्तच्चासहिष्णुत्वम् अत एव क्रोधोऽमर्षः इति काशिका कोपक्रोधामर्षरोषेत्याद्यमरोऽपि असहिष्णुत्वं च स्वानिष्टानुकूलपरक्रियागोचरो द्वेषः चतुर्थ्यास्तु क्रियान्वय्याधेयत्वमर्थः देवदत्ताय क्रुध्यति यज्ञदत्त इत्यत्र स्वानिष्टानुकूलदेवदत्तवृत्तिक्रियागोचरद्वेषाश्रयो यज्ञदत्त इत्यन्वयबोधः । अनिष्टानुकूलायाशिष्यगतायाः पुत्रगतायाश्च क्रियायाः द्वेषसम्भवात् अनिष्टानुकूलव्यापारो द्रुहेरर्थः अत एव द्रोहोऽपकार इति काशिका चतुर्थ्यास्त्वनिष्टान्वय्याधेयत्वमर्थः अनिष्टं च दुःखं सुखाभावश्च देवदत्ताय द्रुह्यति यज्ञदत्त इत्यत्र देवदत्तवृत्तिदुःखानुकूलव्यापारानुकूलकृतिमान् यज्ञदत्त इत्यन्वयबोधः सपत्न्यै द्रुह्यति स्त्रीत्यत्र सपत्नीवृत्तिसुखाभावानुकूलव्यापारानुकूलकृतिमती स्त्रीत्यन्वयबोधः उत्कर्षगोचरो द्वेष ईर्ष्यतेरर्थश्चतुर्थ्याः उत्कर्षान्वय्याधेयत्वमर्थः कर्णायिष्यति फाल्गुन इत्यत्र कर्णवत्युत्कर्षगोचरद्वेषाश्रयः फाल्गुन इत्यन्वयबोधः । यत्र तु

फलतया क्रिया तद्गोचरो द्वेषो व्यापारतयेर्ष्यतिना प्रत्याय्यते फलीभूतक्रियान्वयिनि भार्यादौ न कोपः स्वानिष्टानुकूलव्यापारविरहात् तत्र फलान्वयिनि द्वितीयैव प्रमाणं यथा भार्यामीर्ष्यतीत्यत्रान्यकर्तृकदर्शनं फलं द्वेषो व्यापार ईर्ष्यतेरर्थः दर्शने द्वितीयार्थो विषयत्वं तत्संबन्धावच्छिन्नाधेयत्वं वा भार्याकर्मकान्यकर्तृकदर्शनगोचरद्वेषाश्रयत्वं वाक्यार्थः एतदर्थमेव यं प्रति कोप इत्युक्तमत एव यं प्रति कोप इति किं भार्यामीर्ष्यति मैनामन्यो द्राक्षीदिति काशिका एवं यत्र क्रियान्तरद्वेषोऽपीर्ष्यतिना प्रत्याय्यते तत्रापि द्वितीयैव यथा शिष्यमीर्ष्यति मैनमन्योऽध्यापयेदिति अन्यकर्तृकक्रियाद्वेषस्य धात्वर्थत्वे तु उक्तार्थानामप्रयोगात् अन्यस्मै द्रष्टेऽध्यायकाय वेर्ष्यतीति न प्रयोगः फलीभूतक्रियान्वयिनि कर्मणि स्वानिष्टानुकूलक्रियाविरहायोगात् न कोप विषयत्वमिति न तत्र चतुर्थीति एवं गुणे दोषारोपोऽसूया असूयतेरर्थः चतुर्थ्या गुणान्वय्याधेयत्वमर्थः देवदत्तायासूयति यज्ञदत्त इत्यत्र देवदत्तवृत्तिधैर्यादिगुणधर्मिकचौर्यत्वारोपकर्तृ यज्ञदत्त इत्यन्वयबोधः एवं सपत्न्यै असूयतीत्यत्र सपत्नीवृत्तिपतिसेवनादिकं कार्मणत्वेनारोपयतीत्यर्थः वादिनेऽसूयतीत्यत्र वादिवृत्तिप्रमाणवाक्यमप्रमाणत्वेनारोपयतीत्यर्थः गुणा दोषाश्च प्रातिस्विकरूपेण प्रकरणादिवशादसूयतिनोपस्थाप्यन्ते गुणास्तु निन्दाप्रयोजकान्ये पदार्थास्ते च वैशेषिकसिद्धा द्रव्यगुणक्रियासामान्यादयः प्रत्येतव्याः यच्च काव्यप्रकाशे "भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृत" इत्यत्र विधिं प्रत्य-

सूया व्यज्यत इत्युक्तं तत्र विधेर्नैसर्गिके निद्रादरिद्रीकरणे गुणे शाठ्यहेतुकत्वस्वरूपदोषत्वं स्वप्नसमागमविच्छेदेन विहस्तेन कामिना समारोपितमिति गुणे दोषारोपरूपोऽसूया भावोऽभिव्यज्यत इति संप्रदायः । वस्तुतस्तु अनिन्द्ये विधौ विधित्वे वा शठतादात्म्यस्य शठत्वतादात्म्यस्य वाऽऽरोपस्तादृशेन कामिना कृत इत्यनिन्द्ये दोषारोपरूपोऽसूया व्यज्यत इति दोषास्तु निन्दाप्रयोजका बोध्याः । एतेन दुःखाय नरकाय वा कुप्यतीति प्रयोगापत्तिः दुःखविषयकद्वेषस्य सत्त्वात् दृहस्पतिरध्यापयन् दैत्येभ्यो द्रुह्यतीति प्रयोगानापत्तिः अध्ययनस्य दैत्यसमवेतद्वेषाविषयत्वात् कूपे पततेऽन्धायेर्ष्यतीति प्रयोगापत्तिरन्धकर्तृककूपपतनगोचरद्वेषस्य निवारके सत्त्वादिति परास्तम् । कुप्यादिधातूनां चतुर्थ्याश्च दर्शितार्थकतया अतिप्रसङ्गाप्रसङ्गयोरभावात् कुप्यादीनां दर्शितार्थकत्वे कर्मणि द्वितीया प्रसक्ता निरवकाशया संप्रदानसंज्ञया असाधुत्वज्ञापिकया बाध्यते सूत्रे यं प्रति कोप इत्यत्र कोपोपादानं न चतुर्थ्यर्थतासूचनाय तथा सति कुप्यादिप्रयोगानुपपत्तेः धात्वर्थे कोपे चतुर्थ्यर्थकोपान्वयात् किं तु स्वरूपकथनं भवतु वा प्रतीत्युपादानात् विषयत्वं कोपस्य चतुर्थ्या अर्थः देवदत्ताय क्रुध्यतीत्यत्र कोपार्थकधातुयोगे विषयित्वं चतुर्थ्यर्थः अनिष्टानुकूलव्यापारगोचरद्वेषे कोपोऽन्वेति देवदत्तादेर्यज्ञदत्तानिष्टानुकूलव्यापारकर्तृत्वमर्थादवगम्यते स्वविषयकयज्ञदत्तीयद्वेषप्रयोजकत्वात् देवदत्ताय द्रुह्यतीत्यत्र चतुर्थ्या द्वेषमात्रं कोपोऽर्थस्तत्र विषयितया प्रकृत्यर्थस्यान्वयः अ-

निष्टानुकूलव्यापारे द्वोहे कोपः प्रयोज्यतयाऽन्वेति देवदत्तादेरनिष्टं पूर्ववदगम्यते देवदत्तायेर्ष्यतीत्यत्र पूर्ववत् कोपश्चतुर्थ्यर्थः उत्कर्षगोचरद्वेषे धात्वर्थे प्रयोज्यतयाऽन्वेति देवदत्तादेरुत्कर्षः पूर्ववदेवावगम्यते देवदत्तायासूयतीत्यत्र पूर्ववत्कोपश्चतुर्थ्यर्थः गुणे दोषरोपस्वरूपे धात्वर्थे पूर्ववदन्वेति देवदत्तादेर्गुणाः पूर्ववत् अवगम्यते अस्मिन् कल्पे न दर्शितातिप्रसङ्गाप्रसङ्गौ न वा धनिनिष्टानिष्टानुकूलव्यापारकर्तृकत्वेऽपि चौरस्य धनिने द्रुह्यति चौर इति प्रयोगः धनिनः कोपाविषयत्वात् संप्रदानत्वाप्रसक्तेः यदि कोपमूलकमपि चौर्यं तदा तादृशप्रयोगोऽपीष्ट एव सोपसर्गयोः क्रुधद्रुहोर्योगे कोपविषयस्य न संप्रदानसंज्ञा निरवकाशया कर्मसंज्ञया बाधात् क्रुधद्रुहोरुपसृष्टयोः कर्मण्यनुशासनेन कर्मसंज्ञाविधानात् द्वितीयैव प्रमाणं क्रूरमभिक्रुध्यति अभिद्रुह्यति वेत्यत्र विषयत्वं कोपस्य यथायोग्यं द्वितीयार्थः देवदत्ताय क्रुध्यति द्रुह्यति वेति वदन्वयबोध इति प्रागेवोक्तम् । राधीक्ष्योर्योगे चतुर्थीं ज्ञापयति । " राधीक्ष्योर्यस्य विप्रश्नः " इति सूत्रं राधेरीक्षेश्च योगे यस्य विप्रश्नस्तत्कारकं संप्रदानसंज्ञं भवतीत्यर्थकं विप्रश्नो विविधः प्रश्नः विविधो विविधविषयक इत्यर्थः अत एव यस्य विप्रश्नो विविधः प्रश्नः स यस्य भवति यत्संबन्धिशुभाशुभं पृच्छ्यते इति काशिका राधेरीक्षेश्च दैवपर्यालोचनमर्थः दैवं शुभाशुभं चतुर्थ्याः समवेतत्वमर्थः कृष्णाय राध्यति ईक्षते वा गर्गं इत्यत्र कृष्णसमवेतशुभाशुभपर्यालोचनाश्रयो गर्गं इत्यन्वयबोधः कृष्णस्य कीदृशं शुभमशुभं वेति प्रश्नस्य गोचरता तु



कृष्णपदेन न प्रतिपाद्यते किं तु व्यञ्जनयाऽथ वा विप्रश्नानन्तरितशुभाशुभपर्यालोचनं राधीक्ष्योरर्थ इति धातुनैव विप्रश्नगोचरताप्रत्याय्यते इति संप्रदायः । वस्तुतस्तु विप्रश्नः शुभाशुभप्रश्नः शुभाशुभजिज्ञासाप्रयोज्यकिमादिशब्दघटितवाक्यमिति यावत् तत्र विप्रश्नस्तत्प्रयोजिका जिज्ञासा वा चतुर्थ्यर्थः दैवपर्यालोचने राधीक्ष्योरर्थे प्रयोज्यतयाऽन्वेति चतुर्थ्यर्थे जिज्ञासायां विषयितया प्रकृत्यर्थस्यान्वयः यत्संबन्धित्वेन शुभाशुभजिज्ञासा तस्यैव शुभाशुभविषयतानिरूपितविषयितया जिज्ञासायामन्वयः ईदृशविषयितयैव प्रकृत्यर्थस्यान्वयः तेन मैत्रपुत्रस्य किं शुभमशुभं वेति प्रश्ने मैत्राय राध्यतीति न प्रयोगः । एवं कृष्णाय राध्यतीच्छते वा गर्ग इत्यत्र कृष्णविषयशुभाशुभजिज्ञासाप्रयोज्यशुभाशुभपर्यालोचनाश्रयो गर्ग इत्यन्वयबोधः । धात्वर्थघटकशुभाशुभे कृष्णसमवेतत्वमर्थात्प्रतीयते धात्वर्थो तादृशजिज्ञासाप्रयोज्यत्वान्वयबलात् अत एव देवदत्ताय राध्यतीच्छते वा नैमित्तिकः पृष्टः सन् देवदत्तस्य दैवं पर्यालोचयतीत्यर्थ इति काशिका विप्रश्नवाक्यं न धात्वर्थे घटते न वा चतुर्थ्यर्थः किं तु शुभाशुभजिज्ञासैव यत्र न प्रश्नवाक्यं स्वस्यैव शुभाशुभजिज्ञासा तत्रापि वराय कन्यायै वा राध्यति नैमित्तिक इति प्रामाणिकः प्रयोग इति । प्रत्याङ्पूर्वस्य श्रुवो योगे चतुर्थीं ज्ञापयति । "प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता" इति सूत्रं प्रतिपूर्वकस्याङ्पूर्वकस्य च शृणोतेः पूर्वस्य कर्ता तदर्थप्रयोजकक्रियाकर्ताऽस्य धातोर्योगे संप्रदानसंज्ञो भवतीत्यर्थकं प्रतिशृणोतेरा-

शृणोतेश्च याञ्चापूर्वकः स्वीकारो देयत्वेनाभ्युपगमोऽर्थः याञ्चान्वयिकर्तृत्वं चतुर्थ्यर्थः द्विजाय गां प्रतिशृणोत्याशृणोति वेत्यत्र गोकर्मत्वं याचनस्वीकारयोरुभयोरन्वेति तथा च द्विजकर्तृकगोकर्मकयाचनपूर्वको गोकर्मकः देयत्वेनाभ्युपगमो वाक्यार्थः यत्तु ।

संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः ।
अङ्गीकारोऽभ्युपगमप्रतिश्रवसमाधयः ॥

इति नामलिङ्गानुशासनमभ्युपगममात्रार्थकसंश्रवपर्यायत्वेन प्रतिश्रवाश्रवौ पपाठ तद्विशेष्यस्वरूपैकदेशपर्यायतां ज्ञापयतीति संप्रदायः । वस्तुतस्तु प्रतिशृणोतेराशृणोतेश्चाभ्युपगमोऽर्थः स च क्रियागोचरकर्तव्यत्वाध्यवसायः क्रिया च क्व चिद्दानरूपा क्व चिदन्यादृशी अत एव नामलिङ्गानुशासनसंमता संश्रवप्रतिज्ञानपर्यायता प्रतिश्रवाश्रवयोरुपपद्यते चतुर्थ्याः प्रयोजकतयोपलक्षितो व्यापारोऽर्थः स च क्व चित् याञ्चास्वरूपः यत्र प्रतिशृणोतेर्दानगोचरकर्तव्यत्वाध्यवसायोऽर्थः क्व चिदन्यादृशः यत्र दर्शितधातोरन्यादृशोऽर्थः अत एव प्रतिपूर्वं आङ्पूर्वश्च शृणोतिरभ्युपगमे प्रतिज्ञाने वर्तते स चाभ्युपगमः परेण प्रयुक्तस्य सतो भवति तत्र प्रयोक्ता पूर्वस्याः क्रियायाः कर्ता संप्रदानसंज्ञो भवतीति काशिका एवं विप्राय गां प्रतिशृणोति आशृणोति वा राजेत्यत्र प्रतिशृणोतेर्दानकर्तव्यत्वाध्यवसायोऽर्थः चतुर्थ्या याञ्चारूपो व्यापारोऽर्थः दानं परस्वत्वानुकूलः स्वत्वध्वंसः याञ्चा लिप्सा प्रतिग्रह इति यावत् प्रकृत्यर्थस्य याञ्चायां कर्तृतयाऽन्वयः याञ्चायाः प्रयोज्यतया दाने तङ्गोच-

र्कर्तव्यत्वज्ञाने वाऽन्वयः दानं कर्तव्यत्वप्रकारकं ज्ञानं खण्डशो धात्वर्थः दानं विशेष्यितया कर्तव्यताज्ञानेऽन्वेति प्रतिग्रहः स्वत्वमिच्छा चेति खण्डशश्चतुर्थ्यर्थः स्वत्वसङ्कल्पितयेच्छायामन्वेति कर्तृत्वमाधेयत्वं संसर्ग इच्छान्वयघटको बोध्यः गोकर्मकत्वं दानेऽन्वेति तथा च विप्रसमवेतस्वत्वोद्देश्यताकेच्छाप्रयोज्यगोवृत्तित्वत्वानुकूलस्वत्वध्वंसविशेष्यताककर्तव्यत्वप्रकारकज्ञानाश्रयो राजेत्यन्वयबोधः प्रतिग्रहस्य याच्ञाया गोविषयकत्वमर्थादवगम्यते न ह्यन्ययाच्ञाप्रयोज्यं गोदानं भवति कर्तव्यत्वप्रकारतानिरूपितविशेष्यता स्वत्वध्वंसे अर्थादवगम्यते तत एव कर्तव्यत्वं स्वत्वध्वंसेऽवसीयते प्रतिज्ञानं तथाऽध्यवसाय एव अत एव देवदत्ताय गां प्रतिशृणोति प्रतिजानीत इत्यर्थ इति काशिका । अन्याद्दशक्रियागोचरकर्तव्यत्वाध्यवसायः प्रतिश्रवः चतुर्थ्यास्त्वन्याद्दशो व्यापारोऽर्थो यथा ब्रह्मचारिणं शतपथब्राह्मणं प्रतिशृणोत्युपाध्याय इत्यत्रानुपूर्वीविशेषप्रकारकज्ञानस्य प्रतिपादकतासंसर्गेणार्थवत्त्वप्रकारकज्ञानस्य वाऽनुकूलो व्यापारोऽध्यापनं तद्गोचरकर्तव्यत्वाध्यवसायः प्रतिश्रवातेरर्थश्चतुर्थ्या आनुपूर्वीविशेषणार्थवत्त्वेन वा जिज्ञासार्थः शतपथब्राह्मणविशेषितं विशेष्यित्वं तत्संबन्धावच्छिन्नाधेयत्वं वा द्वितीयार्थः फलीभूते ज्ञानेऽन्वेति ज्ञानस्याध्यापनफलस्याभ्युपगमफलत्वानपायात् जिज्ञासाया प्रयोज्यतया अभ्युपगमेऽन्वयस्तथा च शतपथब्राह्मणविशेष्यताकस्यानुपूर्वीविशेषप्रकारकस्यार्थवत्त्वप्रकारकस्य वा ज्ञानस्यानुकूलो यो व्यापारः तद्गोचरो

यो ब्रह्मचारिसमवेतजिज्ञासाप्रयोज्यः कर्तव्यत्वाध्यवसायस्तदाश्रयः उपाध्याय इत्यन्वयबोधः । अभ्युपगमे फले ज्ञाने ब्रह्मचारिसमवेतत्वमर्थात्प्रतीयते यथाऽभ्युपगमफले स्वत्वे विप्रनिरूपितत्वमिति न ह्यन्यदीयजिज्ञासाप्रयोज्योऽभ्युपगमोऽन्यदीयज्ञानफलकः यथा विप्रयाज्ञाप्रयोज्योऽभ्युपगमः न चवियादिस्वत्वफलक इति । क्व चित्कर्तव्यत्वाध्यवसाय एव प्रतिशृणोतेरर्थः यत्र तद्विषयो धातुना पदान्तरेण वा प्रत्याय्यते यथाऽनुमाननिरूपणं शिष्याय प्रतिशृणोतीत्यत्र निरूपणं ल्युडन्तधात्वर्थस्तत्र प्रयोज्यतया शिष्यजिज्ञासाया अन्वय इति ।

शतमागांसि सोढाहे सूनोस्त इति यत्त्वया ।
प्रतीच्यं तत्प्रतीच्यायै पित्रेष्वस्ते प्रतिश्रुतम् ॥

इत्यत्र त्वत्सूनुप्रयोज्यागःशतकर्मकभाविसहनकर्तृत्वमिति शब्दार्थो यच्छब्दार्थाभिन्नप्रतिश्रवकर्मण्यभेदेनान्वेति प्रतिश्रवोऽत्र कर्तव्यत्वाध्यवसायस्तद्विशेषस्तत्कर्मसहनकर्तृत्वे कर्तव्यत्वाध्यवसायः सहनमादाय पर्यवस्यति आगोऽनिष्टाचरणासहनं तज्जन्यफलोपभोगस्तद्विषयकद्वेषाभावो वा द्वेषाभावे कर्तव्यत्वं क्षेमसाधारणं बोध्यं यथा मीमांसकानां कलञ्जभक्षणाभाव इति चतुर्थ्यास्तु पुत्रगतानिष्टस्याचरणे द्वेषस्तथाविधाचरणाभावे इच्छा वाऽर्थः पित्रेष्वस्तविशेषितः कर्तव्यत्वाध्यवसाये प्रयोज्यतयाऽन्वेतीत्येवमन्यत्राप्यूहनीयमिति । अनुप्रतिपूर्वस्य गृणातेर्योगे चतुर्थीं ज्ञापयति । "अनुप्रतिगृणश्च" इति सूत्रम् । अनुपूर्वकस्य प्रतिपूर्वकस्य च गृणातेर्योगे तदर्थ-

पूर्ववर्तिन्या क्रियायाः कर्तृभूतं कारकं संप्रदानसंज्ञं भवतीत्यर्थकम् । अनुगृणातेः प्रतिगृणातेश्च शंसनपूर्वकं प्रोत्साहनमर्थः शंसनं कथनं प्रोत्साहनं हर्षानुकूलो व्यापारः होत्रे प्रतिगृणात्यनुगृणाति वा अध्वर्युरित्यत्र चतुर्थ्याः शंसने हर्षे चान्विता वृत्तिरर्थस्तथा च होतृवृत्तिशंसनपूर्वकस्य होतृवृत्तिहर्षानुकूलस्य व्यापारस्य कर्ताऽध्वर्युरित्यन्वयबोध इति संप्रदायः । वस्तुतस्तु शंसनपूर्वकतयोपलक्षितं प्रोत्साहनमनुगृणातेरर्थः शंसनपूर्वकत्वं तु शंसनज्ञानसापेक्षज्ञानविषयत्वं तदुपलक्षितं स्वरूपसत्तत्संबन्धीत्यर्थः यच्च काशिकायां होत्रेऽनुगृणाति होता प्रथमं शंसति तमन्यः प्रोत्साहयतीत्युक्तं तच्च शंसने प्रथमत्वं न पूर्ववृत्तित्वं किं तु पूर्वज्ञानविषयत्वमत एवाग्रे काशिकायामनुगृण इति प्रतिगृण इति हि शंसितुः प्रोत्साहने वर्तत इत्युक्तं शंसितुरित्युक्तं न तु प्राक्शंसितुरिति प्रोत्साहनयुक्तमेव हर्षणामथ वा प्रोत्साहनानुकूलो व्यापारः उत्साहोऽध्यवसायस्तत्र प्रकर्षः कर्तव्यत्वगोचरत्वं तेन कर्तव्यताऽध्यवसायानुकूलो व्यापार इति निष्कर्षः । प्रतिशृणोतेस्तथाऽध्यवसायो व्यापारतयाऽस्य फलतयाऽर्थ इति पूर्वसूत्रार्थस्यैव तत्सूत्रार्थे प्रसङ्गसंगतिरप्यायाति चतुर्थ्याः शंसनमर्थस्तस्य स्वज्ञानादिद्वारकप्रयोज्यतया हर्षणे विशेषितया कर्तव्यत्वाध्यवसाये वाऽन्वयः शंसने प्रकृत्यर्थस्याधेयत्वलक्षणकर्तृतयान्वयः । एवं होत्रेऽनुगृणाति प्रतिगृणाति वाऽध्वर्युरित्यत्र होतृवृत्तिशंसनप्रयोज्यहर्षणाश्रयोऽध्वर्युरित्यन्वयबोधः अथ वा कर्तव्यत्वाध्यवसाये शंसनस्य सामा-

नाधिकरणेनाप्यन्वयः सामानाधिकरण्यमेककालावच्छेदेनैकत्र वर्तमानत्वं तथा च होतृवृत्तिशंसनस्य समानाधिकरणास्तद्विशेष्यताकश्च यः कर्तव्यत्वप्रकारकाध्यवसायस्तदनुकूलव्यापाराश्रयोऽध्वर्युरित्यन्वयबोधः । परम्परया शंसनफलकस्य हर्षणस्यापेक्षया साक्षात् शंसनफलकस्य कर्तव्यत्वाध्यवसायस्य धात्वर्थत्वसुचितं न च हर्षणं न शंसनफलकमिति वाच्यं तथासति हर्षकस्य व्यर्थव्यापारतया प्रमत्तत्वापत्तेः । एवं होत्रेऽनुगृणाति होतारं शंसन्तं प्रोत्साहयतीत्यर्थ इति काशिका लङ्प्रयोगं दर्शयन्ती कालघटितसामानाधिकरण्येनान्वयं सूचयति एवं निन्दकायानुगृणाति खल इत्यादावन्यत्रापीयं रीतिर्बोध्येति । परिक्रयार्थकधातुयोगे चतुर्थीं ज्ञापयति । "परिक्रयणे संप्रदानमन्यतरस्याम्" इति सूत्रं परिक्रयणे साधकतमं संप्रदानसंज्ञं भवतीत्यर्थकमन्यतरस्यामित्यनेन करणसंज्ञकमपि तद्बोध्यते वेतनदानादिपूर्वको नियतकालावच्छेद्यस्वत्वानुकूलो व्यापारः परिक्रय इत्युच्यते तत्र करणत्वार्थिका तृतीया चतुर्थी च भवति शताय शतेन वा परिक्रीतो वृषभ इत्यत्र चतुर्थीतृतीययोः करणत्वं व्यापारोऽर्थः स च व्यापारो दानं जन्यतया परिक्रयफले स्वत्वेऽन्वेति तथा च शतदानजन्यस्य परिक्रयप्रयोज्यस्वत्वस्याश्रयाभिन्नो वृषभ इत्यन्वयबोधः । परिक्रयजन्यं च स्वत्वं तत्रैव वस्तुनि व्यवस्थितकालमवस्थाय नश्यति व्यवस्थितकालानन्तरं तु स्वत्वान्तरमुत्पद्यते ऽथ वा व्यवस्थावशादेकमेव स्वत्वं कालान्तरव्यापकं भवतीति संप्रदायः । स्वतन्त्रास्तु भू-

तिदानजन्यनियतकालकस्वत्वजनकः परिग्रहः परिक्रय इत्युच्यते तत्र भृतौ तादात्म्येन शतस्यान्वयः संसर्गतया लब्धकरणत्वस्यानुवादिका तृतीया चतुर्थी च ज्योतिष्टोमेन यजेतेत्यत्र तृतीयावदित्याहुः । वस्तुतस्तु भोगजनकनियतकालकस्वत्वफलको व्यापारः परिक्रयः स च व्यापार इच्छैव भृतिः शतादिका मासादिभोगव्यवस्थया गृहीता मासादिव्यापकं परकीयस्वत्वं जनयति भृतिदानजनितस्वत्वं भोगं जनयति न तु विक्रयदानादिकं परिक्रेतृकृतविक्रयदानादेरसिद्धेः भोगस्य विक्रयो दानं च परिक्रेतुरपि सम्भवति । एवं शताय शतेन वा परिक्रीतो वृषभ इत्यत्र चतुर्थीतृतीययोः करणत्वं व्यापारोऽर्थः स च व्यापारः परस्वत्वोपहितं दानं शतवृत्तिस्वत्वं प्रति तादात्म्येन शतस्य जनकत्वात् स्वत्वोपहिते दाने स्वत्वद्वारकं शतस्य जन्यत्वमिति शतव्यापारत्वमक्षतं यदि च भाविदानेन परिक्रयव्यवहारो न गौणस्तदा शतस्य स्वज्ञानद्वारकं दाने जन्यत्वमिति तद्व्यापारत्वं बोध्यमिति शतस्य जन्यतया कर्मतया च व्यापारे दाने तस्य परिक्रयफले तथाविधस्वत्वे ऽन्वयस्तत्रैव स्वत्वे परिक्रयव्यापारस्येच्छाया उद्देश्यत्वेनाऽन्वयस्तस्य स्वत्वस्य कर्मक्तप्रत्ययार्थे आश्रयेऽन्वयः यदि च परिक्रयकर्मणो विद्यमानतायामपि परिक्रयव्यवहारस्तदा क्तप्रत्ययार्थो निरूपकं तत्रैव तस्य स्वत्वस्यान्वयस्तथा च शतजन्यतत्कर्मकदानजन्यस्येच्छोद्देश्यस्य भोगजनकनियतकालकस्वत्वस्याश्रयो निरूपको वा वृषभ इत्यन्वयबोधः । यत्र व्यवस्थितकालकं न स्वत्वं भृतिशे-

षस्य प्रत्यर्पणेन परिक्रेयस्यापचारेण वा तत्र परिक्रय-व्यवहारार्थं तथाविधस्वत्वोद्देश्यिकेच्छा परिक्रीणातेर-भिधेयत्वेनोक्ता नियतकालकस्वत्वं प्रति तु श्रुतिदानं कारणमत एव परिक्रयणं नियतकालं वेतनादिना स्वी-करणं नात्यन्तिकः क्रय एवेति काशिका न चात्र वेत-नदानादिजन्यनियतकालकस्वत्वानुकूलव्यापारः परि-क्रीणातेरर्थः परिक्रय इति वाच्यं तथासति नियतका-लमित्युपादानवैयर्थ्यापत्तेः वेतनदानादिजन्यस्वत्वस्या-वश्यं नियतकालकत्वात् वेतनाय शताय वेतनेन शतेन-वा परिक्रीत इत्यादावनन्वयप्रसङ्गाच्च भृतेस्तच्छेषस्य वा प्रत्यर्पणं व्यवस्थितकालनाशो वा वेतनदानजस्वत्वनाशं प्रति हेतुरित्यन्यत्र विस्तरः । यजतियोगे संप्रदानस्य क-र्मत्वं बोधयति । "कर्मणः करणसंज्ञा वक्तव्या संप्रदा-नस्य कर्मसंज्ञेति" वार्त्तिकं कर्मणि द्वितीयायाः संप्रदा-ने चतुर्थ्यास्त्वापवादः यजतियोगे करणसंज्ञाकर्मसंज्ञा-विधानात् । एवं पशुना रुद्रं यजत इत्यत्र यजतेर्मन्त्र-करणकः स्वत्वध्वंसफलकस्त्यागोऽर्थः । यच्च काशिकायां पशुना रुद्रं यजते पशुं रुद्राय ददातीत्यर्थ इति स्वत्व-फलकत्यागार्थकददातिना यजतिविवरणं तत्त्यागरूपै-कदेशार्थाभिप्रायेण यथोपेक्षावारणाय ददात्यर्थे स्वत्व-फलकत्वं तथा यजत्यर्थे मन्त्रकरणकत्वं विशेषणं प्रकृते ददातिर्यजतिपर्याय एव देवानां विनियोगाभावात् स्व-त्वाप्रसक्तेः देवस्वमित्यादौ देवप्रीत्युद्देश्यकत्यागकर्म-त्वं देवस्वत्वं प्रतीयत इत्यन्यत्र विस्तरः । तृतीयायाः कर्मत्वमाधेयत्वं स्वत्वध्वंसान्वय्यर्थः चतुर्थ्याः प्रीतिर-

र्थस्तस्या उद्देश्यितया त्यागेऽन्वयः प्रीतौ प्रकृत्यर्थस्य समवेतत्वेन तदवच्छिन्नावच्छेदकतानिरूपकतया वाऽन्वयः तथा च शिवसमवेतप्रीत्युद्देश्यकः पशुनिष्ठस्वत्वध्वंसफलको मन्त्रकरणकस्त्यागो वाक्यार्थः यदि च शिवसमवेता प्रीतिरप्रसिद्धा तदा शिवस्य समवेतत्वसंसर्गावच्छिन्नस्वनिष्ठावच्छेदकतानिरूपकज्ञानविषयत्वसंबन्धेन प्रीतावन्वयः शिवप्रीतिरिष्टसाधनमिति ज्ञानस्य प्रीतिनिष्ठविषयतायाः शिवनिष्ठावच्छेदकतानिरूपितत्वादिति एवं शिवनिष्ठावच्छेदकतानिरूपकज्ञानविषयप्रीत्युद्देश्यकस्तथाविधस्त्यागो वाक्यार्थ इति । गत्यर्थकर्मणि वैकल्पिकीं चतुर्थीं ज्ञापयति " गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि " इति सूत्रं गत्यर्थधातुयोगे तदर्थकर्मणि चेष्टायां तदर्थे सति अध्ववर्जिते द्वितीयाचतुर्थ्यौ भवत इत्यर्थकम् ओदनं पचतीत्यत्र कर्मणि चतुर्थीवारणाय गत्यर्थग्रहणं अश्वेन गच्छतीत्यत्र करणे चतुर्थीवारणाय कर्मणीत्युक्तं मनसा हरिं व्रजतीत्यत्र कर्मणि चतुर्थीवारणाय चेष्टायामित्युक्तं चेष्टात्र परिस्पन्दरूपा बोध्या तेन ग्रामाय रथो गच्छतीत्यत्र न चतुर्थ्यनुपपत्तिः अत एव काशिकायां चेष्टाक्रियाणां परिस्पन्दनक्रियाणां कर्मणीत्युक्तम् । अध्वानं गच्छतीत्यत्र कर्मण्यध्वनि चतुर्थीवारणायानध्वनीत्युक्तम् । आस्थितप्रतिषेधश्चायं विज्ञेयः आस्थितः संप्राप्त आक्रान्त उच्यत इति काशिका अत आक्रान्ते अध्वनि चतुर्थी निषिध्यते यदा तु पन्थानमाक्रान्तुमिच्छति तदा चतुर्थी भवत्येव यथा ऽश्वमुत्पथात्पथेऽध्वने वा गच्छतीति । एवं

ग्रामं ग्रामाय वा गच्छतीत्यत्र द्वितीयाचतुर्थ्योराधेयत्व-लक्षणं कर्मत्वमर्थस्तत्र गत्यर्थफलसंयोगेऽन्वेति । तथा च ग्रामवृत्तिसंयोगानुकूलः स्पन्दो वाक्यार्थः अत एव सं-प्रदानचतुर्थ्या गत्यर्थकर्मणि चतुर्थीविधेर्न प्रत्याख्यान-मिति प्रगेवोक्तम् ।

इति संप्रदानसंज्ञककर्मसंज्ञककारकार्थकचतुर्थीविवरणम् ।

अन्याद्दशार्थिकां चतुर्थीं ज्ञापयति ।

"क्रियार्थोपपदस्य च कर्मणि स्थानिन" इति सूत्रम् । क्रिया क्रियार्था उपपदं यस्य स क्रियार्थोपपदस्तस्य स्था-निनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी विभक्तिभ-वतीत्यर्थकं "तुमुन्ण्वुलौ क्रियायां क्रियार्थायामि"ति सू-त्रेण क्रियायाः क्रियार्थत्वे तुमुनो विधानात् तदुपपदत्वं व्यक्तं क्रियायाः क्रियार्थत्वं फलविषया क्रियाप्रयोज-कत्वं यथान्नं भोक्तुं व्रजतीत्यत्रान्नभोजनफलस्य गमन-प्रयोजकत्वं तुमुनः फलज्ञानद्वारकप्रयोज्यत्वमर्थस्तथा चान्नकर्मकभोजनप्रयोज्यं गमनमिति वाक्यार्थस्तुमुन ईदृशार्थकत्वे गमने भोजनासंपत्तावपि न दर्शितप्रयो-गस्याप्रामाण्यम् एवं भोक्तुमिति तुमुन्नन्तस्याप्रयोगे भो-जनकर्मान्नवाचकशब्दात् चतुर्थी भवति तथा चान्नायौ-दनाय वा व्रजतीत्यत्र चतुर्थ्या भोजनं ज्ञानद्वारकमि-च्छाद्वारकं वा प्रयोज्यत्वं चार्थः प्रकृत्यर्थस्यान्नस्य कर्म-तासंसर्गेण भोजने तस्य निरूपकतया प्रयोज्यत्वे तस्य स्वरूपेण गमनेऽन्वय इत्यन्नभोजनप्रयोज्यगमनं वाक्यार्थ इति । एवं फलान्याहर्तुं वनं यातीत्यत्र फलेभ्यो वनं यातीतिप्रयोगस्तत्र फलाहरणप्रयोज्यं वनकर्मकगमनं

આ પુસ્તક
શ્રી જૈન મુની
શ્રીરત્નલાલજી સ્વામી [illegible]

वाक्यार्थः । नृसिंहं प्रीणयितुं नमस्कुर्म इत्यत्र नमस्कुर्मो नृसिंहायेतिप्रयोगस्तत्र नृसिंहप्रीणनप्रयोज्यो नमस्कारो वाक्यार्थः पटमुत्पादयितुं यतते इत्यत्र पटाय यतत इति प्रयोगस्तत्र पटोत्पादप्रयोज्यो यत्नो वाक्यार्थः न चात्र विषयत्वं चतुर्थ्यर्थः पटविषयताको यत्नो वाक्यार्थ इति वाच्यं चतुर्थ्या विषयत्वार्थकत्वे अनुशासनविरहात् विषयत्वसामान्यस्य तदर्थत्वे पटत्वाय यतत इतिप्रयोगापत्तेः साध्यत्वस्य तथात्वे पटार्थतन्तुसाधने पटाय यतत इति प्रयोगानुपपत्तेः उद्देश्यत्वस्य तथात्वे स्वर्गकामो गङ्गास्नानाय यतत इतिप्रयोगानुपपत्तेः न चात्र तादर्थ्यविधानात् चतुर्थ्या जनकत्वमर्थः पटजनको यत्नो वाक्यार्थ इति वाच्यं तथासति तन्तुसाधने पटानुत्पादे पटाय यतत इतिप्रयोगस्याप्रामाण्यापत्तेः क्रियार्थोपपदस्येत्युक्त्या प्रविश पिण्डीमित्यत्र न चतुर्थीभङ्गेरत्र स्थानित्वात् कर्मणीत्युक्त्या फलेभ्यो गच्छति शकटेनेत्यत्र करणे न चतुर्थी फलेभ्यो गच्छतीत्यत्राहर्तुमित्यध्याहृतं तत्राहरणान्वयिकर्मत्वं चतुर्थ्यर्थः फलकर्मकाहरणार्थकं गमनं वाक्यार्थ इत्यपि वदन्ति । भावकृदन्तात् प्रातिपदिकात् चतुर्थी ज्ञापयति । "तुमर्थाच्च भाववचनादि"ति सूत्रं तुमर्थाः क्रियार्थक्रियार्थका ये भाववचना भावप्रत्यया घञादयस्तदन्तात्प्रातिपदिकात् चतुर्थी भवतीत्यर्थकं पाकाय गच्छतीत्यत्र चतुर्थ्यास्तुमर्थोऽर्थस्तुमर्थस्तु पक्तुं गच्छतीत्यत्र समानकर्तृकत्वमुद्देश्यत्वं च तथा च समानकर्तृकं पाकोद्देश्यकं गमनं वाक्यार्थ इति वदन्ति । शाब्दिकास्तु

भाववचनाश्चेति सूत्रेण घञादीनां भावप्रत्ययानां क्रियार्थत्वं प्रत्याय्यते तच्च पूर्ववत् फलस्य ज्ञानेनेच्छया वा द्वारा प्रयोजकत्वं तथा च घञः प्रयोज्यत्वमर्थस्तच्च गमनेऽन्वेति तत्र पाकादिशब्दात् द्वितीयादिप्रसक्तिविरहेण प्रथमप्राप्ततया प्रथमा प्राप्ता तदपवादाय साधुत्वार्था चतुर्थ्यनुशिष्यते पाकाय गच्छतीत्यत्र पाकप्रयोज्यं गमनं वाक्यार्थः एतेन भावघञन्तात्तादर्थ्यचतुर्थ्यैव पाकाय व्रजतीतिप्रयोगोपपत्त्या तुमर्थादिति भाववचनाश्चेति चानुशासनद्वयं व्यर्थमिति निरस्तम् । क्रियायाः क्रियान्तरार्थत्वे विशेषतस्तुमुनो विधानेन घञोऽप्रवृत्तेर्भाववचनाश्चेत्यस्यात एव क्रियायाः क्रियान्तरार्थत्वस्य तादर्थ्यत्वविरहेण तादर्थ्यचतुर्थ्यप्रसक्त्या प्रथमापवादकचतुर्थीविधायकस्य तुमर्थादित्यस्य च सार्थक्यसंभवादित्याहुः । वस्तुतस्तु भाववचनाश्चेति सूत्रं तुमर्थादितिसूत्रेण चतुर्थीविधानार्थमेव चतुर्थीं विना क्रियार्थभाववचनप्रयोगस्य क्वाप्यदर्शनात् तथा च क्रियायाः क्रियान्तरार्थत्वस्वरूपस्तुमर्थश्चतुर्थ्या अर्थस्तत्र क्रियाद्वयस्य धातुलभ्यतया प्रयोज्यत्वमात्रं तुमुन इवास्या अप्यर्थः भाववचनाश्चेति सूत्रं तुमर्थादित्यत्र भाववचनादिग्रहणं चेच्छादिस्वरूपे तुमर्थे चतुर्थीप्रसक्तिवारणार्थमेव पाकायेत्यत्र सुब्विभक्तेः प्रातिपदिकप्रकृतिकतया घञादिविरहे चतुर्थ्यनुपपत्तेरिति भावः एवं घञादिप्रयोज्यत्वं च फलज्ञानादिद्वारकं पूर्ववद्बोध्यम् । एवं पाकाय व्रजति भोजनाय प्रविशति सुक्तये ऽधीत इत्यत्र पाकप्रयोज्यं गमनं भोजनप्रयोज्यः प्रवेशो सुक्तिप्रयोज्य-

मध्ययनं च वाक्यार्थः भावे विहिता घञ्ल्युट्क्तिन्प्रभृतिप्रत्ययास्तदन्तेभ्यश्चतुर्थीविधायकं भाववचनादितिग्रहणं पाचको व्रजतीत्यत्र क्रियार्थण्वुल्प्रयोगे चतुर्थीं निषेधति चतुर्थ्याः क्रियार्थत्वसूचनार्थं तुमर्थादिति ग्रहणं चतुर्थ्यास्तथार्थकत्वार्थकमेव घञादीनां तथार्थकत्वज्ञापकं भाववचनाश्चेति सूत्रं न घञादीनां भाववचनानां क्रियार्थत्वसंकेतग्राहकं क्रियार्थोपपदस्येति सूत्रेण चतुर्थ्याः क्रियार्थत्वसंकेतकल्पनाया आवश्यकत्वे तत एवालोपपत्तौ घञादिभाववचनानां तथासङ्केतकल्पनाया व्यर्थत्वादिति अङ्का क्रोशेन वाऽनुवाकोऽधीत इत्यत्र अधिकरणस्य तृतीयार्थात्यन्तसंयोगस्येव क्रियामात्रान्वयितया चतुर्थ्यर्थे क्रियार्थत्वस्य कारणस्य कारकत्वमिति । मन्यतियोगे कर्मसाकाङ्क्षपदात् चतुर्थीं ज्ञापयति । " मन्यकर्मण्यनादरे विभाषाऽप्राणिषु" इति सूत्रम् । मन्यतिकर्मान्वयिनि प्राणिवर्जिते तद्वाचकपदात् द्वितीया चतुर्थी च भवत्यनादरे गम्यमान इत्यर्थकं ष्ठ्यन्विकरणस्य मन्यतेर्निर्देशात्तनादेर्मनेर्व्युदासः तेन न त्वां तृणं मन्महे इत्यत्र न चतुर्थी अनादरग्रहणात् ।

अश्मानं तृषदं मन्ये मन्ये काष्ठमुलूखलम् ।
अम्बायास्तं सुतं मन्ये यस्य माता न पश्यति ॥

इत्यत्र न चतुर्थी एवं न त्वां तृणं तृणाय वा मन्ये इत्यत्र नञः सादृश्यमप्राशस्त्यरूपोऽपकर्षो वाऽर्थः तृणपदोत्तरा द्वितीया चतुर्थी च प्रतियोगित्वार्थाऽथ वा नानुयाजेष्वित्यत्र सप्तमीवत् साधुत्वार्था तथा च तृणप्रतियोगिकेन सादृश्येनापकर्षेण वा त्वां जानामी

तिशाब्दोऽन्वयबोधः ततोऽनादृतस्त्वमिति वैयञ्जनिको बोधः यत्र तु नानादरो व्यञ्जनया प्रतीयते तत्र हृषर्लं न द्विजं मन्ये इत्यादौ न चतुर्थी साधुः । दृश्यते च वैयञ्जनिकबोधसापेक्षा पदानां साधुता यथा "बदवद जितः स शत्रुर्न हतो जल्पंस्तवतवास्मी"त्यादौ हर्षभयादौ क्षोत्ये द्विर्वचनं साधु नेतरथा न चात्र हर्षादिः शाब्दप्रतीतिविषयः तद्वाचकपदाभावात् भवतु वा तृणसदृशतदपकृष्टादौ लक्षणा लक्ष्यार्थस्य तादात्म्येन त्वत्पदार्थेऽन्वयः नञ्पदमनादृतवाचि तृणवदनादृतं त्वां मन्ये इत्यन्वयबोधः । यदि च ।

मन्यतेः कर्मणो यस्मादनुक्तस्यापकृष्टता ।
नञ्बोध्या स्याद् द्वितीयावच्चतुर्थी प्राणिवर्जितात् ॥

इतिशाब्दिकभृतेर्न भयमनुक्तस्य कर्मण इति तु न त्वं कीरो मम मत इत्यत्र चतुर्थीवारणायात्र कर्मणः क्तप्रत्ययेनाभिहितत्वादिति संप्रदायः । परे तु अयुक्तौवापकृष्टतेतिपठित्वा हृषर्लं न द्विजं मन्ये इत्यादौ युक्तापकर्षवाचिनोऽनेन व्युदासः नञ्पदोपादानात् तृणादपकृष्टं त्वां मन्ये इत्यन्वयबोध इति वदन्ति । अन्ये तु न त्वां तृणाय मन्य"इत्यादौ तृणपदस्य तृणसदृशोऽर्थः तस्य त्वत्पदार्थे भेदान्वयोपपादिका कर्मानुवादिका द्वितीयावच्चतुर्थ्यनुशिष्यते कर्मविशेषणे न तु मुख्यकर्मणि सूत्रेऽनादर इत्यनेन कर्मणीत्यनेन चानादरनिमित्तसादृश्यप्रतियोगिनः कर्मविशेषणस्य वाचकात्यदात् चतुर्थी विधीयते नञोऽनादरोऽर्थः अनादरो नामेष्टानिष्टसाधनत्वेन प्रतिसंधानं तद्भेदस्य भेदो हि त्वत्कर्मकमननत्वा-

वच्छेदेनान्वेति ततस्त्वत्पदार्थस्य हिताहितान्यतरसाधनत्वमर्थतः प्रतीयत इत्याहुः । अत्र चतुर्थ्याः सादृश्यमर्थः नञ्पदं तात्पर्यग्राहकं क्व चिन्नञ्पदं विनाऽपि प्रयोगः यथा "तृणाय मत्वा रघुनन्दनस्तद्दत्तः प्रधानं प्रधनान्निरास्थत्" इतिभट्टिः । यथा वा । "तृणाभ्यां मन्यते कामक्रोधौ यः पञ्च कारयन्" इति औहर्ष इति वदन्ति । युज्यते चैतत् ।

सदृशत्वं तृणादीनामनुक्तौ मन्यकर्मणि ।
द्वितीयावच्चतुर्थ्योऽपि बोध्यते बाधितं यदि ॥

इत्यापिशलिस्मरणात् बाधितमिति अयुक्तसादृश्यबोधकं तेन मुखं पद्मं मन्ये इत्यत्र युक्तसादृश्ये न चतुर्थी एवं न त्वां तृणाय मन्ये इत्यादौ नञा सङ्गते शून्ये वा प्रयोगे चतुर्थ्याः सादृश्यमर्थस्तच्च मन्यकर्मणि त्वत्पदार्थेऽन्वेति तथा च तृणसदृशत्वत्कर्मताकमननाश्रयोऽहमित्यन्वयबोधः ततोऽनादृतस्त्वमिति बोधः स शाब्द आनुमानिको मानसो वेत्यन्यदेतत् प्राथमिकेऽन्वयबोधेऽनादरो न भासते अत एव काशिकायामनादरे गम्यमाने इत्युक्तं न त्वनादरेऽर्थेऽनादरबोधकनञादिपदसत्त्वे वेत्युक्तम् । मन्यकर्मणि सादृश्यान्वयबोधने चतुर्थ्या द्वितीयासमानवचनत्वं तन्त्वमतस्तृणाभ्यामिति दर्शितप्रयोग उपपद्यते नोपपद्यते च तृणाभ्यां न त्वां तृणाय न युवां वा मन्ये इति प्रयोगः । सूत्रे प्राणिष्वित्यत्र "नौकाकान्नशृगालवर्जेष्वि"तिवक्तव्यमिति वार्त्तिकेन प्राणिनः परिभाषितास्तेन न त्वां नावं काकमन्नं शृगालं वा मन्ये इत्यत्र न चतुर्थी प्राणित्वेऽपि न त्वां शुनं को-

टाय वा मन्ये इत्यादौ चतुर्थी चोपपद्यते । अत्र परम्परया मननकर्मणः चतुर्थ्यर्थसादृश्यस्य नामार्थान्वयेऽपि जलं न पचतीत्यत्र नञर्थान्वयिद्वितीयार्थकर्मत्वस्येव धातुसमभिव्याहारेणैव स्वविशेषणकशाब्दबोधविषयत्वात् प्रागुक्तकारकलक्षणवत्त्वात् कारकत्वमिति ।

इति विभक्त्यर्थनिर्णये कारकचतुर्थीविवरणम् ।

नामार्थान्वयिनः चतुर्थ्यर्थाः अकारकतया संजायन्ते तत्र विधाने "तादर्थ्य उपसंख्यानमि"ति वार्त्तिकं चतुर्थ्यास्तादर्थ्यमर्थं ज्ञापयति तादर्थ्यं च नानाविधं सोऽर्थो यस्येति तस्यार्थो यस्येति च विग्रहेण प्रतीयत तत्र सोऽर्थ इत्यनेन जनकत्वं तस्यार्थ इत्येनोपकारकत्वमपकारकत्वं च यथा यूपाय दारु कुण्डलाय हिरण्यमित्यादौ चतुर्थ्या जनकत्वमर्थः यूपस्य खण्डदारुणो नाशद्वारामहादारुजन्यत्वात् भुग्नसंयोगवतः कुण्डलपदार्थस्य हिरण्यजन्यत्वं सविशेषणे हीति न्यायेन भुग्नसंयोगमादाय पर्यवस्यति यूपजनकं दारु कुण्डलजनकं हिरण्यमित्यन्वयबोधः । एवं पटाय तन्तवो घटाय दण्डो रन्धनाय स्थालीत्यादावपि जनकत्वं चतुर्थ्यर्थः । उपकारकत्वं द्विविधमुपचायकत्वं सुखजनकत्वं चाद्यं यथा अश्वाय यवघासः काननाय दृष्टिरित्यादावुपचायकत्वं चतुर्थ्यर्थः । द्वितीयं यथा ब्राह्मणाय दधि कामिने युवतिरित्यादौ सुखजनकत्वं चतुर्थ्यर्थः । अपकारकत्वं चतुर्विधमपचायकत्वमनुत्पादकत्वं नाशकत्वं दुःखजनकत्वं चेति तत्राद्यं यथा दन्तिने नवबल्वः जलाशयेभ्यः उष्णोपगम इत्यादावपचायकत्वं चतुर्थ्यर्थः । द्वितीयं यथा

दाहाय मणिः नरकाय दीपदानमित्यादावनुत्पादकत्वं चतुर्थ्यर्थः । तृतीयं यथा तापायोशीरं विषाय सुधा मोहाय तत्त्वज्ञानमित्यादौ नाशकत्वं चतुर्थ्यर्थः । चतुर्थं यथा मशकेभ्यो धूमो हरिणेभ्यो वागुरा इत्यादौ दुःखजनकत्वं चतुर्थ्यर्थः ।"क्लृपि सम्पद्यमाने च चतुर्थी वक्तव्या" । इति वार्त्तिकं क्लृपियोगे सम्पद्यमानेऽर्थे चतुर्थी भवतीत्यर्थकं संपद्यमान इति भावे शानच् भक्तिर्ज्ञानाय कल्पते इत्यत्र चतुर्थ्याः सम्पत्तिरर्थः सा चाधिक्यस्वरूपा प्रयोज्यतया भक्तिविषयके कल्प्यते तदर्थकत्वाध्यवसायस्वरूपेऽन्वेति । भक्त्यनन्तरं ज्ञानाधिक्यदर्शनेन भक्तेर्ज्ञानार्थकत्वाध्यवसायो भवतीति । यदि च कल्पनं ज्ञातकसत्त्वं सम्पत्तिरधिकसत्त्वं तदा ज्ञानविशेषितस्याधिकसत्त्वस्य चतुर्थ्यर्थस्य प्रयोजकतया भक्तिवृत्तिकृतकमत्वेऽन्वयः । अत एव सत्त्वरूपैकदेशार्थकतया सम्पदेरसतः सत्त्वार्थकजनेश्च क्लृपिपर्यायता तथा च भक्तिर्ज्ञानाय सम्पद्यत इत्यत्र भक्तिसम्पत्तौ भक्तिर्ज्ञानाय जायत इत्यत्र भक्त्युत्पत्तौ ज्ञानाधिकसत्त्वस्य तथाऽन्वयः अत एव क्लृपीत्यर्थनिर्देशः मूलाय कल्पते सम्पद्यते जायते वा यवागूरिति काशिका । कल्पनादौ धात्वर्थे चतुर्थ्यर्थस्य न कारकत्वं मूलेभ्यो यवागूरित्यत्र मूलाधिकसत्त्वप्रयोजकत्वं यवाग्वां धातुं विनाऽपि प्रतीयत इति क्लृपीतिवार्त्तिकं तु बहुवचनं विनाऽपि तथाऽर्थः प्रतीयत इति ज्ञापनार्थमेव । वस्तुतस्तु क्लृपीतिवार्त्तिकं व्यर्थमेव तादर्थ्यचतुर्थ्यैव दर्शितप्रयोगोपपत्तेः मूलाय यवागूरित्यत्र विषयत्वभावादेव मूलाधिक्यप्रयोजकत्वं यवाग्वां

प्रतीयते यतो मूत्रायौदनमिति न प्रयोगः । "उत्पातेन ज्ञाप्यमान" इति वार्त्तिकम् उत्पातवाचिपदेन योगे ज्ञाप्यमानेऽर्थे चतुर्थी भवतीत्यर्थकं ज्ञाप्यमान इति भावे लट् उत्पातास्तु मयूरचित्रकादौ विद्युद्वैकृतादयो दर्शिताः वाताय कपिला विद्युदित्यत्र ज्ञापनं ज्ञानजननं चतुर्थ्यर्थस्तच्च प्रयोजकतया कपिलविद्युत्यन्वेति ।

वाताय कपिला विद्युदातपायातिलोहिनी ।
पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् ॥

अत्र पीताऽधिकपीता बोध्या अन्यथा नोत्पातत्वमिति । उत्पातत्वं तु नात्र शब्दविषयः नवोऽनुगतमेकमत उत्पातवृत्तिज्ञापकत्वं चतुर्थ्यर्थ इति नाशङ्कनीयमत उत्पातो वाताय्येत्यपि न प्रयोगः उत्पातपरिभाषाविषयतावच्छेदको यो यो धर्मस्तद्विशिष्टप्रतिपादकशब्दयोगे चतुर्थी ज्ञापनार्थिकेत्येव वार्त्तिकार्थः । एवं रक्तोपरागो युद्धाय महोल्कासंप्लवो राष्ट्रभङ्गायेत्यादावपि ज्ञापनार्थिका चतुर्थी बोध्येति । "हितयोगे च" इति वार्त्तिकं हितशब्दयोगे चतुर्थीभवतीत्यर्थकं कालान्तरभावि इष्टस्य सुखदुःखाभावादेः साधनं हितशब्दार्थः युधिष्ठिराय हितः कृष्ण इत्यत्र चतुर्थ्याः सम्बन्धोऽर्थः स च संबन्धः सुखादावाधेयत्वं साधने स्वाधेयसुखादिनिरूप्यत्वमेवं युधिष्ठिरवृत्तिसुखादिनिरूप्यं कालान्तरभाविसुखादिसाधनं कृष्ण इत्यन्वयबोधः युधिष्ठिरवृत्तिसुखादिनिरूपितत्वस्य सुखादिसाधनेऽवगमे युधिष्ठिरवृत्तिसुखादिसाधनत्वमर्थत एवावसीयते । एवमामयाविने हितं भेषज्यमित्यत्र दुःखाभावसाधनं

हितशब्दार्थः स्ववृत्तिदुःखाभावनिरूप्यत्वं साधनान्वय्यामयाविनः संबन्धश्चतुर्थ्यर्थः पूर्ववदन्वयबोधः आमयाविवृत्तिदुःखाभावसाधनत्वस्य हितेऽवगमश्च "चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितै"रिति सूत्रेणाशंसाविषयहितयोगे षष्ठ्या सह वैकल्पिक्याश्चतुर्थ्या विधानेऽपि आशंसाविरहेऽपि चतुर्थीविधायकतया हितयोगे चेतिवार्त्तिकस्य न वैयर्थ्यमिति । नमःशब्दादियोगे चतुर्थी ज्ञापयति । "नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च" इति सूत्रं नमःस्वस्तिस्वाहास्वधाऽलंवषडित्येतैः शब्दैर्योगे चतुर्थी भवतीत्यर्थकं पुष्पं शिवाय नमः इत्यत्र दानकर्म नमःपदार्थः चतुर्थ्याः संप्रदानत्वमर्थः संप्रदानत्वं तु प्रीतिरेव प्रीतिस्तु जनकतया दानेऽन्वेति शिवप्रीतिजनकदानकर्म पुष्पमित्यन्वयबोधः । ब्राह्मणाय गौर्नम इति वाक्यं प्रमाणमपि विहितवाक्यत्वाभावेन न प्रयुज्यते ।

नामगोत्रे समुच्चार्य सम्यक्श्रद्धान्वितो ददत् ।
संकीर्त्य देशकालादि तुभ्यं संप्रददे इति ॥

इत्यार्षवचनेन संप्रदद इत्यन्तस्यैव वाक्यस्य दानवाक्यत्वेन विधानात् । ननु ब्राह्मणादिसंप्रदानके दाने नम इत्यन्तवाक्यस्य विहितत्वाभावेनाप्रयोगेऽपि प्रीत्यादिना दाने शिवाय गौर्नम इत्यादिवाक्यप्रयोगः स्यादिति चेन्न । मन्त्रकरणकत्यागकर्मणो नमःपदार्थत्वात् प्रीत्यादिना दाने मन्त्रकरणकत्वाभावात् वैधे हि कर्मणि मन्त्राणां करणत्वं तच्च त्यागादिवैधकर्मजन्यं परमापूर्वं प्रधानापूर्वं वा प्रत्यङ्गापूर्वद्वारा जनकत्वमत एव जुहुयाद्वाऋ-

गौर्मन्त्रैरित्यादौ मन्त्राणां करणत्वार्थिका तृतीया तथा च नमःपदार्थैकदेशे मन्त्रकरणकत्यागे उद्देश्यकत्वं संप्रदानत्वं प्रीतिरिति यावत् चतुर्थ्यर्थो जनकतयाऽन्वेति शिवप्रीतिजनकमन्त्रकरणकत्यागकर्म पुष्पमित्यन्वयबोधः । भवति च शिवाय नम इति वाक्यं मन्त्रः चतुर्थ्यन्तपदघटितनमोऽन्तवाक्यस्य मन्त्रत्वपरिभाषणात् ईदृशवाक्यरूपमन्त्रस्य देवतोद्देश्यकत्याग एव दर्शितकरणत्वं न तु ब्राह्मणाद्युद्देश्यत्याग इति ब्राह्मणाय गौर्नम इति वाक्यमप्रमाणमेव यत्र तु ब्राह्मणस्य दैवतत्वविवक्षा तत्र दानाङ्गब्राह्मणपूजनादौ पुष्पं ब्राह्मणाय नम इति वाक्यं प्रमाणमेव प्रयुज्यते मन्त्रवाक्ये शिवादीनां देवतात्वं पुनरर्थगम्यं न तु श्रौतं श्रौतं तु ऐन्द्रं दधीत्यादौ तद्धितेन हि चतुर्थ्यन्तकरणकत्यागकर्माभिधीयते तद्धनि तादात्म्येनान्वेति तदेकदेशे चतुर्थ्यन्तपदे प्रकृत्यर्थस्य स्वरूपपरेन्द्रपदार्थेन्द्रशब्दस्य तादात्म्येनान्वयः यदि पुनरिन्द्रश्चेतनो देवता तदेन्द्रपदार्थ इन्द्रः प्रतिपाद्यप्रतिपादकभावसंसर्गेण चतुर्थ्यन्तेऽन्वेति भवतु वेन्द्रप्रतिपादकमिन्द्रपदमेवेन्द्रपदार्थतादात्म्यमेव चतुर्थ्यन्ते पदे भासते अत एव शक्राय स्वाहेत्यादिप्रक्षेपवाक्यमश्रौतं यदग्नये च प्रजापतये जुहोतीत्यादावग्निरित्युद्देश्यताको होमश्च श्रौतस्तत्र चतुर्थ्यन्ताग्निपदकरणकत्वं न्यायावगम्यमत एव तद्धितापेक्षया चतुर्थी दुर्बला साचाद्देवताश्रुत्यभावात् । यदाहुः ।

तद्धितेन चतुर्थ्या वा मन्त्रलिङ्गेन वा पुनः ।
देवतात्वश्रुतिस्तत्र दुर्बलं तु परम्परम् ॥

इति यथा तथा प्रकृते शिवाय नम इति मन्त्रवाक्येऽपि अत्रापि शिवदत्त्युद्देश्यताकत्यागकर्म स्तुतमिति चतुर्थ्यन्तशिवपदकरणकत्वं त्यागे न्यायावगम्यमिति नमःपदार्थैकदेशे त्यागेऽन्वितमुद्देश्यत्वं चतुर्थी प्रतिपादयति। उद्देश्यत्वं तन्निष्ठा प्रीतिरेव तेन शिवप्रीतिजनकत्यागकर्म वाक्यार्थः परमात्मनि शिवे प्रीतेस्तज्जनकत्वस्य च बाधितत्वे तु प्रीत्युद्देश्यकेच्छैव चतुर्थ्यर्थस्तत्तालम्बनत्वेन शिवस्यान्वयः शिवः प्रीयतामिति बाधितविषयेच्छासम्भवात् तादृशेच्छा तु प्रयोज्यतया त्यागेऽन्वेति फलेच्छाया उपायेच्छाप्रयोजकत्वादिति पदवाक्यरत्नाकरे गुरुचरणाः। वस्तुतस्तु पुष्पं शिवाय नमः इत्यादौ मन्त्रकरणकत्यागो नमःपदार्थः त्यागस्तु स्वत्वनाशप्रकारिकेच्छा तस्यास्तु स्वत्वनाशप्रकारतानिरूपितविशेष्यतास्वरूपेण विषयत्वेन पुष्पेऽन्वयः चतुर्थ्याः संबन्धोऽर्थः संबन्धस्तु प्रीतीच्छाप्रयोज्यत्वं तच्च स्वरूपेण स्वत्वनाशेऽन्वेति परम्परासंबन्धघटकतदेकदेशे प्रीतीच्छायां प्रकृत्यर्थस्य प्रीतिप्रकारतानिरूपितविशेष्यतास्वरूपेण विषयित्वेनान्वयः यथा जलस्य कर्पूरगन्धः स्फटिकस्य जवालौहित्यमित्यादौ षष्ठ्यर्थस्य परम्परासंबन्धस्य घटके तदेकदेशे संयोगे प्रकृत्यर्थस्य जलादेरन्वयः परम्परासंबन्धस्य विभक्त्यर्थत्वे तदेकदेशे प्रकृत्यर्थान्वयस्य सर्वसंमतत्वात्। भवतु वा प्रीतीच्छा प्रयोज्यत्वं च खण्डशश्चतुर्थ्यर्थोऽन्वयस्तु पूर्ववदेव तथा च प्रीतिप्रकारतानिरूपितशिवविशेष्यताकप्रीतीच्छाप्रयोज्यमन्त्रकरणकस्वत्वनाशप्रकारकेच्छायाः स्वत्वनाशप्रकारतानिरूपितविशेष्यता-

वत् पुष्पमित्यन्वयबोधः । विषयतायाश्च इच्छादिसमानकालिकत्वात् त्यक्ते पुष्पादौ न नमःपदप्रयोगः । नमः-स्वाहादिपदानां प्रयोक्तृपुरुषीयत्यागार्थकत्वादन्यदीयत्यागेऽन्यस्य न नमःस्वाहादिपदप्रयोगः प्रीतीच्छाप्रयोज्यत्वं स्वत्वनाशान्वय्येवोपपद्यते यतः प्रीतीच्छाप्रयोज्यस्वत्वनाश एव देवतानां स्वत्वं संबन्धः शिवस्य पुष्पमित्यादौ षष्ठ्यर्थतया प्रतीयते तत्र हि प्रीतीच्छाप्रयोज्यत्वस्य त्यागविशेषणत्वे विशिष्टत्यागस्य प्रयोज्यतया स्वत्वनाशघटकत्वे परम्परासंबन्धगौरवं स्यात् तस्य स्वत्वनाशविशेषणतया परम्परासंबन्धघटकत्वे दर्शितसंबन्धस्य लाघवमेव न वा प्रीतीच्छायास्तत्प्रयोज्यत्वस्य वा चतुर्थ्यर्थस्य नमःपदार्थे त्यागेऽन्वयो युज्यते तथासति प्रीतेरुद्देश्यतया त्यागेऽन्वयेनैव तादृशप्रयोगसम्भवात् शिवादेः प्रीतिबाधेऽपि बाधितोद्देश्यताकेच्छासम्भवात्। अग्नये जुहोतीत्यादौ संप्रदानत्वस्य प्रीतेर्नमःपदार्थान्वयोपगमे धातुं विना स्वविशेषणैकशाब्दविषयत्वात्कारकत्वहानिप्रसङ्गात् शिवाय नम इति मन्त्रवाक्ये शिवादीनां देवतात्वं मन्त्रलिङ्गेनावगम्यते यथा त्रातारमिन्द्रमवितारमिन्द्रमितिमन्त्रेण प्रकाश्यमानस्येन्द्रस्य देवतात्वं तच्च त्यागार्थकनमःस्वाहादिपदसमभिव्याहृतचतुर्थ्यन्तपदप्रतिपाद्यत्वमथ वा नमःस्वाहादिपदप्रतिपाद्यस्य त्यागप्रकारस्वत्वनाशस्य प्रयोजिकायाः प्रीतीच्छाया विषयत्वं प्रागुक्तविशेष्यत्वस्वरूपं बोध्यमिति यत्र पदे। न श्रुत्योपस्थापितेऽर्थे पदान्तरार्थस्यान्वयेन वाक्यार्थतया देवतात्वं प्रतीयते तत्र श्रौतं तदुच्यते यथा ऐन्द्रं दधि

भवत्यमावास्यायामित्यादौ तद्धितेनाण्प्रत्ययेन प्रीतीच्छाप्रयोज्यस्य मन्त्रकरणकत्यागप्रकारस्य स्वत्वनाशस्याश्रयो ऽभिधीयते तत्र प्रागुक्तविशेष्यितया प्रीतीच्छायामिन्द्रपदार्थस्येन्द्रस्यान्वयस्तथा च विशेष्यितया तादृशप्रीतीच्छायामन्वये तादृशप्रीतीच्छाया अपि प्रागुक्तविशेष्यतयेन्द्रेऽन्वय इतीन्द्रस्य देवतात्वं वाक्यार्थतया प्रतीयते एवं यथा स्रुतिवीहारा इत्यनेन त्यागवाक्यस्य स्रुतपदघटितत्वनियमनेन शक्राय स्वाहेत्यादिको न प्रयोगः । यदग्नये च प्रजापतये च जुहोतीत्यादौ चतुर्थ्यर्थप्रीतेरुद्देश्यितया होमान्वये होमजन्यस्वत्वनाशप्रयोजकप्रीतीच्छाविषयत्वं वन्हौ न्यायगम्यं यत्प्रीत्युद्देश्यकत्यागजन्यः स्वत्वनाशः स स्वत्वनाशप्रयोजकप्रीतीच्छाविषय इत्येव न्यायः वाक्यार्थविधयाऽप्यत्र प्रीतीच्छाविषयत्वं न प्रतीयत इति न श्रौतं देवतात्वमिति-अचेतनदेवतापक्षे गुरुचरणादर्शिता रीतिरनुसन्धेया । तत्रै पुरभिदे नम इत्यत्र नमःपदस्य नमस्कारोऽर्थः स चोत्कर्षप्रतिपत्त्यनुकूलो व्यापारः तत्रोत्कर्षप्रकारकप्रतिपत्त्यन्वयिविशेष्यित्वं समवेतत्वं च इयं संबन्धश्चतुर्थ्यर्थस्तथा च शिवसमवेतशिवविशेष्यताकोत्कर्षप्रकारकप्रतिपत्त्यनुकूलो व्यापारो वाक्यार्थः व्यापारस्तु नमःपदप्रयोक्तुरेव बोध्यः यदि चाभिवाद्यस्य नोत्कर्षप्रतीतिस्तदोत्कर्षप्रतिपत्तीच्छैव नमस्कारो बोध्यः । अतः शिवसमवेतप्रतिपत्तेर्नित्यतया व्यापारस्य तदनुकूलत्वविरहेऽपि न क्षतिः शिवस्य जन्यप्रतिपत्तिविरहेऽपि तदुद्देश्यकेच्छासम्भवात् उत्कर्षप्रतिपत्तेरुद्देश्यतयेच्छायामन्वयात् । इ-

क्षाऽपि व्यापारवत्प्रयोक्तुरेव बोध्या स्वस्ति प्रजाभ्य इत्यत्र संबन्धश्चतुर्थ्यर्थः स चाधेयत्वमेव स्वस्तिपदार्थः कुशलं तच्चानिष्टसाधनाभावस्तथा च प्रजावृत्तिरनिष्टसाधनाभाव इत्यन्वयबोधश्चतुर्थी चाशिष्यायुष्यमद्रभद्रेतिसूत्रे कुशलग्रहणेन तत्पर्यायस्य स्वस्तेर्ग्रहणे नाशंसायां चतुर्थीसम्भवेऽप्याशंसाविरहेऽपि चतुर्थीविधानार्थं प्रकृते नमःस्वस्तीतिसूत्रे स्वस्तिग्रहणम् अग्नये छत्तिकाभ्यो वा हविः स्वाहेत्यत्र वह्निसंयोगजनकप्रक्षेपोत्तराङ्गकविहितत्यागः स्वाहापदार्थः विहितत्वविशेषणात् वह्निप्रक्षेपफलकयावदृच्छिकत्यागो न स्वाहापदार्थः त्यागस्तु स्वत्वनाशप्रकारिकेच्छैव चतुर्थ्यर्थः संबन्धः प्रीतीच्छाप्रयोज्यत्वं तस्य स्वत्वनाशेऽन्वयः प्रीतीच्छायां तु प्रीतिप्रकारतानिरूपितविशेष्यताकत्वेन प्रकृत्यर्थस्यान्वयः त्यागस्य स्वत्वनाशप्रकारतानिरूपितविशेष्यतया हविष्यन्वयः पुष्पं शिवाय नमः इत्यत्रैवान्वयबोधः । अनग्निकर्तृकब्राह्मणपाण्याद्यधिकरणकप्रक्षेपोत्तराङ्गके त्यागे अग्नौकरणहोमे स्वाहाप्रयोगो गौण इति । इदमन्नं पितृभ्यः स्वधेत्यत्र पितृनुद्देश्यकत्यागः स्वधापदार्थः पितृत्वं तु त्रैवर्णिकसपिण्डितत्वं पारशवस्य पिता न त्रैवर्णिकेन सपिण्डितः किन्तु दैवतमात्रमिति न तत्र स्वधाशब्दप्रयोगः त्रैवर्णिकेन सपिण्डितस्य पारशवेन क्रियमाणे पुनरौर्ध्वदैहिकादौ न स्वधाशब्दप्रयोगः तस्य स्वधाशब्दप्रयोगनिषेधात् प्रत्यवायसहेन पारशवेन प्रयुक्तः स्वधाशब्दः शाब्दबुद्धिं जनयत्येव बाधकाभावात् भवतु वा स्वधाकरणकत्यागः स्वधाशब्दार्थः शूद्रकर्तृक-

स्त्यागो न स्वधाकरणक इति न तत्र स्वधाप्रयोग इति संप्रदायः । वस्तुतस्तु विहितस्त्यागः स्वधाशब्दार्थः चतुर्थ्यर्थः पूर्वोक्त एव संबन्धस्तस्य स्वत्वनाशे त्यागस्यान्ने पूर्ववदन्वयः पुष्पं शिवाय नमः हविरग्नये स्वाहेत्यत्रेवान्वयबोधः नमःस्वाहास्वधाशब्दानां विहितस्त्याग एवार्थः त्यागस्तु प्रयोक्तुरेव तत्र प्रजादौ नमः पदस्य होमे स्वाहा पदस्य श्राद्धे स्वधापदस्य प्रयोगे विशेषविधानात् शूद्रस्य न स्वाहास्वधाप्रयोगो निषेधात् प्रत्यवायसहस्र स्वाहास्वधाप्रयोगेऽपि स त्यागो न तथाविहित इति न स्वाहादिशब्दार्थ इति न शाब्दबोधः अत एव शूद्रेण क्रियमाणे श्राद्धादौ नमःपदप्रयोगः यत्र स्वधाप्रयोगनिषेधस्तत्र वैवर्णिकेनापि क्रियमाणे दृद्धिश्राद्धादौ नमः-स्वाहापदयोरेकतरप्रयोगः विशेषविधानादेवानाग्निकर्तृकेऽग्नौकरणे स्वाहापदप्रयोगः । अलं जगते इत्यत्रालमितिपर्याप्त्यर्थकानां ग्रहणं पर्याप्तिरपि स्वाम्यं निग्राहकत्वं च अत एवालमितिपर्याप्त्यर्थग्रहणमिति काशिका । चतुर्थ्यो निरूपितत्वमर्थः पर्याप्तावन्वेति तथा च जगन्निरूपितस्वाम्यवान् जगन्निरूपितनिग्राहकत्ववान् वैत्यन्वयबोधः जगते प्रभुर्भगवानित्यत्र प्रभुत्वमपि स्वाम्यं निग्राहकत्वं च पूर्ववदन्वयः जगते समर्थः शक्तो वा भगवानित्यत्र सामर्थ्यं शक्तत्वं च निग्राहकत्वमेव पूर्ववदन्वयः मल्लाय प्रभुः समर्थः शक्तो वा मल्ल इत्यत्र प्रभुत्वादिकं निग्राहकत्वमेव पूर्ववदन्वयः घटायालं समर्थः शक्तो वा कुलाल इत्यत्र स्वरूपयोग्यत्वसुपहितत्वं वा सामर्थ्यादिकं पूर्ववदन्वयः । प्रभ्वादिशब्दयोगे षष्ठ्यपि

साधुः "स एषां ग्रामणी"रितिनिर्देशात् अत एव प्रभुर्बुभूषुर्भुवनत्रयस्य य इति माघोऽप्युपपद्यते । वषडिन्द्राय वषडग्नये इत्यत्रापि विहितस्त्यागो वषट्पदार्थः चतुर्थ्याः प्रीतीच्छाप्रयोज्यत्वमर्थः नमःस्वाहायोगवदन्वयः विशेषविधानात् वषट्पदप्रयोगः नमःस्वाहादिशब्दानां पर्यायाणां ग्रहणेन पर्यायस्य हन्तादिशब्दस्य योगेऽपि चतुर्थी ज्ञाप्यते यथा इदमन्नं सनकादिमनुष्येभ्यो हन्त इत्यत्र विहितस्त्यागो हन्तशब्दार्थः चतुर्थ्याः प्रीतीच्छाप्रयोज्यत्वमर्थः नमःस्वाहादियोगवदन्वयः विशेषविधानाद्धन्तशब्दप्रयोगः वषड्ग्रहणं फट्वौषडादिशब्दानामप्युपलक्षकं तेन नेत्रत्रयाय वौषट् अस्त्राय फट् इत्यत्र चतुर्थ्युपपद्यते एतदर्थमेव सूत्रे चकारः । काशिकाकृतस्तु चकारः पुनरस्यैव समुच्चयार्थः तेनाशीर्विवक्षायामपि षष्ठीं बाधित्वा चतुर्थ्येव भवति स्वस्ति गोभ्यो भूयात् स्वस्ति ब्राह्मणेभ्यो भूयादित्याहुः । हृदयाय नम इत्यादौ नमःस्वाहावषट्वौषट्फट्शब्दाः कुशलार्थकाः चतुर्थ्याआधेयत्वं संबन्धः चतुर्थ्यर्थः कुशलेऽन्वेति । हुंशब्दोऽपि वषट्शब्दस्य तदुपलक्षकतयाऽऽशीर्विवक्षया वा चतुर्थीति । ननु देवान् नमस्यतीत्यत्र नमोयोगे चतुर्थी स्यात् "नमोवरिवश्चित्रङः क्यजि"ति सूत्रेण नमःशब्दात् करणे क्यच्विधानेन नमस्यतीतिसिद्धेः नमस्यतेर्नमस्करोतेश्च नमस्कारानुकूलप्रयत्नार्थकतया फलसमानाधिकरणव्यापारवाचित्वादकर्मकतया तद्योगे द्वितीयाऽनुपपत्तिश्च यदि च नमस्यतिनमस्करोतौ धातू नमस्कारे रूढौ व्याकरणव्युत्पादनमुणादिवद्ब्राह्मोपलालनं तदा फलस्यो-

त्कर्षप्रकारकप्रतिपत्तेर्व्यधिकरणव्यापारवाचित्वात् स-कर्मकतया द्वितीयोपपत्तावपि नमोयोगे चतुर्थीविधानेन द्वितीयाचतुर्थ्योर्विकल्पः स्यादिति चेन्न उपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायात् देवान् नमस्यति नमस्करोति वेत्यत्र द्वितीयाया एव साधुत्वादिति । स्वयंभुवे नमस्कृत्येत्यत्र नमोयोगे न चतुर्थी किं तु क्रि-यार्थोपपदेतिसूत्रेण क्रियार्थक्रियायां तथा च स्वयंभुवं प्रीणयितुं नमस्कृत्येत्यर्थ इत्युक्तप्रायम् ।

इत्यकारकचतुर्थ्यर्थनिर्णयः ।

इति विभक्त्यर्थनिर्णये चतुर्थीविवरणं समाप्तम् ।

अथ पञ्चमी ।

ङसिभ्यांभ्यस इति त्रयः प्रत्ययास्तत्र सरसः समुपैति सुमनसः समधीत इत्यादौ श्रूयमाणत्वादसस्तत्वेन भ्यामित्यस्य भ्यांत्वेन भ्यसो भ्यस्त्वेन वाचकत्वं ङकार इकारश्चानुबन्धः क्व चिदप्यश्रूयमाणत्वान्न तौ वाचकताकुक्षिप्रविष्टाविति अनुशासनसिद्धाः पञ्चम्या अर्थाः । अनुशासनं च "अपादाने पञ्चमी" इति । तत्रापादानमपादानत्वं वाऽर्थ इति वक्ष्यते । अत्राध्ययनमिच्छित इत्यधिकारस्तेन चौरभीत इत्यत्र समासेन व्याघ्र इति बिभेतीत्यत्र निपातेनापादानाभिधाने न पञ्चमी । अपादानपदसङ्केतयाहकं सूत्रं "ध्रुवमपायेऽपादानम्" इति । ध्रुवं यदपाययुक्तमपाये साध्ये यदवधिभूतं तत्कारकमपादानसंज्ञं भवतीत्यर्थकम् । अपायो विश्लेषः संबन्धापगम इति यावत् । विश्लेषस्य साध्यत्वं क्रियाजन्यत्वं तेन स्वतःसिद्धविश्लेषवतो ध्रुवस्य नापादानत्वमतो मेरोरयमायातीति न प्रयोगः तरोः पत्रं पततीत्यत्र विश्लेषस्य संयोगनाशस्य प्रयोजको विभागोपायस्तद्वत्त्वमपायित्वं क्रियानधिकरणत्वं ध्रुवत्वं तत्र विभागो भेदश्च पञ्चम्यर्थः लाघवाक्रियावदन्यो विभागवान्न पञ्चम्यर्थो गौरवात् विभागस्य जनकतया भेदस्य प्रतियोगितावच्छेदकतया क्रियायामन्वयः वृक्षस्य पतनक्रियावदन्यत्वाद्विभागवत्वाच्चापादानत्वं क्रियावदन्यत्वं तु तत्क्रियावदन्यत्वं बोध्यं तेन कुड्यात्पततोऽश्वात्पततीत्यत्राश्वस्य पतनक्रियावत्त्वेऽपि नरकर्तृकपतनक्रियापादानत्वस्य न हानिस्तदुक्तं हरिणा ।

अपाये यदुदासीनं चलं वा यदि वाऽचलं ।
ध्रुवमेवातदावेशात्तदपादानमुच्यते ॥
पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमुच्यते ॥
उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मजे ।
विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते ॥
मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।
मेषयोः स्वक्रियाऽपेक्षं कर्तृत्वं च पृथक् पृथक् ॥

इति तत्र अपाये विभागे सतीति शेषः । उदासीनं कर्म कर्त्रादिभिन्नं कारकं चलं धावदश्वादि अचलं तरुपर्वतादि अतदावेशात्क्रियाशून्यत्वात् । ननु परस्परस्मान्मेषावपसरत इत्यादावुभयकर्मजन्यविभागवत्तया विभागजनकक्रियावदन्यत्वं न कस्यापि मेषस्य तत्कथं मेषयोरपादानत्वमित्याशङ्कते । उभावपीत्यादि । नन्वपादानसंज्ञायां क्रिया क्रियात्वेन विभागजनकत्वेन वा न प्रवेशनीया किं तु तादृप्येणेति नानुपपत्तिरिति समाधत्ते । प्रविभक्ते त्वित्यादि । तुस्तथापिपर्यायः प्रविभक्ते भिन्ने क्रिये विवक्षिते तदृपेणेतिशेषः । ननु कर्तृसंज्ञाऽवरुद्धयोर्मेषयोः कथमपादानसंज्ञा "आकडारादेका संज्ञे"ति संज्ञाप्रतिनियमनादित्याशङ्क्य भिन्नभिन्नक्रियानिरूपितसंज्ञाद्वयसमावेशो न विरुद्ध इति समाधत्ते । मेषान्तरेत्यादि । अवधित्वं विभागजनकतत्क्रियावदन्यत्वे सति तत्क्रियाजन्यविभागवत्त्वं यद्यतिरिक्तशक्तिस्वरूपमवधित्वं तदाऽप्येतदभिव्यङ्ग्यमेव तत् कर्तृत्वं क्रियाश्रयत्वमत्रापि क्रिया तदृपेणैव निविशत इति भावः स-

र्वमिदं बालोपलालनं न तु पञ्चम्यर्थविवेचनं क्रियादेरन्यलभ्यत्वात्तत्तत्क्रियादेरननुगमेन पञ्चम्यर्थप्रवेशानुपपत्तेः तस्माद्भेदो विभागश्च पञ्चम्यर्थस्तत्र प्रकृत्यर्थस्याधेयतया अन्वयः विभागस्य जनकतया भेदस्य प्रतियोगितावच्छेदकतया पतनादिक्रियायामन्वयः । तरोः पत्रं पततीत्यत्र तरुसमवेतविभागजनकस्य तरुवृत्तिभेदप्रतियोगितावच्छेदकस्य पतनस्याश्रयः पत्रमित्यन्वयबोधः । शाब्दिकैकदेशिनस्तु विभाग एव पञ्चम्यर्थो न तु भेदः न चैवं पत्रात्पत्रं पततीतिप्रयोगप्रसङ्ग इति वाच्यं परया कर्तृसंज्ञयाऽपादानसंज्ञाबाधात् पञ्चम्यनुपपत्तेः संज्ञाया एव विभक्तिनिष्पादकत्वादिति वदन्ति । तन्न एवं सति वृक्षात्पर्णं पतति न पत्रादित्यत्र निषेधप्रतीत्यनुपपत्तेः पतने पत्रसमवेतविभागजनकत्वाभावस्य नञा बोधनासम्भवादयोग्यत्वात् गुणान्न पततीत्यादाविव प्रकृत्यर्थसमवेतत्वाभावस्य पञ्चम्यर्थे विभागे बोधनस्याप्यसम्भवात् विभागस्य पत्रसमवेततया अयोग्यत्वात् भेदस्य पञ्चम्यर्थतावादे तु पत्रनिष्ठभेदप्रतियोगितावच्छेदकत्वाभावस्य पतने नञा बोधनसम्भवान्निषेधप्रतीत्युपपत्तिः नन्वेवमपि पत्रसमवेतविभागजनकत्वस्य पत्रान्तरनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य च द्वयोः पतने सत्त्वान्निषेधप्रतीत्यनुपपत्तिः पत्रात्पत्रं पततीतिप्रयोगप्रसङ्गश्च न च तत्तत्पत्रनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य समुदायो नञा निषिध्यत इति निषेधप्रतीत्युपपत्तिस्तथाविधसमुदाय एव पञ्चम्याः साधुत्वान्न दर्शितप्रयोगस्येत्यादिपूर्वोक्तप्रायं सांप्रतमिति वाच्यं युगसहस्रेणापि ग्रहीतु-

मशक्यत्वात् न च स्ववृत्तिविभागजनकत्वस्ववृत्तिभेदप्रतियोगितावच्छेदकत्वोभयसंसर्गावच्छिन्नप्रतियोगिताकः पत्रसामान्यभाव एव पतने नञा बोध्यते पञ्चमी तु प्रतियोगितावच्छेदकसंसर्गानुवादिकेत्यपि पूर्वोक्तप्रायं युज्यत इति वाच्यं वृत्त्यनियामकसंबन्धस्य प्रतियोगितावच्छेदकतयाऽनभ्युपगमात् अभ्युपगमे तु विभागप्रतियोगित्वविशिष्टजनकत्वस्वरूपसाच्चात्संसर्गावच्छिन्नप्रतियोगिताकस्य पत्रसामान्यभावस्य पत्रापादानकपतनेऽपि सत्त्वेन पत्रात्पतपि पतङ्गे पत्रान्नायं पततीतिप्रयोगप्रसङ्गात् न च परम्परामुद्रया तादृशसंसर्गावच्छिन्नप्रतियोगिताक एव पत्रसामान्याभावः पञ्चम्यन्तपत्रपदपत्त्यादिधातुसमभिव्याहृतनञा बोध्यते परम्परा हि विभागनिरूपकत्वजनकत्वानि भेदानुयोगित्वप्रतियोगित्वावच्छेदकत्वानि च परस्परविशृङ्खलितान्येव संसर्गस्तत्र प्रथमपरम्परास्थले पत्रत्वावच्छिन्नप्रतियोगितानिरूपिता विभागसंसर्गता तया निरूपितो निरूपकत्वे तया निरूपिता जनकत्वे च संसर्गता तन्निरूपितानुयोगिता नञर्थेऽभावे भासते द्वितीयपरम्परायामप्यनया रीत्या संसर्गता बोध्या विभागप्रतियोगित्वविशिष्टजनकतास्वरूपसाच्चात्संसर्गे तु विशिष्टधर्मावच्छिन्नजनकतावृत्तिरेकैव संसर्गता प्रतियोगित्वानुयोगित्वाभ्यां निरूप्यत इति परम्पराविशिष्टसंसर्गयोः संसर्गताविवेक इति न दर्शितप्रयोगप्रसङ्ग इति वाच्यं परम्परासंसर्गतासु प्रथमा प्रतियोगितया चरमा पुनरनुयोगितया प्रथमैवानुयोगितया चरमैव प्रतियोगितया निरूप्यत इत्यत्र

विनिगमकाभावात् दृश्यते च प्राचां निबन्धेषु प्रतियोगिविश्रान्ताः रचनाः न चोभयथा ऽपि परम्परातो विशिष्टस्य संसर्गताविवेक उपपद्यत इति वाच्यं विलोमानुलोमपरम्परासंसर्गावच्छिन्नप्रतियोगिताकाभावयोरविशेषप्रसङ्गादिति परम्परायाः संसर्गत्वस्य नितरां प्रतियोगितावच्छेदकत्वस्य चानुपपत्त्या पत्रं न पत्रात्यतीत्यत्र निषेधप्रतीत्यनुपपत्तिरिति चेत् । अत्र गुरुचरणाः पुष्पवन्तौ नेत्यत्र विभक्त्युपस्थाप्यद्वित्वविशिष्टयोः सूर्याचन्द्रमसोर्नञर्थान्वये सूर्यचन्द्रोभयत्वावच्छिन्नप्रतियोगिताकाभावो बुध्यतां यत्र तु निष्पुष्पवन्तमित्यव्ययीभावस्तत्र द्वित्वोपस्थापकाभावात् द्वित्वावच्छिन्नप्रतियोगिताकाभावबोधनासम्भवात् न्यूनत्वोक्तिभ्यां सूर्यत्वचन्द्रत्वाभ्यामवच्छिन्नव्यासक्तप्रतियोगिताकः सूर्याचन्द्रमसोरत्यन्ताभावः प्रतीयते यथा तथा न पत्रादित्यादौ विभागजनकत्वभेदप्रतियोगितावच्छेदकत्वपर्याप्तप्रतियोगिताकोऽप्यभाव इति यदि च पुष्पवन्तपदादेः सूर्यचन्द्रोभयमर्थः । तदा पञ्चम्या अपि विभागनिरूपकजनकत्वभेदप्रतियोगितावच्छेदकत्वोभयमर्थः तथा चोभयत्वावच्छिन्ना प्रतियोगिता जनकतात्वनिष्ठयाऽवच्छेदकत्वनिष्ठया चावच्छेदकतया निरूप्यते अथ वोभयत्वनिष्ठाऽवच्छेदकता सामानाधिकरण्येन जनकतात्वावच्छेदकत्वाभ्यामवच्छिद्यते तत्र जनकतात्वनिष्ठावच्छेदकता निरूपकत्ववृत्त्या सा च विभागवृत्त्या अवच्छेदकत्वत्वनिष्ठा तु प्रतियोगितावृत्त्या सा च भेदनिष्ठयाऽवच्छेदकतया निरूप्यते स्रोतोहृदयसुखभूतं तु विभागभेदयोरवच्छेदकत्व-

द्वयमेकमेव पतत्वावच्छिन्नयाऽवच्छेदकतया निरूप्यत-
इति असुमेवाभावं पत्रपतनकर्तृपत्रे विभागजनकत्वत-
न्निष्ठभेदप्रतियोगितावच्छेदकत्वं पतने नास्तीतिवाक्येन
प्रामाणिका व्यवहरन्ति । एतादृशाभावबोधः पतत्वा-
ट्यवच्छिन्नैकप्रकारतानिरूपितविभागभेदोभयविशेष्य-
ताकः सम्भवति प्रकारताद्वयनिरूपितैकविशेष्यताकस्य
संशयादेरिव विशेष्यताद्वयनिरूपितैकप्रकारताकबोध-
स्याप्युपेयत्वात् अत एव संशयाव्यवहितोत्तरं प्रत्यक्ष-
मिति वाक्येन मानान्तरेण वा यस्मात्संशयाद्व्यवहि-
तं तस्मादुत्तरं प्रत्यक्षमिति प्रत्याय्यते संशयत्वावच्छिन्न-
यैकप्रकारतयाऽव्यवधानोत्तरत्वविषयतयोस्ताभ्यां च प्र-
त्यक्षविशेष्यताया निरूपणेन फलत एकतमसंशयाव्य-
वहितपूर्वस्य चिरातीतसंशयान्तरोत्तरप्रत्यक्षस्यानवगा-
हनात् । एवमेव धूमत्वादिसामान्यधर्ममन्तर्भाव्य व-
न्ह्यादेः कारणत्वमपि सुग्रहं तत्तद्वह्न्याव्यवहितपूर्वक्ष-
णावच्छेदेन तत्तद्वह्न्याधिकरणे विद्यमानस्याभावस्य प्र-
तियोगितासामान्याभावो वह्नौ धूमकारणता स चैक
एवाभावः न तु धूमव्यक्तिघटितकूटात्मकः युगसहस्रे-
णापि दुर्ग्रहत्वात्सम्भवति चैकयैव धूमत्वावच्छिन्नाव-
च्छेदकतया निरूपितमव्यवहितपूर्वक्षणावच्छिन्नत्वे अ-
धिकरणत्वे चावच्छेदकताद्वयं ताभ्यां निरूपितं विद्य-
मानत्वे तेन चाभावेऽवच्छेदकत्वमेकैकमेव परस्परनि-
रूपितमभावनिष्ठावच्छेदकत्वेन निरूपिता प्रतियोगिता-
त्वावच्छिन्ना प्रतियोगितेति तन्निरूपकोऽनुगतः सामा-
न्याभावः तद्वह्निं प्रति धूमत्वावच्छिन्नैकप्रकारतानिरू-

पितान्यवहितपूर्वक्षणावच्छिन्नत्वाधिकरणावृत्तिविशेष्यतानिरूपितविद्यमानत्वादिनिष्ठैकविषयताको व्यभिचारग्रह एव विरोधी न तु धूमान्तराव्यवहितपूर्वक्षणावच्छेदेन धूमान्तराधिकरणे विद्यमानं वन्ह्यभावमवगाहमान इत्यन्यत्र विस्तरोऽनुसन्धेय इति पदवाक्यरत्नाकरे प्राहुः । वस्तुतस्तु विभागो भेदश्च पञ्चम्यर्थः विभागस्य जनकत्वेन भेदस्य स्वसमानाधिकरणविभागजनकत्वविशिष्टेन प्रतियोगितावच्छेदकत्वेन संबन्धेन पतनादिक्रियायामन्वयः तरोः पत्रं पतति न पत्रादित्यत्र पत्रवृत्तिभेदस्य दर्शितेन विशिष्टप्रतियोगितावच्छेदकत्वेन संबन्धेनावच्छिन्नप्रतियोगिताकोऽभावो नञा पतने बोध्यते ऽतो भेदस्य पत्रान्तरनिष्ठस्य प्रतियोगितावच्छेदकत्वसंबन्धेन पतने सत्त्वेऽपि न निषेधप्रतीत्यनुपपत्तिः दर्शितविशिष्टप्रतियोगितावच्छेदकत्वसंबन्धस्य प्रतियोगितावच्छेदकताया युक्तिसहत्वात् यो हि वृत्त्यनियामकः संबन्धः प्रतियोगिविशिष्टबुद्धिं नार्जयति स न प्रतियोगितावच्छेदकः यो हि विशिष्टबुद्धिमर्जयति स प्रतियोगितावच्छेदक एव तद्वैशिष्ट्यं प्रति तत्संबन्धावच्छिन्नप्रतियोगिताकाभावस्य विरोधित्वादित्यादियुक्तोद्वितीयाविवरणे दर्शितत्वात् यदि च वृत्त्यनियामकः संबन्धो न प्रतियोगितावच्छेदक इति मन्त्रपाठमधर्यादिवत् प्रतियोगितावच्छेदकत्वबुद्धिं विरुणद्धि तदा भेदस्य दर्शितविशिष्टप्रतियोगितावच्छेदकत्वविशिष्टा विशेषणतैव संबन्धः पतनादिक्रियायामन्वयघटको न पत्रादित्यत्र नञर्थाभावस्य प्रतियोगितावच्छेदकश्चाभ्यु-

पेयते यदत्र परम्परासंबन्धस्य न संसर्गत्वं न वा प्रतियोगितावच्छेदकसंसर्गत्वमिति बाधकमुक्तं तदप्यकिंचित्करं सुरभि जलं लोहितः स्फटिक इत्यत्र समवायिसंयोगस्य संसर्गतायाः कर्पूरगन्धो न तडागजले किं तु कुङ्कुमोदके मञ्जिष्ठारागो न मैत्रवस्त्रे किं तु चैत्रपटे इत्यत्र प्रतियोगितावच्छेदकतायाः सर्वानुभवसिद्धत्वात्प्रकृतेऽपि विभागभेदयोः पञ्चम्यर्थयोः जनकत्वप्रतियोगितावच्छेदकत्वाभ्यां परम्पराभ्यां पतनादिक्रियायामन्वयात् न पत्रादित्यादौ परम्परायाः प्रतियोगितावच्छेदकसंसर्गतया निषेधप्रतीत्युपपत्तिः नञ्विनिर्मुक्तावावये येन संबन्धेन यस्य यत्रान्वयः तत्र नञ्समभिव्याहारे तत्संबन्धावच्छिन्नप्रतियोगिताकस्तस्याभावस्तत्रान्वेतीतिव्युत्पत्तेः न च सुरभि जलमित्यादिप्रत्यक्षादिबुद्धौ परम्परायाः संसर्गत्वेऽपि शाब्दे क्वापि संसर्गत्वाभावात् प्रकृतेऽपि न संसर्गत्वं न वा प्रतियोगितावच्छेदकसंसर्गत्वमिति वाच्यं पचतीत्यादौ विक्लित्त्यादिफलकस्य जनकतया प्रयोजकतया वा फूत्कारादिव्यापारे तस्य प्रयोजकतया तिङर्थे प्रयत्नेऽन्वयदर्शनात् एवं चैत्रेण न पच्यत इत्यादौ तृतीयार्थप्रयत्नस्य प्रयोज्यतया संबन्धेनावच्छिन्नप्रतियोगिताकोऽभावः पाकेऽन्वेतीति सर्वानुभवान्न हि जनकता जन्यता वा प्रयोजकता प्रयोज्यता वा साक्षात्संबन्धः न च जनकत्वसतिरिक्तपदार्थस्तस्य साक्षात्संबन्धत्वमिति वाच्यं जनकत्वस्य तथात्वे तु जन्यत्वस्यापि तथात्वावश्यकत्वात् प्रति जनकं जन्यं च जन्यत्वजनकत्वयोरतिरिक्तयोरनन्तकल्पनाऽपेक्षया कार्याधिकरणवृत्त्य-

भावप्रतियोगितावच्छेदकस्य क्लृप्तस्य तथात्वौचित्यात् जन्यत्वस्यातिरिक्तत्वपक्षेऽपि प्रयोजकत्वस्य साक्षात्संबन्धत्वाभावात् प्रयोजकतया प्रयोज्यतया वाऽन्वये परम्परायास्तथात्वावश्यकत्वमिति न च फलस्य व्यापारे तस्य प्रयत्ने जनकतयाऽन्वयो न तु प्रयोजकतयेति वाच्यम् । अधिश्रयणाद्यवतारणान्तानां व्यापाराणां विक्लित्त्यादिजनकत्वविरहात् मध्यमव्यापाराणां जनकत्वेऽपि प्रथमव्यापारेषु प्रयोजकतयैव विक्लित्त्यादेरन्वयसम्भवात् पचतीत्यत्रापि व्यापारस्य तथैवान्वयात् न चात्र साध्यित्वाख्यविषयित्वसंबन्धेनान्वय इति वाच्यं प्रथमव्यापारस्य चरमव्यापारानुकूलप्रयत्ने तथाऽन्वयासम्भवात् । एवं चैत्रेण पच्यत इत्यत्र तृतीयार्थप्रयत्नस्यापि न साध्यत्वाख्यविषयत्वेन व्यापारेऽन्वयः प्रथमव्यापारसाध्यकप्रयत्नस्य मध्यमचरमव्यापारेषु साध्यत्वविरहादिति प्रयोज्यतयैवान्वय इति चैत्रेण न पच्यत इत्यत्र प्रयोज्यतासंबन्धावच्छिन्नप्रतियोगिताकः प्रयत्नाभावो व्यापारे प्रतीयत इति परम्परायाः संसर्गत्वं प्रतियोगितावच्छेदकसंसर्गत्वं च सर्वसंमतमिति । यदि च भेदोऽपि पत्यादिधातोरेवार्थः सर्वत्र पञ्चमीघटितशाब्दसामाग्र्यां भेदोपस्थितेर्निवेशनापेक्षया पत्यादिधातुघटितकतिपयशब्दसामग्र्यां तन्निवेशनस्यैवौचित्यात् न च पत्यादिधात्वर्थस्य भेदस्य धात्वर्थे विशेषणतया अन्वयित्वात् फलतया तदन्वयिनोऽपादानस्य कर्मत्वाद् द्वितीयाऽऽपत्तिरिति वाच्यम् । अपायवतो ध्रुवस्य निरवकाशयाऽपादानसंज्ञया कर्मसंज्ञाबाधात्संयोगभेदोभयफलवत एव पत्यादिकर्मत्वा-

दित्यस्य द्वितीयाविवरणे दर्शितत्वाच्च धात्वर्थभेदेऽपादानस्यान्वये पञ्चम्यर्थस्य क्रियाजन्यविभागादिरूपापायस्यान्वयसामग्री प्रयोजिकाऽतः केवलं भेदान्वयापत्त्या मेरोरयमायातीति न प्रयोग इति विभाव्यते तदा भेदो न पत्यादिधातोर्न वा पञ्चम्या अर्थः किं तु विभागादिरूपे पञ्चम्यर्थे व्यापारवद् भेदावच्छिन्नसमवायावच्छिन्नाधेयतया प्रकृत्यर्थस्यान्वयस्तत एव पत्वात्पत्रं पततीति न प्रयोगः वृक्षात्पत्रं पतति न तु पत्रादित्यपि दर्शिताधेयत्वसंबन्धावच्छिन्नप्रतियोगिताकः पत्राभावो विभागे प्रतीयत इति निषेधप्रतीत्युपपत्तिः दर्शिताधेयत्वस्य वृक्ष्यनियामकत्वेऽपि प्रतियोगितावच्छेदकसंबन्धत्वं सर्वसंमतमेव अन्यथा गुणान्न पततीत्यत्र निषेधप्रतीतेः कथमप्यनुपपत्तेः दर्शिताधेयत्वसंबन्धावच्छिन्नप्रतियोगिताको गुणाभावो विभागे प्रतीयत इति निषेधप्रतीतिरित्यमेव सम्भवतीति समवायादभावाद्वा न पततीत्यत्र दर्शिताधेयत्वं समवायादेर्व्यधिकरणः संबन्धस्तत्संबन्धावच्छिन्नप्रतियोगिताकः समवायादेरभावो विभागे प्रतीयत इति निषेधप्रतीत्युपपत्तिः । ननु यतः पतनादिकं प्रसिद्धं तस्यैव निषेधो नञा प्रत्याय्यते अत एव नञ्विनिर्मुक्तशब्दप्रयोगे यद्वैशिष्ट्यं यत्र प्रतीयते नञि समभिव्याहृते तन्निषेधस्तत्र प्रतीयत इति व्युत्पत्तिः । इत्थं गुणाद्यपादानकपतनाप्रसिद्धा गुणात्समवायादभावाद्वा पततीतिप्रयोगविरहात् गुणात्समवायादभावाद्वा न पततीतिवाक्यमयोग्यमेव तत्कथं दर्शिताधेयत्वसंबन्धावच्छिन्नप्रतियोगिताको गुणादेरभावो विभागे प्रतीयते येन वृक्ष्य-

नियामकसंबन्धस्य प्रतियोगितावच्छेदकसंबन्धत्वं स्या-
दिति चेत् तर्हि न पत्त्रात्पततीत्यत्र दर्शिताधेयत्वेन
संबन्धेन पत्त्रविशिष्टस्य विभागस्य जनकं यत्पतनं तत्क-
र्तृत्वस्य पतङ्गादिनिष्ठस्य प्रसिद्धस्याभावो नञा पत्त्रे
बोध्यत इति निषेधप्रतीत्युपपत्तिः वृक्षात्पतनं पत्त्रस्य न
तु पत्त्रादित्यत्र तथापत्त्रविशिष्टस्य विभागस्य जनकतासं-
बन्धावच्छिन्नप्रतियोगिताको भावो नञा पतने बोध्यते
यदि च जनकत्वस्य वृत्त्यनियामकतया न प्रतियोगि-
तावच्छेदकसंबन्धत्वं तदा पूर्ववत्पतनस्य पत्त्रादित्यत्रा-
नुषङ्गेण तथापत्त्रविशिष्टस्य विभागस्य जनकं यत्पतनं प-
तङ्गादिकर्तृकं प्रसिद्धं तदन्यत्वं नञा वृक्षापादानकप-
तने बोध्यत इति निषेधप्रतीत्युपपत्तिरथ वा पत्त्रापा-
दानकपतने खगादिकर्तृके प्रसिद्धे पत्त्रस्येतिषष्ठ्यन्तार्थ-
स्य पत्त्रकर्तृत्वस्याभावो नञा बोध्यत इति निषेधप्र-
तीत्युपपत्तिः एवं यन्मूर्तापादानकं पतनमप्रसिद्धं तद्वा-
चकपदात् नञ्समभिव्याहारेऽपि न पञ्चमी अत एव
गुणान्न पततीतिवत् भूतलात्पातालाद्वा न पततीति
न प्रयोगः समवाये व्यापारवद्भेदस्येव मूर्तवृत्तित्व-
स्यापि वैशिष्ट्यं विशेषणं तेन व्यापारवद्भेदावच्छिन्न-
मूर्तवर्त्तित्वावच्छिन्नसमवायावच्छिन्नाधेयत्वसंबन्धेन प्र-
कृत्यर्थस्य पञ्चम्यर्थे विभागेऽन्वयोऽभ्युपेतव्यः अतो वृ-
क्षादिव गगनाज्जीवाद्वा पततीति न प्रयोगः अन्य-
था व्यापारवद्भिन्नगगनादिनिष्ठविभागजनकत्वस्य पतने
सत्वाद् दर्शितप्रयोगस्य दुर्वारताऽपत्तेः गुणान्न पततीं
त्यत्रैव गगनाज्जीवाद्वा न पततीत्यत्रापि निषेधगति-

रवसेयेतीयमभिनवा रीतिरिहानुसंधेया । नन्वेवमपि दृचाद्देपते स्यन्दते वेत्यादिः प्रयोगो दुर्वार एव पञ्चम्यर्थविभागस्य धात्वर्थे कम्पादौ जनकतया अन्वयसम्भवात् । न च फलव्यापारोभयवाचकधातुजन्योपस्थितिः पञ्चम्यर्थविभागान्वयबोधे हेतुरिति वेपतिस्यन्दत्योर्व्यापारमात्रवाचकतया फलावाचकत्वात्तज्जन्योपस्थितेर्विभागान्वयबोधाहेतुत्वान्न दर्शितप्रयोग इति वाच्यं तथासत्यासनाच्चलित इति प्रयोगानुपपत्तेः चलतेरपि फलावाचकत्वान्न च चलतेः संनिहितदेशसंयोगफलकव्यापारवाचित्वात् फलवाचकत्वमेव तथात्वेऽपि धात्वर्थान्तर्भूतकर्मकत्वान्न सकर्मकत्वं फलवाचकस्यापि धातोर्योगे पञ्चमीप्रयोगो भवत्येव यथा पल्यङ्कात् पीठे समुपविशतीत्यादौ तथाऽऽसनाच्चलित इत्यत्रापि पञ्चमीप्रयोगो निष्प्रत्यूह एवेति वाच्यम् । तथापि तरोस्त्यजतीति प्रयोगापत्तेस्त्यजेः फलव्यापारोभयवाचकतया तज्जन्योपस्थितेः पञ्चम्यर्थविभागान्वयबोधहेतुत्वे बाधकाभावादिति चेत् अत्र केचित् फलव्यापारोभयविषयकज्ञानोद्देश्यताकसङ्केतीयज्ञाननिष्ठविषयतायां विभागविषयकत्वानवच्छिन्नत्वस्य फलविषयकत्वावच्छिन्नत्वव्यापारविषयकत्वावच्छिन्नत्वयोश्च निवेशस्तथा सति तादृशज्ञाननिष्ठतादृशविषयताकसङ्केतज्ञानजन्यसंस्कारसहकृतधातुजन्योपस्थितिः पञ्चम्यर्थविभागान्वयबोधे हेतुरिति त्यजिजन्योपस्थितिर्न तथा त्यजेः सङ्केतीयज्ञाननिष्ठविषयतायां विभागविषयकत्वावच्छिन्नत्वात् सङ्केतस्य विभागस्यन्दोभयविषयकज्ञानोद्दे-

श्यकत्वादिति त्यज्यर्थे पञ्चम्यर्थस्य नान्वय इति वदन्ति तच्चिन्त्यं त्यजेः संयोगस्यन्दोभयवाचकताभ्रमदशायां तादृशशाब्दप्रसक्त्या तादृशप्रयोगापत्तेः न च सङ्केतज्ञाने भ्रमान्यत्वं विशेषणमतो न तादृशशाब्दप्रसक्तिरिति वाच्यं तथापि यत्र पचिनाऽवतारणव्यापारोऽभिहितस्तत्र चुल्याः पचतीति प्रयोगापत्तेः किं च विभागार्थकविभजतियोगे वृक्षाद्विभजत इत्यत्रैव तरोस्त्यजतीत्यवधित्वार्थकपञ्चमीप्रयोगापत्तिरिति । शाब्दिकास्तु त्यजतिफलविभागवृत्तया वृक्षस्य कर्मत्वोत्तरया कर्मसंज्ञयाऽपादानसंज्ञाबाधात् तरोस्त्यजतीति न प्रयोग इत्याहुस्तदपि न सुन्दरं गोभ्यः पयांसि दोग्धीत्यत्रैवावधित्वविवक्षया तथाप्रयोगापत्तेः न च विभागः स्यन्दनं व्यापार एतन्निरवयवार्थकस्यापि दुहेर्विभागाविवक्षायामपादानार्थकपञ्चम्यन्तस्य गोभ्य इत्यस्य प्रयोग इति वाच्यं तथासति त्यजेरपि विभागाविवक्षायां स्यन्दमात्रप्रतिपादने तरोस्त्यजतीतिप्रयोगापत्तेः । तस्मादिदमत्र तत्त्वम् । विभागानुयोगित्वस्वरूपमवधित्वं तत्र विभागस्य धातुना अलाभे पञ्चम्या विभागोऽर्थः पञ्चम्यर्थविभागान्वये संयोगव्यापारोभयवाचकधातुजन्या व्यापारोपस्थितिस्तन्त्रं विभागस्य धातुलभ्यत्वे तु पञ्चम्या अनुयोगित्वमर्थः पञ्चम्यर्थानुयोगित्वान्वये तु प्रधानीभूतधात्वर्थव्यापारे साक्षाद्विशेषणताऽनापन्नविभागोपस्थितिर्धातुजन्या तत्त्वं वृक्षाद्विभजत इत्यत्र विभागस्य प्रधानव्यापारे साक्षाद्विशेषणत्वानापन्नस्यैव धातुजन्योपस्थितिः गोभ्यः पयांसि दोग्धीत्यत्र स्व-

न्दनविशेषणतयोपस्थितस्यापि विभागस्य प्रधानव्यापारे साक्षाद्विशेषणत्वात् दुर्हिजन्या विभागोपस्थितिरस्त्व मित्थं च त्यजेः संयोगावाचकतया तदर्थं न पञ्चम्यर्थविभागस्यान्वय इति प्रधानव्यापारे साक्षाद्विशेषणतैव विभागस्य त्यजिनोपस्थापनान्न तत्र पञ्चम्यर्थानुयोगित्वस्यान्वय इति तरोस्त्यजतीति न प्रयोगः प्रधानव्यापारे साक्षाद्विशेषणीभूतविभागवाचकधातुजन्योपस्थितिः पञ्चम्यर्थानुयोगित्वान्वये तन्त्रमिति तु फलितार्थः अतस्तरोः त्यज्यत इति कर्माख्यातप्रयोगोऽपि निरस्तः कर्माख्याते विभागस्य व्यापाराविशेषणतया भानेऽपि त्यजेर्विशेषणीभूतविभागवाचकत्वात् प्राचां मते धातोः फलावच्छिन्नव्यापारार्थकतया नव्यानां फलव्यापारोभयवाचकतया विभागस्य गमनादिव्यावर्त्तकत्वरूपं विशेषणत्वं त्यज्यर्थव्यापारे सर्वथैवोपेयमिति । नन्वेवं विभागव्यापारोभयवाचकस्यापसरत्यादेर्योगे सदसोऽपसरतीतिप्रयोगो न स्यात् धातोर्विशेषणीभूतविभागवाचकतया तदर्थे विभागे पञ्चम्यर्थानुयोगित्वान्वयाप्रसक्तेरिति चेन्न । धातोरपसरत्यादेर्विभागावाचकत्वात् किंतु अपपूर्वकस्य सरत्यादेः पूर्वदेशान्यदेशसंयोगफलकस्यन्दवाचकत्वमिति धात्वर्थान्तर्भूतकर्मकत्वादकर्मकत्वमिति तदर्थे स्यन्दे पञ्चम्यर्थविभागान्वयसम्भवात् भवति सदसोऽपसरतीत्यादिकः प्रयोगः संयोगफलकधातुयोगे पञ्चमी यथा वृक्षात्पतति गच्छति वा पतमित्यादौ पतेरधोदिगवच्छिन्नसंयोगफलको गमेस्तु संयोगफलको व्यापारोऽर्थः उपत्यकाभ्यो गिरिमधिरोहत्या-

रोहति वेत्यादावधिपूर्वकस्याङ्पूर्वकस्य च रोहतेर्ऊर्ध्वदिगवच्छिन्नसंयोगफलको व्यापारोऽर्थः जलादुन्मज्जति उन्मज्जति वा पद्मिमित्यादावुत्पूर्वकस्य गच्छतेर्मज्जतेश्च ऊर्ध्वदेशसंयोगफलको व्यापारोऽर्थः । पल्यङ्कादुपविशति पीठे इत्यादावुपविशतेः स्फिगभूमंयोगस्य स्फिङ्स्मृर्तसंयोगस्य वानुकूलो व्यापारोऽर्थः यदि जलेषूपविष्टो योगी न निमज्जतीतिप्रयोगस्तदा स्फिङ्स्मृर्तसंयोगः फलतया बोध्यः ऊर्ध्वदेशादिकर्मणो धात्वर्थान्तर्भावात् धात्वर्थान्तर्भूतकर्मकत्वादुद्गच्छत्यादीनामकर्मकत्वमिति पञ्चमीनां दर्शितेषु प्रयोगेषु विभागोऽर्थः स च जनकतया व्यापारेऽन्वेति ग्रामादजां वनं नयति विपणेः पण्यभारं गृहं वहतीत्यादौ नयतेः प्रेरकदेशावधिकप्रेर्यदेशवृत्तिपरत्वनिरूपितापरत्वसमानाधिकरणः संयोगः कर्मव्यापारश्चार्थः आङ्पूर्वकस्य नयतेरर्थे तादृशापरत्वसमानाधिकरण एव संयोगो निविशतेर्वहतेश्च संयोग आधेयकर्म आधारकर्मस्वरूपो व्यापारश्चार्थः वणिग्गृहात् कनकं स्वगृहं हरति तस्कर इत्यत्र हरतेः संयोगः कर्म व्यापारश्चार्थः वृक्षाच्छाखां भूमिं कर्षतीत्यत्र कृषेः कर्षकदेशावधिककर्षणीयदेशवृत्तिपरत्वनिरूपितापरत्वासमानाधिकरणः संयोगः कर्मव्यापारश्चार्थस्तादृशापरत्वसमानाधिकरणः संयोग आङ्पूर्वकस्य कृषेरर्थे निविशते पञ्चमीनां विभागोऽर्थः स च जनकतया संयोगजनके अजाकर्मणि भारकर्मणि कनककर्मणि शाखाकर्मण्यन्वेति न तु कर्तृव्यापारे ग्रामवर्तिनाऽपि ताडनादिना अजादेर्वने नयनादिति नगराद्वनं गमयत्व-

रातोनित्यादावपि पञ्चम्यर्थो विभागो जनकतया अरातिकर्मण्येवान्वेति स्याल्या ओदनमुद्धरतीत्यादावुद्धरतेरूर्ध्वदेशसंयोगानुकूलकर्मानुकूलो व्यापारोऽर्थः ऊर्ध्वदेशस्य कर्मणो धातुनाऽभिधानात् नास्य द्विकर्मकत्वमिति पञ्चम्या विभागोऽर्थः स चोर्ध्वदेशसंयोगजनके ओदनकर्मण्यन्वेति मन्दुराभ्यो हयान्नये युनक्तीत्यत्र पार्थिवद्रव्यसंयोगानुकूलकर्मानुकूलव्यापारो युजेरर्थः पार्थिवस्य कर्मणो धातुनाऽभिधानात् नास्य द्विकर्मकत्वमिति अत्रापि पञ्चम्यर्थो विभागो जनकतया पार्थिवसंयोगजनके हयकर्मण्यन्वेति विभागार्थकधातुयोगे पञ्चमी यथा वृक्षात् विभजते पत्रं वायुरस्थ्नो विभजते मांसं कौणप इत्यत्र विभजतेः पर्थिवद्रव्यविभागानुकूलकर्मानुकूलव्यापारोऽर्थः विभागफलवतः पार्थिवस्य कर्मणो धातुनाऽभिधानान्नास्य द्विकर्मकत्वमिति पार्थिवविशेषणात् जले जलाद्वा विभजत इति न प्रयोगः पार्थिवविभागानुकूलकर्मस्वरूपफलवत्त्वात् पत्रमांसयोः कर्मत्वमिति अत्र पञ्चम्यर्थोऽनुयोगित्वस्वरूपमवधित्वं निरूपकतयाऽनुयोगितानिरूपकत्वस्वरूपमवधिमत्त्वं वा स्वरूपेण संबन्धेन पार्थिवविभागेऽन्वेति वृक्षात्पुष्पं चिनोतीत्यत्र प्रतियोग्युत्पत्तिद्वितीयक्षणोत्पन्नसंयोगप्रतिद्वन्द्वी विभागः कर्मव्यापारश्चिनोतेरर्थः गोभ्यः पयांसि दोग्धीत्यत्र दुहेरुक्त एवार्थः अत्रापि पञ्चम्यर्थोऽवधित्वमवधिमत्त्वं वा विभागेऽन्वेति । न च चिनोतेर्दुहेश्च विभागाविवक्षायामत्र विभागार्थिका पञ्चमीतिवाच्यम् । संयोगार्थकधातुयोग एव पञ्चम्या विभागार्थकत्वादन्य-

थाऽतिप्रसङ्गादित्युक्तत्वादिति । यदि वाऽपसरत्यादेर्देशान्तरसंयोगफलको व्यापारो नार्थः तथासति विलादर्धमायाते सर्पे विलात्सर्पोऽपहृत इति प्रयोगप्रसङ्गात् तस्मात्सर्वावयवावच्छिन्नपूर्वदेशविभागफलककर्मफलको व्यापारोऽपपूर्वकस्य निःपूर्वकस्य च गमनार्थकधातोरर्थः विभागफलवतः पूर्वदेशस्य धातुना अभिधानात् कर्मफलवतो व्यापारवत्तया कर्तृत्वाच्च नापसरत्यादेः सकर्मकत्वमिति विभाव्यते तदा सदसोऽपसरतीत्यादौ पञ्चम्या अवधित्वमवधिमत्त्वं वा अर्थो विभागेऽन्वेति । यदि च सर्वावयवावच्छिन्नपूर्वदेशान्यसंयोगफलको व्यापारोऽपसरत्यादेरर्थस्तदा सदसोऽपसरति निःसरत्यपगच्छति निर्गच्छत्यपैति निरेति वेत्यादौ पञ्चम्या विभागोऽर्थो जनकतया व्यापारेऽन्वेति । क्व चिदन्याहशोऽप्यपायः यथा वैपणिकान् मौक्तिकं क्रीणाति नृपाङ्गां प्रतिगृह्णातीत्यादौ स्वस्वामिभावसंबन्धविगमोऽपायः पञ्चम्यर्थः क्रये प्रतिग्रहे प्रयोजकतयाऽन्वेति क्रयस्तु स्वत्वेच्छाप्रयोज्यं दानं प्रतिग्रहः स्वत्वोद्देश्यकेच्छेतिवृतीयाविवरणोक्तं स्मर्तव्यं पञ्चम्याः स्वत्वनाशोभयं खण्डशो वाऽर्थस्तत्र प्रकृत्यर्थस्य निरूपितत्वेन संबन्धेन स्वत्वे तस्य प्रतियोगितानिरूपिताऽनुयोगितया नाशेऽन्वयस्तथाविधनाशस्य जनकतया क्रयव्यापारे दाने प्रतिग्रहव्यापारे स्वत्वेच्छायां चान्वयः नरकात्त्रायते पितॄनुद्धरतीत्यत्रोर्ध्वलोकप्राप्तिफलकादृष्टफलकः श्राद्धादिव्यापार उद्धरतेरर्थः अदृष्टफलवता पितृकर्मणाऽस्य सकर्मकत्वं प्राप्तिफलवत ऊर्ध्वलोकस्य धातुनाऽभिधानान्न

तेन कर्मणा सकर्मकत्वमिति न द्विकर्मकत्वमिति पञ्च-म्यर्थोऽत्र नाशः प्रकृत्यर्थविशेषित ऊर्ध्वलोकप्राप्तिजनके पितृगते अदृष्टे जनकतयाऽन्वेति । शताद् वियुज्यन्ते शु-ङ्यन्ति वा दशमिता इत्यत्र धातोरपेक्षाबुद्धिविषयत्वा-भावोऽर्थः शतपदस्य शतत्वं संख्याऽर्थः पञ्चम्या अनुत्पा-दोऽर्थः प्रयोजकतया धात्वर्थेऽन्वेति तथा च शतत्वसंख्या-नुत्पादप्रयोजकस्यापेक्षाबुद्धिविषयत्वाभावस्याश्रया द-शमिता इत्यन्वयबोधः नरकात्पापाद्वा मुच्यत इत्यत्र दैवादिकस्य मुच्यतेर्दुःखात्यन्तविमोक्षानुकूलस्तत्त्वज्ञा-नादिव्यापारोऽर्थः फलसमानाधिकरणव्यापारार्थकत-याऽस्य न सकर्मकत्वमिति पञ्चम्या अनुत्पादो नाशश्च प्रयोजकतत्त्वज्ञानादौ व्यापारेऽन्वेति नरकानुत्पादस्य पापनाशस्य वा प्रयोजको मोक्षानुकूलस्तत्त्वज्ञानादि-व्यापारो वाक्यार्थ इति सर्वपापैः स मुच्यत इत्यत्र मुञ्चतेः संबन्धाभावप्रयोजको नाशादिव्यापारोऽर्थः तृती-यार्थः प्रतियोगितात्वं कर्तृत्वं नाशेऽन्वेति व्युत्पत्ति-वैचित्र्येण पापस्य संबन्धेऽन्वयः संबन्धाभावस्वरूपफल-वत्तया तच्छब्दार्थस्य कर्मत्वमिति तथा च पापप्रतियो-गिताकनाशप्रयोज्यस्य पापसंबन्धाभावस्याश्रयः स इ-त्यन्वयबोधः । बन्धनान्निगडाद्वा मुच्यत इत्यत्र मुच्यतेर्ब-न्धनाख्यसंयोगनाशकविभागोऽर्थः पञ्चम्या अवधित्वमर्थो विभागेऽन्वेति विभागस्य धातुना प्राधान्येनोपस्थापनात् प्रधानव्यापारे साक्षाद्विशेषणतयोपस्थित्यविषयत्वात् सं-बन्धनाशशब्दस्य कर्मण्यल्युटा रज्जुनिगडादिप्रत्यया धा-तुनाऽनभिधानान्न ततः पञ्चम्यनुपपत्तिरिति । ननु प-

ञ्चम्या नानाविधापायार्थकतामपेक्ष्यैकविधातिरिक्तावधित्वार्थकत्वमेवोचितं लाघवात् दर्शितेषु सकलस्थलेषु एकविधस्यावधित्वस्य धात्वर्थेऽन्वयोपगमादभीष्टसिद्धेरिति चेन् मैवं नानाविधापायस्य प्रतीयमानस्यापलापापत्तेः अयमस्मात्तार इत्यादाववधित्वस्यैकविधतया नामार्थान्वयेन कारकत्वहान्यापत्तेश्च किं च पञ्चम्या एकविधावधित्वार्थकत्वं न सम्भवति तथा हि वृक्षात्पतीत्यत्र पाके वृक्षावधित्वान्वयवारणाय तदन्वयबोधं प्रति गमनार्थकधातुजन्योपस्थितेः कारणत्वमुपेयं तथा च वृक्षाद् विभजत इत्यत्रानन्वयापत्तेः न च यद्यद्धातुयोगे पञ्चमी दृश्यते तत्तद्धातुजन्योपस्थितेः पञ्चम्यर्थावधित्वान्वयबोधे हेतुरिति वाच्यम् । अननुगमात् वृक्षात् क्रीणातीतिप्रयोगापत्तेश्चेत्यलं विस्तरेण । "प्रश्नाख्यानयोश्च पञ्चमी वक्तव्ये" तिवार्तिकेन सिद्धा कुतो भवानिति प्रश्ने प्रतिष्ठाननगरादित्युत्तरे चागत इति पदाध्याहारेण पञ्चमी विभागार्थिका बोध्येति । "जुगुप्साविरामप्रमादार्थानामुपसंख्यानमिति" वार्तिकं जुगुप्सादिविषये ऽपादानत्वं ज्ञापयति । पापाज्जुगुप्सते विरमति वेत्यत्र गुपेर्गर्हा नाम द्वेषविशेषः विरमतेर्निवृत्तिर्यत्नोऽर्थः धर्मात्प्रमाद्यतीत्यत्र प्रमादेरनुद्बुद्धसंस्कारोऽर्थः सर्वत्र पञ्चम्या विषयत्वमर्थस्तथाच पापविषयकगर्हाऽऽश्रयत्वं पापविषयकनिवृत्त्याश्रयत्वं धर्मविषयकानुद्बुद्धसंस्काराश्रयत्वं वाक्यार्थ इति संप्रदायः । केचित्तु गुपेर्गर्हाप्रयुक्तः प्रवृत्त्यभावोऽर्थः विरमतेः करणानन्तरमकरणमर्थः प्रमाद्यतेः कर्तव्यतास्मरणाभावप्रयुक्तः प्रवृत्त्यभावोऽर्थः पञ्चम्यर्थो विषयत्वं ग-

र्हीकरणयोरभावप्रतियोगिषु चान्वेति पापविषयकगर्हा-प्रयुक्तः पापविषयकप्रवृत्त्यभावः पापविषयककरणादनन्तरस्तदभावः धर्मविषयककर्तव्यतास्मरणाभावप्रयुक्तो धर्मविषयकप्रवृत्त्यभावो वाक्यार्थ इत्याहुः । वस्तुतस्तु बुध्यादिविगमस्वरूपापायवतो जुगुप्साद्यपादानत्वज्ञापनार्थं ध्रुवसूत्रैकवाक्यतया वार्तिकारम्भः न तु पञ्चम्या विषयत्वार्थकत्वज्ञापनार्थं तथासति अपादाने पञ्चमीतिसूत्रैकवाक्यतया तदारम्भः स्यादिति तथा च कर्तव्यत्वप्रकारकज्ञानविशेष्यत्वाभावः पञ्चम्या अर्थः स च प्रयोजकतया जुगुप्सायामन्वेति पञ्चम्यर्थे तादृशाभावे प्रकृत्यर्थस्याधेयतयाऽन्वयः जुगुप्सा तु द्वेषविशेषः यद्वा अपकर्षप्रतिपत्त्यनुकूलव्यापार अत एव जुगुप्सतिः सकर्मकस्तत्र कर्मणोऽपादानत्वविवक्षायां पञ्चमीतरथा तु पापकर्माणि जुगुप्सत इति द्वितीयैव प्रमाणम् एवं पापाज्जुगुप्सत इत्यत्र पापपदस्य पापकर्मपरतायां दुरितजनकत्वमपकर्षः दुरितपरतायां तु दुःखजनकत्वं तथा च पापहत्तेः कर्तव्यत्वप्रकारकबुद्धिविशेष्यत्वाभावस्य प्रयोजकोऽपकर्षप्रतिपत्त्यनुकूलो व्यापारो वाक्यार्थः पापस्यापकर्षप्रतिपत्तिविशेष्यत्वमर्थात्प्रतीयते न ह्यन्यनिष्ठस्य कर्तव्यताबुद्धिविशेष्यत्वाभावस्य प्रयोजकोऽन्यनिष्ठापकर्षप्रतिपादकः सम्भवति देवदत्ताज्जुगुप्सत इत्यत्र पञ्चम्या गुणाभावोऽर्थः गुणो धैर्यादिः अपकर्षश्चात्र क्रोधलोभादिः पूर्ववदन्वयः एतेन जुगुप्साहूपद्वेषविषयस्य क्रियाफलेन विषयत्वेनाभिप्रेततया संप्रदानत्वमेव यथा आद्याय निगर्हत इति तथा चात्रापादानत्वाभावात् पञ्च-

व्यप्रसक्तेः पापाज्जुगुप्सत इति प्रयोगो न स्यादित्यपि समाहितं क्रियाफलेनापकर्षप्रतिपत्त्या अनभिप्रेतत्वात्संप्रदानत्वाप्रसक्तेरिति । पापाद्विरमति निवर्तते वेत्यत्र धातोर्निवृत्तिर्यत्र एवार्थः पञ्चम्याः काम्यत्वाभावार्थः पापवृत्तेः काम्यत्वाभावस्य प्रयोजिका निवृत्तिर्वाक्यार्थः पापे निवृत्तिविषयत्वं पूर्ववदर्थात्प्रतीयते करणानन्तरमकरणं तु न विरमत्यादेरर्थस्तथासति रामः परस्त्रीगमनाद्विरतो निवृत्तो वेति प्रयोगानुपपत्तेः । धर्मात्प्रमाद्यतीत्यत्र प्रमाद्यतेर्निश्चयाभावोऽर्थः पञ्चम्याः प्रवृत्तिविषयत्वाभावोऽर्थः धर्मवृत्तेः प्रवृत्तिविषयत्वाभावस्य प्रयोजको निश्चयस्त्वर्थात्कर्त्तव्यत्वप्रकारकः निश्चयविशेष्यत्वं धर्मे पूर्ववदर्थात्प्रतीयते तीर्थात्प्रमाद्यतीत्यत्र तीर्थपदस्य तीर्थगमने धातोर्वा गमननिश्चयाभावे लक्षणा स्मरणं तु न प्रमाद्यर्थं निविशते तथा सत्यनवगतान्वयपुत्रो दशरथोऽन्वयपुत्ररक्षणात्प्रामाद्यादित्यत्रापूर्वान्वयपुत्ररक्षणविशेष्यकस्मरणाप्रसिद्ध्याऽनन्वयापत्तेरिति । बिभेत्यादियोगे पञ्चमीं ज्ञापयति । "भीत्रार्थानां भयहेतुरि"तिसूत्रं भयार्थानां त्राणार्थानां च धातूनां योगे भयहेतुर्यस्तत्कारकमपादानसंज्ञं स्यादित्यर्थकं व्याघ्राद्बिभेति त्रायते वेत्यादौ पञ्चम्या भयहेतुत्वमर्थो भयेऽन्वेति । गौडास्तु परतोऽनिष्टसम्भावनास्वरूपं भयं तदर्थका बिभेत्यादयः अनिष्टानुत्पत्त्यनुकूलव्यापारस्वरूपं त्राणं तदर्थकाः त्रायत्यादयः एतेषां धातूनां योगेऽनिष्टप्रयोजकमपादानसंज्ञं भवतीति सूत्रार्थः इत्थं च पञ्चम्याः प्रयोजकत्वमर्थो धात्वर्थघटकेऽनिष्टेऽन्वेति यदि च यस्य पुंसो व्याघ्रा-

धीनमनिष्टमप्रसिद्धं व्याघ्राधीनत्वेन मरणमसौ सम्भावयति तत्पुरुषपरो व्याघ्रादयं बिभेतीतिप्रयोगस्तदा पञ्चम्यर्थः प्रयोज्यत्वप्रकारकत्वं धात्वर्थेऽनिष्टसम्भावनायामन्वेति दर्शितस्थले तस्य पुंसो व्याघ्रप्रयोज्यत्वप्रकारिकाया अनिष्टसम्भावनायाः सत्त्वात् नानुपपत्तिः एवं च शत्रुभ्रमेण मित्राद्बिभेतीतिप्रयोग उपपद्यते इत्थं च भयार्थकधातुयोगे भयहेतुत्वेन सम्भावितमित्येकः त्राणार्थकधातुयोगेऽनिष्टप्रयोजकमपादानमित्यपरः सूत्रार्थः । अनिष्टं च दुःखमेव सर्वत्रानुगतं बोध्यमिति यत्प्रयोज्यं दुःखं न कस्यापि प्रसिद्धं तादृशस्याहिकण्टकादेर्यद्यपादानत्वमिष्यते तदा दुःखोपधायकव्यापारविरहस्यानुकूलो व्यापारस्त्राणं तत्र दुःखवतः कर्मत्वं तथाविधव्यापारविरहाधिकरणस्यापादानत्वं तथा च तादृशाहिकण्टकाद्यपादानकं स्वकर्मकत्राणमेव प्रसिद्धमिति यत्राचेतनस्य घटादेः कर्मत्वं तन्नाशोपधायकव्यापारविरहानुकूलव्यापारस्वरूपं त्राणं तत्र नाशवतः कर्मत्वमिति । एवं तत्पर्यात् त्रायत इत्यादौ पञ्चम्या आधेयत्वमर्थ इति वदन्ति तच्चिन्त्यं नरकाद्बिभेतीत्यादौ नरकजन्यानिष्टान्तरस्याभावादनन्वयापत्तेः प्रयोज्यत्वप्रकारकत्वस्य पञ्चम्यर्थस्यानिष्टसम्भावनायामन्वयोगमेऽपि प्रयोज्यत्वस्यानिष्टान्वयानुपगमे व्याघ्रप्रयोज्यो दृकनाशः दृकप्रयोज्यो बालनाशः बालश्च मम पुत्रः सम्भाव्यत इति ज्ञानदशायां बालपुत्रोऽयं व्याघ्राद्बिभेतीतिप्रयोगापत्तेः अनिष्टान्वये तु दोषस्य स्वयमेव दर्शितत्वात् न च प्रयोज्यत्वप्रकारत्वस्य स्वनिरूपितानिष्टनिष्ठविशेष्यता-

प्रतियोगित्वेन संम्बन्धेन सम्भावनायामन्वयोपगमान्नो-क्तदोष इति वाच्यं तथासति सम्भावनामात्रस्य बिभे-त्यर्थत्वापत्तेः व्याघ्रप्रयोज्यं चैतस्य दुःखं सम्भाव्यत इति ज्ञानदशायां मैत्रो व्याघ्राद्बिभेतीतिप्रयोगापत्तेः तत्तत्पु-रुषीयदुःखविषयकतत्तत्पुरुषीयसम्भावनाया धात्वर्थत्वे ऽननुगमाद् दुर्ग्रहत्वापत्तेः समानाधिकरणदुःखविष-यकसम्भावनायास्तथात्वे तु यत्र दुःखत्वेन शरीर-नाशादिः सम्भावितस्तत्र बिभेतीतिप्रयोगानापत्तेः नरकात् चायत इत्यादावपि नरकप्रयोज्यानिष्टान्तर-स्याभावादनन्वयप्रसङ्ग इति । भयत्वं द्वेषत्वावान्त-रजातिः सैव बिभेतेः प्रवृत्तिनिमित्तं फलावाचक-त्वादेवासौ यतिवदकर्मकः तत्र दुःखगोचरे भये स्वस्मि-न्भावित्वप्रतिसन्धानमेव कारणमत्र द्वेषस्तत्सामग्री वा सहकारितयाऽपेक्ष्यते ततो रागाध्यानामास्तिकानां नर-कात् यियक्षूणां यागश्रमान्मुक्षूणां कुतोऽपि क्लेशाद्वा न भयमित्यादयः प्रयोगा उपपद्यन्ते उपात्तविषये भये भया-पादानस्यानिष्टसाधनत्वमासन्नत्वं च ज्ञायमानं जनकं चौरेभ्यो हि भवत्यासन्नतया प्रतिसंहितेभ्य एव भय-मासत्तिप्रकर्षाच्च भयप्रकर्ष आसत्तिरपि कालिकी दै-शिकी यथाऽनुभवमूहनीया एवं च विषयविषयिभाव-लक्षणाहेतुतैव पञ्चम्यर्थश्चौरेभ्यो बिभेतीत्यत्र चौरगोच-रभयं वाक्यार्थः त्राणमपि भयाभावानुकूलो व्यापार-स्तत्र भयाभावस्वरूपफलवान् त्रातव्यः कर्म भयाभावस्तु कारणविघटनद्वारा त्रातृव्यापारप्रयोज्यः व्याघ्राद्गां त्रा-यत इत्यत्र गोवृत्तिर्व्याघ्रविषयकभयप्रतियोगिकाभावस्य

प्रयोजको व्यापारस्तत्कर्तृत्वं वाक्यार्थः नन्वेवं "स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयादि"त्यत्र भयात् त्रातुं दातुमित्यत्र चानन्वयापत्तिः भयस्य द्वेषतया त्राणस्य तदभावानुकूलव्यापारतया द्वेषविषयकद्वेषाप्रसक्त्या भयहेतुकत्वाप्रसिद्धेः भयस्यानिष्टसम्भावनास्वरूपत्वे तु त्राणस्यानिष्टानुत्पादकव्यापारस्वरूपतयाऽनिष्टसम्भावनाहेतुकानिष्टान्तरस्य सम्भवान्नान्वयानुपपत्तिरिति चेन्नैवं तथा हि भयस्य द्वेषविशेषस्वरूपस्य दुःखविशेषसाधनत्वमनुभवसिद्धमिति भाविभयगोचरभयसम्भवात् भयगोचरभयानुत्पादनस्वरूपत्राणस्य नाप्रसिद्धिरिति अत एव द्वितीयाद्वि भयमिति श्रुत्या स्वस्यापि भयमिति परिसंख्यायते द्वेषस्य विषयस्वाभाव्येन विषयतया द्वेषं प्रति द्वेषसमवायिभेदस्य हेतुत्वात्स्वविषयकभयाप्रसिद्धेः भयस्यानिष्टसम्भावनास्वरूपत्वे तु स्वहेतुकानिष्टसम्भावनायाः सम्भवान्न परिसंख्यानसम्भव इति गुरुचरणाः । वस्तुतस्तु अनिष्टोत्पत्तिसम्भावनाजन्यदुःखं भयमनिष्टं च दुःखप्रयोजकतावच्छेदकधर्मविशिष्टं मरणादि तत्तद्धर्मावच्छिन्नस्य येन संबन्धेन मरणादिसाधनत्वमवगतं स्वस्मिन् तद्धर्मावच्छिन्नस्य तत्संबन्धज्ञानं मरणाद्यनिष्टोत्पत्तिसम्भावनाया जनकं सा तु दुःखं जनयति तथा मरणादिसाधनतयाऽवगतस्य व्याघ्रस्य स्वस्मिन्सन्निधिसंबन्धज्ञानं मरणाद्युत्पत्तिं सम्भावयति सम्भावना तु दुःखं जनयति अनिष्टसाधनताज्ञानादिसहकृतसंबन्धज्ञानप्रयोज्यत्वस्वरूपं भयहेतुकत्वमीदृशप्रयोज्यताविशेषलाभार्थमेव सूत्रे भयपदमीदृश-

प्रयोज्यताविशेषस्य हेतुतासामान्यविलक्षणस्य धात्व र्थभय एवान्वयात् न कारकत्वहानिरिति । व्याघ्राद् बिभेतीत्यत्र पञ्चम्यर्थे दर्शितप्रयोज्यत्वे निरूपकतया प्रकृत्यर्थस्यान्वयः तथाविधप्रयोज्यत्वस्यानिष्टसम्भावनाजन्यदुःखे भयेऽन्वयः तथा च व्याघ्रप्रयोज्यं भयं वाक्यार्थः व्याघ्रादेः स्वविशेष्यकानिष्टसाधनातास्ज्ञानादिसहकृतस्वसंबन्धज्ञानद्वारा निष्टोत्पत्तिसम्भावनाजन्यदुःखप्रयोजकत्वं सन्निधिस्वरूपस्य संबन्धस्यातिशयस्वरूपप्रकर्षेण ज्ञानं सम्भावनाकोटेरनिष्टोत्पत्तेरुत्कटत्वं प्रयोजयति । अथ वा ऽनिष्टोत्पत्तेरवधारणमेव जनयतीत्युभयथा दुःखमुत्कटं प्रयोजयतीति सन्निधिप्रकर्षेण भयप्रकर्षः इत्थं च द्वितीयाद्वि भयमिति श्रुतिः भये द्वितीयहेतुकत्वपरिसंख्यां बोधयतीतरथा द्वितीयादित्यस्य व्यर्थतापत्तेः परिसंख्या तु प्रकृते द्वितीयाऽन्यहेतुकत्वस्य स्वहेतुकत्वपर्यवसन्नस्य व्यवच्छेदः भयस्य स्वहेतुकत्वं न सम्भवति स्वसंनिधिज्ञानस्यानिष्टोत्पत्तिसम्भावनां प्रत्यप्रयोजकत्वात् अन्यथा सोऽहमात्मना संबद्ध इत्याकारके सकलदुःखोच्छेदप्रयोजके ज्ञाने विद्यमाने भयापत्तेः एवं नरकाद्बिभेतीत्यादौ नरकपदस्य कुम्भीपाकादिसंबन्धज्ञानं शरीरतापाद्यनिष्टोत्पत्तिं सम्भावयति सम्भावना तु दुःखं जनयतीति नानुपपत्तिः नरकपदस्य सुखासम्भिन्नदुःखपरता न युज्यते तथासति दुःखाद्व्यथायो वा बिभेतीतिप्रयोगापत्तेः भयाङ्गेतव्यमित्यादौ भयपदस्य भयजनके व्याघ्रचौरादौ लक्षणेति नानुपपत्तिः यदि च दुःखाद्बिभेतीतिप्रयोगोऽभ्युपेयते

तदा दुःखस्य भोगस्वरूपानिष्टसाधनस्य संबन्धज्ञानं भोगस्वरूपानिष्टस्योत्पत्तिं सम्भावयति सम्भावना तु दुःखमितिानानुपपत्तिः एवं भयाद् बिभेतीत्यादावपीयमेवगतिर्बोध्या एतेन व्याघ्राङ्गयाद्बिभेतीत्यत्रापादानस्य भयस्य विषयित्वं धात्वर्थे भयेऽन्वेति व्याघ्रविषयित्वमपादानभयेऽन्वेति भयं तु द्वेषविशेष इति तु न युज्यते यतो हि व्याघ्रविषयकद्वेषविषयको द्वेषो न सम्भवति तथा हि व्याघ्रविषयकद्वेषस्यानिष्टसाधनत्वज्ञानं विना तद्विषयकद्वेषानुत्पादात्तच्च ज्ञानं तदैव सम्भवति यदि व्याघ्रस्य बलवदनिष्टाननुबन्धीष्टसाधनत्वं स्यात् तत्त्ववाधितमिति न तज्ज्ञानं संभवति न चानिष्टसाधनत्वभ्रमाद् द्वेषविषयकद्वेषसंभवात् नानुपपत्तिरिति वाच्यं तथा सति व्याघ्राङ्गयाद् बिभेषि वेत्यत्राभ्रान्तस्य वक्तुः सम्बोध्यस्य वा शब्दानुदयप्रसङ्गादित्यपि परास्तं भयादिपदार्थस्य दर्शितत्वात् व्याघ्रप्रयोज्यभयप्रयोज्यस्य भोगस्वरूपानिष्टोत्पत्तिसंभावनाजन्यदुःखस्वरूपस्य भयस्य कर्तरि संबोध्ये अन्यत्र च संभवात् एवं चौरेभ्यो बिभेत्युद्विजतेवेत्यत्र चोरप्रयोज्यमनिष्टं धनहरणादि तदुत्पत्तिसंभावनया दुःखमिति उद्वेगोऽपि भयमेव यत्र दर्शितभयप्रयोज्यत्वस्य तत्त्वेन न विवक्षा किं तु शेषत्वेन तत्र षष्ट्येव प्रमाणमत एव "कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे" इति "कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च" इति च प्रयोग उपपद्यते । एवं व्याघ्राङ्गां त्रायते रक्षति चेत्यत्र भयस्वरूपदुःखप्रतियोगिकाभावप्रयोजको व्यापारो धात्वर्थस्तत्र भयाभावस्वरूपफलवत्तया गवादेः

कर्मत्वं पञ्चम्यास्तथाविधप्रयोज्यत्वमर्थः फलैकदेशे भये व्युत्पत्तिवैचित्र्येणान्वेति अथ वा भयमभावश्च खण्डशः फलतया धात्वर्थस्तत्र पञ्चम्यर्थस्य भये तस्य प्रतियोगितया अभावे तस्य प्रयोजकतया व्यापारेऽन्वय इति । यस्या अहिकण्टकादिव्यक्तेः क्वापि न भयप्रयोजकत्वं तस्यास्तद्व्यक्तित्वेन न त्राणापादानत्वमपि तद्व्यक्तेस्त्रायत इत्यप्रयोगात्सर्पत्वादिनाऽपादानत्वमिष्यत एव यद्धर्मावच्छिन्नस्य संबन्धज्ञानमनिष्टोत्पत्तिं सम्भावयति तद्धर्मवत्तत्तथात्वोपगमादिति । भयात् त्रायत इत्यत्र भयप्रयोज्यस्य भयस्याभावप्रयोजकव्यापारः प्रतीयते भयप्रयोज्यं यथा भयं तथा प्रदर्शितमेव भयं तु दुःखं प्रत्यक्षसिद्धमेव भयमिति दुःखमितिभयेनातिदुःखितोऽस्मीति चानुभवात् बिभेत्यादार्थे भयं दुःखमेव चेतनकर्तृकत्वनियमात् यत्र चेतनकर्मकं रक्षणं तत्र दुःखस्वरूपभयाभावप्रयोजको व्यापार एव धात्वर्थः यत्राचेतनकर्मकं रक्षणं तत्र वन्हेः पटं रक्षति काकेभ्यो दधि रक्षतीत्यादौ नाशानुत्पादप्रयोजको व्यापारो रक्षतेरर्थस्तत्र नाशान्वयिप्रयोज्यत्वसामान्यं पञ्चम्यर्थ इति । आतपात्कुसुमं रक्षत्यवति वेत्यत्रापकारानुत्पादप्रयोजको व्यापारो धात्वर्थः प्रकृते पुष्पापकारः शोष एव पञ्चम्यर्थः प्रयोज्यत्वसामान्यमपकारेऽन्वेति नाशाद्यन्वयिनः पञ्चम्यर्थस्य प्रयोज्यत्वसामान्यस्य फलद्वारैव व्यापारेऽन्वयोपगमात् तथा नामार्थानन्वयान्न कारकत्वहानिरिति । पराजेर्योगे पञ्चमीं ज्ञापयति । "पराजेरसोढ" इति सूत्रं पराजेर्योगे असोढः सोढुमशक्यो योऽर्थस्तत्कारकमपादानसंज्ञं स्या-

दित्यर्थकं रणात्पराजयते इत्यादिप्रयोगः । अत्र गौडाः । पराजेर्युद्धनिवृत्तिरर्थः पञ्चम्या द्वेषोऽर्थः तत्र प्रकृत्यर्थस्य विषयित्वेनान्वयः द्वेषस्तु जन्यतया युद्धनिवृत्तावन्वेति तथा च रणगोचरद्वेषजन्ययुद्धनिवृत्तिर्वाक्यार्थ इति वदन्ति तदसत् । युद्धनिवृत्तेर्धात्वर्थत्वेऽध्ययनात्पराजयत इत्यादावनन्वयापत्तेर्न च निवृत्तिमात्रं धात्वर्थस्तत्र व्युत्पत्तिवैचित्र्येण पञ्चमीप्रकृत्यर्थस्य विषयित्वेनान्वय इति वाच्यं तथापि विद्यात्पराजयत इति प्रयोगापत्तेस्तस्मादिदमत्राकूतं पराजयतेर्भङ्गफलकव्यापारोऽर्थः स च भङ्गः कर्तृगतश्चेत्तदा फलसमानाधिकरणव्यापारार्थकतया नास्य सकर्मकत्वमिति तत्र यद्विषयकद्वेषप्रयोज्यः पराजयव्यापारस्तद्वाचकपदात्पञ्चमी भवति पूर्वसूत्रे भयहेतुशब्देनानिष्टसाधनताज्ञानादिद्वारकप्रयोज्यत्वं पञ्चम्यर्थतया ज्ञापितं प्रकृतेऽसोढशब्देन द्वेषद्वारकप्रयोज्यत्वं तथा तत्र पञ्चम्या द्वेषोऽर्थः प्रयोज्यतया व्यापारेऽन्वेति । अथ वा स्वविषयकद्वेषद्वारकप्रयोज्यत्वं पञ्चम्यर्थः स्वरूपेण व्यापारेऽन्वेति अध्ययनात्पराजयत इत्यत्र वादिवाक्यार्थदोषप्रतिपादकोत्तरवाक्यप्रयोक्तृत्वं भङ्गः फलं शास्त्रार्थानभिज्ञानं व्यापारो धात्वर्थस्तत्र विषयितया प्रकृत्यर्थविशेषितः पञ्चम्यर्थो द्वेषः प्रयोज्यतयाऽथ वा निरूपितत्वेन प्रकृत्यर्थविशेषितं स्वविषयकद्वेषद्वारकप्रयोज्यत्वं स्वरूपेणान्वेति अनध्ययनविषयकद्वेषसाध्यद्वेषसाध्ययने प्रवृत्त्यनुत्पादद्वारा अध्ययनाभावप्रयोजकत्वमध्ययनाभावप्रयोज्यं शास्त्रार्थानभिज्ञानमिति तथा चाध्ययनविषयकद्वेषप्रयोज्यं दर्शितभङ्गफलकशास्त्रा-

र्थानभिज्ञानं वाक्यार्थः। एवं रणात्पराजयत इत्यत्र पलायननिलयनादिर्भङ्गः फलं शौर्याभावो व्यापारो धात्वर्थः शौर्यं तु परकर्मकप्रहरणकर्तृत्वं प्रकृते बोध्यं रणस्तु परस्परप्रहरणं रणगोचरद्वेषस्य रणे प्रवृत्त्यनुत्थापद्वारा रणाभावप्रयोजकत्वं रणाभावप्रयोज्यो दर्शितशौर्यस्याभाव इति। एवं विवादात्पराजयत इत्यत्र परोद्भावितदोषानुद्धरणं भङ्गः फलं प्रतिज्ञातार्थोपपादकपरस्परवाक्यं तद्गोचरद्वेषस्तु साक्षादेव दर्शितव्यापारप्रयोजक इति। अविद्यमानो द्वेष्योऽसोढः विद्यमानस्तु सोढ एवातः शत्रोः पराजयत इति न प्रयोगः शत्रोर्विद्यमानतया सोढत्वात् अत एवासोढ इति किं शत्रुं पराजयत इति काशिका सङ्गच्छते अन्यथा द्वेष्यत्वस्वरूपासोढत्वस्यानपायादसङ्गत्यापत्तेः इत्थं च पराजेर्भङ्गफलकव्यापारार्थकत्वमेव निष्टृच्याद्यर्थकत्वे तु काशिकोदाहरणासङ्गतिरपि द्रष्टव्या। वारयत्यादियोगे पञ्चमीं ज्ञापयति। "वारणार्थानामीप्सितः" इति सूत्रं वारणार्थानां धातूनां योगे ईप्सितो योऽर्थस्तत्कारकमपादानसंज्ञं भवतीत्यर्थके यवेभ्यो गां वारयति कूपादन्धं वारयतीति प्रयोगः। अत्र गौडाः। वारणं क्रियाप्रतिषेधप्रतियोगिनी क्रिया भक्षणगमनादिरूपा तात्पर्यवशात्कचित्कस्याश्चित्प्रतिषेधो वारयत्यादिना बोध्यते प्रतिषेधस्तु कर्तृत्वाभावानुकूलो व्यापारः कर्तृत्वाभावस्वरूपफलवत्तया गवाश्वादेः कर्मता पञ्चम्यास्तु देशादिगतत्वेनेच्छाविषयत्वमर्थः मतत्वं तु आधेयत्वं तथा चाधेयत्वप्रकारिकेच्छाविषयत्वं पञ्चम्यर्थो भक्षणगमनादिफ-

ले गलाधःसंयोगोत्तरदेशसंयोगादावन्वेति प्रकृत्यर्थस्य निरूपकतया आधेयत्वेऽन्वयः इच्छा तु भक्षणादिकर्तुर्बोध्या एवं च यवाधेयत्वप्रकारिकेच्छाविषयगलाधःसंयोगफलकभक्षणकर्तृत्वाभावस्य गोवृत्तेरनुकूलव्यापारः कूपाधेयत्वप्रकारिकेच्छाविषयोत्तरसंयोगफलकगमनकर्तृत्वाभावस्यान्धवृत्तेरनुकूलव्यापारश्च वाक्यार्थः यद्यप्यन्धादेः कूपाधेयत्वप्रकारिका नेच्छा तथाप्यभिमुखदेशाधेयत्वप्रकारिकेच्छा विद्यत एवाभिमुखत्वेन कूपादिस्तत्र भासत एवेति नानुपपत्तिः न च पञ्चम्या आधेयत्वमर्थो भक्षणादिफले गलाधःसंयोगादावन्वियात् किं पञ्चम्यर्थे इच्छान्तर्भावेणेति वाच्यं यत्रान्नपिहितविषभोजनप्रतिषेधव्यापारस्तत्र विषाद्वारयतीति न प्रयोगः किं तु स विषान्नाद्वारयतीतिप्रयोगस्तत्र पूर्वप्रयोगवारणेच्छायाः तदन्तर्भावात् यस्य यवादेर्न केनापि भक्षणं तत्पराद्यवाङ्गां वारयतीतिप्रयोगस्यानुपत्तेश्च इच्छायास्तदन्तर्भावे तु तद्यवाधेयत्वप्रकारिकेच्छाविषयफलकभक्षणकर्तृत्वाभावानुकूलव्यापारबोधस्य सम्भवात् भवति तथाविधप्रयोगः एवं च दर्शितस्थले भक्षणादौ तद्यवाधेयत्वस्य गोकर्तृकत्वस्य चोभयाभावः प्रतीयते तदर्थं व्युत्पत्त्यन्तरकल्पनं च न युक्तं गौरवात् । न च सर्वत्रैव उभयाभावबोधान्न व्युत्पत्त्यन्तरकल्पनमिति वाच्यम् । तथासति गगनाङ्गां वारयतीतिप्रयोगापत्तेः गगनाधेयत्वगोकर्तृकत्वोभयाभावस्य भक्षणे सत्त्वात् तस्मादिच्छायास्तथात्वमेवोचितमेतदर्थमेव सूत्रे ऽपीप्सितपदमित्याहुस्तच्चिन्त्यं तथासति क्षेत्राद्वन्यां वार-

यति नृपादानपं कूपेण वारयतीत्यादावचेतनस्य व-
न्यादेर्गमनकर्तुरिच्छाविरहात् चेत्राद्याधेयत्वप्रकारि-
केच्छाविषयत्वस्य गमनफले संयोगादौ विरहादनन्व-
यापत्तेरिति । गुरुचरणास्तु वारयत्यादिधातुर्धातुप्रवृत्ति-
निमित्तत्वोपलक्षितपतनत्वाद्यवच्छिन्नप्रतियोगिताकम-
भावं फलविषयाऽभिधत्ते तत्प्रयोजकमपि मा पतेतिवा-
क्यादिव्यापारः प्रधानतया तज्जनिता तु पदार्थोपस्थिति-
रुपलक्षणधर्ममोषेण पतनाभावत्वादिना फलमवगाहते
तत्राभावस्वरूपफलाधिकरणतया विवक्षिते कर्मसंज्ञा ब-
लीयसीति ततो द्वितीयाफलभूताभावप्रतियोगिक्रिया-
कारकाणि पुनरपादानसंज्ञकानीति तस्मात् पञ्चमी
तानि कारकाण्यभिधत्ते कूपादन्धं वारयतीत्यत्र कू-
पाधिकरणकपतनप्रतियोगिकस्यान्धवृत्तेः यवेभ्यो गां
वारयतीत्यत्र यवकर्मकभक्षणप्रतियोगिकस्य गोवृत्तेः
परस्वेभ्यः पाणिं वारयतीत्यत्र परस्वकर्मकोपादानप्रति-
योगिकस्य पाणिवृत्तेः परेभ्यः शरीरं वारयतीत्यत्र शरी-
रकरणकबाधप्रतियोगिकस्य शरीरवृत्तेः पुष्पेभ्यः आतपं
वारयतीत्यत्र पुष्पकर्मकशोषणप्रतियोगिकस्यातपवृत्तेः
श्वपचेभ्यो दातारं वारयतीत्यत्र श्वपचसंप्रदानकदानप्र-
तियोगिकस्य दातृवृत्तिरभावस्यानुकूलो व्यापारो वा
क्यार्थ इति प्राञ्चः । के चित्तु कूपादन्धं वारयतीत्यादौ-
धात्वर्थतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नक्रियागोचर-
निवृत्त्यनुकूलो व्यापारो वारयतेरर्थस्तत्र निवृत्त्यन्वितं स-
मवेतत्वं द्वितीयार्थः पञ्चम्यास्तु प्रकारित्वमर्थः कूपे मा
पतेयमित्याकारकनिवृत्तेः कूपप्रकारकत्वात् तथा च

कूपप्रकारिकाया अन्धसमवेतायाः पतननिवृत्तेरनुकूलो व्यापारो वाक्यार्थ इति वदन्ति तन्न पुष्पेभ्यः आतपं वारयतीत्यादावनन्वयापत्तेरातपादेरचेतनस्य निवृत्त्यसंभवात् कूपादन्धं वारयति न पुनरन्धो निवृत्त इति प्रयोगानुपपत्तेश्च किं च प्रकारित्वमपि न पञ्चम्यर्थः संभवति तथासति क्षेत्रे खले वा यवेभ्यो गां वारयतीत्यत्र क्षेत्रादिपदात्पञ्चम्यापत्तेः क्षेत्रे यवं मा भक्षयमिति निवृत्तो क्षेत्रादेः प्रकारित्वादिति । वस्तुतस्तु तथोपलक्षितधर्मावच्छिन्नक्रियागोचरप्रवृत्त्यभावप्रयोजकज्ञानानुकूलव्यापारो वारयतेरर्थस्तथाविधज्ञानस्वरूपफलवत्तया गवान्यादेः कर्मत्वं तथाविधं ज्ञानं तु प्रवृत्तिविषयक्रियानिष्ठस्यानिष्टसाधनत्वस्य कृत्यसाध्यत्वस्य वाऽवगाहिबोध्यं तदनुकूलो दण्डोद्यमनादिर्वारयितुर्व्यापारस्ताडनाद्यनिष्टफलको गवादेर्यवभक्षणप्रवृत्तिं विघटयति यवभक्षणं तु वारयितुरनिष्टसाधनमिति परम्परया ताडनाद्यनिष्टसाधनमिति बन्धनादिर्वारयितुर्व्यापारो यवभक्षणे कृत्यसाध्यतावुद्धिं गवादेर्जनयतीति न यवभक्षणे प्रवृत्तिः अग्रे कूप इति कूपे मा पतेति वाक्यं तु कूपपतननिष्ठानिष्टसाधनत्वस्य स्मारकमिति नान्धस्य कूपपतनप्रवृत्तिरिति एवं यवेभ्यो गां वारयतीत्यत्र पञ्चम्याः कर्मत्वमर्थः प्रवृत्तिविषयक्रियायामन्वेति तथा च यवकर्मकभक्षणविषयकप्रवृत्त्यभावप्रयोजकज्ञानस्य गोवृत्तेरनुकूलव्यापारो वाक्यार्थः यत्र च गवादेर्यवभक्षणादावुत्कटो रागस्ताडनादौ न तथा द्वेषो वा तत्र दण्डिना वारिता अपि गावो यवभक्षणे

प्रवर्त्तन्ते न निवर्तन्ते वेति प्रयोगः दण्डिकर्तृकव्यापारप्रयोज्यस्य यवभक्षणप्रवृत्त्यभावप्रयोजकज्ञानस्याश्रया इति वारिता इत्यन्तस्यार्थः वारयतेर्दर्शितार्थकत्व एवोभयविधप्रयोगः संगच्छते अत एव प्रवृत्तिविघातो वारणमिति काशिका सूचीयमीप्सितपदं पञ्चम्याः कर्मत्वमर्थं सूचयति यस्य यवादेर्न केनापि भक्षणं तत्परयवेभ्यो वारयतीति न प्रयोगः यदि प्रयोगस्तदा यवकर्मत्वस्य स्वावच्छिन्नया भक्षणप्रकारितया प्रवृत्तावन्वय इति नानुपपत्तिः एवमेव कूपादन्धं वारयति कारुणिक इति कारुणिकेन वारितोऽप्यन्धो न निवर्तत इति प्रयोगेऽप्यन्वयः इयांस्तु विशेषः यदत्र कूपकर्मकगमनस्य प्रवृत्तावन्वय इति पुष्पेभ्य आतपं वारयतीत्यादावचेतने कर्मणि वारयतेः क्रियाऽभावप्रयोजकव्यापारोऽर्थः क्रियाऽभावस्वरूपफलवतः कर्मत्वात्तद्वाचकपदात् द्वितीया पञ्चम्याः कर्मत्वमर्थः फलैकदेशक्रियायामन्वेति तथा च पुष्पकर्मकगमनाभावस्य शोषणाभावस्य वाऽऽतपप्रवृत्तेरनुकूलो व्यापारो वाक्यार्थः न चैवं क्रियाभावप्रयोजकव्यापार एव सर्वत्र वारयतेरर्थोऽस्त्विति वाच्यं वारिता अपि गावो यवं भुञ्जते इति वारितोऽप्यन्धः कूपं गत इति प्रयोगस्यानुपपत्तेः भक्षणादिक्रियाभावस्वरूपफलाश्रयस्य वारणकर्मणो भक्षणादिक्रियाकर्तृत्वानुपपत्तेरिति । ननु वारयतेर्नानाविधार्थकत्वाभ्युपगमे यवेभ्यो गां वारयतीत्यादौ चेतने कर्मणि क्रियाऽभावेच्छाप्रयोज्यव्यापार एवार्थोऽस्तु किं प्रवृत्त्यभावप्रयोजकज्ञाननिवेशनेन तावतैव वार्यमाणा गावो भुञ्जत इत्या-

दिप्रयोगोपपत्तेः फलीभूतायाः क्रियाभावेच्छाया विषयस्य गवादेर्वारणकर्मत्वेऽपि भक्षणकर्तृत्वाविरोधादिति चेत् स्यादेवं यदि यवभक्षणाभावेच्छया विधीयमाने क्षेत्रस्य कण्टकाद्यावरणेऽपि वारयतीतिप्रयोगः यदि च वारयतेर्नानार्थकत्वेऽनुगतप्रवृत्तिनिमित्ताभावे प्रयोगातिप्रसङ्गः क्रियाभावप्रयोजकव्यापारार्थकत्वे तु यवकर्मकत्यागाभावप्रयोजकव्यापारेऽपि यवेभ्यो गां वारयतीतिप्रयोगप्रसङ्ग इति विभाव्यते तदा संबन्धाभावप्रयोजककार्यानुकूलो व्यापारो वारयतेरर्थस्तथाविधकार्यस्य फलतया तद्वतो गवादेः कर्मत्वं यद्दीयसंबन्धस्याभावस्तद्वाचकपदात्पञ्चमीसूत्रे ऽपीप्सितशब्देनाप्तीच्छाविषयप्रतिपादनं बालोपलालनं कर्तुरीप्सितेतिसूत्रवदाप्तिमत एवापादानत्वविवक्षणात् आप्तिस्तु प्राप्तिः सा च संबन्ध एव तदभावप्रयोजकं क्व चिदनिष्टसाधनताज्ञानस्वरूपं कार्यं यथा गवादेर्यवभक्षणत्वावच्छेदेन दण्डताडनाद्यनिष्टसाधनताज्ञानं कण्ठावच्छेदेन यवसंबन्धस्य यवसंयोगस्याभावं प्रयोजयति यस्य यवादेर्न केनापि भक्षणं तत्संयोगाभावमपि सामान्यतो यवभक्षणत्वावच्छेदेनानिष्टसाधनताज्ञानमेव प्रयोजयति अन्यथा तद्भक्तिभक्षणस्यानुपस्थित्या तद्गतानिष्टसाधनताज्ञानासम्भवात् कुतोऽपि यवाद्वारणासम्भवात् एवं कूपगमनत्वावच्छेदेन शरीरोपघातकपतनानिष्टसाधनताज्ञानस्य चरणावच्छेदेन कूपसंयोगस्याभावं प्रयोजयति क्व चिदचेतने कर्मणि ज्ञानातिरिक्तं कार्यं यथाऽऽतपादेः छत्राद्यावर-

णसंयोगः रूपसंयोगाभावं पुष्पसंयोगाभावं वा प्रयोजयति । एवं वन्यादेरादिसंयोगः क्षेत्रसंयोगाभावं प्रयोजयति एवं पञ्चम्या आधेयत्वं निरूपकत्वं वाऽर्थस्तच्च धात्वर्थैकदेशे संबन्धेऽन्वेति तथा च यवेभ्यो गां वारयति दण्डीत्यत्र यवनिरूपितसंयोगाभावप्रयोजककार्यस्य गोवृत्तेरनुकूलो यो व्यापारस्तदनुकूलशक्तिमान् दण्डीत्यन्वयः एवं कूपादन्धं वारयति पुष्पान्नृपाद्भाऽऽतपं वारयति क्षेत्राद्वन्यां वारयतीत्यादावप्यन्वयो बोध्यः । एवं चाण्डालात्कनकं वारयति दातेत्यत्र चाण्डालसंप्रदानककनककदाननिष्ठानिष्टसाधनताज्ञानविषयत्वस्वरूपकार्यस्य कनकनिष्ठस्य प्रयोजकं तथाविधागमस्मरणं दातुः तथाविधविषयत्वं तु कनके चाण्डालस्वत्वाभावं प्रयोजयति इत्थं च वारयतेर्न नानार्थता न वा वार्यमाणा गावो यवं भुञ्जत इत्यादिप्रयोगानामनुपपत्तिः संबन्धस्तु प्रयोज्यो बोध्यः तेन घटसमवेतत्वाभावप्रयोजकस्याग्निसंयोगविशेषसामानाधिकरण्यस्य श्यामरूपनिष्ठस्यानुकूले पाचकव्यापारे सत्यपि घटात् श्यामं रूपं वारयति पाचक इति न प्रयोगः । यत्र तु वारणान्तर्भूतस्य संबन्धाभावस्यैव वारयत्यादिना विवक्षणं तत्र संबन्धस्याभावे विशेषणतया फलत्वात् तद्दतः कर्मत्वमिति तत्र परत्वाद् द्वितीयैव प्रमाणं यथा कूपं वारयति पान्थः मांसं वारयति मुनिरिति अत्र कूपवृत्तिसंबन्धाभावप्रयोजकशक्तिमान् पान्थ इत्यादिरन्वयबोधः यत्र चाभावप्रयोजकव्यापारस्यैव वारणान्तर्भूतस्य विवक्षणं तत्र संबन्धस्य वारणानन्तर्भूतत्वात् तद्दतो नापादानत्वमिति

तत्र न पञ्चमी वारणार्थकधात्वर्थान्तर्भूतसंबन्धवत एवापादानत्वविधानात् प्रतियोग्यविशेषितस्य फलीभूतस्याभावस्य प्रतियोग्येव कर्म न त्वधिकरणं यथा घटं रहयतीत्यादौ घटादिः प्रतियोगी तथाऽत्रापीति प्रतियोगिन्येव द्वितीया यथा कूपगमनं कूपसंयोगं वा वारयति पान्थ इत्यादौ अत्र द्वितीयायाः प्रतियोगित्वमर्थस्तच्च फलेऽभावेऽन्वेति तथा च कूपगमनप्रतियोगिताकस्य कूपसंयोगप्रतियोगिताकस्य वाऽभावस्य प्रयोजको व्यापारस्तदनुकूलकृतिमान् पान्थ इत्यन्वयबोधः । एवं मांसभोजनं मांसकण्ठसंयोगं वा वारयति मुनिरित्यादावप्यन्वयो बोध्यः । यत्राभावेऽधिकरणस्य संबन्धो विवक्षितस्तत्र शेषे षष्ठ्येव प्रमाणं यथाऽन्धस्य कूपगमनं कूपसंयोगं वा वारयति दयालुः मांसभोजनं पुत्रस्य वारयति मुनिः पापकर्म स्वस्य वारयति विद्वानिति अत्रान्वयबोधः पूर्ववदेव विशेषस्तु प्रतियोग्यन्विते प्रयोजकव्यापारविशेषणेऽभावे षष्ठ्यर्थसंबन्धभानमिति । एवं वारयत्यादेर्दर्शितार्थकतायामेव दर्शितनिखिलप्रयोगोपपत्तिः त्यागाभावप्रयोजकव्यापारे वारयतिप्रयोगानुत्पत्तिश्च । वारयतिपर्यायो वर्जयतिनिवर्तयतिप्रभृतयो बोध्यास्तेन यवेभ्यो गां वर्जयतीत्यादिः प्रयोग अत एव यवेभ्यो गां वारयति निवर्तयतीति काशिका । यत्तु सूत्रोपेप्सितशब्देनानीप्सितस्यापि ग्रहणं तेनाग्नेर्मोणवकं वारयतीतिप्रयोग इति शाब्दिकैरुक्तं तत्सूत्रार्थानभिज्ञानविजृम्भितम् ईप्सितशब्देन संबन्धवतोऽपादानत्वाभिधानादित्युक्तत्वात् दर्शितकार्यस्वरूपफलवतः

कर्मत्वे संबन्धप्रयोजकक्रियादिमत्त्वं तन्त्रमतः सान्निध्याभावस्वरूपस्य संबन्धाभावप्रयोजकस्य फलस्य प्रयोज्यस्य सत्त्वेऽपि वह्निकूपादेर्न कर्मत्वमिति माणवकादग्निं कूपमन्धाद्वा वारयतीति न प्रयोगः संबन्धप्रयोजकक्रियादेर्माणवकेऽन्धे विद्यमानस्याग्नौ कूपे च विरहादिति माणवकादेस्तथात्वात्कर्मत्वमेवेति । निलीयत्यादियोगे पञ्चमीं ज्ञापयति । अन्तर्धौ येनादर्शनमिच्छति इति सूत्रम् । अन्तर्धिनिमित्तं येनादर्शनमात्मनस्तत्कारकमपादानसंज्ञकं भवतीत्यर्थकं मातुर्निलीयते बाल इति प्रयोगः । अत्र स्वकर्मकदर्शनाभावप्रयोजको व्यापारो निलीयतेरर्थः पञ्चम्यास्तु वृत्तिमत्त्वप्रकारकेच्छाविषयत्वमर्थः स्वकर्मकादर्शनेऽन्वेति । प्रकृत्यर्थस्य निरूपकतया वृत्तिमत्त्वेऽन्वयस्तथा च मातृनिरूपितवृत्तिमत्त्वप्रकारकेच्छाविषयस्य स्वकर्मकदर्शनाभावस्यानुकूलो व्यापारो वाक्यार्थः इष्यते हि बालेन माता मां मा द्राक्षीदिति मातृवृत्तित्वेन स्वकर्मकदर्शनाभावः अत एव मातुर्निलीयते बालः माता पुनरेनं पश्यत्येवेत्यादयः प्रयोगाः सूत्रेऽप्येतदर्थमिच्छतिग्रहणमिति शाब्दिकसंमताः पन्थाः । वस्तुतस्तु दर्शनाभावप्रयोजकव्यापारो नान्तर्धिस्तथासति सूत्रेऽन्तर्धावित्यस्य वैयर्थ्यापत्तेः किं च स्वकर्मकादर्शनेच्छया येन शत्रुचक्षुर्नोशितं तत्र सोऽयं शत्रोर्निलीयत इति प्रयोगप्रसङ्गः तस्माच्चक्षुःसंयोगप्रतिबन्धकदेशसंयोगोऽन्तर्धिशब्दार्थः स एव निलीयतेरर्थः प्रतिबन्धकस्तु व्यवहितदेशसंयोगः अत एव व्यवधानमन्तर्धिरिति काशिका । यदि च तमसि निलीयत इति

प्रयोगस्तदा चाक्षुषजनकसंयोगप्रतिबन्धकदेशसंयोगस्तथा पञ्चम्यास्तु दर्शनाभावेच्छार्थस्तच्च प्रकृत्यर्थस्य कर्तृतया दर्शनेऽन्वयः दर्शनाभावेच्छायाः प्रयोज्यतयाऽन्तर्भावन्वयः मातुर्निलीयते बाल इत्यत्र मातृकर्तृकदर्शनाभावेच्छाप्रयोज्यतथाविधसंयोगानुकूलकृतिमान् बाल इत्यन्वयबोधः । व्यवधानाद्यपनयेन मातुर्दर्शनेऽपि सति तथाप्रयोगार्थं सूत्रे इच्छतीत्युक्तम् अत एवेच्छातिग्रहणं किम् अदर्शनेयां सत्यां सत्यपि दर्शने यथा स्यादिति काशिका । वस्तुतस्तु चाक्षुषाभावेच्छाप्रयोज्यव्यवहितादिदेशसंयोगोऽन्तर्धिः पञ्चम्याः कर्तृत्वमर्थः चाक्षुषेऽन्वेति चाक्षुषाभावस्तु चाक्षुषविषयत्वाभावः स्ववृत्तिरन्तर्धौ निविशते स्वान्यवृत्तिचाक्षुषविषयत्वाभावेच्छायां न पञ्चमी अत एवान्तर्धाविति किं चौरान्न दिदृक्षत इति काशिका । अत्र चौरवृत्तिचाक्षुषविषयत्वाभावेच्छाप्रयोज्यव्यापारस्य सत्त्वेऽपि नान्तर्धिरिति तथा च यत्र स्वकर्मकचौरकर्तृकदर्शनाभावेच्छया चौरकर्मकस्वकर्तृकदर्शनाभावेच्छा तत्र चोरेभ्योऽयं निलीयत इति न प्रयोग इति एवं मातुरन्तर्वत्ते निलीयते वा बाल इत्यत्र मातृकर्तृकचाक्षुषविषयत्वाभावस्य स्ववृत्तेरुद्देश्यनी येच्छा तत्प्रयोज्यस्य व्यवहितादिदेशसंयोगस्वरूपव्यापारस्याश्रयो बाल इत्यन्वयबोधः इत्थं च निलीनमपि बालं माता पश्यतीति प्रयोगोपपत्तिः दर्शनान्तर्धेराश्रयस्य निलीनशब्दार्थतया तत्र दर्शनकर्मत्वस्याविरोधात् अत एव उपाध्यायादन्तर्धत्ते उपाध्यायान्निलीयते मा मासुपाध्यायो द्राक्षीदिति निलीयते इति

काशिका । अत्रेत्यन्तं पञ्चम्यर्थसहितस्य धात्वर्थस्य प्रयोज्यान्तस्य विवरणं निलीयत इति व्यवहितादिदेशसंयोगस्य धात्वर्थस्य प्रधानस्य विवरणमिति । अधीङादियोगे पञ्चमीं ज्ञापयति । आख्यातोपयोगे इति सूत्रम् । आख्याता वक्ता आख्याफले उपयोगे सति अपादानसंज्ञः स्यादित्यर्थकम् । आख्यानफलं तु शिष्यस्योच्चारणमर्थज्ञानं वा श्रोतुस्तु पुण्यमधर्मध्वंसो वा उपाध्यायादधीत इत्यत्राध्ययनं द्विविधमपि पूर्वोक्तं पञ्चम्या आख्यानं वाक्यमर्थस्तच्चाध्ययनफले उच्चारणे अर्थप्रतिपादकताज्ञाने वा प्रयोज्यतयाऽन्वेति उच्चारणफलकं श्रावणमर्थप्रतिपादकताज्ञानफलकं श्रावणं चेति द्विविधमध्ययनमधीङोऽर्थः उच्चारणं तु वर्णोत्पादकतयोपलक्षितो विक्लित्तादिः प्रयत्न इति आख्याने तु प्रकृत्यर्थस्य कर्तृतयाऽन्वयः एवमुपाध्यायकर्तृकवाक्यप्रयोज्यस्योच्चारणस्यार्थप्रतिपादकताज्ञानस्य वाऽनुकूलं यच्छ्रावणं तदाश्रयत्वं वाक्यार्थः । गरलाद्दवानलाद्वा दारुवदान्यतां शिक्षत इत्यादौ यदि न हेतुतृतीयाप्रयोगः तदा ऽऽख्यानज्ञापनं तच्च क्रियाकर्तव्यताज्ञानानुकूलव्यापारः पञ्चम्यर्थः प्रयोज्यतया शिक्षणादिफले प्रवृत्तावन्वेति शिक्षतेस्तु प्रवृत्तिफलकं परकर्तृकक्रियाया दर्शनं ज्ञानसामान्यं वाऽर्थः वडवानलादेस्तु दाहकर्तृत्वमेव दाहकर्तव्यताज्ञानप्रयोजकमिति नानुपपत्तिरिति पञ्चम्यर्थे तथाविधव्यापारे प्रकृत्यर्थस्याधेयतयाऽन्वयः एवं पाचकात्पाकं शिक्षते नटान्नाट्यं शिक्षते इत्यादौ दृश्यं च पक्तव्यमिति पाकाङ्गस्य चुल्लीप्रज्वालनादिकर्मणः

प्रदर्शनस्वरूपः पाचकव्यापारः पाककर्तव्यताज्ञानं जनयति तथाविधज्ञानं तु पाकप्रवृत्तिप्रयोजकमिति इत्थं नटनीयमिति नाट्याङ्गस्याङ्गुलिचेष्टादिकर्मणः प्रदर्शनस्वरूपो नटव्यापारो नाट्ये कर्तव्यताज्ञानं तच्च प्रवृत्तिं जनयतीत्येवमन्यत्रापूह्यमिति तथा च पाचकवृत्तिः कर्तव्यताज्ञापनस्वरूपो यो व्यापारस्तत्प्रयोज्यायाः पाकसाध्यिकायाः प्रवृत्तेरनुकूलं यत्परकर्तृकपाकस्य दर्शनं ज्ञानसामान्यं वा तदाश्रयत्वं वाक्यार्थः । एवं नटवृत्तितथाविधव्यापारप्रयोज्यायाः नाट्यसाध्यिकायाः प्रवृत्तेरनुकूलं यदन्यकर्तृकनाट्यदर्शनं तदाश्रयत्वं वाक्यार्थ इति एवं पण्डितात्पुराणं शृणोतीत्यादौ लक्षणपञ्चकोपेतमार्षवाक्यं पुराणं पञ्चम्या आख्यानवाक्यमर्थः प्रयोज्यतया धात्वर्थे श्रवणेऽन्वेति तथा च पण्डितकर्तृकवाक्यप्रयोज्यं यत्पुराणकर्मैकश्रवणं तदाश्रयत्वं वाक्यार्थः अत्रोपयोगः पुण्यजनकत्वमधर्मध्वंसजनकत्वं वा श्रवणे स्वरूपसदपेक्षितं तस्य तु बोधः पञ्चमीसाधुत्वार्थं मानान्तरेणैवेति यत्र नेदृश उपयोगस्तत्र न पञ्चमी यथा नटस्य शृणोतीत्यादौ अत एव उपयोग इति किं नटस्य शृणोतीति काशिका । पिकाद्वने शृणवतीत्यादौ हेतौ पञ्चमीति नानुपपत्तिः अत एव हेतुपञ्चम्या गतार्थता सम्भवति पुण्यजनकत्वादुपयोगप्रतीतिप्रयोजनकतया सार्थकत्वात् एतेन पण्डितात्पुराणं शृणोति उपाध्यायादेदमधीते इत्यादावुच्चारणाधीनत्वं पञ्चम्यर्थः प्रकृत्यर्थस्य कर्तृतयोच्चारणेऽन्वयः । उच्चारणाधीनत्वं श्रवणे उच्चारणेऽर्थपरत्वज्ञा-

ने वाऽध्ययनेऽन्वेतीत्यपि निरस्तं नटस्य शृणोतीत्यत्र पञ्चम्यापत्तेः नटोच्चारणाधीनत्वस्य श्रवणे सत्त्वात् एवमुपाध्यायादेर्दं शृणोतीत्यत्र श्रवणस्योच्चारणजनकत्वमपि शिष्योपयोगः पुण्यजनकत्वमेव शिष्यान्योपयोग इति । जन्यादिधातुयोगे पञ्चमीं ज्ञापयति । जनिकर्तुः प्रकृतिरिति सूत्रम् । जनिकर्तुरुत्पत्त्याश्रयस्य प्रकृतिः समवायिकारणमपादानसंज्ञं भवतीत्यर्थकम् । अत्र शृङ्गाच्छरो जायत इतिप्रयोगः अत्र गौडाः । प्रकृतित्वं न विकारित्वं प्रकृतिविकृतिभावविरहेऽपि रघोरजो ऽजायतेत्यादौ पञ्चमी न च सुतवपुषः पित्रोः शरीरविकृतित्वमपि तदीयशुक्रशोणितविकृतित्वमेव शुक्रशोणितादेः शरीरत्वेऽपि मलमूत्रादेरिव शरीरावयवत्वाभावात् तदवयवारभ्यत्वस्यैव तद्विकारतारूपत्वात् । न चात्र हेतौ पञ्चमी न त्वपादान इति वाच्यम् । ऋणगुणातिरिक्तहेतौ पञ्चम्यनुशासनविरहात् अन्यथा हेतुपञ्चम्यैवोपपत्तौ जनिकर्तुरितिसूत्रस्य वैयर्थ्यापत्तेः तस्मात्कारणत्वमेव प्रकृतित्वं दण्डात् घटो जायत इत्यादिप्रयोगा दृश्यन्त एव अत एवेश्वरस्य कार्याप्रकृतित्वेऽपि यतो द्रव्यं गुणाः कर्मेत्यादौ पञ्चमी न चात्र क्रियायोगाभावात् कथमपादानपञ्चमीति वाच्यम् । अगत्या जायत इत्यादिक्रियाध्याहारेण पञ्चम्या उपपादनीयत्वादिति निरूप्यत्वं पञ्चम्यर्थः शृङ्गादिविशेषितं धात्वर्थे जन्यादावन्वेतीत्याहुः । तन्न सुन्दरं पुत्रस्य पित्रविकृतित्वात् न हि मलमूत्रादिसदृशं शुक्रशोणितादि पित्रोरारम्भकत्वात् अत एव षाट्कौशिकं

शरीरं त्रीणि पित्तस्त्वङ्मांसरुधिराणि मारुतः अ-स्थिस्नायुमज्जानः इति । यद्यपि चक्षुर्गुणातिरिक्तो हेतौ न पञ्चम्यनुशासनविरहादिति तदपि दाहो दहनान्न तु जलादित्यादेर्निजशिरोमणिवचनस्य विरुद्धं दर्शयिष्यमाणपञ्चम्यनुशासनतया अकिंचित्करमेव । अत एव यतो द्रव्यं गुणाः कर्म तथा जातिः पराऽपरेत्यत्र जायत इत्यध्याहारेण पञ्चम्युपपादनमप्ययुक्तं जायत इ-त्यध्याहारेण जातिरित्यादावसम्भवात् हेतुपञ्चम्यैवोपप-त्तेः अत एवोत्पादकत्वं ज्ञापकत्वं चेति द्विविधमत्र हे-तुत्वं यथायोग्यमिति प्रकाशे महामहोपाध्यायचरणाः । तस्मात् प्रकृतित्वं समवायिहेतुत्वं तथा च पञ्चम्याः स-मवायावच्छिन्नत्वमर्थः । तच्च प्रकृत्यर्थस्य समवाये निरू-पकतयाऽन्वयः समवायावच्छिन्नत्वस्य जन्यादिधात्वर्थे ज-न्यत्वेऽन्वयः । एवं तन्तुभ्यः पटः कपालेभ्यो घटः मृङ्गा-च्छरो वा जायत इत्यादौ तन्तुनिरूपितसमवायावच्छि-न्नजन्यत्वाश्रयः पट इत्यादिरन्वयबोधः । यदि च वि-कारित्वमेव प्रकृतित्वं तच्च विद्यमाननाशप्रतियोगित्व-मन्यथा रूपस्य घट. प्रकृतिरितिव्यवहारापत्तेः । न च तथाऽपि महापटः खण्डपटस्य प्रकृतिरिति व्यवहारा-पत्तिरिति वाच्यम् । समवायिहेतोर्नष्टजातीयत्वस्य त-थात्वात् । न हि महापटः समवायिहेतुरिति एवं त-न्तुभ्यः पट इति नापादानपञ्चमी किं तु मृत्पिण्डात् घटो जायत इत्यादौ नष्टपिण्डजातीयस्यैव घटारम्भ-कत्वात् । येन रूपेण प्रकृतित्वं तेन रूपेण साजात्यं बोध्यमतो द्रव्यत्वादिना तन्त्वादेर्नष्टमहापटादिसाजा-

त्वेऽपि न प्रकृतित्वं द्रव्यत्वादेः प्रकृतिताऽनवच्छेदकत्वात् । पुत्रस्य शुक्रशोणितनाशजन्यत्वेऽपि पितरौ न प्रकृतिः पित्रादिगतचैत्रत्वादिजातेरवयविमात्रवृत्तितया शुक्रोद्यवृत्तित्वात् । एवं दध्नः दुग्धं शरस्य शृङ्गं भस्मनः काष्ठं प्रकृतिरित्यादौ दुग्धपरमाणूनां दुग्धत्वेन नष्टदुग्धसाजात्यं शृङ्गावयवस्य शृङ्गत्वेन नष्टशृङ्गसाजात्यं काष्ठपरमाणूनां काष्ठत्वेन नष्टकाष्ठसाजात्यं दुग्धत्वादिजातेरवयवावयविवृत्तित्वात् भवत्युपपत्तिरिति विभाव्यते तदा पञ्चम्याः स्वप्रकृत्यर्थतावच्छेदकत्वोपलक्षितजातिमत्प्रतियोगिको नाशोऽर्थस्तत्र प्रकृत्यर्थस्याधेयतयाऽन्वयः तथाविधनाशस्तु प्रयोज्यतया जन्यादिधात्वर्थे उत्पत्तावन्वेति एवं दुग्धाद्दधि भवति काष्ठाङ्गस्य भवति शृङ्गाच्छरो जायते गोमयाद् वृश्चिक उत्पद्यते पाषाणाद् भेको भवतीत्यादौ दुग्धवृत्तिदुग्धनाशप्रयोज्योत्पत्त्याश्रयो दधीत्यादिरन्वयबोधः । अत एव हेतुपञ्चम्या नास्य सूत्रस्य गतार्थत्वं नाशप्रयोज्यत्वस्वरूपविलक्षणार्थप्रतिपत्तिफलकत्वात् एतेन यदत्र ब्रह्मणः प्रजाः प्रजायते इत्यादुदाहरणं हेतुपञ्चम्याः सूत्रं प्रत्याख्यातमिति निरस्तमुदाहरणस्य दर्शितत्वात् ब्रह्मण इत्यादिरत्नोदाहरणप्रयोगः सूत्रार्थानभिज्ञानविजृम्भित एवेति ।

अङ्गादङ्गात्संभवसि हृदयादभिजायसे ।
आत्मा वै पुत्रनामाऽसि त्वं जीव शरदः शतमिति ॥

श्रुतौ तु नापादानपञ्चमी । किं तु हेतुपञ्चमीति नानुपपत्तिरिति । प्रभवतियोगे पञ्चमीं ज्ञापयति । भुवः प्रभव इति सूत्रम् । भवनं भूः भुवः कर्तुः प्रभवो

योऽर्थस्तत्कारकमपादानसंज्ञं भवतीत्यर्थकम् । प्रभवः प्रकाशनाधिकरणं भवनं प्रथमः प्रकाशः हिमवतो गङ्गा प्रभवतीत्यत्र पञ्चम्या अधिकरणत्वमाधेयत्वं वाऽर्थः प्रभवत्यर्थे प्रथमप्रकाशे ऽन्वेति हिमवद्वृत्तिप्रथमप्रकाशवती गङ्गेत्यन्वयबोध इति वदन्ति । सबन्धाधीनत्वं पञ्चम्यर्थः धात्वर्थे प्रथमप्रकाशेऽन्वेतीत्यन्ये । दर्शनयोग्यत्वाभावावच्छेदकदेशाव्यवहितदेशावच्छेदेन दर्शनयोग्यत्वं प्रकाशः प्रभवत्यर्थः द्वितीयदेशान्वयितादात्म्यं पञ्चम्यर्थस्तथा च हिमवदभिन्नो यो दर्शनयोग्यत्वाभावावच्छेदकदेशाव्यवहितदेशस्तदवच्छिन्नदर्शनयोग्यतावती गङ्गेति वाक्यार्थ इति गुरुचरणाः । वस्तुतस्तु प्रथमप्रकाशः प्रभवत्यर्थो न सम्भवति प्रकाशे दर्शनस्वरूपे ज्ञानसामान्यस्वरूपे वा प्रथमत्वस्यासम्भवात् । तथा हि तत्प्रागभावाधिकरणसमयवर्तित्वं तत्प्रथमत्वं तच्च प्रकृते न सम्भवति हिमवदन्यदेशे प्रकाशस्यापि प्रकाशान्तरप्राग्भावाधिकरणसमयवर्तित्वात् न चात्र सजातीयाधिकरणसमयध्वंसानधिकरणसमयवर्तित्वं प्रथमत्वं तच्च प्रथमप्रकाश एव द्वितीयादिप्रकाशस्य प्रथमप्रकाशाधिकरणसमयध्वंसाधिकरणसमयवर्तित्वान्न तत्त्वमिति वाच्यं दर्शनस्वरूपाणां ज्ञानस्वरूपाणां वा प्रकाशानामनादौ संसारे दर्शनाधिकरणसमयध्वंसाधिकरणसमयवर्त्तित्वात्प्रथमत्वाप्रसिद्धेः । न च गङ्गाविषयकत्वेन प्रकाशस्य सोजात्यं विवक्षणीयमतो नाप्रसिद्धिरिति वाच्यं हिमवद्गङ्गासंबन्धात्प्राग्वर्तिनां जनानां गङ्गोपनीतभानादिसम्भवादप्रसिद्धितादव-

स्यात् प्रकाशस्याननुगमापत्तेश्च । तस्मात्प्रथमावय वावच्छेदेन लौकिकं चाक्षुषं प्रत्यक्षं वा प्रकाशः प्रथमत्वमवयवानां तु स्वारभ्यारम्भकावयवाधिकरणासमयध्वंसानधिकरणसमयवर्तित्वमिदमेव मूलत्वं हैमवतस्य गङ्गावयवस्य स्वोत्पादकसमयवर्तितया तथात्वं देशान्तरीयस्य तु हैमवताधिकरणासमयध्वंसाधिकरणसमयवर्तितया न तथात्वमिति । एवं वृक्षमूलस्यापि मध्यशाखाद्यपेक्षया प्रथमत्वमिति एवं हिमवतो गङ्गा प्रभवतीत्यत्र दर्शितः प्रभवत्यर्थः विषयत्वस्वरूपं कर्तृत्वं तिङर्थः पञ्चम्याः प्रकाशान्वयिकर्तृघटितसंबन्धावच्छिन्नमाधेयत्वमर्थस्तथा च हिमवद्वृत्तिः प्रथमावयवावच्छिन्नस्य चाक्षुषस्य वा विषयो गङ्गेत्यन्वयबोधः दर्शिते प्रभवत्यर्थे प्रथमत्वमवयव एव विवक्षितमतो हिमवतो गङ्गा प्रभवति काश्मीरेभ्यो वितस्ता प्रभवति प्रथमत उपलभ्यत इत्यर्थ इति काशिका अत्र प्रथमत्वस्य धात्वर्थविशेषणत्वे प्रथममिति स्यान्न तु तस्यन्तप्रयोगस्तसेरवच्छिन्नत्वमर्थः पृष्टतो गरुडध्वज इति दर्शनात् अवच्छिन्नत्वं तु प्रकृते स्वरूपसंबन्धविशेषः विषयित्वं वेत्यन्यदेतत् । अथ वा पञ्चम्या हेतुत्वमर्थः अत एव प्रभवत्यस्मादिति प्रभव इति काशिका । हेतुत्वं च दैशिकं बोध्यं प्रथमावयवाधीनस्य दर्शितप्रकाशस्य प्रयोजकता प्रथमावयवसत्ताप्रयोजकस्य हिमवत इति अत एव क्षेत्राच्छालिः वृक्षात्पुष्पं वा प्रभवतीति न प्रयोगः शालिपुष्पयोर्मूलवृक्षयोः प्रथमावयवयोः क्षेत्रवृक्षाभ्यामन्यत्रापि परंपरानयने सति संयोगसम्भवात्

क्षेत्रदृष्टयोः मूलदृन्तसत्ताप्रयोजकत्वविरहात् प्रयोजकत्वं तु प्रकृते नियामकत्वं व्यापकत्वमिति यावत् । एवं "वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्ये"त्यत्रापि शक्रधनुःखण्डस्य प्रथमावयवसत्तानियामकं वल्मीकाग्रं शक्रधनुःखण्डस्य दर्शितप्रकाशे हेतुः मेघाद्विद्युत्प्रभवतितरामित्यादौ विद्युदादिप्रथमावयवसत्तानियामको मेघादिदर्शितप्रकाशे हेतुरिति अत्र प्रभवतिपर्यायस्याविर्भवत्यादेर्योगे न पञ्चमी किन्तु सप्तमी यथा वल्मीकाग्रे शक्रधनुःखण्डमाविर्भवतीति केचित् । वस्तुतस्तु सूत्रे भुव इत्युपादानाद्दर्शितप्रकाशार्थकस्य भूधातोर्योगे पञ्चमीति ज्ञायते । अन्यथा प्रभुवो भव इत्येव मुनिः सूत्रयेत् प्रभव इत्यत्र प्रशब्दोपादानं भुवो दर्शितप्रकाशार्थकत्वज्ञापनार्थमिति वल्मीकादाविर्भवति प्रादुर्भवति वा शक्रधनुरित्यादिप्रयोगोऽपीष्ट एवेति । अत्र भीत्रार्थानामित्यादिसप्तसूत्रे प्रत्याख्याता फणिभाष्यकृद्भिस्तत्र चौरेभ्यो बिभेति भयान्निवर्तते त्रायते रक्षणेन निवर्तयति। पराजयते ग्लान्या निवर्तते । वारयति प्रवृत्तिं प्रतिबध्नन् निवर्तयति । निलीयते निलयनेन निवर्तते । अधीते उपाध्यायान्निःसरन्तं शब्दं गृह्णाति । ब्रह्मणः प्रपञ्चो जायते ततो निर्गच्छति । प्रभवति भूत्वानिःसरति इति धातूनां स्वेच्छयाऽर्थकल्पनेन शाब्दिकानां प्रत्याख्यानोपपादनं शास्त्रमर्यादालङ्घनफलकं स्वातन्त्र्यमेव । करणे पञ्चमीं ज्ञापयति । करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य इति सूत्रं स्तोकाल्पकृच्छ्रकतिपयइत्येतेभ्यः शब्देभ्योऽसत्त्ववचनेभ्यःकर-

णोऽर्थे पञ्चमी विभक्तिर्भवतीत्यर्थकं कृच्छ्रशब्दस्य दुःखमर्थः कतिपयशब्दस्य संख्यात्वावान्तरजातिमती संख्यार्थः । असत्त्ववचनत्त्वं द्रव्यवाचिपदासामानाधिकरण्यं बोध्यं चकारात्तृतीयाऽपि भवति स्तोकेन स्तोकाद्वा अल्पेन अल्पाद्वा कृच्छ्रेण कृच्छ्राद्वा कतिपयेन कतिपयाद्वा मुक्तो मुच्यते वा इत्यादौ तृतीयापञ्चम्योः करणव्यापारोऽर्थः । स च प्रयोज्यतया धात्वर्थेऽन्वेति व्यापारे प्रकृत्यर्थस्य प्रयोज्यतयाऽन्वयस्तथा च स्तोकप्रयोज्यव्यापारजन्यमोचनकर्मेत्यादिरन्वयबोधः बहुतरदाने द्वेषादल्पसंख्याया द्वेषानुत्पादद्वारा स्वाश्रयत्राने प्रयोजकत्वमिति दानं व्यापारः कृच्छ्रस्य स्वविषयको द्वेषो व्यापारो बोध्यः । द्रव्यपदसामानाधिकरण्येन पञ्चमी यथा स्तोकेन विषेण हत इति । ल्यप्लोपे कर्मण्युपसंख्यानमिति वार्त्तिकं ल्यबन्तधातुलोपे सति कर्मवाचकपदात्पञ्चमीं विधत्ते यथा प्रासादात्प्रेक्षते इति अत्र लोपः ल्यबन्तस्यारुह्येत्यादेः स्मारकः पञ्चम्या कर्मत्वमर्थः । अथ वा पञ्चम्याः कर्मताविशिष्टारोहणस्य सामानाधिकरण्यावच्छिन्नमुत्तरकालिकत्वमर्थः प्रेक्षणादावन्वेति तथा च प्रासादकर्मकारोहणस्य समानाधिकरणमुत्तरकालिकं यत्प्रेक्षणं तत्कर्तृत्वं वाक्यार्थः कर्मणीत्युपलक्षणं कारकान्तरवाचकपदादपि पञ्चमी ज्ञेया । यथाऽसनात्प्रेक्षत इति अत्राधिकरणवाचकात्पञ्चमी उपविश्येति ल्यबन्तस्य लोपः स्मारकः पञ्चम्या अधिकरणत्वमर्थः अथ वाऽऽधेयतताविशिष्टोपवेशनस्य तथाविधमुत्तरकालिकत्वं पञ्चम्यर्थः एवं यत्कारकार्थकवि-

भक्तिसमभिव्याहृतस्य ल्यबन्तस्य लोपस्तत्कारकार्थिका तत्र पञ्चमी घनान्निःसृत्य विद्योतते इत्यत्रापादानार्थकपञ्चमीसमभिव्याहृतस्य ल्यबन्तस्य लोपे अपादानार्थिकैव पञ्चमी यथा बलाहकाद्विद्योतते विद्युदित्यत्र पञ्चम्या अपादानत्वमर्थः लोपो निःसृत्येति ल्यबन्तस्य स्मारकोऽथ वा घनापादानकनिःसरणस्य तथाविधमुत्तरकालिकत्वं पञ्चम्यर्थः विद्योतनेऽन्वेति पूर्ववदन्वयबोध इति नात्रापि यादृच्छिकः निःसृत्येत्यध्याहारः किं त्वानुशासनिक इति । यदि चासनात्प्रेक्षत इत्यत्राप्यध्यास्याधिष्ठाय वेत्यादेर्ल्यबन्तस्य लोपे कर्मण्येव पञ्चमी न तु कारकान्तर इति कर्मणीति नोपलक्षणमिति विभाव्यते तदा बलाहकाद्विद्योतते तडिदित्यत्रापि विभिद्य विदीर्य वेत्यादेर्ल्यबन्तस्य लोपे कर्मण्येव पञ्चमी न तु निःसृत्येत्यध्याहार इति ।

इति विभक्त्यर्थनिर्णये कारकपञ्चम्यर्थनिर्णयः ।

नामार्थान्वयिनः पञ्चम्यर्था अकारकतया संक्षायन्ते । तत्र यतश्चाध्वकालनिर्माणं ततः पञ्चमी तदुक्तादध्वनः प्रथमासप्तम्यौ कालात्सप्तमी वक्तव्येति वार्तिकं यतो यदवधिकं अध्वकालयोर्निर्माणं निर्गतं मानं परिमाणं तद्वाचकात्पञ्चमी भवति तथाविधपञ्चमीयुक्तादध्वावयववाचकपदात्प्रथमासप्तम्यौ तथाकालावयववाचकात्सप्तमीमात्रं भवतीत्यर्थकं कालस्य परिमाणं स्वावयवकालसंख्या बोध्या पञ्चम्यर्थान्वयं नामार्थयोरध्वकालविशेषयोर्ज्ञापयति यथा ग्रामाद्योजने योजनं वा वनमित्यादौ अत्र पञ्चम्या अवधित्व-

मर्थः तच्च योजनशब्दार्थस्य योजनपरिमाणविशिष्टस्यैकदेशे योजनपरिमाणे व्युत्पत्तिवैचित्र्यादन्वेति अवधिमत्त्वं तु घटितत्वं बोध्यं ग्रामावधिघटितत्वं तु ग्रामाधिकरणदेशपरिमाणघटितत्वं योजनपरिमाणे तद्घटितत्वं तदारभ्यत्वमथ वा तज्ज्ञानसापेक्षज्ञानविषयत्वं संयुक्तदेशसंयोगः समानाश्रयावच्छिन्नः सप्तम्याः प्रथमायाश्चार्थः । एवं ग्रामावधिकयोजनपरिमाणावच्छेदेशसंयुक्तदेशसंयोगवहनमित्यन्वयबोधः समानाश्रयावावच्छिन्नत्वनिवेशादग्रपृष्ठादिभिन्नभिन्नावच्छेदेन योजनवनयोः संयोगे तथा न प्रयोगः । एवं कार्तिक्या मासि आग्रहायणी इत्यत्र पञ्चम्या अवधित्वमेवार्थः । तच्च त्रिंशद्दिनवर्तिनो मासशब्दार्थस्यैकदेशे त्रिंशद्दिनेऽन्वेति । सप्तम्यास्तु त्रिंशद्दिननाशोत्पत्तिकालिकोत्पत्तिकत्वमर्थः तथा च कार्तिक्यवधिकं त्रिंशद्दिनवर्तमानीयत्रिंशद्दिननाशोत्पत्तिकालोत्पत्तिमती आग्रहायणीत्यन्वयबोधः । एवं कुरुक्षेत्राच्चत्वारि योजनानि चतुर्षु योजनेषु वा पृथूदकमित्यत्र चतुर्योजनपरिमाणविशेषविशिष्टः चतुर्योजनशब्दयोः प्रथमान्तयोः सप्तम्यन्तयोश्चार्थः तादृशपरिमाणविशेषे पञ्चम्यर्थावधित्वस्यान्वयः । एवं कार्तिक्यास्त्रिमासे त्रिषु मासेषु वा माघीत्यत्र मासत्रयवर्ती त्रिमासशब्दार्थः तत्र पञ्चम्यर्थावधित्वस्यान्वयः पूर्ववदितरान्वय इति । गुरुचरणास्तु योजनादिशब्दा सुख्यया वृत्त्या परत्वविशेषमभिदधति गौण्या तु तदभिव्यञ्जकसंयुक्तसंयोगघटकान् परत्वप्रतियोगिकापरत्वाधिकरणदेशान्मासादिपदमपि तावदादित्यपरिस्प-



न्दान्तरितजन्मनोर्वस्तुनोः सामयिकमपरत्वविशेषमभिदधत्तत्संसर्गगुणेन तदन्तरालकालावयवानभिधत्ते स्वीक्रियते च संख्याया इव परत्वादेरपि समवायाख्येन येन केनापि संसर्गेण गुणकर्मणोरपि व्यवहारादैशिष्ट्यं तथा च ग्रामाद्योजनं योजने वा वनमित्यादौ पञ्चम्या अवधिमत्त्वं प्रथमायाः सप्तम्या वा अधिकरणत्वमर्थ इति ग्रामावधिकयोजनात्मकपरत्वाधिकरणं वनमित्यन्वयबोधः कार्तिक्या आग्रहायणी मासे इत्यादौ तु कार्तिक्यादिपदं तदुत्पन्नस्थिरद्रव्ये लाक्षणिकं तथा च कार्तिक्युत्पन्नस्थिरद्रव्यावधिकमासस्वरूपपरत्वाधिकरणाग्रहायण्युत्पन्नस्थिरद्रव्यमित्यन्वयबोध इति प्राहुः । अन्यादिशब्दयोगे नानाविधार्थिकां पञ्चमीं ज्ञापयति । अन्यारादितरर्ते-दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते इति सूत्रम् । अन्यः आरात् इतरः ऋतेतिस्वरूपतः शब्दाः दिक्शब्दा दिग्भेदार्थकशब्दाः पूर्वादयः न तु दिक्सामान्यार्थका दिगादयः अञ्चूत्तरपदाः शब्दाः दिग्भेदार्थकाः प्रागादयः न तु सध्र्यङ्देवद्यङादयः । आच्प्रत्यय आहिप्रत्ययश्च एतैः शब्दैर्योगे पञ्चमी भवतीत्यर्थकम् । अन्येतरयोरुभयोरुपादानं पर्यायग्रहणार्थं तेन परभिन्नादिशब्दयोगेऽपि पञ्चमी साधुः । अन्यशब्दस्य भेदविशिष्टोऽर्थः भेदविशिष्टार्थकप्रातिपदिकशब्दः पर्यायः तादृशः शब्दो रूढ इतरपरादिः कृत्तद्धितान्तादिभिर्भिन्नभेदवदादिः शक्रादन्यो नहुष इत्यत्र पञ्चम्याः स्वप्रकृत्यर्थतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नप्रतियोगित्वमर्थस्तच्च व्युत्प-

त्तिवैचित्र्येणान्यपदार्थैकदेशे भेदे स्वनिरूपितानुयोगित्वेन संबन्धेनान्वेति प्रकृत्यर्थस्याधेयतया तथाविधप्रतियोगित्वेऽन्वयः तथा च शक्रवृत्तिशक्रत्वावच्छिन्नप्रतियोगिताकभेदवदभिन्नो नहुष इत्यन्वबोधः । न च प्रतियोगित्वमात्रं पञ्चम्यर्थोऽस्तु किमवच्छिन्नान्तनिवेशेनेति वाच्यं तथासति घटादन्यो घट इति प्रयोगप्रसङ्गात् । घटनिष्ठप्रतियोगिताकस्य नीलघटभेदस्य पीतघटे सत्त्वात् । ननु प्रकृत्यर्थस्य प्रकृत्यर्थतावच्छेदकावच्छिन्नत्वेनाधेयत्वेन चोभाभ्यां संबन्धाभ्यां पञ्चम्यर्थे प्रतियोगित्वेऽन्वयोपगमान्नोक्तदोष इति चेत्सत्यं तथासति पञ्चमी साधुत्वार्थिकैव प्रकृत्यर्थस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन संबन्धेनान्यत्वेऽन्वय इत्येव ज्यायः अत एवान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वमिह व्युत्पत्तिबललभ्यं न हि भवति नीलो घटो घटादन्य इत्यनुमानदीधितावुक्तम् । समानविभक्तिकनामार्थयोरेव भेदान्वयो न व्युत्पत्तिसिद्धः अत एव विभक्तेर्निरर्थकतावादिनां मते राज्ञः पुरुष इत्यादौ स्वस्वामिभावसंबन्धेन राजपदार्थस्य पुरुषपदार्थेऽन्वय इति यदि च विरुद्धविभक्तिकनामार्थयोरपि न भेदान्वयोऽभ्युपेयते । तदा प्रतियोगित्वमात्रं पञ्चम्यर्थस्तस्य प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगित्वीयनिरूपितानुयोगितयाभेदेऽन्वयोऽथ वा दर्शितोभयसंबन्धेन प्रकृत्यर्थस्य प्रतियोगित्वे तस्य स्वनिरूपितानुयोगितया भेदेऽन्वयः अन्वयबोधस्तु पूर्ववदेव एवं शक्रादितरः परो भिन्नो भेदवान्वेत्यादावन्वयो बोध्यः । इयांस्तु विशेषः । भिन्न इत्यत्र भेदा-

अयः भेदवानित्यत्र भेदसंबन्धी प्रतीयते । नञ्पदं न भेदविशिष्टार्थकमिति तद्योगे न पञ्चमी किं च प्रथमोपात्ता प्रथमैव न चैवं गुणाद्द्रव्यो द्रव्यस्येत्यादौ भेदशब्दस्य विशिष्टार्थवत्त्वाभावात् भेदमात्रार्थकतया पञ्चम्यनुपपत्तिरिति वाच्यं गुणाद्वैधर्म्यमित्यत्रैव गुणाद्भेद इत्यादावपि विभक्तपञ्चमीसम्भवादित्यस्य वक्ष्यमाणत्वात् । भवतु वाऽन्यशब्दस्य भेदार्थकः शब्दः पर्यायस्तथापि सूत्रे निपातातिरिक्तपर्यायस्य ग्रहणात् नञ्पदयोगे न पञ्चमीति । यत्तु अन्यपदस्य पृथक्त्वगुणविशिष्टोऽर्थः पृथक्त्वार्थकशब्द एव पर्यायः भिदिधातोरपि पृथक्त्वमेवार्थः नञ्पदं तु न पृथक्त्वार्थकमिति तद्योगे पञ्चमी न भवतीति अत एव पृथक्त्वगुणसिद्धिरिति तदुच्छम् । अन्यादिशब्दस्य पृथक्त्वार्थकत्वासम्भवात् । द्रव्यादन्यो गुण इत्यादिप्रयोगानुपपत्तेः । भिदेरपि पृथक्त्वमर्थः । द्रव्यात्कर्मादिभ्यश्च भिद्यते गुण इत्यादिप्रयोगात् गुणे गुणानङ्गीकारात् पृथक्त्वान्वयासम्भवात् भेदस्यान्वयसम्भवात् भेदार्थकत्वावश्यकत्वात् भेदत्वस्याखण्डोपाधितया शक्यतावच्छेदकगौरवविरहात् प्रकृते लक्षणानुपपत्तेः पृथक्त्वसिद्धिस्तु मल्लान्मल्लोऽपयाति मेषान्मेषोपसरतीत्यादौ पृथक्त्वस्यापि पञ्चम्यर्थतया तत्र प्रकृत्यर्थस्यावधितयाऽन्वयस्तथाविधस्य पृथक्त्वस्य क्रियायां सामानाधिकरण्येनान्वयः । न चात्र भेदः पञ्चम्यर्थस्य प्रतियोगितावच्छेदकतया क्रियायामन्वय इति वाच्यम् । परस्परस्मान्मल्लौ मेषौ वा अपसरत इत्यादावपादानकर्तृभयोः क्रियावत्त्वाद्भेदान्वयासम्भवा-

त् । न च तत्तत्क्रिया भेदप्रतियोगितावच्छेदिकेति वाच्यं तत्तत्क्रियादेर्भेदप्रतियोगितावच्छेदकत्वेऽपि धातुना तादृश्येणानुपस्थापनात् तत्रान्वयासम्भवात् भेदप्रतियोगितावच्छेदकमपसरणमिति सामान्यतो बोधस्य स्वस्मादपसरत इत्यादावपि सम्भावितत्वादित्यादियुक्तेर्गुणगन्यादौ युक्त्यन्तरस्य पृथक्त्वसाधकस्यानुसन्धानेन पृथक्त्वं साधनीयमिति । प्रकृते तु पृथक्त्वानुपपत्तिः सूत्रे शब्दस्य पृथङ्नार्थकत्वकल्पने युज्यते नैव यतो हि सिद्धमर्थं शब्दोऽभिधते नहि शब्देनार्थसिद्धिरन्यथा खपुष्पादिशब्दादतिरिक्तवस्तुसिद्ध्यापत्तेरिति नञोऽभावत्व प्रवृत्तिनिमित्तं न तु भेदत्वमनुयोगिवाचकपदे प्रथमान्ते सति प्रथमान्तार्थस्य तादात्म्यावच्छिन्नप्रतियोगितया नञर्थेऽभावे अन्वयोपगमाद्घटो न पट इत्यादौ घटादिषु घटादिभेदस्यार्थतः प्रतीतिसम्भवादिति । नञ्योगे पञ्चम्यप्रसक्तेः घटो न घटादित्यादिको न प्रयोग इत्यपि वदन्ति । घटः पटात्पृथगित्यादौ तु पञ्चमी सूत्रान्तरेणेति वक्ष्यते ऋतेयोगे यथा कृष्णादृते व्रजो विरस इत्यादौ अत्र पञ्चम्याः प्रतियोगित्वमर्थः तत्र प्रकृत्यर्थस्य पूर्ववदन्वयः ऋतेशब्दार्थोऽत्यन्ताभावस्तत्र प्रतियोगित्वस्य पूर्ववदन्वयः विरसस्तु प्रीत्यजनकस्तथा च कृष्णवृत्तिकृष्णत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववान् व्रजः प्रीत्यजनकाभिन्न इत्यन्वयबोधः । ऋतेशब्दार्थो भेदोऽपि यथा कृष्णादृते जनो गोवर्धनासह इत्यादौ क्व चिदत्यन्ताभाववान् भेदवांश्च ऋतेशब्दार्थः यथा रामादृते न लक्ष्मण इत्यत्रात्यन्ताभाववान् रामादृते भक्तिः प्रीतिर्वा न लक्ष्मणस्ये-

त्यत्र भेदवान् प्रतीयते । आराद्योगे यथा ग्रामादारा-
त्तटाकः तटकादाराद्वनमित्यादौ आराच्छब्दो दूरसमी-
पयोर्वर्त्तते सामीप्यञ्च सामान्यतः संयुक्तसंयोगित्वं वि-
शेषतः खल्वेतरसंयोगघटितपरम्परासंबन्धवत्त्वमितरा-
पेक्षं तदन्यत्सामान्यतः समीपान्यत्वं दूरत्वं बहुतरसं-
योगघटितपरम्परावत्त्वं परम्पराघटकप्रथमसंयोगान्व-
यिप्रतियोगित्वं तु पञ्चम्यर्थः सामीप्यदूरत्वघटकचरम-
संयोगयोस्तटाकवनादावन्वयः तथा च ग्रामप्रतियोगि-
ताकसंयोगवद्देशसंयोगवांस्तटाकः तटाकप्रतियोगिताक-
संयोगवद्देशसंयुक्तबहुतरदेशसंयोगपरम्पराघटकसंयोग-
वद्वनमित्यन्वयबोधः । वनादारादित्यत्र वनावधिकं प-
रत्वमपरत्वं चार्थ इति गुरुचरणाः । दिक्शब्दयोगे
यथा ग्रामात्पूर्वो दक्षिणः पश्चिम उत्तरो वा राम इ-
त्यादावुदयाचलसंनिहितः पूर्वपदार्थः वडवानल-
संनिहितो दक्षिणपदार्थः अस्ताचलसंनिहितः पश्चि-
मपदार्थः कैलाससंनिहित उत्तरपदार्थः पदार्थैकदेशत-
त्तत्सांनिध्यान्वय्यवधित्वं पञ्चम्यर्थस्तच्च तत्तत्सांनिध्यस्व-
रूपपरम्पराघटकसंयोगान्वयिपरम्परान्तरघटकसंयोग-
संख्यान्यूनसंख्यावत्त्वं तच्च प्रकृत्यर्थस्य स्वसंयोगघटितत्व-
संबन्धेन परम्परान्तरे ऽन्वयः तथा च ग्रामसंयोगघटितो-
दयाचलपरम्पराघटकसंयोगन्यूनसंख्याकसंयोगघटितो-
दयाचलपरम्पराघटकसंयोगवान् राम इत्यन्वयबोधः ।
एवं वडवानलादिसान्निध्यमादायान्वयबोध ऊहनीयः ।
वस्तुतस्तु तत्सानिध्यं तु तत्संयोगघटितपरम्परान्तरघ-
टकतत्संयोगघटितपरम्पराघटकसंयोगवत्त्वं भवति हि

रामविश्रान्तोदयाचलसंयोगघटितपम्परायां घटिकोदय-
संयोगघटितारामविश्रान्ता परम्परेति ग्रामापेक्षयोदय-
स्यान्तिक आराम इति । एवं परम्परान्वयिसंयोगघटि-
तत्वं पञ्चम्यर्थः प्रकृत्यर्थस्य संयोग आधेयतयाऽन्वयः ए-
वमन्वयबोध ऊहनीयः घटकत्वं तु तद्विषयताव्यापक-
विषयतावत्त्व घटितत्वं तु तद्विषयताव्याप्यविषयतावत्त्वं
बोध्यमिति । परे तु उदयाचलाद्यवधिकापरत्वविशिष्टः
पूर्वादिपदार्थः पञ्चम्याः परत्वमर्थः तत्र प्रकृत्यर्थस्याधे-
यतया परत्वेऽन्वयस्तथा च ग्रामवृत्तिपरत्वनिरूपकमुद-
याचलावधिकं यदपरत्वं तदाश्रयस्तटाकः इत्यन्वयबोधो
ग्रामत्पूर्वस्तटाक इत्यादौ जायते एवमेव प्रागादिशब्द-
योगेऽप्यन्वयबोध इति वदन्ति । पूर्वादिशब्दस्य दिग-
न्यार्थे वर्त्तमानतायां पञ्चमी यथा माधवात्पूर्वो मधुः
कृष्णात्पूर्वो हलायुध इत्यादौ अत्र कालिकसंबन्धेन
प्रागभाववान् पूर्वपदार्थः प्रागभावान्वयिप्रतियोगित्वं
पञ्चम्यर्थस्तत्र प्रकृत्यर्थस्याधेयतयाऽन्वयस्तथा च माधव-
वृत्तिप्रतियोगिताकप्रागभाववान्मधुरित्यादिरन्वयबोधः
प्रागभावकालोत्पत्तिमत्त्वं न पूर्वपदार्थतावच्छेदकं प्रा-
गभावापेक्षया गुरुत्वादिति । अन्ये तु कालिकपरत्ववा-
न् पूर्वपदार्थः परत्वान्वय्यपरत्वनिरूपकत्वं पञ्चम्यर्थस्त-
च प्रकृत्यर्थस्याधेयतयाऽपरत्वेऽन्वयस्तथा च कृष्णवृत्ति-
परत्वनिरूपकापरत्ववान् हलायुध इत्यन्वयबोध इत्या-
हुः । यदि च शब्दात्पूर्वं गगनं जन्यज्ञानात्पूर्वो जीवः का-
र्यमात्रात्पूर्वो भगवानित्यादिः प्रयोगस्तदा प्रागभावाधिक-
रणकालवर्तित्वं पूर्वत्वमथ वाऽधिकरणसमयध्वंसानधि-

करणत्वविशिष्टस्याधिकरणभेदस्य विशिष्टे समये वर्तमानत्वं तथा च द्वितीयादिक्षणमात्रवर्तिन्यतिप्रसङ्गवारणाय विशिष्टस्येत्यन्तं भेदस्य विशेषणं आद्यक्षणवृत्तिनि स्वस्मिन्पूर्वत्ववारणायाधिकरणभेदस्य वैशिष्ट्यं समयविशेषणं कालिकसंबन्धेन वस्तुमात्रानधिकरणे जीवादौ वर्तमानस्य ज्ञानसुखादेर्घटादिपूर्वत्ववारणाय समय इति पदे तेन कालिकसंबन्धावच्छिन्नाधेयत्वं तथाविधानधिकरणनिरूपितं पूर्वत्वं तच्च जीवादौ कालिकेन वर्तमाने ज्ञानसुखादौ नातिप्रसक्तमिति अधिकरणत्वं ध्वंसाधिकरणत्वं च कालिकेनैव बोध्यं तेन कपालादिस्वरूपाधिकरणध्वंसाधिकरणकपालिकादिभिन्ने तन्तुसमुदाये वर्तमानस्य पटस्य न घटादिपूर्वत्वमिति विशेषणान्तरप्रयोजनमप्यनया रीत्या बोध्यं तथाविधध्वंसानधिकरणत्ववैशिष्ट्यमधिकरणभेदस्य विशेषणतावटितसामानाधिकरण्येन बोध्यमतः स्वोत्तरवर्तिनि नातिप्रसङ्गः । एवं पञ्चम्या निरूपितत्वमर्थः तच्च भेदप्रतियोगिन्यधिकरणे ध्वंसप्रतियोगिन्यधिकरणसमये चान्वेति तथा च शब्दनिरूपिताधिकरणसमयध्वंसानधिकरणे शब्दनिरूपिताधिकरणभिन्ने समये वर्तमानं गगनमित्यादिरन्वयबोधः । एवमेव माधवात्पूर्वो मधुः कृष्णात्पूर्वो हलायुध इत्यादावप्यन्वयो बोध्यः । अञ्चूत्तरपदयोगे यथा नगरात्प्राक् अवाक् प्रत्यगुदग् वा क्रीडापर्वत इत्यादौ अत्राप्युदयाचलादिसंनिहितः प्रागादिशब्दार्थः पूर्वोक्ततत्तत्सान्निध्यान्वयिपूर्वोक्तमवधिमत्त्वं पञ्चम्यर्थः ग्रामात्पूर्वं आराम इत्यादाविवान्वयो बोध्यः। एवं माधवात्प्राक्

मधुः कृष्णात्प्राक् हलायुध इत्यादावन्वयबोध्यः। प्रागादिशब्दानां दिक्शब्दत्वेऽपि ग्रामस्य दक्षिणत इत्यादाविवातसर्थप्रत्ययस्य योगे प्रसक्तायाः षष्ठ्या निषेधाय-पृथक् ग्रहणं तेन नगरात्प्राचीन आराम इत्यादावतमर्थस्य खप्रत्ययस्य योगे षष्ठी न भवतीति। आच्योगे आहियोगे च यथा नगराद्दक्षिणा दक्षिणाहि वा पर्वतः नगरादुत्तरा उत्तराहि वा कासार इत्यादौ। अत्र दक्षिणोत्तरशब्दयोरर्थः पूर्वोक्त एवं पञ्चम्याः पूर्वोक्तमवधिमत्त्वमर्थः तच्च पूर्वोक्ततत्तत्सान्निध्येऽन्वेति आजाहिप्रत्यययोरधिकरणार्थकयोराधेयत्वमर्थस्तथा च नगरावधिकबडवानलसंनिहितदेशवृत्तिः पर्वत इत्यादिरन्वयबोधः। अनयोः प्रत्यययोरतसर्थतथा प्रसक्तषष्ठीनिषेधार्थमेवोपादानमिति। अवयववाचिपूर्वादिशब्दयोगे षष्ठ्येव प्रमाणं तस्य परमासंडितमितिनिर्देशात्तेन पूर्वं कायस्य शरीरस्य दक्षिणाहि तिलः इत्यादौ कायशरीरादिपदान्न पञ्चमी पूर्वपदस्य पूर्वकायस्वरूपवाचकत्वात्। दक्षिणपदस्य दक्षिणभागस्वरूपशरीरावयववाचकत्वादिति। अपादाने पञ्चमीतिसूत्रविवेचने कार्तिक्याः प्रभृतीतिभाष्यप्रयोगात् प्रभृतिशब्दयोगे पञ्चमी तदेतद्भाष्यं विद्वद्वता कैय्यटेन तत आरभ्येत्यर्थ इत्युक्तं तेनारभ्येति ल्यबन्तयोगेऽपि पञ्चमी साधुरिति ज्ञायते। कार्तिक्याः प्रभृति आरभ्य वा सेव्यते गङ्गेत्यादौ प्रभृतिशब्दस्याधिकरणकालध्वंसाधिकरणसमयोऽर्थः आरभ्येतिशब्दस्याप्ययमेवार्थः पञ्चम्यास्तु अधिकरणान्वयिनिरूपकत्वमर्थः प्रभृत्यर्थः सेवने व्यापकतया आधे-

यतया वाऽन्वेति तथा च कार्तिक्यधिकरणसमयध्वंसाधिकरणं यः समयस्तद्व्यापकस्य तद्वृत्तेर्वा सेवनस्य कर्म गङ्गेत्यन्वयबोधः एवमेव भवात्प्रभृति भवादारभ्य वा सेव्यो हरिरित्यादावन्वयो बोध्यः ।

ततः प्रभृति संक्रान्तावुपरागादिपर्वसु ।
त्रिपिण्डमाहरेच्छ्राद्धमेकोद्दिष्टं मृताहनि ॥

इत्यादौ यदि प्रभृत्यर्थस्य निपातार्थतया संक्रान्त्यादिकालभेदान्वयो न युज्यते तदा संक्रान्त्यादिवृत्तिश्राद्धप्रभृत्यर्थस्याधेयतयैवान्वय इति । अपपरिबहिरञ्चवः पञ्चम्या इति सूत्रेण समासविधानात् ज्ञापकात् बहिःशब्दयोगेऽपि पञ्चमी साधुरिति ज्ञायते । नगराद्बहिराराम इत्यादावयवसंयुक्तोऽन्यावयवसंयुक्तो बहिःपदार्थः पञ्चम्या अवयवान्वयि समवायित्वमन्यत्वान्वयि प्रतियोगित्वं चार्थः बहिःपदार्थस्याधेयतया आरामादावन्वयः । तथा च नगरसमवाय्यवयवसंयुक्तो यो नगरप्रतियोगिताकभेदवत्संबन्ध्यवयवसंयुक्तस्तद्वृत्तिराराम इत्यन्वयबोधः काश्या बहिर्मिथिलेतिप्रयोगवारणायावयवसंयुक्तत्वमन्यावयवसंयुक्ते विशेषणम् । अत एवानधिकरणं बहिःपदार्थ इत्यपि प्रत्युक्तं घटस्य घटानधिकरणतया "घटे जलं घटाद्बहिरि"तिप्रयोगप्रसङ्गाच्च ज्ञापकसिद्धं न सर्वत्रेति करस्य करभो बहिरित्यादौ षष्ठी अत्र षष्ठावयवसंयुक्तोऽवयवो बहिरर्थः तत्र षष्ठ्यर्थसंबन्धस्यान्वय इति पञ्चमीविधायकयोगार्थं केषु चिच्छब्देषु कर्मप्रवचनीयसंज्ञां विधत्ते । अपपरी वर्जने इति सूत्रम् । अपपरिशब्दौ वर्जनेऽर्थे कर्मप्रवचनीयसंज्ञौ भवत इत्य-

र्थकं वर्जनाद्यर्थविरहे न कर्मप्रवचनीयता यथा । ओदनं परिषिञ्चतीत्यादौ । आङ् मर्यादावचने इति सूत्रम् । आङ् इत्येष शब्दो मर्यादावचने स्वार्थं मर्यादाप्रतिपादने सति कर्मप्रवचनीयसंज्ञो भवतीत्यर्थकं मर्यादायामेतावन्मात्रोक्त्यैव समाहितसिद्धौ वचनग्रहणान्मर्यभिविधावपि कर्मप्रवचनीयतां ज्ञापयति तथा हि काशिका वचनग्रहणादभिविधिरपि गृह्यत इति । मर्यादावचन इति ईषदर्थे क्रियायोगे उक्तसंज्ञानिषेधार्थमिति । कर्मप्रवचनीययोगे पञ्चमीं ज्ञापयति । पञ्चम्यपाङ्परिभिरिति सूत्रम् । अपाङ्परिइत्येतैः कर्मप्रवचनीयैर्योगे पञ्चमी भवतीत्यर्थकम् अपचिगर्तेभ्यः परिचिगर्तेभ्यो वा दृष्टो देव इत्यादावपपरिशब्दयोर्वर्जनमत्यन्ताभावोऽर्थः पञ्चम्या आधेयत्वमर्थोऽत्यन्ताभावेऽन्वेति स प्रतियोगितया अपरपदार्थे वृष्ट्यादावन्वेति तथा च चिगर्तदृत्त्यत्यन्ताभावप्रतियोगिदृष्टिकर्ता देव इत्यन्वयबोधः एवमेवापहरेः परिहरेर्वा संसार इत्यादावप्यन्वयो बोध्य इति संप्रदायः । अत्र समानकालिकत्वसंबन्धेनाप्यत्यन्ताभावस्य समभिव्याहृतार्थे दृष्ट्यादावन्वयस्तेन कालान्तरावच्छेदेन चिगर्तदृत्तेरत्यन्ताभावस्य प्रतियोगिन्यपि चिगर्तवर्षणे तथा न प्रयोगः । वस्तुतस्तु समभिव्याहृतार्थस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन संबन्धेनात्यन्ताभावेऽन्वयः तथाविधात्यन्ताभावस्य समानकालिकतया समाभिव्याहृतार्थेऽन्वयस्तथा च चिगर्तदृत्तेर्दृष्ट्यत्यन्ताभावस्य समानकालिकी या दृष्टिस्तत्कर्ता देव इत्यन्वयबोधस्तेन चिगर्तदृत्तेर्वृष्टिगगनाद्युभयाभावस्य प्रति-

योगिनि समानकालिकेऽपि विगर्तवर्षणे तथा न प्रयोगः । आङो मर्यादार्थः सा च व्यवधानसंसर्गयोरभावौ तत्रा-व्यवधानं क्व चित्कालिकं क्व चिद्देशिकं क्व चित्पाठिकं क्व चिदन्यथापि संसर्गस्य तादात्म्यसंयोगसादिश्यसमा-नकालिकत्वादेरभावोऽपि यथायथं तात्पर्यवशादुपति-ष्ठते आमुक्तेः संसार इत्यत्र संसारे मुक्तिनिरूपितं का-लिकमव्यवधानं मुक्तिसमानकालिकत्वाभावश्च आस-मुद्रान्मृद इत्यत्र मृदां समुद्रनिरूपितं दैशिकमव्यवधानं तादात्म्यस्य सादेश्यस्य वा अभावश्च आकडारादेका संज्ञा इत्यत्र एकसंज्ञाकशब्दविधीनां कडारसूत्रनिरूपि-तं पाठिकमव्यवधानं तत्पठितत्वाभावश्चावगम्यत इति । अभिविधौ वर्तमानस्याङो व्यापकत्वमितरसंबन्धस्यार्थ-स्य च व्यापकताघटक इतरनिरूपितश्चैक एव संसर्गः प्रतीयते आपरमाणोः पृथिवीत्वसामानाधिकरण्येन ता-दात्म्यसंसर्गावच्छिन्ना पच्यमानपरमाणुव्यापकता तदि-तरतादात्म्यं च भासते आसमुद्राद्यश इत्यादौ यशसि समुद्राभिव्यापकत्वं समुद्रेतरसंबन्धो भासत इतीयं री-तिरन्यत्रापि ज्ञेयेति पदवाक्यरत्नाकरे गुरुचरणाः । के चित्तु यावच्छब्दतुल्यार्थकस्याङो मर्यादा अभिविधि-स्वार्थः मर्यादा तु सीमा कालरूपा देशरूपा च कालरू-पा यथा तस्यामारभ्य तां देवीमादृशस्याः प्रपूजयेदि-त्यादौ कालनिष्ठं सीमत्वं तु समभिव्याहृतकालप्राग-भावानधिकरणस्वप्रागभावाधिकरणस्वसजातीययावत्का-लवृत्तिसमभिव्याहृतक्रियाऽनधिकरणत्वं दर्शितस्थले पू-जारूपक्रियायाः शुक्लदशमीनिष्ठसीमत्वनिरूपकत्वमा-

ङ्शब्देन प्रत्याय्यते तावतैवार्थतः शुक्लदशम्या मर्य्यादात्वं लभ्यते तन्निष्ठसीमत्वनिरूपकत्वं च तद्वृत्तित्वे सति कृष्णनवमीप्रागभावानधिकरणतत्प्रागभावाधिकरणतिथिकूटव्यापकत्वं तावता षोडशतिथ्यधिकरणकषोडशपूजारूपस्यैककर्मणो विधेयतया लाभः व्याप्यकालसमुदाये सजातीयत्वविशेषणात्पूजाया उक्तविशेषणद्वयाक्रान्तदण्डादिसमुदायाव्यापकत्वेऽपि न बाधः अन्वयितावच्छेदकघटकरूपेण साजात्यस्य विवक्षणादुक्तस्थले च तिथेरित्यध्याहारेण दशमीपदार्थतावच्छेदकस्य तिथित्वघटितत्वेन वाऽऽङ्शब्दार्थान्वयितावच्छेदकतया तिथित्वलाभात् तेन रूपेण दण्डादेर्दशमीसजातीयत्वाभावात् तिथिः सखण्डकालविशेषरूपः । ननु चन्द्रमण्डलकलाऽवस्थाऽप्यणुक्रियाप्रचयरूपा पूजायास्तावत्क्रियावृत्तित्वासम्भवात् तत्र च प्रागभाव एवाऽऽर्थः प्रतियोगित्वमनुयोगित्वं वा तत्र प्रकृत्यर्थस्य दशम्या अन्वयः तावता च दशमीप्रतियोगिकप्रागभावलाभस्तस्य स्वप्रतियोग्यवृत्तित्वविशिष्टव्यापकतासंबन्धेन पूजारूपसमभिव्याहृतक्रियायामन्वयः व्यापकत्वं च स्वाधिकरणतिथिनिष्ठाभावप्रतियोगिताऽनवच्छेदकपूजाविशेषत्ववत्त्वं स्वाधिकरणकृष्णनवमीप्रतियोगिकप्रागभावावच्छिन्नाभेदविशिष्टकालिकविशेषणतासंबन्धेन बोध्यं तेन कृष्णनवमीप्रतियोगिकप्रागभाववत्प्रतियोगिकभेदस्याप्रसिद्धावपि न क्षतिः तद्दशमीप्रागभावाधिकरणकालस्य स्वाधिकरणकृष्णनवमीप्रागभावावच्छिन्नभेदवत्त्वसंबन्धेन तत्प्रागभावाधिकरणत्वाच्चते: । न चैवं व्यवहितकृष्णनव-

मीप्रतियोगिकप्रागभावावच्छिन्नभेदघटितसंबन्धेन प्रकृतकृष्णनवमीपूर्वतिथीनामपि तत्तद्दशमीप्रागभाववत्त्वात् तदधिकरणतिथिव्यापकत्वं पूजाविशेषेऽपि न सम्भवतीति वाच्यं स्वावच्छिन्नकृष्णनवमीप्रागभावाधिकरणत्वसंबन्धेन स्वावच्छिन्नभेदस्य संबन्धघटकत्वोपगमात्तेन संबन्धेन प्रकृतनवमीपूर्वतिथीनां तत्तद्दशमीप्रागभावानधिकरणत्वात्पूजाविशेषस्य व्यापकत्वाच्चतेरिति देशरूपा च यथा काश्यीत आकौशिक्या व्रजतीत्यत्र कौशिक्यागमनसौमत्वं प्रतीयते तच्च काशीपूर्वकौशिकीपश्चिमदेशव्यापकगमनानधिकरणत्वं आङ्शब्देन कौशिकानधिकरणकत्वे सति काशीपूर्वकौशिकीपश्चिमदेशव्यापकत्वं गमने प्रत्याय्यते तत्राङ्शब्दार्थः पश्चिमदेशस्तदन्वय्यवधिमत्त्वं पञ्चम्यर्थस्तत्र प्रकृत्यर्थस्य कौशिकाया अन्वयस्तावता कौशिकावधिकपश्चिमदेशलाभः तस्य स्वावधीभूतकौशिकावृत्तित्वविशिष्टव्यापकतासंबन्धेन गमनेऽन्वयः व्यापकत्वं च काशीपूर्वाभिन्नस्वनिष्ठाभावप्रतियोगितानवच्छेदकगमनविशेषत्ववत्त्वमिति । अभिविधिरपि कालरूपो देशरूपश्च कालरूपो यथा कार्त्तिकमारभ्याचैत्राच्छीतं भवति इत्यादौ देशरूपो यथा काश्मीत आपाटलिपुत्रात् दृष्टो देव इत्यादौ प्रथमे कार्तिकपूर्वकालोत्तरचैत्रोत्तरकालपूर्वकालव्यापकत्वं चैत्रोत्तरकालावृत्तित्वसहितं शीतभवने द्वितीये काशीपश्चिमदेशपूर्वपाटलिपुत्रपूर्वदेशपश्चिमदेशव्यापकत्वं पाटलिपुत्रपूर्वदेशावृत्तित्वसहितं दृष्टावाङ्शब्देन प्रत्याय्यते शेषः पूर्वदिशाऽवसेय इत्याहुः । तच्चिन्त्यं मर्यादायां

व्यापकताभाने मानाभावात् आकडारादेका संज्ञेत्यत्र व्यापकताभानस्यासम्भवाच्च तथाच्चेष संज्ञाविधिर्न कडारसूत्रपूर्वसूत्रव्यापकः। इको गुणवृद्धी न धातुलोप आर्धधातुके इत्यादिपूर्वसूत्रे तद्विरहान्नाप्यव्यवहितपूर्वसूत्रव्यापकः वाऽऽहिताग्न्यादिषु इत्यव्यवहितपूर्वसूत्रे तद्विरहात् एवं प्रभासत आगङ्गासागरात् मृद इत्यादौ प्रभासपूर्वभूतगङ्गासागरपश्चिमदेशानां सरित्कासारदेवखातानां मृदन्यत्वात् मृदां तादृशदेशाव्यापकत्वात्तद्भावायोगाच्च एतमापरमेश्वरादात्मनां कर्मबन्ध इत्यादौ पूर्वोत्तरादिदेशकालान्यतरस्वरूपसौक्ष्म्योऽप्ययोगादिति। एवमभिविधावपि व्यापकत्वस्य सौक्ष्म्यानुपपत्तिरूहनीया तस्मान्मर्यादायामाङः संबन्धाभावः संबन्धिसंबन्धश्चार्थः आकडारादेका संज्ञा इत्यत्र कडारसूत्रसंबन्धस्याभावः संबन्धस्तु प्रतिपाद्यत्वं कडारसंबन्धिनस्तत्पूर्वस्य सूत्रस्य संबन्धः प्रतिपाद्यत्वमेकसंज्ञाविधौ प्रतीयते तत्र पञ्चम्या निरूपितत्वमर्थस्तथा च कडारसूत्रनिरूपितप्रतिपाद्यत्वाभाववान् कडारपूर्वसूत्रप्रतिपाद्य एकसंज्ञाविधिरित्यन्वयबोधः। अभावप्रतियोगी संबन्धिनिरूपितश्चैक एव संबन्धो बोध्यः तेन समुद्रतादात्म्याभावसमुद्रसमकालिकत्वसंबन्धयोश्च गगने सत्त्वेऽपि आसमुद्राद्गगनमिति न प्रयोगः यदि च कडारसूत्रोत्तरसूत्रेऽप्येकसंज्ञाविधिविरहोऽभिसंहितस्तदा प्रागभावानधिकरणसूत्रप्रतिपाद्यत्वाभाव एव प्रकृते मर्यादा तत्र प्रागभावानधिकरणसंबन्धाभाव आङोऽर्थः पञ्चम्याः प्रतियोगित्वमर्थः प्रागभावेऽन्वेति कडारसूत्रप्रतियोगिताक-

प्रागभावानधिकरणं कडारसूत्रं तदुत्तरसूत्रकदम्बकं च आनुपूर्वीविशेषविशिष्टवर्णकलापस्वरूपस्य वृद्धिरादैजित्यादेरअ इत्यन्तस्याष्टाध्यायीग्रन्थस्य वाहिताग्न्यादिषु इति सूत्रान्तभागः कडारसूत्रानुपूर्वीविशिष्टवर्णप्रागभावस्याधिकरणमनधिकरणं चानभिहिते इत्यादिसूत्रभाग इति तत्र तथाविधस्याधिकरणस्य स्वाभिन्नसूत्रनिरूपितप्रतिपाद्यत्वं संबन्धः तथाविधानधिकरणस्य तु स्वाभिन्नसूत्रनिरूपितप्रतिपाद्यत्वसंबन्धाभावश्चैकसंज्ञाविधौ प्रतीयते । कडारसूत्रपूर्वत्वमाङ्प्रयोगोत्तरत्वविशिष्टं बोध्यं यत्र चाङ्प्रयोगे द्वितीयोऽवधिर्न दृश्यते तत्राङ्प्रयोगाधिकरणमानुपूर्वी वा कालो वा देशो वअवधिस्तत्रानुपूर्वी प्रकृते आकडारादेका संज्ञेति सूत्रानुपूर्वी तथाविधावधिस्तथाविधानुपूर्व्युत्तरत्वविशिष्टस्य दर्शितसूत्रप्रागभावाधिकरणस्य दर्शितसंबन्धः प्रतीयते अत एव काशिकायामाकडारादितिसूत्रव्याख्याने कडाराः कर्मधारये इति वक्ष्यति आ एतस्मात्सूत्रादवधेर्यदित ऊर्ध्वमनुक्रमिष्यामस्तत्रैकसंज्ञाभवतीति वेदितव्यमित्युक्तं तथाविधकालो यथा आमरणाद्धितमभिसन्धत्ते धीर इत्यादौ अत्र हिताभिसन्धानस्य मरणकालाधेयत्वाभाव आङ्प्रयोगोत्तरमरणप्रागभावाधिकरणकालाधेयत्वं च प्रतीयते अत्रापि न व्यापकत्वस्य भानं मरणप्रागभावाधिकरणसुषुप्त्यादिकालेऽभिसन्धानविरहात् । अत्र संबन्धाधेयत्वं कालिकसंबन्धावच्छिन्नं बोध्यमतो नानुपपत्तिस्तथाविधदेशो यथा आसमुद्रात्क्षितिरित्यादौ अत्र तादात्म्याभावः संयुक्तदे-

श्रतादाख्यं चाङोऽर्थस्तत्र संयुक्तदेशे आङ्प्रयोगाधिकरणपार्थिवावधिकं पूर्वत्वं दक्षिणत्वं पश्चिमत्वमुत्तरत्वं समुदितं प्रत्येकं वा तात्पर्यवशादवगम्यते अतः समुद्रवर्तिनां न दर्शितप्रयोगस्तथा च समुद्रभिन्ना तादृशपार्थिवावधिकपूर्वेण समुद्रसंयुक्तवेलादिदेशेनाभिन्ना क्षितिरित्यन्वयबोधः । क्व चित्सजातीयोऽप्यवधिः यथा मिथ्याज्ञानमात्मन इत्यादौ अत्र समवेतत्वाभावो भोक्तृसमवेतत्वं चाङोऽर्थः भोक्ता तु साजात्यसंबन्धवानिति नानुपपत्तिः भोक्तृव्यापकतासंबन्धेन समवायेऽन्वयस्तथाविधसमवायावच्छिन्नाधेयत्वमवधिं विना मिथ्याज्ञानेऽनुपपन्नमिति स्थावरजीवन्मुक्तादिर्भोक्ताऽवधिस्तस्यावधित्वं परमात्मन इव बोध्यं तथा च स्थावरजीवन्मुक्तासमवेतत्वविशिष्टं तथाविधभोक्तृसमवेतत्वमथ वा स्थावरजीवन्मुक्तभिन्नभूता एव भोक्तृतया भासन्ते तथा च परमात्मासमवेतं स्थावरजीवन्मुक्तभिन्नभोक्तृव्यापकसमवायावच्छिन्नाधेयत्ववन्मिथ्याज्ञानमित्यन्वयबोधः । क्व चिन्न द्वितीयोऽवधिर्यथा आसृक्तेः संसार इत्यादौ अत्र मुक्तिकालावृत्तित्वं मुक्तिप्रागभावकालवृत्तित्वं च पूर्वावधिरहिते संसारे प्रतीयते क्व चिद्द्वितीयावधियोगः यथा तत आरभ्य तां देवीमादृशस्याः प्रपूजयेदित्यादौ अत्र पूर्वकालावृत्तित्वमुत्तरकालवृत्तित्वम् आरभ्यशब्दस्यार्थः तत्र पूर्वत्वघटकप्रागभावान्वयिप्रतियोगित्वमुत्तरत्वघटकाधिकरणान्वयिनिरूपकत्वं च प्रज्ञया अर्थः । आङस्तु समानकालिकत्वाभावः प्रागभावकालिकत्वं चार्थः कालान्वयिनि-

रूपकत्वं प्रागभावान्वयिप्रतियोगित्वं च पञ्चम्यर्थस्तथा च कृष्णनवमीप्रतियोगिताकप्रागभावकालावृत्तिः कृष्णनवमीनिरूपिताधिकरणकालध्वंसाधिकरणकालस्वरूपोत्तरकालवृत्तिः दशमीप्रतियोगिताकप्रागभावकालिकी देवीकर्मिकपूजा वाक्यार्थः कृष्णनवम्यादिसकलतिथिवृत्तित्वं तु पूजायां प्रतितिथिपूजाङ्गविशेषोपदेशादवगम्यते नवम्यादितिथिस्तु तत्तच्चन्द्रकालानुक्रियाप्रचयाधिकरणकालस्वरूपा तथाविधक्रियाऽप्रचयभावावस्थायिजन्यपदार्थस्वरूपा वेत्यन्यदेतत् देशस्वरूपोभयावधियोगो यथा काशिकायाम् आपाटलिपुत्राद्वृष्टो देव आमथुराया इत्यादौ अत्र देशिकसंसर्गावच्छिन्नाधेयत्वस्याभावस्तथाविधं पश्चिमदेशाधेयत्वं च प्रथमस्याङोऽर्थः पञ्चम्यास्तु आधेयत्वान्वयिनिरूपितत्वं पश्चिमत्वान्वय्यवधिमत्त्वं चार्थः । एवं द्वितीयस्याङस्तथाविधाधेयत्वाभावस्तथाविधं पूर्वदेशाधेयत्वं पञ्चम्यास्तु निरूपितत्वमवधिमत्त्वं चार्थस्तथा च पाटलिपुत्रावृत्तेः पाटलिपुत्रावधिकपश्चिमवृत्तेः मथुरानिरूपिताधेयत्वाभाववत्या मथुरावधिकपूर्वदेशवृत्तेर्दृष्टेः कर्ता देव इत्यन्वयबोधः । ओकृष्णनवमीपूर्वतिथि आशुक्लदशमि देवीं पूजयेदिति आपाटलिपुत्रमामथुरं दृष्टो देव इति चाव्ययीभावसमासे त्वाङो निपाततया तदर्थे भेदान्वये बाधकाभावाद्दर्शित एवान्वयबोधः । इयांस्तु विशेषः । समासे विभक्तेर्लुप्ततया पञ्चम्यर्थयोर्निरूपितत्वप्रतियोगित्वाद्योः संसर्गतया भानमिति । आङो ऽभिविधिरप्यर्थः स च तत्संबन्धतदितरसंबन्धाव्यापरमाणोः पृथिवीत्यादौ पृ-

थिवीत्वसामानाधिकरण्येन परमाणोस्तदन्यस्य च तादात्म्यं प्रतीयत इति के चित् परे तु तद्व्यापकत्वं तद्भिन्नसंबन्धस्याभिविधिः व्यापकताघटक इतरनिरूपितश्चैक एव बोध्यस्तेन संबन्धान्तरेण व्यापकत्वे नातिप्रसङ्गः आपरमाणोः पृथिवीत्यादौ पृथिवीत्वसामानाधिकरण्येन पच्यमानपरमाणुव्यापकत्वं परमाणुभिन्नतादात्म्यं च प्रतीयत इत्याहुः। तदुभयमपि चिन्त्यम्। आगुणाज्जातिरितिप्रयोगप्रसङ्गात् । अन्ये तु कार्तिकमारभ्याचैत्राच्छीतमित्यत्राङ उत्तरकालोऽर्थस्तस्य स्वपूर्वकालव्यापकत्वेन स्वावृत्तित्वेन चापरपदार्थेऽन्वयः पञ्चम्या उत्तरत्वान्वयिनिरूपकत्वमर्थः आरभ्यशब्दस्य पूर्वकालोत्तरकालोऽर्थः पूर्वत्वान्वयिप्रतियोगित्वं द्वितीयाऽर्थस्तावता कार्तिकपूर्वकालोत्तरकाललाभः स चायं कालः संसर्गीभूतव्यापकताघटकस्वपूर्वकालस्य विशेषणं न तु ज्ञाप्यन्वेति पूर्ववदेव कार्तिकपूर्वकालोत्तरस्वपूर्वकालनिष्ठाभावप्रतियोगिताऽनवच्छेदकधर्मवत्त्वं व्यापकत्वं संसर्गः आरभ्यान्तवाक्यं दर्शितव्यापकतासंसर्गकान्वयतात्पर्यग्राहकं तथा च चैत्रोत्तरकालावृत्तिकार्तिकपूर्वकालोत्तरीभूतचैत्रोत्तरकालपूर्वकालव्यापकं च शीतमित्यन्वयबोधः। एवं काश्मीत आपाटलिपुत्राद्वृष्टो देव इत्यादौ पूर्वदेश आङोऽर्थः पूर्वत्वान्वय्यवधिमत्त्वं पञ्चम्यर्थस्तावता पाटलिपुत्रपूर्वदेशो लभ्यते तस्य तु काश्मीपश्चिमदेशावधिकपूर्वीभूतस्वपश्चिमदेशव्यापकत्वेन स्वावृत्तित्वेन चापरशब्दार्थेऽन्वयस्तथा च पाटलिपुत्रपूर्वदेशावृत्तित्वं काश्मीपश्चिमदेशावधिकपूर्वभूतपाटलिपुत्रपू-

वावधिकपश्चिमदेशव्यापकत्वं च दृष्टौ प्रतीयते आरभ्यान्तवाक्यं पूर्ववत्तात्पर्यग्राहकमेवेति वदन्ति । तदपि चिन्त्यम् । आशैशवादधीतमायौवनादित्यादौ यौवनोत्तरकालपूर्वीभूतशैशवपूर्वकालोत्तरकालव्यापकत्वस्याध्ययने विरहात् तादृशानध्यायरोगादिकालेऽध्ययनविरहादिति तस्मात्संबन्धिसंबन्धाभावः संबन्धेतरसंबन्धस्याभिविधिराङोऽर्थः संबन्ध्यन्वयिनिरूपितत्वमितरान्वयिप्रतियोगित्वं च पञ्चम्यर्थ आपरमाणोः पृथिवीत्यादौ परमाणुतादात्म्यवतो जलादिपरमाणोस्तादात्म्याभावः पार्थिवपरमाणुतादात्म्यं पार्थिवपरमाणुभिन्नद्व्यणुकादितादात्म्यं च पृथिव्यां प्रतीयते यादृशसंबन्धस्याभावो भासते तादृश एव संबन्ध इतरसंबन्धश्च भासते अतः समुद्रसंयुक्तशैवालतादात्म्याभावसमुद्रसमकालिकत्वसमुद्रेतरशङ्खवत्तादात्म्यानां गगने सत्त्वेऽपि आसमुद्राङ्गनमिति न प्रयोगः न वा गगनसमवेतशब्दतादात्म्याभावगगनतादात्म्यगगनेतरपृथिव्यादिसमकालिकत्वानां गगने सत्त्वेऽपि आगगनाङ्गनमितिप्रयोगः । आचैत्राच्छीतं भवतीत्यत्र उत्तरकालाधेयत्वस्याभाव आधेयत्वमितराधेयत्वं चाङोऽर्थः उत्तरत्वं ध्वंसाधिकरणत्वं बोध्यं पञ्चम्याः प्रतियोगित्वं निरूपितत्वं चार्थः प्रतियोगित्वध्वंसेतरत्वयोर्निरूपितत्वमाधेयत्वेऽन्वेति आधेयत्वं तु कालिकविशेषणतावच्छिन्नं बोध्यं तथा च चैत्रप्रतियोगिताकोत्तरकालावृत्तित्वचैत्रवृत्तित्वचैत्रेतरकालवृत्ति शीतं तज्जनकं वा वाक्यार्थः । आप्रयागाद्गन्तवैदिरित्यादौ पूर्वदेशतादात्म्याभावस्ता-

दात्म्यमितरदेशतादात्म्यं चाङ्गोऽर्थः पञ्चम्याः पूर्वत्वान्वय्यवधिमत्त्वं तादात्म्यान्वयिनिरूपितत्वमितरत्वान्वयिप्रतियोगित्वं चार्थस्तथा च प्रयागपूर्वदेशभिन्ना प्रयागप्रतियोगिताकेतरपश्चिमादिदेशाभिन्ना चान्तर्वेदिरित्यन्वयबोधः । आकोटादाकैटभारेरभीष्टलाभप्रयुक्तकृतकृत्यतेत्यादौ कैटभार्य्यवधिकोत्कृष्टपरमात्मावृत्तित्वमाधेयत्वमितरात्मवृत्तित्वं द्वितीयस्याङ्गोऽर्थः प्रथमस्य तु कीटावधिकापकृष्टनारकिकात्मावृत्तिदर्शितोभयं चार्थः पञ्चम्या उत्कर्षापकर्षान्वय्यवधिमत्त्वं निरूपितत्वं प्रतियोगित्वं च पूर्ववदर्थस्तथा च कैटभार्य्यवधिकोत्कृष्टपरमात्मावृत्तिः कैटभारिवृत्तिः कैटभारिभिन्नवृत्तिः कीटावधिकापकृष्टनारकिकात्मावृत्तिः कीटवृत्तिः कीटप्रतियोगिताकेतरात्मवृत्तिश्च कृतकृत्यतेत्यन्वयबोधः द्वितीयोऽवधिस्तु पूर्ववदिहापि बोध्यः । एवमाकीटमाकैटभवैरितुल्यः स्वाभीष्टलाभात्कृतकृत्यभाव इत्याद्याव्ययीभावसमासेऽपि दर्शित एवान्वयबोधः पञ्चम्यर्थस्य तु संसर्गत्वं विशेषः । एवं कीटतदितराधेयत्वयोः कैटभारितदितराधेयत्वयोश्चाविशेषेण प्रतीत्या कीटकैटभारिवृत्तिकृतकृत्यभावस्य नारकिकेतरीभूतपरमात्मेतरसकलात्मव्यापकत्वमर्थतः प्रतीयते । एवं मर्यादायामपि कृष्णनवमीप्रभृतितिथिवृत्तित्वस्य दशमीपूर्वकालवृत्तित्वत्वेन लाभात्पूजायां नवमीप्रभृतिषोडशतिथिव्यापकत्वमर्थतः प्रतीयते बाधकविरहात् । पञ्चमीविधानार्थं प्रतेरर्थविशेषे कर्मप्रवचनीयतां ज्ञापयति । प्रतिः प्रतिनिधिप्रतिदानयोरिति सूत्रं प्रतिनिधौ

प्रतिदाने चार्थे प्रतिः कर्मप्रवचनीयसंज्ञः स्यादित्यर्थकम् । कर्मप्रवचनीययोगे पञ्चमीं ज्ञापयति । प्रतिनिधिप्रतिदाने च यस्मादिति सूत्रं यस्मात्प्रतिनिधिः यतश्च प्रतिदानं तत्र कर्मप्रवचनीयप्रतियोगे पञ्चमी विभक्तिर्भवतीत्यर्थकम् । प्रतिनिधौ यथा अभिमन्युरर्जुनात्प्रति प्रद्युम्नः कृष्णात्प्रतीत्यादौ अत्र प्रतिनिधौ वर्तमानस्य प्रतेर्भेदस्तत्कार्यकारित्वं चार्थः पञ्चम्या भेदान्वयिप्रतियोगित्वं कार्यान्वयिनिरूपितत्वं चार्थस्तथा चार्जुनप्रतियोगिताकभेदवानर्जुननिरूपितकार्यकृदभिमन्युरित्यादिरन्वयबोधः । प्रतिदाने यथा माषानस्मै तिलेभ्यः प्रतियच्छतीत्यादौ अत्र प्रतिदाने वर्तमानस्य प्रतेः ऋणात्वध्वंसजनकत्वमर्थः पञ्चम्यास्तु ऋणात्वान्वय्यादानजन्यत्वमर्थः ऋणात्वं तु स्वत्वमिव पदार्थान्तरं प्रापविशेषो वेत्यन्यदेतत् तथा चैतत्संप्रदानकं तिलादानजन्यर्णत्वध्वंसजनकं माषकर्मकदानं यत्तत्कर्तृत्वं वाक्यार्थ इति संप्रदायः । वस्तुतस्तु सदृश एव प्रतिनिधिशब्दार्थः अत एव चन्द्रस्य प्रतिनिधिसुखमितिप्रयोगस्तथा च प्रतेरपि सदृश एवार्थः सादृश्यान्वयिप्रतियोगित्वं पञ्चम्यर्थः । यत्तु मुख्यस्य सदृशः प्रतिनिधिरिति काशिकायासुक्तं तत्र मुख्यतोक्त्या कार्यसदृशकार्यकार्यौ प्रतिनिधिरिति ज्ञाप्यते तत्र पञ्चम्याः प्रथमकार्यान्वयिजन्यत्वमर्थः कार्यं तु कार्यतावच्छेदकत्वोपलक्षितत्तद्धर्मविशिष्टं बोध्यं यद्धर्मविशिष्टे पञ्चम्यर्थान्वयस्तद्धर्मविशिष्ट एव सादृश्यान्वयः । अभिमन्युरर्जुनात्प्रतीत्यादावर्जुनजन्ययुद्धसदृशयुद्धकर्ता अभिमन्युरित्यादिरन्वयबो-

धः। यदि निपातार्थस्याभेदान्वयो न मन्यते तदा प्रतेः कार्यसदृशकार्यकारित्वमेवार्थ इति। एवमश्वो रथात्प्रतीत्यादौ रथजन्यगमनसदृशगमनकर्तोऽश्व इत्यन्वयबोधः। प्रतिदानं द्वितीयदानं सदृशदानमिति यावत् माषानश्वे तिलेभ्यः प्रतियच्छतीत्यादौ पञ्चम्यर्थहेतुत्वस्य माषदानेऽन्वयः माषाणां श्यामत्वादिना तिलसादृश्यात्। यत्तु काशिकायां प्रतिदानं दत्तस्य प्रतियातनमित्युक्तम् तत्र प्रतियातनं प्रतियत्नफलकं प्रतिप्रयोजनकं प्रत्युपकारमिति यावत् तथा चैतत्संप्रदानकतिलहेतुकमाषकर्मकप्रत्युपकारकदानकर्तृत्वं वाक्यार्थः। यत्तु ऋणापाकारणं प्रतिदानमिति तच्च सूत्रवृत्तिविरुद्धं तथा हि सूत्रे प्रतिदानग्रहणं न हि ऋणप्रयोग उद्धारो वा दानमिति वृत्तौ दत्तस्य प्रतियातनमित्युक्तं न हि ऋणं दत्तं भवतीति। एवं वलयौ मित्राय कुण्डलाभ्यां प्रतियच्छतीत्यादौ नलोऽश्वहृदयस्तुपर्णायाक्षहृदयात्प्रतियच्छतीत्यादौ च दर्शितरीत्याऽन्वयो बोध्यः। सूत्रे वृत्तौ च यस्मादिति पञ्चमी हेतुत्वार्थिकैवान्यथाऽनुपपत्तेरिति। ऋणे हेतौ पञ्चमीं ज्ञापयति। अकर्तर्यृणे पञ्चमी इति सूत्रं कर्तृवर्जिते ऋणे हेतौ पञ्चमी विभक्तिर्भवतीत्यर्थकम्। शताद् बद्धः सहस्राद्बद्ध इत्यादौ पञ्चम्या हेतुत्वमर्थः ऋणात्मकशतहेतुकबन्धनकर्मेत्यन्वयबोधः कर्तरि ऋणे हेतौ न पञ्चमी किं तु तृतीयैव यथा शतेन बन्धित इत्यादौ अत्र प्रयोजकत्वाद्दृणं कर्तृभूतमिति। गुणे हेतौ वैकल्पिकीं पञ्चमीं ज्ञापयति।

विभाषा गुणेऽस्त्रियामिति सूत्रं गुणं हेतौ विभाषा पञ्चमी भवति न तु स्त्रीलिङ्गे इत्यर्थकम् । जाड्याज्जाड्येन वा बद्ध इत्यादौ पञ्चमीतृतीययोर्हेतुत्वमर्थो ज्याद्यहेतुकबन्धनकर्मेत्यन्वयबोधः । अत्र जाड्यं मोहो मिथ्याज्ञानमिति यावत् तस्य गुणत्वं स्फुटमेव गुणा इत्युपादानात् धनेन कुलमित्यादौ न पञ्चमी गुणोऽपि स्त्रियां न पञ्चमी यथा बुद्ध्या मुक्त इत्यादौ अत्र सूत्रे विभाषोपदेशाद्गुणे कर्तरि हेतौ पञ्चम्येव तृतीयाऽपवादश्च प्रतीयत इति । अत्र विभाषेति योगविभागाद्गुणे गुणेऽपि स्त्रियां च क्व चिद्धेतौ पञ्चमी यथा धूमादग्निमान् नास्ति घटोऽनुपलब्धेरित्यादाविति शाब्दिकाः । तच्च न शोभनं तावताऽपि घटो दण्डाद्दाहो दहनादित्यादौ पञ्चम्यनुपपत्तेः धूमादित्यादौ ज्ञापकत्वस्वरूपहेतुत्वस्य सूत्रादलाभात् ज्ञापकत्वे पञ्चम्यनुपपत्तेश्च । तस्माद्गुणेऽप्रधानेऽकर्तरीति यावत् ऋणस्य पूर्वसूत्रेणोपादानात् ऋणान्यस्मिन्नकर्तरि हेतौ विभाषा पञ्चमी भवतीतिसूत्रार्थ इति अत्र एव प्रतिनिधिप्रतिदाने च यस्मादिति हेतुपञ्चमीनिर्देशोऽपि संगच्छते । एवं घटो दण्डादित्यादौ पञ्चम्या जनकत्वमर्थः तच्च निरूपकतया घटादावपरपदार्थेऽन्वेति प्रकृत्यर्थस्याधेयतया पञ्चम्यर्थजनकत्वेऽन्वयस्तथा च दण्डवृत्तिजनकतानिरूपको घट इत्यन्वयबोध इति प्राञ्चः । एकदेशिनस्तु निरूपकत्वादिसंबन्धस्य वृत्त्यनियामकस्य प्रतियोगिताऽनवच्छेदकत्वात् दाहो दहनात् न तु जलादित्यादौ जनकत्वाभावप्रतीत्यसम्भवात् निरूपकत्वान्यसंबन्धावच्छिन्नप्रति-

योगिताकस्य जनकत्वाभावस्य दाहेऽपि सत्त्वात् दाहो न दहनादित्यादिप्रयोगापत्तेः जनकत्वं न पञ्चम्यर्थः किंतु जन्यत्वं तस्य स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकोऽभावो नञा प्रत्याय्यते जन्यत्वे प्रकृत्यर्थस्य निरूपितत्वेनान्वयस्तथा च जलनिरूपितजन्यत्वाभाववान् दाह इत्यन्वयबोध इति वदन्ति तदत्र तृत्यनियामकसंबन्धस्य प्रतियोगिताऽवच्छेदकत्वे युक्तोद्वितीयाविवरणे दर्शितत्वात् न किञ्चिदेतत् प्रतियोगिवैशिष्ट्यबुद्ध्यजनकस्य तृत्यनियामकस्य प्रतियोगिताऽनवच्छेदकत्वात् गगनादिसंयोगस्य तृत्यनियामकस्य प्रतियोगिवैशिष्ट्यबुद्ध्यजनकत्वादेव तथात्वमन्यथा घटो न पारिमाण्डल्यादित्यत्र जन्यत्वाभावस्यापि नञा बोधयितुमशक्यत्वात् जन्यत्वस्यापि पञ्चम्यर्थत्वानुपपत्तेस्तस्माज्जनकत्वं जन्यत्वं वा पञ्चम्यर्थ उभयथाऽपि तृत्यनियामकसंबन्धस्य प्रतियोगिताऽवच्छेदकत्वमिति घटो न पारिमाण्डल्यादित्यत्र प्रकृत्यर्थस्य पञ्चम्यर्थे जनकत्वे आधेयतासंबन्धावच्छिन्नप्रतियोगिताको जन्यत्वे निरूपकतासंबन्धानच्छिन्नप्रतियोगिताकोऽभावो नञा प्रत्याय्यते गगनं न पारिमाण्डल्यादित्यत्र गगनसम्बन्धो न पञ्चतीत्यत्रैव हिधा न नञर्थस्य भानमिति तृतीयाविवरणे प्रागेवोक्तमिति यदि च तृत्यनियामकस्य प्रतियोगिताऽवच्छेदकत्वे ब्रह्मशापो न पारिमाण्डल्यादित्यादिवाक्यमयोग्यं चाभ्युपेयते तदा भवतु जन्यत्वं पञ्चम्यर्थ इति ज्ञापकत्वमपि पञ्चम्यर्थ "तदधिष्यं संज्ञाप्रमाणत्वात्" "लुग्योगाप्रख्यानात्" इत्यादिनिर्देशात्सर्वतो वह्नि-

मान् धूमादित्यत्र पञ्चम्यर्थो ज्ञापकत्वं निरूपकतया वन्ह्यादिपदार्थेऽन्वेति प्रकृत्यर्थस्याधेयतया ज्ञापकत्वेऽन्वयस्तथा च धूमवृत्तिज्ञापकतानिरूपकवन्हिमान् पर्वत इत्यन्वयबोधः । मणिकृतस्तु प्रतिज्ञासमभिव्याहृतपञ्चम्यन्तधूमादिपदस्य ज्ञाने लक्षणा हेत्ववयवसमभिव्याहृतप्रतिज्ञाघटकसाध्यवाचिवन्ह्यादिपदस्यापि ज्ञाने ज्ञायमानवन्हौ वा लक्षणा पञ्चम्या जनकत्वं जन्यत्वं वा लभ्यमेवार्थः तच्च ज्ञाने लक्ष्ये लक्ष्यतावच्छेदकघटके वाऽन्वेति तथा च धूमज्ञानहेतुकवह्निज्ञानविषयः पर्वत इति धूमज्ञानहेतुकज्ञानविषयवह्निमान् पर्वत इति वाऽन्वयबोध इति वदन्ति । यत्तु प्रतिज्ञाघटकसाध्यवाचिपदस्य ज्ञाने लक्षणाऽभ्युपगमे प्रतिज्ञाया विप्रतिपत्तिसमानशब्दार्थकत्वप्रदर्शनपरस्याहत्तौ सैव प्रतिज्ञेति वाक्यस्य विरोधः विप्रतिपत्तिवाक्ये साध्यवाचिपदस्य ज्ञाने लक्षणाविरहात् पर्वतो वह्निमानित्युक्ते कुत इति जिज्ञासायां धूमादित्युत्तरवाक्येऽपि धूमपदस्य धूमज्ञानेन लक्षणाप्रयोजनविरहात् कोशादिज्ञापितरूढिविरहाच्च तस्माज्ज्ञापकत्वं पञ्चम्यर्थस्तत एव प्रतिज्ञाहेत्वोरेकवाक्यतासम्भवः तथापि जलं स्पर्शवद्रूपात् न गन्धान्नापि शब्दादित्यादौ निरूपकत्वादिवृत्त्यनियामकसंबन्धस्य प्रतियोगितानवच्छेदकतया ज्ञापकत्वाभावस्य नञा बोधयितुमशक्यत्वात् नञर्थान्वयानुरोधात् ज्ञाप्यत्वं ज्ञानज्ञाप्यत्वं वा पञ्चम्यर्थ इति नव्यैरुक्तं तच्च न शोभनं तथा हि विप्रतिपत्तिसमानार्थकत्वं प्रतिज्ञाया हेत्ववयवासंबलिताया अक्षतमेव केवलप्रतिज्ञायाः

साध्यवाचिपदस्य ज्ञाने लक्षणाविरहात् यद्यपि रूढिप्रयोजनान्यतराभावो लक्षणाबाधकइत्युक्तं तच्च दर्शितनिर्देशाद्रूढेरेव जागरूकत्वमन्यथा ज्ञापकत्वे पञ्चम्या अपि लक्षणाविरहप्रसङ्गात् । ननु साध्यहेतुपदयोर्ज्ञाने लक्षणाऽभ्युपगमेऽपि जलं स्पर्शवत् रूपान्न गन्धादित्यादौ निषेधप्रतीत्यनुपपत्तिस्तथा हि नञा न तावज्जले गन्धज्ञाप्यस्पर्शस्यात्यन्ताभावस्तद्वदन्योन्याभावो वा बोधयितुं शक्यते जलप्रत्यक्षमात्मकगन्धपरामर्शानुमेयस्पर्शस्य सत्त्वात् अत एव स्पर्शज्ञाने गन्धज्ञानजन्यत्वाभावोऽपि न बोधयितुं शक्य इति न वा गन्धप्रमाऽनुमेयस्पर्शस्यात्यन्ताभावादिस्तथा पृथिवीपत्यक्षकगन्धप्रमाऽनुमितिविधेयताऽवच्छेदकस्पर्शत्वावच्छिन्नस्य जले सत्त्वात् न च स्पर्शत्वावच्छिन्नस्य जले सत्त्वेऽपि गन्धप्रमाऽनुमेयस्पर्शव्यक्तेः पृथिवीवृत्तित्वात्यन्ताभावोऽविकल एवेति निषेधप्रतीत्युपपत्तिरिति वाच्यं तथाऽपि जलं द्रव्यत्ववत् स्पर्शान्न गन्धादित्यत्र गन्धप्रमाऽनुमेयद्रव्यत्वव्यक्तेर्जले सत्त्वान्निषेधप्रतीत्यनुपपत्तेः अत एव द्रव्यत्वज्ञाने गन्धप्रमाहेतुकत्वाभावो न तथा पृथिवीपत्यक्षद्रव्यत्वानुमितौ गन्धप्रमाहेतुकत्वस्य सत्त्वात् । न च कस्याश्चिद्द्रव्यत्वानुमितेर्गन्धप्रमाहेतुकत्वेऽपि सर्वस्या न तथात्वमिति निषेधप्रतीत्युपपत्तिरिति वाच्यं तथासति पृथिवी द्रव्यत्ववती स्पर्शान्न गन्धादित्यादिप्रयोगप्रसङ्गात् स्पर्शलिङ्गकद्रव्यत्वानुमितेर्गन्धप्रमाहेतुकत्वाभावात् निषेधप्रतीत्यापत्तेरत एव द्रव्यत्वे गन्धज्ञानज्ञाप्यत्वाभावोऽपि न प्रतीयते बाधादिति चेत् । अत्र गुरुचरणाः गुरुमते प्रतिज्ञादिहेत्वन्तभागात्

हेतौ पक्षसंबन्धोऽपि प्रतीयते अत एवोदाहरणान्त एव न्यायस्तथा च प्रकृते जलसंबन्धाभाव एव नञा प्रत्याय्यत इति मतान्तरे तु विशेष्यताद्वयासंवलितमेव प्रकारतानिरूपितविशेष्यत्वं तत्प्रतियोगित्वेन लिङ्गविशिष्टं भ्रमसामान्यभिन्नं ज्ञानं यत् तस्यैव लिङ्गपदलक्ष्यत्वात् तादृशज्ञानस्य पञ्चम्यर्थहेतुतायां तस्याः प्रकृतपक्षकप्रकृतसाध्यकानुमितित्वावच्छिन्ननिरूपकतया-संसर्गेण साध्यपदलक्ष्यार्थे साध्यज्ञानेऽन्वय इति व्युत्पत्त्या जलं द्रव्यत्ववत् स्पर्शान्न गन्धादित्यत्र दर्शितविषयताकभ्रमसामान्यभिन्नस्पर्शज्ञाननिष्ठहेतुतायां जलपक्षकद्रव्यत्वसाध्यकानुमितित्वावच्छिन्ननिरूपकतासंसर्गः द्रव्यत्वज्ञाने भासते तत्संसर्गावच्छिन्नप्रतियोगिताको दर्शितविषयताकभ्रमसामान्यभिन्नगन्धज्ञाननिष्ठहेतुत्वस्याभावोऽपि प्रतीयत इति विशेष्यताद्वयासंवलननिवेशाज्जलं द्रव्यत्ववत्स्पर्शात्पृथिवी द्रव्यत्ववती गन्धादित्याद्यिन्यायजसमूहालम्बनपरामर्शजन्यत्वस्य जलपक्षकद्रव्यत्वानुमितौ सत्त्वेऽपि न प्रकृतवाक्यार्थबाधः समूहालम्बनविषयतायां विशेष्यताद्वयसंवलनादिति प्राञ्चः । वस्तुतस्तु साध्यवाचिवन्ह्यादिपदस्य ज्ञानविधेयवन्ह्यादौ लक्षणाज्ञानविधेयवन्हेस्तु स्वनिष्ठविधेयतानिरूपितोद्देश्यतया स्वविधेयकज्ञानीययाऽपि संबन्धेन पक्षे पर्वतादावन्वयः अत एव पर्वते एकत्र द्वयमिति रीत्या वन्हिगुणयोः साध्यतायां पर्वतो वन्हिमान् गुणवान् धूमाद् द्रव्यत्वादितिन्यायजस्य वह्निव्याप्यधूमवान् गुणवद्व्याप्यद्रव्यत्ववान् पर्वत इत्याकारकस्य एकत्र द्वयमिति-

रीत्या धूमद्रव्यत्वोभयप्रकारकैकविशेष्यताकस्य परामर्शस्य जन्यत्वेऽपि पर्वतो वह्निमान् गुणवान् इत्याकारकानुमितेः पर्वतो वह्निमान् धूमान्न द्रव्यत्वादित्यादौ न निषेधप्रतीत्यनुपपत्तिः वह्निविधेयताकज्ञानत्वावच्छिन्नं प्रति द्रव्यत्वप्रमाया अजनकत्वात् वह्निविधेयताविशेषणज्ञाने द्रव्यत्वप्रमाहेतुकत्वाभावप्रतीतिसम्भवात् । एवं जलं द्रव्यत्ववत्स्पर्शान्न गन्धादित्यादौ स्पर्शप्रमाया द्रव्यत्वविधेयताकज्ञानं प्रति जनकत्वात् द्रव्यत्वविधेयकज्ञानोद्देश्यतायां जले सत्त्वात् स्पर्शप्रमाजन्यज्ञानविधेयस्य द्रव्यत्वदर्शितोद्देश्यतया जलेऽन्वयः सम्भवति गन्धप्रमाया द्रव्यत्वविधेयताकज्ञानत्वावच्छिन्नं प्रति जनकत्वेऽपि गन्धप्रमाजन्यज्ञानोद्देश्यतायां जले विरहात् पक्षनिष्ठोद्देश्यताकज्ञानं प्रति पक्षसंबन्धविषकलिङ्गविषयकज्ञानस्य हेतुत्वात् गन्धप्रमाया जलसंबन्धाविषयकत्वात् गन्धप्रमाजन्यज्ञाने जलोद्देश्यताकत्वविरहाद् दर्शितोद्देश्यतासंसर्गेण गन्धप्रमाजन्यज्ञानविधेयत्वापन्नस्य द्रव्यत्वस्य जले वैशिष्ट्यविरहान्नान्वयः दर्शितोद्देश्यतासंसर्गावच्छिन्नप्रतियोगिताकस्य गन्धप्रमाजन्यज्ञानविधेयद्रव्यत्वाभावस्य नञा बोधनसम्भवान्निषेधप्रतीत्युपपत्तिः । ननु दर्शिते पर्वतो वह्निमान् गुणवान्धूमाद् द्रव्यत्वादित्यादौ वह्निविधेयताकज्ञानत्वावच्छिन्नं प्रति द्रव्यत्वप्रमाया अजनकत्वेऽपि वह्निगुणोभयसमूहालम्बनजनकत्वस्याक्षतत्वात् द्रव्यत्वान्न वह्निमानित्यादौ कथं वह्निज्ञाने द्रव्यत्वप्रमाहेतुक-

त्वाभावस्य नञा बोधनसम्भव इति चेन्मैवं यतो स्व-
माजन्यत्वविशिष्टविषयितासंसर्गेण लिङ्गविशिष्टज्ञानस्य
लिङ्गपदलक्ष्यस्यार्थतो लिङ्गविषयकज्ञानत्वावच्छिन्न-
स्य ज्ञानविधेयताविशेषेण ज्ञानेऽन्वय इति द्रव्यत्वप्र-
मानिष्ठहेतुतायां निरूपितवह्निविधेयताकज्ञानत्वाव-
च्छिन्नजन्यत्वस्य व्यधिकरणसंबन्धतया तत्संबन्धावच्छि-
न्नप्रतियोगिताकाभावो वह्निगुणोभयानुमितौ वह्निवि-
धेयकत्वावच्छेदेन नञा बोध्यते बाधकाभावात् । वस्तु-
तस्तु पञ्चम्या जन्यत्वमर्थोऽस्तु लिङ्गप्रमाया लिङ्गविष-
यकज्ञानत्वावच्छिन्ननिरूपितत्वेन संबन्धेनान्वयस्ता-
दृशजन्यत्वस्य स्वरूपेण लक्ष्ये साध्यज्ञानेऽन्वयो व्युत्प-
त्तिवैचित्र्येण विधेयितासंबन्धावच्छिन्नजन्यतावच्छेदक-
तया साध्येऽन्वेतीति ज्ञानविधेयसाध्यस्य लक्ष्यत्वे तु ता-
दृशजन्यत्वस्य स्वरूपेण ज्ञानेऽवच्छेदकतया साध्ये तद्वि-
धेयतायां वाऽन्वय इति द्रव्यत्वप्रमाजन्यत्वावच्छेदक-
तासंबन्धावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावो नञा साध्ये
तद्विधेयतायां वा बोध्यत इति दर्शितोद्देश्यतासंबन्धः
साध्यज्ञानस्य ज्ञानविधेयसाध्यस्य च तुल्य इति तद-
न्वय ऊहनीय इति दर्शितसंसर्गेण लिङ्गप्रमानिष्ठहे-
तुतायाः साध्यविधेयताविशेषणज्ञानेऽन्वयोपगमे तु धू-
मादग्निमानित्यादिपक्षवाचकपदासमभिव्याहृतवाक्ये-
ऽपि नान्वयबोधानुपपत्तिः न वा गन्धाच्चन्द्राद्वा न स्ने-
हवानित्यादिपक्षासमभिव्याहृतवाक्ये निषेधप्रतीत्यनु-
पपत्तिः।अथ वा साध्यपदस्य साध्यज्ञाने लक्षणा तच्च लि-
ङ्गप्रमानिष्ठहेतुतायां दर्शितसंसर्गेणैवान्वयः साध्यज्ञानस्य

साध्यतावच्छेदकावच्छिन्नविधेयतानिरूपितोद्देश्यतया तादृशोद्देश्यतास्वरूपसंबन्धवतो मत्वर्थस्य तादात्म्येन वा पक्षतावच्छेदकविशिष्टे पक्षेऽन्वयः पर्वतो वन्हिमान् धूमादितिहेत्वन्तवाक्ये धूमप्रमाहेतुताकवन्हिज्ञानीयवन्हित्वावच्छिन्नविधेयतानिरूपितोद्देश्यतावदभिन्नः पर्वत इत्यन्वयबोधः। जलं द्रव्यत्ववत् न गन्धादित्यत्र गन्धप्रमाहेतुकं यद्घटो द्रव्यत्ववानित्यादिद्रव्यत्वज्ञानं तदीयद्रव्यत्वनिष्ठविधेयतानिरूपितोद्देश्यतायां जले विरहात् तादृशोद्देश्यत्वस्यात्यन्ताभावस्तद्वदन्योन्याभावो वा जले नञा बोध्यत इति निषेधप्रतीत्युपपत्तिः न च द्रव्यत्वव्याप्यगन्धवान् घटः द्रव्यत्वव्याप्यस्पर्शवज्जलमिति समूहालम्बनगन्धप्रमात्मकपरामर्शजन्यानुमित्युद्देश्यतायां जले सत्त्वात् कथं तादृशोद्देश्यत्ववदन्योन्याभावस्य प्रतीतिरिति वाच्यं मुख्यविशेष्यताद्वयाप्रतियोगित्वेन लिङ्गप्रमाया विशेषणीयत्वात्तथा च मुख्यविशेष्यताद्वयाप्रतियोगिनी घटो द्रव्यत्वव्याप्यगन्धवानित्याकारिकैकमात्रविशेष्यिका या गन्धप्रमा तज्जन्यानुमित्युद्देश्यतायां जले विरहान्निषेधप्रतीत्युपपत्तेः मुख्यविशेष्यताद्वयप्रतियोगिदर्शितसमूहालम्बनस्वरूपगन्धप्रमाजन्यानुमित्युद्देश्यतायां जले सत्त्वेऽप्यकिञ्चित्करत्वादिति प्राचीनपथपरिष्कारः वृत्त्यनियामकसंबन्धस्य प्रतियोगितावच्छेदकत्वे ब्रह्मशापं मन्वानानां नबानां मते पर्वतो वन्हिमान् धूमान्न तु द्रव्यत्वादित्यादौ वन्हिज्ञाने द्रव्यत्वप्रमाहेतुत्वस्याभावो नञा न बोधयितुं शक्यते दर्शितसंसर्गस्य वृत्त्यनियामकतया तद-

वच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः स्वरूपादिसंसर्गावच्छिन्नप्रतियोगिताकाभावस्य द्रव्यत्वप्रमाजन्ये गुणादिज्ञानेऽपि सत्त्वादिति पञ्चम्या ज्ञानज्ञाप्यत्वमर्थस्तदेकदेशे ज्ञाने प्रातिपदिकार्थो विषयित्वेनान्वेति कर्तृकृदर्थैकदेशे कर्तरि धात्वर्थवदाकाङ्क्षावैचित्र्यात् विषयित्वं भ्रमसामान्यभिन्नत्वविशिष्टमन्वयघटकं बोध्यं तथा च द्रव्यत्वप्रमाजन्यज्ञानविषयत्वस्य गुणादौ प्रसिद्धस्य स्वरूपसंसर्गावच्छिन्नप्रतियोगिताकोऽभावो वह्नौ नञा बोध्यत इति निषेधप्रतीत्युपपत्तिः जलं द्रव्यत्ववत् स्पर्शान्न तु गन्धादित्यादौ गन्धप्रमाजन्यज्ञानविषयत्वस्याभावो द्रव्यत्वे जलावच्छेदेन नञा प्रत्याय्यते इति निषेधप्रतीतेर्नानुपपत्तिः धूमादग्निमानित्यादौ पञ्चपदासमभिव्याहृतवाक्येऽपि नान्वयबोधानुपपत्तिः धूमप्रमाजन्यज्ञानविषयवह्निमानित्याकारकान्वयबोधस्य निष्प्रत्यूहत्वादिति । नव्यमते पुनरिदं चिन्त्यं तथा हि ज्ञानज्ञाप्यत्वस्य पञ्चम्यर्थताऽभ्युपगमे गन्धाद् द्रव्यत्ववानित्यादौ नान्वयबोधः स्याज्जलावच्छेदेन द्रव्यत्वे गन्धप्रमाजन्यज्ञानविषयत्वाभावस्य सत्त्वात् न च पृथिव्यवच्छेदेन द्रव्यत्वे गन्धप्रमाज्ञाप्यत्वस्य सत्त्वादन्वयबोधोपपत्तिरिति वाच्यं तथासति जलावच्छेदेन तदभावस्य सत्त्वात् गन्धान्न द्रव्यत्ववदिति वाक्यप्रयोगप्रसङ्गात् द्रव्यत्वं गन्धान्नगन्धाच्चेति प्रयोगप्रसङ्गाच्च न च जलं द्रव्यत्ववत् गन्धादित्यत्र गन्धप्रमाज्ञाप्यद्रव्यत्वस्यात्यन्ताभावस्तद्वदन्योन्याभावो वा नञा जले प्रत्याय्यत इति वाच्यं घटो द्रव्यत्ववान् गन्धाज्जलं द्रव्यत्ववत् न ग-

न्धादित्यत्र गन्धप्रमाज्ञाप्यत्वविशिष्टस्य द्रव्यत्वस्य घट इव जलेऽपि सत्त्वात् निषेधप्रतीत्यनुपपत्तेः यदि च गन्धप्रमाज्ञाप्यद्रव्यत्वस्य स्वज्ञानीयस्वनिष्ठविधेयतानिरूपितोद्देश्यतया घटादावन्वयः तादृशोद्देश्यतासंबन्धावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावस्तादृशोद्देश्यत्वावच्छिन्नप्रतियोगितावच्छेदकताकस्तद्वदन्योन्याभावो वा जले नञा प्रत्याय्यत इत्यभ्युपेयते तदा द्रव्यनियामकसंबन्धस्य तादृशोद्देश्यत्वस्यात्यन्ताभावीयप्रतियोगितायां अवच्छेदकत्वं भेदप्रतियोगितावच्छेदकतायाश्चावच्छेदकत्वं स्वयमेवाभ्युपेतमिति साध्यपदस्य साध्यज्ञाने लक्षणाया युक्तत्वात् साध्यज्ञानस्य तादृशोद्देश्यत्वसंसर्गेण पक्षेऽन्वयस्य समुचितत्वादित्यस्योक्तत्वादिति प्राचीनमतमेव ज्ञेयः पञ्चम्या ज्ञानज्ञाप्यत्वे लक्षणाकल्पनं दृष्टेवेति । पृथगादिशब्दयोगे पञ्चमीं ज्ञापयति पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् इति सूत्रम् पृथग्विनानानाइत्येतैः शब्दैर्योगे तृतीयाविभक्तिर्भवति अन्यतरस्यां पञ्चमीत्यर्थकम् अन्यतरस्यामित्यनेन द्वितीयाऽपि समुच्चीयते पृथग्विनानानाशब्दानां वर्जनमत्यन्ताभावस्तद्वानन्योन्याभावस्तद्वांश्चार्थः न च पृथगादिशब्दानां पर्य्यायत्वे सूत्रे विनाऽर्थैरित्येव प्रयुज्येतेतिवाच्यं हिरुग्देवदत्तस्येत्यत्र विनापर्यायस्य हिरुक्शब्दस्य योगे तृतीयाऽादिप्रसङ्गात्तद्वारणाय पृथगादिशब्दग्रहणात् हिरुक्शब्दस्यापि वर्जनमर्थः हिरुङ्नाना च वर्जने इत्यमरसिंहात् । वन्हिना वन्हेर्वन्हिं वा विना जलमित्यत्रात्यन्ताभावो विनाऽर्थः सविशेषण-

तया जलादावन्वेति तृतीयापञ्चमीद्वितीयानां प्रतियोगित्वमर्थस्तत्र प्रकृत्यर्थस्य स्ववृत्तिप्रकृत्यर्थतावच्छेदकाद्यन्वयितावच्छेदकावच्छिन्नत्वेन संसर्गेणान्वयस्तथा च वह्नित्वावच्छिन्नवह्निप्रतियोगिताकात्यन्ताभाववज्जलमित्यन्वयबोधः प्रकृत्यर्थतावच्छेदकादेः संसर्गमध्ये निवेशात् पर्वतीयवन्हेर्विरहेऽपि वह्निं विना महानसमिति न प्रयोगः न वा पर्वतीयं वह्निं विना महानसमिति प्रयोगानुपपत्तिः क्व चिद्विनार्थात्यन्ताभावस्य व्याप्यव्यापकभावेन संबन्धेनान्वयः यथा वह्निना वन्हेर्वह्निं वा विना न धूम इत्यादौ क्व चित्प्रयोज्यप्रयोजकभावसंबन्धेनान्वयः यथा दण्डाद् दण्डेन दण्डं वा विना न घट इत्यादौ पृथगादियोगे यथा वह्निना वन्हेर्वह्निं वा पृथक् वह्निना वह्नेर्वह्निं वा नाना जलमित्यादौ पृथक्शब्दस्य स्वरूपेण विवक्षणात् पृथक्त्वगुणविशिष्टवाचिपृथक्शब्दयोगेऽप्येतो विभक्तयः घटेन घटात् घटं वा पृथक् पट इत्यादौ अत्र तृतीयादीनामवधिमत्त्वमर्थः पृथक्पदार्थतावच्छेदके पृथक्त्वेऽन्वेति अवधिमत्त्वं स्वरूपसंबन्धविशेषोऽतिरिक्तपदार्थो वेत्यन्यदेतत् विनार्थोऽत्यन्ताभाववान् यथा रूपेण रूपात् रूपं वा विना स्पर्श इत्यादौ अत्रात्यन्ताभाववत आधेयतया स्पर्शेऽन्वयः विनार्थोऽन्योन्याभावो यथा अर्जुनेनार्जुनाद्अर्जुनं वा विना पाण्डवाः सैन्धवेन वारिता इत्यादौ अत्रान्योन्याभावो विशेषणतया पाण्डवेष्वन्वेति विनार्थोऽन्योन्याभाववान् यथा पाण्डवैः पाण्डवस्यः पाण्डवान्वा विना प्रीतिर्दुर्योधनस्येत्यादौ अत्रान्यो-

न्याभावत आधेयतया प्रीतावन्वयः । दूरान्तिकार्थ-
कशब्दयोगे पञ्चमीं ज्ञापयति । "दूरान्तिकार्थैः षष्ठ्य-
न्यतरस्यामि"ति सूत्रम् । दूरान्तिकार्थकैः शब्दैर्योगे षष्ठी
भवत्यन्यतरस्यां पञ्चमी भवतीत्यर्थकं ग्रामस्य ग्रामाद्वा
दूरं विप्रकृष्टं वा इत्यत्र दूरादिशब्दस्य दैशिकपरत्व-
विशिष्टः तादृशपरत्वव्यञ्जकबहुतरसंयोगघटितपरम्प-
राश्रयो वार्थः षष्ठीपञ्चम्योरवधित्वमर्थः परत्वे बहुतर-
संयोगे वान्वेति तथा च ग्रामावधिकपरत्ववानित्यन्व-
बोधः । ग्रामस्य ग्रामाद्वान्तिकं सविधं वा इत्यत्रान्ति-
कशब्दस्य दैशिकापरत्वविशिष्टस्तादृशापरत्वव्यञ्जकस्व-
ल्पतरसंयोगघटितपरम्पराश्रयो वार्थः ग्रामावधिकापर-
त्ववानित्यादिरन्वयबोधः । दूरान्तिकशब्देभ्यो वैक-
ल्पिकीं पञ्चमीं ज्ञापयति । "दूरान्तिकार्थेभ्यो द्वितीया
चे"ति सूत्रं दूरान्तिकार्थकशब्देभ्यो द्वितीया भवति
चकारात्तृतीया पञ्चमी च समुच्चीयत इत्यर्थकं ग्रा-
मस्य ग्रामाद्वा अन्तिकमन्तिकेनान्तिकाद्वा सविधं स-
विधेन सविधाद्वा इत्यादौ दर्शित एवान्वयबोधः दूरा-
न्तिकशब्देभ्यः सप्तम्यपि भवति तत्रानुशासनं दर्शयिष्य-
ते तेन ग्रामस्य ग्रामाद्वा दूरे विप्रकृष्टे वा सविधे अ-
न्तिके वा इति प्रयोगः अत्र दूरान्तिकार्थकशब्दप्रकृति-
कानां द्वितीयातृतीयापञ्चमीसप्तमीनां प्रातिपदिकार्-
थमात्रे विधानमिति शाब्दिकाः । "दूरेण तं परिहरन्ति
सदैव रोगा" इत्यत्र दूरादावसथान्मूलमित्यत्र च तृती-
यापञ्चम्योरधिकरणार्थकत्वं दृश्यते तस्मादिदमवगम्यते
यत्र दूरादिपदार्थानामितरस्मिन् विशेषणतयाऽन्वयस्त-

आ पुस्तक
श्री जैन मुनी
[illegible] स्वामीनुं छे.

च प्रातिपदिकार्थमात्रे द्वितीयादयो विभक्तय इति । अत्राप्यसत्त्ववचनस्येत्यनुवर्तते तेन शब्दान्तरसमानाधिकरणादूरादिशब्दाद्विशेषणाद्विभक्तिर्भवति यथा दूरः पन्था दूराय पथे स्पृहयति । वैधर्म्यार्थयोगे पञ्चमीं ज्ञापयति । "पञ्चमी विभक्ते" इति सूत्रम् । निर्धारणाश्रये विभक्ते सति यतो विभागस्ततः पञ्चमी भवतीत्यर्थकं षष्ठीसप्तम्योरपवादः विभागो वैधर्म्यं तच्च सजातीयावधिकोत्कर्षापकर्षस्वरूपं निर्धारणं तु सामान्यधर्मावलौढयत्किञ्चिद्व्यक्तिवैधर्म्यं विभागस्त्वन्वयितावच्छेदकावच्छिन्नवैधर्म्यमिति विशेषः पाटलिपुत्रेभ्य आढ्यतरा माथुरा इत्यत्राढ्यतरत्वमधिकसंख्यकधनवत्त्वं पञ्चम्यास्तु भेदप्रतियोगितावच्छेदकत्वमर्थस्तच्चापरशब्दार्थतावच्छेदकेऽन्वयितावच्छेदकेऽन्वेति भेदे च प्रकृत्यर्थस्य धनावच्छिन्नाधिकरणतानिरूपिताधेयतयाऽन्वयस्तथा च धनवत्पाटलिपुत्रवृत्तिभेदप्रतियोगितावच्छेदकाढ्यतरत्ववदभिन्ना माथुरा इत्यन्वयबोधः यादृशधर्मोऽन्वयितावच्छेदके भेदप्रतियोगितावच्छेदकत्वस्यान्वयस्तत्सजातीयधर्मावच्छिन्नाधिकरणतानिरूपिताधेयतया प्रकृत्यर्थस्य भेदेऽन्वयो विवक्षितः साजात्यं चान्वयितावच्छेदकघटकतावच्छेदकरूपेण बोध्यं प्रकृते तु तादृशं रूपं धनवत्त्वमेव अतो वृक्षेभ्यो दरिद्रेभ्यो वा आढ्यतरा माथुरा इति न प्रयोगः । यत्तु "वैश्येभ्यः क्षत्रियाः शूराः शूद्रेभ्यो धनिनो विप्र" इत्यादौ शौर्यसंख्यानिष्ठभेदप्रतियोगितावच्छेदकजातिमत्संख्यावत्त्वं धनसंख्यानिष्ठभेदप्रतियोगितावच्छेदजातिमत्संख्यावत्त्वं च पञ्चम्यर्थः शूरपदा-

र्थतावच्छेदके शौर्ये धनिशब्दार्थतावच्छेदके धने यथा-
योग्यमन्वेति पञ्चम्यर्थैकदेशे शौर्ये धने प्रकृत्यर्थस्यान्व-
यस्तथा च वैश्यशौर्यसंख्यानिष्ठभेदप्रतियोगितावच्छेद-
कजातिमत्संख्यावच्छौर्यवदभिन्ना: क्षत्रिया इत्यादिर-
न्वयबोध इति तन्न शोभनं शौर्यधनादे: पञ्चम्यर्थेऽनुप्र-
वेशे पञ्चम्यर्थस्याननुगमापत्ते: यत्रैकैकमेव धनमुत्कृष्टा-
पकृष्टं तत्रास्मादसौ धनिक इत्यादिप्रयोगानुपपत्तेश्च
धनिकत्वमतिशयितधनवत्त्वमतिशयो बहुमूल्यता च उ-
भयथाऽप्यतिशयितधनवत्त्वं धनिनिष्ठभेदप्रतियोगितावच्छेदकमिति दर्शितपक्षे न काऽप्यनुपपत्तिरिति । अस्मा-
वस्माद्दीर्घ इत्यत्र दीर्घत्वं परिमाणविशेष: तस्य ह्रस्व-
परिमाणवदिदंपदार्थनिष्ठभेदप्रतियोगितावच्छेदकत्वम-
क्षतमेव एवमस्माद्ह्रस्व इत्यत्र ह्रस्वत्व परिमाणवि-
शेषस्तस्यापि दीर्घावधिकत्वं दर्शितप्रायमिति । अय-
मस्मात्तारो मन्द्रो इत्यत्र सजातीयमाक्षात्कारस्य प्रति-
बन्धकतावच्छेदकजातिमत्त्वं तारत्वं प्रतिबध्यतावच्छे-
दकजातिमत्त्वं मन्द्रत्वमित्यन्यत्र विस्तरस्तारत्वं मन्द्र-
निष्ठस्य मन्द्रत्वं तारनिष्ठस्य प्रतियोगितावच्छेदक-
मिति नानुपपत्ति: श्वपाकाद्यवनो नीच इत्यत्र नी-
चत्वं वेदनिषिध्यतावच्छेदकत्वोपलक्षितधर्मविशिष्टक-
र्मकर्तृत्वं तादृशधर्मविशिष्टस्य गोहननादेरतिशयित-
नरकप्रयोजकस्य कर्तृत्वं यवननिष्ठं तादृशधर्मविशि-
ष्टश्वपचादिनरकप्रयोजककर्मकर्तृश्वपाकनिष्ठत्यन्योन्याभा-
वप्रतियोगितावच्छेदकमिति नीचपर्याय इतरशब्दोऽध-
मशब्दश्चेति । तस्मादयमधिक इत्यत्राधिकत्वमधिकसं-
ख्यावत्त्वं न्यूनसंख्यकतद्वृत्तिभेदप्रतियोगितावच्छेदकमि-

ति संख्याया आधिक्यं स्वान्यसंख्याव्याप्यत्वं न्यूनत्वं तु स्वान्यसंख्याव्यापकत्वं दशत्वव्याप्यं शतत्वं न तु दशत्वं तद्व्याप्यं दशमात्रे व्यभिचारादिति शतत्वमधिकं शतत्वव्यापकं दशत्वमिति तन्न्यूनमिति अधिकसंख्या क्व चिदवयवगता यथा गुञ्जाया अधिको यवः क्व चिन्मूल्यगता यथा रजतादधिकं हिरण्यं क्व चित्पुण्यगता यथा पितुरधिको युधिष्ठिरः क्व चिद्विद्यागता यथा वैशम्पायनादधिको व्यासः क्व चिद्गुणगता यथा तेजसोऽधिके चित्तिपाथसौ एवमन्यत्रापूहनीयम् । तस्मात्स्थूलः कृशो वेत्यत्र दीर्घत्वह्रस्वत्ववदन्वयो बोध्यः एवमन्यत्रापि विभक्तपञ्चम्यर्थान्वयो बोध्यः । के चित्तु तस्मादयं दीर्घ इत्यादौ पञ्चम्यर्थस्यावधिमत्त्वस्यापादानरूपस्य दीर्घादिनामार्थेऽन्वयाव्युत्पत्तेः भवतीतिक्रियाध्याहार इति वदन्ति । तदसत् कारकेऽपादानत्वस्वरूपस्य दर्शितत्वात् विभक्तपञ्चम्याः तदर्थकत्वविरहात् भवतीत्यध्याहारेऽपि भवत्यर्थयोरुत्पत्तिमत्तयोर्निरवधित्वेनानन्वयापत्तेश्च । किं चावधित्वमपि नैकं यतः विभागनिरूपकोऽवधिर्न परत्वप्रथक्त्वादिनिरूपक इत्यास्तां विस्तरः । काशिकावृत्तौ निर्धारणाश्रये यस्मिन् विभक्तमस्ति ततः पञ्चमी भवतीति व्याख्यातं तदनुरोधेन प्रकृतेऽपि तथा व्याख्यातं निर्धारणं तु विशेषेण वक्ष्यते । यदि च नागरिकेषु पाटलिपुत्रेभ्य आढ्यतरा माथुरा इति नरेषु क्षत्रिया वैश्येभ्यः शूरा इति च प्रयोगस्तदा वृत्तौ निर्धारणाश्रय इत्युपादानं युक्तमेवेति ।

इत्यकारकपञ्चम्यर्थनिर्णयः ।

इति विभक्त्यर्थनिर्णये पञ्चमीविवरणं समाप्तम् ।

॥ अथ षष्ठी ॥

ङस्ओस्आमिति त्रयः प्रत्यया एव ङकारोऽनुबन्धः क्व चिदप्यश्रूयमाणत्वान्न वाचकताकुक्षिप्रविष्ट इति सुमनसः सौकुमार्यं सुमनसोः सौरभ्यं सुमनसां मार्दवमित्यादौ श्रूयमाणत्वादसत्त्वेन ओस ओस्त्वेन आम आन्त्वेन वाचकत्वमनुशासनसिद्धः षष्ठ्यर्थः। अनुशासनं च "षष्ठी शेषे" इति उक्तेभ्यः कर्मादिभ्यः प्रातिपदिकार्थादिभ्यश्च भिन्नः शेषः। काशिकाकृतस्तु यच्चाप्रधानं तच्छेषशब्देनोच्यते तदुभयत्र पर्यायेण वा षष्ठी भवतीत्याहुः। तच्च शेषस्तावद्भिन्नत्वेन अप्रधानमपि तत्त्वेन न षष्ठीवाच्यं किं तु शेषत्वेन शेषत्वं सम्बन्धत्वं सप्रतियोगिकत्वे सति सानुयोगिकत्वं प्रतियोगित्वानुयोगित्वनिरूपकतावच्छेदकधर्मवैशिष्ट्यमिति यावत् एकशतं षष्ठ्यर्था इति महाभाष्यपरिगणितमपि न प्रवृत्तिनिमित्तानामनेकविधत्वं ज्ञापयति किं तु शेषव्यक्तीनां सम्भवति शक्त्यैक्ये अनन्तशक्तिकल्पनाया अन्याय्यत्वात् दर्शितधर्मवान् शेषः संयोगसमवायस्वत्वकर्तृत्वादिकारकविषयत्वादिभेदादनेकविधः हिमानां गिरिः गजस्यालानं वल्लिकाया स्तम्भ इत्यादौ षष्ठ्यर्थः संयोगस्तत्र प्रकृत्यर्थस्य प्रतियोगितयाऽन्वयः पुरुषस्य दण्डः कर्णस्यावतंसः हृदयस्य हार इत्यादौ षष्ठ्यर्थसंयोगे प्रकृत्यर्थस्यानुयोगितयाऽन्वयः। हिमप्रतियोगिकसंयोगवान् गिरिरित्यादिरन्वयबोधः। पुरुषानुयोगिकसंयोगवान् दण्ड इत्यादिरन्वयबोधः। वृक्षस्य शाखेत्यादौ समवायः षष्ठ्यर्थस्तत्र प्रकृत्यर्थस्य प्रतियोगितयाऽन्वयः।

वृक्षप्रतियोगिकसमवायवती शाखेत्यन्वयबोधः। पटस्य नीलिमेत्यादौ समवेतत्वं षष्ठ्यर्थस्तत्र प्रकृत्यर्थस्य निरूपितत्वेनान्वयः पटनिरूपितसमवेतत्ववान्नीलिमेत्यन्वयबोधः। राज्ञः पुरुष इत्यादौ स्वत्वं षष्ठ्यर्थस्तत्र निरूपितत्वेनान्वयः राजनिरूपितस्वत्ववान् पुरुष इत्यन्वयबोधः। पुरुषाणां राजा चित्राणां गवामयं नक्षत्राणां शशीत्यादौ स्वामित्वं षष्ठ्यर्थस्तत्र निरूपितत्वेन प्रकृत्यर्थस्यान्वयः पुरुषनिरूपितस्वामित्ववान्राजेत्यादिरन्वयबोधः सतां गतमित्यादौ कर्तृत्वं षष्ठ्यर्थस्तत्राधेयतया प्रकृत्यर्थस्यान्वयः। ओदनस्य पक्तेत्यत्र कर्मत्वं षष्ठ्यर्थस्तत्र निरूपितत्वेन प्रकृत्यर्थस्यान्वयः फलानां तृप्तः पयसामभिषेक इत्यादौ करणत्वं व्यापारः षष्ठ्यर्थस्तत्र प्रयोज्यतया प्रकृत्यर्थस्यान्वयः ब्राह्मणस्य दानमित्यादौ संप्रदानत्वं स्वत्वोद्देश्यतायाः अवच्छेदकत्वस्वरूपं षष्ठ्यर्थस्तत्राधेयतया प्रकृत्यर्थस्यान्वयः कान्तस्य त्रस्यतीत्यादौ दर्शितभयहेतुत्वस्वरूपमपादानत्वं षष्ठ्यर्थस्तत्राधेयतया निरूपकतया वा प्रकृत्यर्थस्यान्वयः। पाकस्य गृहमित्यादावधिकरणत्वं पीठस्योपवेशनमित्यादौ वाधेयत्वस्वरूपमधिकरणत्वं षष्ठ्यर्थस्तत्र निरूपकतया प्रकृत्यर्थस्यान्वयः शास्त्रस्य ज्ञातेत्यादौ विषयत्वं षष्ठ्यर्थः भ्रमस्य रजतमित्यादौ विषयत्वं षष्ठ्यर्थस्तत्र निरूपकतया प्रकृत्यर्थस्यान्वयः अस्य पिता अस्य पुत्र इत्यादौ जनकत्वं जन्यत्वं षष्ठ्यर्थस्तत्र प्रकृत्यर्थस्य निरूपकतयान्वयः यदि च पितृत्वादिकं जनकत्वादिघटितं तदा निष्ठत्वं षष्ठ्यर्थस्तत्र प्रकृत्यर्थस्य प्रतियोगितयान्वयः। ए-

वमन्याङ्गशोऽपि शेषो बोध्यः । करणेऽर्थे षष्ठीं ज्ञापयति । "ज्ञोऽविदर्थस्य करणे" इति सूत्रम् । जानातेरविदर्थस्य करणे कारके षष्ठी विभक्तिर्भवतीत्यर्थकम् । अविदज्ञानमिन्नमथ वाऽज्ञानं मोहो मिथ्याज्ञानमिति यावत् ज्ञानभिन्नप्रवृत्तिरूपोऽर्थो बोध्यः । तथा हि काशिका प्रवृत्तिवचनो जानातिरविदर्थो भवति अथ वा मिथ्याज्ञानवचन इति सर्पिषो जानीत इत्यत्र षष्ठ्याः स्वजन्यं स्वविषयकप्रत्यक्षं व्यापारः करणत्वमर्थः प्रयोज्यतया प्रवृत्तिरूपे धात्वर्थेऽन्वेति । मिथ्याज्ञानरूपे धात्वर्थे तु षष्ठ्या लयो व्यापारोऽर्थः लयस्तु तथाविधं धारणाऽऽपन्नं प्रत्यक्षं तज्जन्यदृढसंस्कारजन्यं स्मरणं वा तथा च सर्पिःप्रत्यक्षप्रयोज्यप्रवृत्त्याश्रयत्वं वाक्यार्थः । अथ वा सर्पिर्लयप्रयोज्यं सर्पिस्तादात्म्यावगाहिसकलवस्तुविषयकं यन्मिथ्याज्ञानं तदाश्रयत्वं वाक्यार्थः । यो यद्विषयकलयवान्स तन्मयं जगत्पश्यतीति । एवं मधुनो जानीत इत्यादावप्यनया रीत्याऽन्वयो बोध्यः । अधीगादिकर्मणि षष्ठीं ज्ञापयति । "अधीगर्थदयेशां कर्मणि" इति सूत्रम् । अधिपूर्वकस्येङ्धातोः स्मरणमर्थस्तदर्था ये धातवस्तेषां दयधातोरीशधातोश्च कर्मणि षष्ठी विभक्तिर्भवतीत्यर्थकं मातुरध्येति स्मरति चिन्तयति वेत्यादौ षष्ठ्या अधेयत्वस्वरूपं कर्मत्वमर्थः फले विषयत्वेऽन्वेति । मातृवृत्तिविषयतानिरूपितस्मरणाश्रयत्वं वाक्यार्थः । दय दानगतिरक्षणेषु इति दयतेस्त्रयोऽर्थाः तेषां कर्मणि षष्ठी तव दाने यथा सर्पिषो मधुनो वा दयते इत्यत्र सर्पिष्कर्मकं मधुकर्मकं वा यद्दानं तदाश्रय-

त्वं वाक्यार्थः । गतौ यथा तीर्थस्य दयते इत्यत्र तीर्थकर्मकगमनाश्रयत्वं वाक्यार्थः । रक्षणे यथा दीनस्य दयते इत्यत्र दीनकर्मकरक्षणाश्रयत्वं वाक्यार्थः । ईश ऐश्वर्ये इतीशधातोरैश्वर्यमर्थस्तच्च स्वत्वफलनिरूपकं स्वामित्वमैश्वर्यकर्मणि षष्ठी यथा सर्पिष ईष्टे इत्यत्र सर्पिर्वृत्तिस्वत्वनिरूपकत्वाश्रयत्वं वाक्यार्थः । एवं ग्रामस्य देशस्य नगरस्य पौरस्य वा ईष्टे इत्यादावप्यनया रीत्याऽन्वयो बोध्यः । कृञः कर्मणि षष्ठीं ज्ञापयति । "कृञः प्रतियत्ने" इति सूत्रम् । कृञः कर्मणि षष्ठी विभक्तिर्भवति प्रतियत्ने गम्यमाने इत्यर्थकं सतो गुणान्तराधानम्प्रतियत्नइति काशिका । एधोदकस्योपस्कुरुते पाचक इत्यत्र षष्ठ्याः कर्मत्वमर्थो धात्वर्थ उपकरणेऽन्वेति उपकरणं संन्निधापनं तथा चैधोदककर्मसंनिधापनप्रयत्नाश्रयः पाचक इत्यन्वयबोधः । तदनन्तरं सतः पाकस्य क्षिप्रसम्पत्तिरूपगुणाधायकमेधोदकसन्निधापनमिति वैयञ्जनिको बोध इति वृत्तिस्वरसादवगम्यते । वस्तुतस्तु प्रतियत्नो द्वितीययत्नः स चोपकारस्वरूप उपपूर्वकस्य करोतेरर्थस्तत्कर्मणि षष्ठी विभक्तिर्भवतीति सूत्रार्थः । अत एव उपात्प्रतियत्नेति सूत्रेण विहितस्य सुट आगमत्वान्निरर्थकस्य धात्वर्थप्रतियत्नद्योतकत्वमुक्तम् । उपकारश्च द्विविधः उप समीपे करणं स्थापनं सन्निधापनमिति यावत् । इत्येक एतस्यैव प्रतियत्नस्य द्योतकः सुडागमः । द्वितीयस्तु दुःखनाशसुखान्यतरानुकूलव्यापारस्वरूप एतस्मिन्प्रतियत्ने विवक्षिते न सुडागमः आद्यो यथा एधोदकस्योपस्कुरुते पाचकः इत्यत्रान्वयबोधः पूर्ववदेव । द्विती-

यो यथा दीनस्योपकुरुते कारुणिक इत्यादौ षष्ठ्या आधेयत्वस्वरूपं कर्मत्वं दुःखनाशादौ फलेऽन्वेति तथा च दीनवृत्तिदुःखनाशानुकूलप्रयत्नाश्रयः कारुणिक इत्यन्वयबोधः क्व चित्प्रतिक्रियाऽपि प्रतियत्नः प्रतिक्रिया च क्रियाविघातकक्रिया सा च प्रतिपूर्वकस्य करोतेरर्थः। तत्कर्मण्यपि षष्ठी यथा "गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत भिषक्स्वभेषजैः" इत्यादौ प्रतिक्रिया क्रियाऽभिघातकक्रिया धात्वर्थस्तत्र गुर्वादिकर्मत्वस्य षष्ठ्यन्तार्थस्यान्वय इति क्रियाविशेषणस्य कर्मत्वादुपक्रियाविशेषणेऽपि षष्ठी यथा स हि तत्त्वतो ज्ञातः स्वात्मसाक्षात्कारस्योपकरोतीत्यादौ अत्र स्वात्मसाक्षात्काराभिन्नोपकारप्रयत्नाश्रयः स इत्यन्वयबोधः। रुजार्थानां कर्मणि षष्ठीं ज्ञापयति। "रुजार्थानां भाववचनानामज्वरेः" इति सूत्रं भाववचनानां भावकर्तृकाणां रुजार्थानां ज्वरिवर्जितानां कर्मणि षष्ठी विभक्तिर्भवतीत्यर्थकं चौरस्य रुजति रोग इत्यादौ रुजेर्दुःखानुकूलव्यापारोऽर्थः तिङः प्रयोजकत्वमर्थः षष्ठ्या आधेयत्वस्वरूपं कर्मत्वमर्थः पित्तादिविकारो रोगः तथा च चौरवृत्तिदुःखानुकूलधातुविकारस्वरूपव्यापारप्रयोजकः पित्तादिविकार इत्यन्वयबोधः। एवं चौरस्यामयस्यामय इत्यादावप्यन्वयो बोध्यः रुजार्थानामित्युपादानात् "एति जीवन्तमानन्दो नरं वर्षशतादपि इत्यादौ कर्मणि न षष्ठी भाववचनानामित्युपादानात् नदीकूलानि रुजतीत्यादौ कर्मणि न षष्ठी अत्र रुजेर्नाशानुकूलो व्यापारोऽर्थः अज्वरेरित्युपादानात् चौरं ज्वरयति रोग इत्यादौ

कर्मणि न षष्ठी "अज्वरिसंतापोरिति वक्तव्यमि"ति वार्तिकात् चौरं सन्तापयति सन्ताप इत्यादौ कर्मणि न षष्ठी अत्र धातोर्दुःखानुकूल औष्ण्यानुभवार्थः सन्तापशब्दस्योद्भूतस्पर्शवत्तेजःसंयोगोऽर्थ इति । एवं भोक्तृ रुजति बहुभोजनं कामुकस्य क्षयिष्यत्यनवरतरतमित्यादिको भावकर्तृकरुजर्थप्रयोगोऽपीष्ट एवेति । नाथतेः कर्मणि षष्ठीं ज्ञापयति "आशिषि नाथ"इति सूत्रम् । आशीरर्थे वर्तमानस्य नाथतेः कर्मणि षष्ठी विभक्तिर्भवतीत्यर्थकम् । आशीराशंसा लिप्सेति यावत् सर्पिषो नाथते इत्यादौ षष्ठ्या आधेयत्वस्वरूपं कर्मत्वमर्थः तच्च धात्वर्थेच्छाफले विषयत्व उद्देश्यत्वे वाऽन्वेति तथा च सर्पिर्वृत्तिविषयताकेच्छाश्रयत्वं वाक्यार्थः । आशिषीत्युपादानात् माणवकमुपनाथतीत्यादौ कर्मणि न षष्ठी अत्र नाथतेरुपतापोऽर्थः नाथृ नाधृ याञ्ञोपतापैश्वर्याशीःष्वित्यभिधानात् । हिंसार्थकानां कतिपयधातूनां कर्मणि षष्ठीं ज्ञापयति । "जासिनिप्रहणनाटक्राथपिषां हिंसायाम्" इति सूत्रम् । जासिनिप्रहणनाटक्राथपिष इत्येतेषां धातूनां हिंसार्थकानां कर्मणि षष्ठी भवतीत्यर्थकं प्राणात्यन्तवियोगफलकव्यापारो हिंसा तदर्थका एते धातवस्तथा हि उत्पूर्वकस्य प्रणिपूर्वकस्य निपूर्वकस्य प्रपूर्वकस्य च हन्तेरुत्पूर्वकस्य नाटेः क्राथतेः पिषेश्च हिंसार्थः । चौरस्योज्जासयति निप्रहन्ति प्रणिहन्ति निहन्ति प्रहन्ति उन्नाटयति उत्क्राथयति पिनष्टि वेत्यादौ षष्ठ्या आधेयत्वस्वरूपं कर्मत्वमर्थस्तच्च हिंसाफले प्राणात्यन्तवियोगेऽन्वेति तथा च चौरवृत्तिप्राणात्यन्तवि-

योगफलकव्यापाराश्रयत्वं वाक्यार्थः हिंसायामित्युपादानात् । धानाः पिनष्टीत्यत्र कर्मणि न षष्ठी आरम्भकसंयोगनाशफलिकाऽऽरम्भसंयोगफलिका च पार्थिवक्रिया विजातीया पिनष्टेरर्थस्तत्राद्यं फलमादाय माषं पिनष्टीतिप्रयोगः द्वितीयं फलमादाय धानाः पिनष्टीतिप्रयोगः । व्यवहृपणोः कर्मणि षष्ठीं ज्ञापयति । "व्यवहृपणोः समर्थयोः" इति सूत्रम् । व्यवहृपणा वृत्येतयोर्धात्वोः समर्थयोः समानार्थयोः कर्मणि षष्ठी भवतीत्यर्थकं द्यूते क्रयविक्रयव्यवहारे चानयोर्धात्वोः तुल्यार्थता शतस्य व्यवहरते पणते वा इत्यादौ द्यूतं क्रयो विक्रयश्च व्यवहरतेः पणतेश्चार्थः त्यागलाभान्यतरफलकोच्चपातनादिव्यापारो द्यूतं त्यागे स्वत्वनाशप्रकारतानिरूपितविशेष्यत्वस्य तत्संबन्धावच्छिन्नाधेयत्वस्य वा कर्मत्वस्यान्वयः लाभः स्वत्वेच्छा तत्र स्वत्वप्रकारतानिरूपितविशेष्यत्वस्य तत्संबन्धावच्छिन्नाधेयत्वस्य वा कर्मत्वस्यान्वयस्तथा च शतकर्मताकत्यागस्य शतकर्मताकस्य लाभस्य वा फलकं यदुच्चपातनादिकं तदनुकूलकृतिर्वाक्यार्थः क्रयो विक्रयश्च प्रागेव निरुक्तस्तत्र कर्मत्वान्वयोऽपि दर्शित एवेति शतकर्मताकक्रयकर्तृत्वं शतकर्मताकविक्रयकर्तृत्वं च वाक्यार्थः समर्थयोरित्युपादानात् । शलाकां व्यवहरतीत्यादौ कर्मणि न षष्ठी व्यवहरतेर्गणनार्थकत्वात् । तथा च शलाकाकर्मताकपरिगणनकर्तृत्वं वाक्यार्थः । एवं ब्राह्मणं पणायतीत्यादावपि कर्मणि न षष्ठी पणते स्तुत्यर्थकत्वात् अत एवाचायप्रत्ययः "स्तुत्यर्थस्य प-

णतेरायप्रत्यय इष्यत" इति वार्तिकात् तथा च ब्राह्मणाकर्मताकस्तुतिकर्तृत्वं वाक्यार्थ इति । अधिकरणे काले षष्ठीं ज्ञापयति । "क्त्वोऽर्थप्रयोगे कालेऽधिकरणे" इति सूत्रं क्त्वोऽर्थानां प्रत्ययानां प्रयोगे सति कालरूपेऽधिकरणेऽर्थे षष्ठी विभक्तिर्भवतीत्यर्थकं काले इत्यस्य कालवाचिशब्दादित्यर्थस्तथा च कालविशेषवाचिशब्दादधिकरणेऽर्थे षष्ठी भवतीतिसूत्रार्थः । पञ्चक्त्वोऽङ्को भुङ्क्ते इत्यादौ क्रियाभ्यावृत्तिगणने विहितस्य क्त्वसुच्प्रत्ययस्याभ्यावृत्तिमात्रमर्थोऽनन्यलभ्यत्वात् क्रियाया धातुना गणनस्य संख्यार्थकशब्देन लाभात् अभ्यावृत्तिः पौनःपुन्यमुत्पत्तिरिति यावत् । अत एव काशिकायामेककर्तृकाणां तुल्यजातीयानां क्रियाणां जन्म संख्यानं क्रियाभ्यावृत्तिगणनमिति व्याख्यातं तन्नोत्पत्तौ तद्विताथें पञ्चशब्दार्थस्य पञ्चत्वसंख्याविशिष्टस्य द्विशब्दार्थस्य द्वित्वविशिष्टस्य प्रतियोगितयाऽन्वयः पञ्चान्वितोत्पत्तेः धात्वर्थताऽवच्छेदकैकधर्मावच्छिन्नसमानाधिकरणभूते धात्वर्थे प्रतियोगितयाऽन्वयः तत एव क्रियाजन्मसंख्यानलाभः धात्वर्थताऽवच्छेदकैकधर्मावच्छिन्नत्वनिवेशात् चैत्रस्य त्रिर्भोजने द्विर्गमने सति चैत्रः पञ्चकृत्वो भुङ्क्ते गच्छति वेति न प्रयोगः सामानाधिकरण्यनिवेशात् चैत्रस्य त्रिर्भोजने मैत्रस्य द्विर्भोजने सति चैत्रो मैत्रो वा पञ्चकृत्वो भुङ्क्त इति न प्रयोग इति प्रकृत्यर्थविशेषितेन क्त्वोऽर्थप्रत्ययार्थेन विशेषिते धात्वर्थे प्रकृत्यर्थकालविशेषविशेषितस्य षष्ठ्यर्थस्याधेयत्वस्यान्वयः तथा च पञ्चप्रतियोगितानिरूपकोत्पत्तिप्रतियोग्यावृत्तिभोजनक-

र्थं त्वं वाक्यार्थः। व्युत्पत्तिवैचित्र्येण समानाधिकरणे एकधर्मावच्छिन्ने धात्वर्थे क्त्वोऽर्थप्रत्ययार्थस्योत्पत्तेरन्वयः क्त्वोऽर्थप्रत्ययार्थविशिष्टे धात्वर्थे षष्ठ्यर्थस्याधेयत्वस्यापि व्युत्पत्तिवैचित्र्येणान्वयः। अत एव क्त्वोऽर्थप्रयोगोपादानं संगच्छते तदुपादानफलं तु क्त्वोऽर्थप्रत्ययप्रयोगशून्ये अग्नि शुङ्के शेते वेत्यादौ कालेऽधिकरणे न षष्ठी। शाब्दिकास्तु क्त्वोऽविदर्थस्येतिसूत्रेण करणेऽधीगर्थेत्यादिना व्यवच्छपणोरित्यन्तेन सूत्रषट्केन कर्मणि क्त्वोऽर्थेतिसूत्रेणाधिकरणे कारके यत्षष्ठीविधानं तच्छेषत्वेन विवक्षिते बोध्यं "षष्ठी शेष" इत्यतः शेष इत्यस्यानुवृत्तेर्जागरूकत्वात् न चैवं "षष्ठी शेषे" इत्यनेन षष्ठ्यां सिद्धायां दर्शिताष्टसूत्रीप्रणयनं व्यर्थमिति वाच्यम्। सर्पिषो ज्ञानमित्यादौ समासनिषेधफलकतया तत्सार्थक्यात्। न च दर्शिताष्टसूत्र्या न समासनिवृत्तिफलकत्वं किं तु समासे षष्ठीलुग्निवृत्तिफलकत्वं तत एव सार्थक्यसंभवादिति वाच्यम्। अलुक्समासे प्रमाणाभावात् समासनिषेधफलकत्वस्यानुशासनिकस्यौचित्यात् तथा च वार्तिकं "प्रतिपदविधाना षष्ठी न समस्यत" इति। हरिरप्याह।

कारकैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः।
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये॥

इति प्रतिपदमित्यत्र प्रतियोगे इत्थंभावाख्याने द्वितीया संबन्धमभिधत्ते तथा च पदसंबन्धिनी षष्ठी कारकव्यपदेशवतौ श्रूयमाणक्रिये सूत्रे प्रोक्ता समासनिवृत्त्यर्थेत्यन्वयबोधः। पदसंबन्धस्तु कारकविशेषसंबन्धेन धातुविशेषसंबन्धो बोध्यः। इत्थं च सर्पिषो ज्ञानं मा-

तुः स्मरणमित्यादिकः प्रयोगः शेषत्वविवक्षायामसमस्त एव साधुः । हरिस्मरणमित्यादिसमासस्तु शेषत्वाविवक्षायां कृद्योगषष्ठ्या बोध्यस्तत्र कारकपूर्वकत्वात् । गतिकारकेत्यादिना विहितः कृदुत्तरपदप्रकृतिस्वरो मध्योदात्तो भवति शेषषष्ठ्या समासोपगमे त्वन्तोदात्तस्तत्पुरुषस्वरः स्यादिति स्वरार्थमयमष्टसूचीति निर्गलितार्थः । किं च मातुः स्मृतमित्यादौ समासाभावोऽष्टसूत्र्या ज्ञाप्यते कृद्योगप्रयुक्तकर्मषष्ठ्या निष्ठायां निषेधात् कर्मविषया षष्ठी निष्ठायां प्रतिषिध्यत इत्युक्तेः शेषषष्ठ्या समासस्तु दर्शिताष्टसूत्रीज्ञाप्यनिषेधस्य विषय एवेति वदन्ति । अत्रेदं चिन्त्यं हरिस्मरणमित्यादौ कृदुत्तरपदप्रकृतिस्वरो मध्योदात्तो नान्तोदात्तः शेषषष्ठीतत्पुरुषस्वर इति नायं शेषषष्ठीतत्पुरुष इति तु तदैव संगच्छते यदि च सुगन्धिं पुष्टिवर्द्धनमित्यादिवैदे कारकस्य शेषत्वविवक्षायां पुष्टिवर्द्धनशब्दस्य शेषषष्ठीतत्पुरुषसमासोपगमेऽन्तोदात्तस्वर उपलभ्येत नायं हृष्टचर इति न किञ्चिदेतत् मातुः स्मृतमित्यादावपि न शेषषष्ठ्या निषेधः न लोकेतिनिषेधस्य "नपुंसके भावे उपसंख्यानमि"तिवार्त्तिकेन प्रतिप्रसवात् । न च कर्मषष्ठ्या निष्ठायां निषेध इति वाच्यं निष्ठायां निषेधस्याप्रामाणिकत्वात् प्रामाणिकत्वे तु क्तवतुमात्रविषयत्वात् । अत एव ग्रामस्य गतमोदनस्य भुक्तमित्यादिको भावाधिकरणक्तान्ते कर्मविषयषष्ठीप्रयोगः प्रामाणिकानां संगच्छते । किं च दर्शिताष्टसूत्र्याः शेषषष्ठीसमासनिषेधफलकत्वाभ्युपगमे सुरेशिता जनेशिता

नदीशितेत्यादिकः षष्ठीसमासो न स्यात् कर्मषष्ठ्याः तृणि न लोकेत्यनेन निषेधात् दर्शिताष्टसूत्र्या शेषषष्ठीसमासनिषेधस्य ज्ञापनादिति तस्मात्करणे कर्मणि अधिकरणे तत्त्वेन विवक्षितेऽष्टसूत्र्या षष्ठी विधीयते न चैवं कारकविभक्तेर्ज्ञापकं विना स्वार्थकविभक्त्यन्तरबाधकत्वनियमात् दर्शितोदाहरणेषु तृतीयाद्वितीयासप्तमीनां बाधप्रसङ्ग इति वाच्यम् । ईदृशनियमे मानाभावात् पुष्पेभ्यः पुष्पं वा स्पृहेरर्थभेदेन चतुर्थीद्वितीययोरुपपत्तिरिति वाच्यं प्रकृतेऽप्यर्थभेदसंभवात् । अतिशयितस्य द्विविधाविदर्थस्य करणेऽतिशयितस्याध्यानस्य दयत्यर्थत्रितयस्येश्वर्यस्य प्रतियत्नादेश्च तत्तत्सूत्रप्रदर्शितधात्वर्थस्य कर्मणि षष्ठीविधानात् । अनतिशयितस्य तु करणे कर्मणि सामान्यतस्तृतीयाद्वितीययोर्विधानात्कृत्वोऽर्थप्रयोगेऽधिकरणे कालिकसंबन्धावच्छिन्नाधेयत्वस्य विवक्षायां षष्ठी विधानादाधेयत्वमात्रविवक्षायां सामान्यतः सप्तमीविधानाद्दर्शितत्तद्धातुप्रयोगे तृतीयाद्वितीयासप्तमीनामपि नानुपपत्तिः । न चैवं दर्शितयोर्वार्त्तिकहरिकारिकयोर्विरोधात् नैषा रीतिर्युक्तेति वाच्यं सूत्रविरोधापेक्षया तयोर्विरोधस्याकिंचित्करत्वात् यदि च तयोरपि विरोधो न युक्तः तदा तयोः कारकषष्ठ्याः समासनिषेधपरत्वमभ्युपेयम् अत एव हरिकारिकायां कारकैर्व्यपदिष्ट इत्यादिसार्थकं हरिस्मरणमित्यादिकः शेषषष्ठ्याः समासः अत एव जनेशितेत्यादिप्रयोगोपपत्तिः न चैवं स्वरविपर्ययापत्तिरिति वाच्यम् । दत्तोत्तरत्वात् कारकस्य कारकत्वशेषत्वोभयविवक्षायां

षष्ठीसमासयोः स्वरवैचित्र्यस्याद्दृष्टचरत्वादित्यलं विस्तरेण । दिवः कर्मणि षष्ठीं ज्ञापयति । "दिवस्तदर्थस्य" इति सूत्रम् । व्यवहृपणिसमानार्थकस्य दीव्यतेः कर्मणि षष्ठी विभक्तिर्भवतीत्यर्थकम् । शतस्य दीव्यतीत्यादौ षष्ठ्याः कर्मत्वमर्थस्तथा च शतकर्मताकद्यूतकर्तृत्वं पूर्ववत् वाक्यार्थः । यदि च क्रयविक्रयावपि दिवोऽर्थौ वितं तदा शतकर्मताकक्रयादिकर्तृत्वं वाक्यार्थः । यद्यपि पूर्वसूत्रे दिवः कथने पृथक्सूत्रप्रणयनं न भवतीति लाघवं संभवति तथाप्यग्रिमसूत्रेऽनुवृत्त्यर्थं पृथक्सूत्रारम्भ इति । सोपसर्गस्य दिवः कर्मणि वैकल्पिकीं षष्ठीं ज्ञापयति । "विभाषोपसर्गे" इति सूत्रम् । उपसर्गे सति दिवस्तदर्थस्य कर्मणि विभाषा षष्ठी विभक्तिर्भवतीत्यर्थकं शतस्य शतं वा प्रतिदीव्यतीत्यादौ षष्ठीद्वितीययोः कर्मत्वमर्थः । वाक्यार्थस्तु दर्शित एवेति उपसर्गे विभाषोपदेशात् निरुपसर्गस्य दिवोऽर्थस्य द्यूतादेरतिशयितस्यापि कर्मणि न द्वितीया किन्तु षष्ठ्येवेति प्रतीयते द्यूतादिभिन्नार्थकस्य दिवः सोपसर्गस्यापि कर्मणि द्वितीयैव न तु षष्ठी यथा शलाकां प्रतिदीव्यतीत्यादौ । निरुपसर्गस्य दिवः कर्मणि क्व चित्षष्ठ्यपवादं ज्ञापयति । द्वितीया ब्राह्मणे इति सूत्रं ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि द्वितीया विभक्तिर्भवतीत्यर्थकं ब्राह्मणः संहितेतरवेदभागो विप्रश्च आद्ये गामस्य तदहः सभायां दीव्येयुरिति अत्र निरुपसर्गस्य दिवस्तदर्थस्य कर्मणि द्वितीयाप्रयोगो ब्राह्मणभागान्तर्भूत एव अथ ब्राह्मणभागस्य सम्यगुच्चारणे न देवने गोः क-

मत्वं प्रतीयते द्वितीये विप्रस्य गां दीव्यति विप्रो गां दीव्यतीत्यत्र द्वितीयया षष्ठ्यपवाद इति। तिङन्त-विशेषस्य कर्मणि षष्ठीं ज्ञापयति। "प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने" इति सूत्रम्। दृष्यतेर्दैवादिकस्य लोटम-ध्यमपुरुषैकवचनं प्रेष्य इति तत्राहचर्याब्रुविरपि तथाभूत एव गृह्यते इति प्रेष्यब्रूहिइत्येतयोः तिङन्तयोः कर्मणि हविषः षष्ठी भवति देवतायां संप्रदाने सतीत्यर्थकं हविषो हविर्वाचकशब्दादित्यर्थः। अग्नये छागस्य हविषो वपाया मेदसो वा प्रेष्य अग्नये छागस्य हविषो वपाया मेदसो वाऽनुब्रूहीत्यादौ प्रपूर्वकस्येष्यतेरनुपूर्वकस्य ब्रुवेश्च दानमर्थः षष्ठ्यास्तु कर्मत्वमर्थस्तथा चाग्निसंप्रदानताकच्छागकर्मताकाशंसाविषयदानकर्तृत्ववांस्त्वमित्यादिरन्वयबोधः प्रेष्यब्रुवोरित्युपादानात् अग्नये छागं हविर्वपां मेदो वा जुह्वधीत्यादौ धात्वन्तरकर्मणि न षष्ठी। हविष इत्युपादानादग्नये गोमयानि प्रेष्येत्यादौ कर्मणि न षष्ठी। देवतासंप्रदान इत्युपादानात् माणवकाय पुरोडाशं प्रेष्येत्यादौ कर्मणि न षष्ठी। "हविषः प्रस्थितस्य प्रतिषेधो वक्तव्य"इति वार्तिकम् प्रस्थितशब्दसमानाधिकरणहविःशब्दात्षष्ठीं निषेधति। यथा इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्येत्यादौ प्रस्थितं प्रकर्षेण स्थितं प्रकर्षस्तु प्रोक्षणाभिमन्त्रणयथोक्तस्थानकत्वं बोध्यमिति। संप्रदानेऽर्थे षष्ठीं ज्ञापयति। चतुर्थ्यर्थे बहुलं छन्दसि इति सूत्रं छन्दसि चतुर्थ्यर्थे संप्रदानत्वादौ षष्ठी विभक्तिर्भवति बहुलमित्युपादानात् चतुर्थी क्व चि-

क्रिया संबध्यते तद्वत् कृतपूर्व्यादिषु स्थिता ।

कर्त्रा कर्तृसंसृष्टेन क्रिया भावना तद्वता योगः तदेकदेशभावनायामन्वयः अविगृह्य प्रधानकारकान्वयिनीति तदर्थं इति वदन्ति । तच्चिन्त्यं कृतशब्दार्थस्य करणकर्मणस्तद्वितार्थभावनायामन्वये कटमिति द्वितीयान्तार्थस्यानन्वयापत्तेः एककर्मावरुद्धायां कर्मान्तरान्वयस्यानाकाङ्क्षितत्वात् । किं च भावनायामेव कारकान्वय इति न सम्भवति ओदनस्य पाकः इत्यादौ षष्ठ्यर्थकर्मणोऽनन्वयप्रसङ्गात् । भावकृतां भावनाबोधकत्वविरहात् । तथात्वाभ्युगमे तु कर्मकर्तृभावनाभ्यां कर्मकर्त्रोराक्षेपेऽनभिहिताधिकारीययोः कर्मकर्तृषष्ठ्योरनुपपत्तिप्रसङ्गात् । न चौदनस्य पाकः चैत्रस्य पाक इत्यादौ शेषषष्ठीव कृद्योगषष्ठी कर्मकर्तृकृत्सु चोपेयत इति वाच्यम् । "उभयप्राप्तौ कर्मणी"ति सूत्रस्य निर्विषयकत्वापत्तेः न च करणादिकृत् तद्विषय इति वाच्यम् । करणादिकृतोऽपि भावनाबोधकत्वस्य विरहात् कर्तृकर्मणोरन्वयाप्रसक्त्या निर्विषयत्वतादवस्थात् करणादिभावनाया अतिरिक्ताया अप्यभ्युपगमे तत्रापि कर्तृकर्मणोरन्वयासंभवात् निर्विषकत्वतादवस्थ्यात् यदि च गुणानां चेतिन्यायेन भावनायां कारकत्वेनान्विते धात्वर्थे न कारकान्वय इत्येवाभ्युपेयते न तु षष्ठ्याद्यन्तेन प्रधानवदुपस्थापिते तस्मिन्निति तदा भवतु भावकृदन्तार्थे षष्ठ्यर्थकारकान्वयः तावता न नः कापि क्षतिरिति । ननु कृतपूर्वीकटमित्यादौ कृतशब्दार्थस्य करणकर्मणस्तद्वितार्थभावनायामनन्वयेऽसामार्थ्याद् इत्यनु-

प्पत्तिरन्वये तु तेनैव कर्माकाङ्क्षाविच्छित्तेः कटादेः कर्मतया तत्रान्वयासंभवः सूत्रे कृतीतिव्यर्थं षष्ठ्यप्रसक्तेः कर्मणोऽभिधानात्। अत्रापि कटमिति द्वितीयाऽनुपपत्तिश्चेति चेत्। अत्र शाब्दिकाः। कृतमिति भावक्तान्तमविवक्षितकर्मकं पूर्वशब्देन समासमासाद्य कर्तृतद्धितस्य प्रकृतिर्भवतीति कृतपूर्वीशब्दस्त्रिघ्नः प्राक्कालिककरणकर्त्तेतिशाब्दबोधमर्जयति तत्र भावक्तान्तकृत्यर्थे कटकर्मत्वस्यान्वय इति वदन्ति। अत्र गुरुचरणाः। भावक्तान्ते कर्मान्वयो न युज्यते। अविवक्षितकर्मण्य एव भावप्रत्ययाद् अन्यथा गतं गम्यते वेत्यादौ भावप्रत्ययान्ते ग्राममिति द्वितीयान्तार्थस्य ग्रामकर्मकत्वस्यान्वयप्रसङ्गात्। कर्मणो विवक्षायां भावप्रत्ययस्य विवक्षायां कर्मान्वयस्याव्युत्पन्नत्वात् किं च कृतपूर्वीत्यत्र कृत्यर्थे कर्मान्वयोपगमे कृतीत्यनेन कथं कर्मषष्ठीवारणं निष्ठापर्युदासानुसरणे तु किं कृतीत्युपादानेन तस्मात्कृतपूर्वीत्यत्र कृतादिपदार्थपरित्यागेन तद्धितस्य प्राक्कालिकभावनावानर्थः। यदि च पक्वपूर्वी वेदानित्यादेः पर्यायत्वमाशङ्क्यते तदा पाकादिभावनावानेव तद्धितार्थः। तद्धितार्थैकदेशे पाकादौ षष्ठ्यर्थकर्मत्वान्वयवारणाय सूत्रे कृतीत्युपादानम्। ननु विग्रहे समासे च विवक्षितस्यापि निष्ठार्थस्य कर्तृतद्धितोत्पत्तौ सत्यां निष्ठाया अविवक्षाया निरर्थकत्वं युज्यते न तु धातोरतो धात्वर्थे तदुपहिततद्धितार्थभावनायां वा कर्मान्वयः सम्भवति तावतैव कृतीत्युपादानसार्थक्यं किं तद्धितानां पाकादिनानाभावनावदर्थकतया नानार्थताऽभ्युपगमेनेति

चेत् । मैवं यतो निष्ठाया निरर्थकत्त्वाभ्युपगमेऽपि धातोः कृदन्तत्वमक्षतमिति षष्ठीप्रसक्तेर्दुर्वारतया सूत्रे कृतीत्युपादानमनर्थकमिति कृतीत्युपादानसामर्थ्यादेव क्तान्तं निरर्थकमवसीयत इति तद्धितेनिप्रत्ययस्य नानार्थकत्वमनन्यगतिकतयाऽभ्युपेयते क्तान्तन्तु प्रकारवचनादिवत् तत्तद्भावनावन्तमुपस्थापयति पक्वपूर्वीत्यत्र पाकानुकूलभावनावान् कृतपूर्वीत्यत्र करणभावनावान् प्रतीयते तत्र तद्धितार्थैकदेशे पाके भावनाया वौदनकर्मत्वस्य करणे भावनायां वा कटकर्मत्वस्य विवक्षायामोदनपदात्कटपदात्षष्ठीं वारयति सूत्रे कृतीति द्वितीया तु सामान्यतो विहिता भवत्येवेति पक्वपूर्वी ओदनं कृतपूर्वी कटमित्यादौ कर्मणि न षष्ठी किं तु द्वितीयैवेति पदवाक्यरत्नाकरे प्राहुः । शाब्दिकनव्यास्तु कृतं पूर्वमनेनेति विग्रहे ऽविवक्षितकर्मतया भावे क्तप्रत्यये कृते कर्मसापेक्षत्वाभावात्समासतद्धितौ भवत एव तथा च कृतपूर्वीत्यस्यपूर्वं कृतवानित्यनेन समानार्थकः संपद्यते तद्धिते सति वृत्तिभेदात् कर्मविवक्षायां गुणभूतयाऽपि क्रियया कारकाणां संबन्धस्य कटं कृतवानित्यादौ दर्शनाच्चापि कटकर्मत्वान्वयः तत्र कर्मणि षष्ठीवारणाय सूत्रे कृतीत्युपात्तं न च क्तस्य कृत्त्वात् कृदुपादानेऽपि षष्ठीप्रसक्तिर्दुर्वारैवेति वाच्यम् सूत्रे कृत्यदस्य प्रत्ययान्तराप्रकृतिभूतस्यैवोपादानात् कृतपूर्वशब्दस्य तद्धितप्रकृतितया क्तान्तकृतशब्दस्य तद्धितप्रकृतित्वात् । तण्डुलस्य पाचकतम इत्यादौ षष्ठ्या असाधुत्वमिष्टमेव अत एव तण्डुलं पाचकतम इत्यादिप्रयोगं साधुं कालापा

मन्यन्त इत्याहुः । तच्चिन्त्यं विग्रहवाक्ये विवक्षितकर्मकस्य दृत्तिवाक्ये सकर्मतयाऽदृष्टचरत्वादन्यथा शोभनं पचनमत्रेतिविग्रहेऽविवक्षितकर्मतया भावे ल्युट्प्रत्यये वचनशब्दस्य समासतद्धितयोः कर्मविवक्षायां तण्डुलं शोभनपचनवद्गृहमिति प्रयोगापत्तिः । यद्पि प्रत्ययान्तराप्रकृतित्वं कृतो विशेषणं तदपि न सुन्दरं तण्डुलं पाकतरः तण्डुलं पाकवद्गृहमितिप्रयोगापत्तेश्च वस्तुतस्तु भावप्रत्ययमाचख्याकर्मकेभ्यो न विधानमोदनस्य भुक्तं तण्डुलस्य पाक इत्यादौ षष्ठ्यर्थकर्मत्वस्यानन्वयप्रसङ्गात् । किं तु भावे लकारस्यैव भावे चाकर्मकेभ्य इत्यनुशासनेन तद्विधावकर्मकेभ्य इत्युपादानात् । न चैवमोदनं भुक्तं तण्डुलं पाक इत्यादिकः कर्मद्वितीयासमभिव्याहृतः प्रयोगः स्यादिति वाच्यं कृतिषष्ठ्या द्वितीयाऽपवादात् । एतदर्थमेव सूत्रे कृतीत्युपादानमन्यथा सामान्यतः कर्मणि द्वितीयाषष्ठ्योरुभयोर्विधाने वैकल्पिकताऽऽपत्तेः । नन्वेवं कृतपूर्वीकटमित्यादौ निष्ठास्वरूपकृद्योगस्यावैकल्यात् । कर्मणि षष्ठीप्रसङ्गो द्वितीयाऽपवादप्रसङ्गश्च न च "न लोके" तिसूत्रेण निष्ठायोगे षष्ठीनिषेधान्नैवमिति वाच्यं "नपुंसके भावे उपसंख्यानमि"ति वार्तिकेन भावे क्तस्ययोगे षष्ठीप्रतिप्रसवादिति चेन्मैवं सूत्रे कृतीत्यत्र कृत्पदस्य विशेषपरत्वात् । तथा हि क्तप्रकृतिकत्वेन विवक्षितस्य प्रत्ययस्य प्रकृतिभूतो यः कृत् तद्योग एव कर्तृकर्मणो षष्ठीविधानं "सपूर्वाच्चे"तिसूत्रेणेनिप्रत्ययविधाने पूर्वशब्दस्य सपूर्वकत्वं क्तान्तशब्दपूर्वकत्वमेवान्यथा कुड्यपूर्वीत्यादि-

भयषष्ठीप्रयोगे कर्तरि षष्ठी न साधुरिति ज्ञाप्यते तेन नलस्य पाको भीमस्य पाक इत्यादिप्रयोगाणां नानुपपत्तिः गोपस्य दोह इत्यादिप्रयोगोऽपीष्ट एव अककारयोः स्त्रीप्रत्ययोः प्रयोगे "न शेषे विभाषेति वक्तव्यमि"ति वार्तिकं स्त्रीप्रत्ययेऽकप्रत्ययान्ते अकारप्रत्ययान्ते च न कर्तर्यपि षष्ठीनिषेधः शेषे उक्तोभयप्रत्ययान्तभिन्ने स्त्रीप्रत्यये कर्तरि विभाषा षष्ठीभवतीत्यर्थकं तेन ण्वुल्प्रत्ययान्ते स्त्रीप्रत्ययान्ते कर्तृकर्मणोरुभयोः षष्ठी यथा रुद्रस्य भेदिका जगतः । रुद्रकर्तृकं जगत्कर्मकं भेदनं वाक्यार्थः भावे ण्वुल्विधानात् भेदनमर्थः । अकारप्रत्ययान्ते स्त्रीप्रत्यान्ते तदुभयोः षष्ठी यथा रुद्रस्य बिभित्सा जगत इत्यादौ रुद्रकर्तृका जगत्कर्मकभेदनेच्छा वाक्यार्थः । अप्रत्यादित्यनेन भावेऽकारविधानात् भेदनेच्छार्थः । एवं भदिका देवदत्तस्य काष्ठानां चिकीर्षा यज्ञदत्तस्य कटस्येत्यादौ दर्शितरीत्या वाक्यार्थो बोध्यः । शेषे कर्तरि विभाषा षष्ठी यथा विचित्रा सूत्रस्य कृतिः पाणिनेः पाणिनिना वेत्यादौ अत्र सूत्रपदोत्तरषष्ठ्याः कर्मत्वमर्थः पाणिनिपदोत्तरषष्ठीतृतीययोः कर्तृत्वमर्थः कृतावन्वेति । काशिकावृत्तौ सुट्तिथोरितिसूत्रव्याख्याने सौयुटो लिङ्वागमो तेन भिन्नविषयत्वात् सुटा बाधो न भवतीत्युक्तं तत्र बाधशब्दः पुमानेव यदि बाधाशब्दः स्त्रीप्रत्ययान्तस्तदा सौयुटइति शेषे षष्ठी लिङागमिनोऽन्वयानुरोधात् । षष्ठ्यर्थसंबन्धस्यानुषङ्गेण बाधायामन्वयस्तत्र सुट्हेतुकत्वाभावः प्रतीयते । सुटेतिहेतौ न तु करणे तृतीया । कर्तुराकाङ्क्षाया

अनिष्टत्तेरिति । के चिदविशेषेण विभाषामिच्छन्ति । अविशेषेण स्त्रीप्रत्ययाकारप्रत्ययययोर्विवक्षां विनेत्यर्थः विभाषामित्यत्र कर्तरिषष्ठया इत्यादि यथा शब्दानामनुशासनमाचार्येणाचार्यस्य वेत्यादौ शब्दपदोत्तरषष्ठ्याः कर्मत्वमाचार्यपदोत्तरतृतीषष्ठ्योः कर्तृत्वमर्थोऽनुशासनेऽन्वेति । गुणकर्मणि वेष्यते इतीष्टा नेता ऽश्वस्य सुद्युम्नस्य सुद्युम्नं वेत्यादौ सुद्युम्नादौ गुणकर्मणि वैकल्पिकीं षष्ठीं शाब्दिका उदाहरन्ति । तत्रेयमिष्टिर्न युज्यते गवां दोह इत्यादौ गुणकर्मणि गवादौ द्वितीयाया अप्रयोगात् । यदि युज्यते तदा नयत्यादिगणगुणकर्मण्येवेति निष्ठायोगे निषेधस्यापवादार्थं षष्ठीं ज्ञापयति । "क्तस्य वर्तमाने" इति सूत्रं । वर्तमानकालार्थकस्य क्तस्य योगे षष्ठी भवतीत्यर्थकं "मतिबुद्धिपूजार्थेभ्यश्चे"ति सूत्रेण वर्तमानधात्वर्थकर्मणि क्तस्य विधानात् वर्तमानार्थत्वमुक्तं राज्ञा मतो बुद्धः पूजितो वेत्यादौ मतिरिच्छा बुद्धिर्ज्ञानं क्तप्रत्ययस्य विषयो धात्वर्थफलस्य विषय वस्याश्रयो वाऽर्थः पूजा प्रीणनं प्रीत्यनुकूलो व्यापार इति क्तस्य समवाय्यर्थः षष्ठ्या मत्यादीन्वयिकर्तृत्वमर्थस्तथा च राजकर्तृकाया मतेर्बुद्धेर्वा विषयो विषयत्वाश्रयो वा राजकर्तृकव्यापारप्रयोज्यप्रीतिसमवायी च वाक्यार्थः । "नपुंसकभावे उपसंख्यानमि"ति वार्तिकं "नपुंसके भावे क्त" इति सूत्रेण विहितस्य क्तस्य योगे कर्तृकर्मणोः षष्ठी भवतीत्यर्थकं तेन कृष्णस्य शयितं क्षात्रस्य हसितं चैत्रस्य गमनमित्यादौ षष्ठ्याः कर्तृत्वमर्थः शयनादौ भावे क्तार्थेऽन्वेति । शास्त्रस्याधी

तं शब्दानित्यताया मतमोदनस्य भुक्तं ग्रामस्य गतमित्यादौ षष्ठ्याः कर्मत्वमर्थः क्तार्थेऽध्ययनादौ भावेऽन्वेति । कर्मविषयषष्ठ्या निष्ठायां निषेधोऽप्रामाणिक एवेत्युक्तम् । पुनरपवादार्थं षष्ठीं ज्ञापयति । "अधिकरणवाचिनश्च" इति सूत्रम् । अधिकरणार्थकस्य क्तस्य योगे कर्तृकर्मणोः षष्ठी भवतीत्यर्थकम् । "क्तोधिकरणे चे"तिसूत्रेण विधानात् क्तस्याधिकरणवाचित्वमुक्तम् । इदमेषामाशितं शयितं वेत्यादौ षष्ठ्याः कर्तृत्वमर्थः शयनादौ धात्वर्थेऽन्वेति क्तस्याधिकरणमर्थस्तथा चेदंकर्तृताकशयनाधिकरणभिन्नमिदमित्यादिरन्वयबोधः । इदमेषामोदनस्य भुक्तं ग्रामस्य यातं वेत्यादौ इदंपदोत्तरषष्ठ्याः कर्तृत्वमोदनग्रामपदोत्तरयोः षष्ठ्याः कर्मत्वमर्थस्तथा चेदंकर्तृताकौदनकर्मताकभोजनाधिकरणाभिन्नमित्यादिरन्वयबोधः । "कर्तृकर्मणोः कृती"ति प्राप्तषष्ठ्याः केषु चित्कृत्सु निषेधेनासाधुतां ज्ञापयति । "न लोकाव्ययनिष्ठाखलर्थतृनाम्"ति सूत्रम् । उकाव्ययनिष्ठाखलर्थतृनइत्येतेषां योगे कर्तृकर्मणोः षष्ठी न भवतीत्यर्थकम् । ल इत्यनेन शतृशानचौ कानच् क्वसुः किकिनौ च गृह्यन्ते । शतृ । ओदनं पचमानः । कानच् । ओदनं पेचानः । क्वसुः । ओदनं पेचिवान् । किकिनौ । पपिः सोमं ददिर्गाः । "आडुगमहनजनः किकिनौ लिट्च"त्यनुशासनेन तच्छीलादिष्वर्थेषु आदन्ताडुदन्ताङ्गमिहन्तिजनिभ्यश्च लिट्कार्यकारिणौ किकिनौ प्रत्ययौ विधीयेते लिट्कार्यं द्विर्भावादि आत् । पपिर्ददिः । क्वत् । बभिवर्च । गमि । जग्मिर्युवा । हन । जघ्नि-

र्वृत्रम् । जनि । जज्ञिर्बीजम् । एतद्विधानं छन्दसि बोध्यम् । "भाषायां तु धाञ् कृसृगमिजनिनमिभ्य" इत्यनुशासनेन लोके पृथग्विधानात् । दधिर्दण्डं चक्रिः कटं सस्रिरन्तिकं जग्मिः ग्राममेवं जज्ञिर्नेमिः पपिरित्यादेः पानशीलादिरर्थस्तथा च सोमकर्मकपानशील इत्यादिरन्वयबोधः सोमं पपिरित्यादौ बोध्यः । उ । चिकीर्षुः कट बुभुक्षुरोदनम् । अलङ्करिष्णुः कन्याम् । उक । दैत्यान् घातुकः । वाराणसीं गामुकः । उप्रत्ययस्य उकप्रत्ययस्य च तच्छीलादिरर्थः । "उकप्रतिषेधे कमेर्भाषायामप्रतिषेध" इति लक्ष्म्याः कामुक इत्यादौ लोके षष्ठी । अव्यये । कटं कृत्वा ओदनं भोक्तुं । "अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेध" इति पुरावत्सानामपाकर्तोरास्ते इत्यादौ तोसुन्प्रत्यये षष्ठी वत्सानपाकर्तुमास्त इति वाक्यार्थः । पुरा क्रूरस्य विसृषो विरप्सिन्नित्यादौ कसुन्प्रत्यये षष्ठी क्रूरान् विसर्पितुं विरप्साशील इत्यर्थः । विरप्सा विरोधः । अथ वा विरप्सिन् विराध्येत्यर्थः । तोसुन्कसुनौ छान्दसौ तुमर्थौ बोध्यौ । निष्ठायां विष्णुना हता दैत्याः ओदनं भुक्तवान् ग्रामं गत इत्यादौ । खलर्थे ईषत्करः प्रपञ्चो हरिणा । हरिकर्तृकेषत्करणकर्म प्रपञ्चो वाक्यार्थः । अर्थग्रहणात् युच्प्रत्ययेऽपि ईषत्पानः सोमो भवतीत्यादौ भवत्कर्तृकेषत्पानकर्म वाक्यार्थः । तृन्निति प्रत्याहारः । स च "लटः शतृ" इति सूत्रे तृशब्दमारभ्य "तृन्नि"तिसूत्रे नशब्दं यावत् बोध्यस्तेन शानन्चानश्शतृणामपि ग्रहणम् । शानन् । सोमं पवमानः । चानश् । आत्मानं मण्डयमानः । शतृ । वेद-

मधीयन्। तृन्। कर्ता लोकान्। "द्विषः शतुर्वा वचनम्" इति सुरस्य मुरं वा द्विषन् इत्यादौ वैकल्पिकी षष्ठी । शानन: कर्तार्थः सोमकर्मकपवनकर्ता वाक्यार्थः । चानशादीनां ताच्छील्यादिकमर्थो वाक्यार्थः स्वयम्भूः सुधियेति । कृदन्तरेऽपि कृद्योगषष्ठ्या असाधुतां ज्ञापयति । "अकेनोर्भविष्यदाधमर्ण्ययो" रिति सूत्रम् । अकस्य भविष्यति काले गम्यमाने इनस्तु भविष्यदाधमर्ण्ययोर्योगे षष्ठी न भवतीत्यर्थकम् । सज्जनान्पालको ऽवतरति । ओदनं भोजको व्रजति इत्यादौ क्रियार्थक्रियायां ण्वुलो विधानात् पालनादिक्रियाया भविष्यत्त्वमर्थादवगम्यते "भविष्यति गम्यादय" इत्यधिकारे विधानात् तुमुन्ण्वुलोर्भविष्यत्कालार्थकत्वमित्यन्यदेतच्चिन्त्यम् । गम्यादिशब्दानां निपातनात् भविष्यद्गमनकर्तृवाचकत्वं गम्यादौ प्रकृतिप्रत्ययव्युत्पादनं ढुढगवादिशब्द इवाचार्यसामर्थ्यमेव गम्यादाविन्प्रत्ययस्यैव वा भविष्यत्कालार्थकत्वं न तु ण्वुल इति। क्रियार्थक्रियायां ण्वुलो भविष्यदधिकारे विधानस्य निष्प्रयोजनत्वात् न ह्यतीताया वर्तमानाया वा क्रियायाः क्रियार्थकत्वं सम्भवतीति । एवं सज्जनं पालको ऽवतरिष्यति भविष्यति वेत्यादौ कर्तरि ण्वुल्विधानेऽपि पालनेऽर्थाद्भविष्यत्त्वावगमे कर्मणि न षष्ठी । व्रजं गमी गामी वा इत्यादौ भविष्यत्त्वावगमादिनो योगे कर्मणि न षष्ठी । शतं दायी दायो वेत्यत्राधमर्ण्यावगमादिनादियोगे कर्मणि न षष्ठी । सर्वोऽयं निषेधः कारकषष्ठ्या न तु शेषे षष्ठ्या अत एव ब्राह्मणस्य कुर्वन् उत्तमर्णस्य दायीत्यादौ षष्ठी।"इच्छा-

कृणां दुरापेऽर्थे त्वदधीना हि सिद्धय"इत्यत्र च"अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम्" इत्यत्र च खलर्थयोगे कर्तरि न षष्ठी किं तु शेषे। स च दुरापे सिद्धौ वा दुर्वचे विस्मये वाऽन्वेति। विश्वस्य गोप्ता भुवनस्य कर्तेत्यादौ तृचो योगे कर्मणि षष्ठी साधुरेव।"ण्वुल्तृचावि"ति सूत्रेण सामान्यतः कर्तरि ण्वुल्तृचोर्विधानात्। तृचः तृन्प्रत्याहारान्तर्भावविरहात् न चैवं "न लोके"तिसूत्रे तृनो ग्रहणं व्यर्थं सर्वत्र तृचैव षष्ठ्युपपत्तेरिति वाच्यम्। तृच्शतृतृनां स्वरे भेदात् छन्दसि शतृतृनोः प्रयोगे षष्ठीनिषेधार्थत्वात्। शाब्दिकास्तु"कर्तृकर्मणोः कृती"ति षष्ठीविधिरनित्य एव। "तदर्हमि"ति निर्देशात्। अत एव"धायैरामोदसुत्तममि"ति भट्टिकाव्यं संगच्छते। अतएव निषेधोऽप्यनित्यः इच्छाकृणामित्यादिदर्शितप्रयोगादित्याहुः। तन्मन्दम् "तदर्हमि"तिनिर्देशे तदित्यव्ययस्य लुप्तषष्ठ्यन्तत्वात्तथैव साहचर्यात् "तच्च तस्यैवे"ति पूर्वसूत्रेण सप्तम्यन्तषष्ठ्यन्ताभ्यामिवार्थे वतेर्विहितत्वात्। काशिकाद्यैस्तु तदितिद्वितीयासमर्थादर्हतीत्येतस्मिन्नर्थे वतिप्रत्ययो भवतीतिव्याख्यातं तच्चार्हतीतितिङन्तानुरोधेन द्वितीयासमर्थादित्युक्तम्। वस्तुतस्तस्यतिषष्ठीसमर्थादर्हमित्यर्थे वतिः प्रत्ययो भवतीतिव्याख्यानमुचितमिति धायैरामोदमित्यादौ प्रकरणादिना भविष्यत्त्वावगमात्। णप्रत्ययस्याकारेण योगेन षष्ठी न चाकारयोगे कृतः षष्ठीनिषेध इति वाच्यम् अकेनोरिति सूत्रे ऽकारस्यापि ग्रहणात्। अकश्च अश्च अकाः अकाश्च इन् च अकेनौ तयोरित्याकारग्रहणात्।

अका इति "सर्वो द्वन्द्वो विभाषैकवद्भवती"त्येकवचनम् एतदर्थमेव भविष्यदाधमर्ण्ययोर्गम्यमानयोरिति व्याख्यातं गम्यमानत्वं तु प्रकृतिप्रत्ययाभ्यामन्येन ज्ञाप्यमानत्वं शतं दायीत्यादावपि णिनिप्रत्ययस्य कर्तैवार्थः । आधमर्ण्यं तु मानान्तरगम्यमेव इच्छाकूणामित्यादौ षष्ठ्युपपत्तिर्दर्शितैवेत्यलं विस्तरेण । कृत्यप्रत्यययोगे वैकल्पिकीं षष्ठीं ज्ञापयति । "कृत्यानां कर्तरिवे"ति सूत्रं कृत्यानां प्रत्ययानां योगे कर्तरि वा षष्ठी भवतीत्यर्थकम् । मया मम वा सेव्यो हरिः इत्यादौ तृतीयाषष्ठ्योः कर्तृत्वमर्थः सेवने धात्वर्थेऽन्वेति यथा च मत्कर्तृकसेवनकर्म हरिर्वाक्यार्थः । एवं भवता भवतो वा कटः कर्तव्य इत्यादावपि वाक्यार्थो बोध्यः । कर्तरीत्युपादानात् कर्मणि न षष्ठ्या विकल्पः यथा गेयो माणवकः साम्नामित्यादौ । अत्र "भव्यगेये"ति सूत्रेण कर्तरि भव्यगेयादिशब्दानां निपातनात् । अनभिहिते कर्मणि कृद्योगे षष्ठी । पचेलिमा माषा इत्यादौ कर्मकर्तरि केलिमरादौ कर्मकर्त्रोरुभयोरभिधानात् । कृद्योगे न षष्ठीति । "उभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेधोवक्तव्य"इति गुणकर्मणि षष्ठ्या निषेधः । यथा नेतव्याः व्रजं गावः कृष्णेन कृष्णस्य वेत्यादौ । अत्र व्रजादौ गुणकर्मणि न षष्ठीति ।

इति विभक्त्यर्थनिर्णये कारकषष्ठ्यर्थनिर्णयः ।

नामार्थान्वयिनः षष्ठ्यर्थो अकारकतया संज्ञायन्ते तत्र शेषः "षष्ठी शेष" इति सूत्रविवेचने प्रागेव दर्शितः। शेषत्वेन प्रतियोगित्वादिकं न षष्ठ्यर्थः किं तु प्रतियोगित्वत्वादिनेति ज्ञापयितुं "तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्यामि" ति सूत्रं तदेतत् तृतीयाविवरणे व्याख्यातम्। चतुर्थ्या सह वैकल्पिकीं षष्ठीं ज्ञापयति। "चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः" इति सूत्रम्। आशिषि गम्यमानायां आयुष्यमद्रभद्रकुशलसुखार्थहितशब्दैर्योगे चतुर्थी विभक्तिर्भवति चकारात्षष्ठी भवतीत्यर्थकम्। मद्रभद्रशब्दयोः पर्यायशब्दग्रहणात् दर्शितशब्दानां पर्यायशब्देन योगेऽपि चतुर्थी भवति। आयुष्यं चिरजीवितं वा कृष्णाय कृष्णस्य वा भूयात् इत्यत्र चतुर्थीषष्ठ्योः संबन्धोऽर्थ आयुष्येऽन्वेति। आयुष्यं दीर्घजीवितं तथा च कृष्णसंबन्धि दीर्घजीवितमाशंसाविषयभवनकर्तृ इत्यन्वयबोधः। मद्रं भद्रं वा ब्राह्मणाय ब्राह्मणस्य वा भूयाद् इत्यत्र मद्रमभद्रनिवृत्तिः कुशलमारोग्यं सुखमानन्दो वा शिष्याय शिष्यस्य वा भूयात्। सुखं सुतः काम्यो गुणविशेषः। अर्थः प्रयोजनं वा शिष्याय शिष्यस्य वा भूयात्। प्रष्टुरुद्देश्यं प्रयोजनं हितं पथ्यं वा शिष्याय शिष्यस्य वा भूयात्। हितं कालान्तरभाविन इष्टस्य साधनं तादृशमिष्टसाधनं वा बोध्यमिति दर्शितरीत्या सर्वत्रान्वयो बोध्य इति। आशिषीत्युपादानात् मार्कण्डेयस्यायुष्यमस्तीत्यादौ न चतुर्थीति। "षष्ठ्यर्थे चतुर्थी वक्तव्येति" वार्तिकं षष्ठ्यर्थे शेषे चतुर्थीमपि विधत्ते छन्दसि। यथा या नखानि कृ-

न्ते तस्य कुनखं जायते यथा वा अहल्यायै जार इत्यादौ अत्र चतुर्थ्याः संबन्धोऽर्थः कुनखादावन्वेति । लोके तु तस्याः कुनखम् अहल्याया जार इत्यादौ षष्ठ्येव साधुरिति । अतसर्थप्रत्ययप्रयोगे षष्ठीं विधत्ते "षष्ठ्यतसर्थप्रत्ययेने"ति सूत्रं दक्षिणोत्ताराभ्यामतसुजित्यनेनातसुज् विधीयते अत एवातसर्थाये प्रत्ययास्तैर्योगे षष्ठी भवतीत्यर्थकम् । ग्रामस्य दक्षिणत उत्तरतो वा नदीत्यत्र षष्ठ्याः पूर्वोक्तमवधिमत्त्वमर्थो दक्षिणादावन्वेति । सप्तम्यन्तादिभ्यो विधानादतसर्थप्रत्ययानामाधेयत्वमर्थो नद्यादावन्वेति । तथा च ग्रामावधिकदक्षिणादेशविन्ध्यवृत्तिर्नदीत्यादिरन्वयबोधः । विन्ध्याद्दक्षिणत इत्यादौ विन्ध्यमारभ्येतिल्यबन्तलोपे पञ्चमी बोध्या पुर अध इत्यत्रासिप्रत्ययः । पुरस्तात् अधस्तादित्यत्रास्तातिप्रत्ययः । नगरस्य पुरः पुरस्ताद्वा आरामः पर्वतस्याधो अधस्ताद्वा काननम् उपरि उपरिष्टादितिनिपातयोर्योगे पर्वतस्योपर्युपरिष्टाद्वा मेघः । पश्चादितिनिपातयोगेऽपि नृपस्य पश्चादुपविशामः ।"ततः पश्चात्स्नंस्यत"इति भाष्यप्रयोगात् पश्चाच्छब्दयोगे पञ्चम्यपि दर्शितरीत्या सर्वत्रान्वयो बोध्यः । एनबन्तयोगे द्वितीयां ज्ञापयति । "एनपा द्वितीया" इति सूत्रम् । एनप्प्रत्ययप्रयोगे द्वितीया विभक्तिर्भवतीत्यर्थकं"षष्ठ्यपीष्यते"इतीष्टा षष्ठ्यप्येनपा योगे भवति । ग्रामं ग्रामस्य वा दक्षिणेन नदीं ग्रामं ग्रामस्य वोत्तरेण नदीत्यादौ द्वितीयाषष्ठ्योरवधिमत्त्वमर्थः । एनप्प्रत्ययस्याधेयत्वमर्थः पूर्ववदन्वयः "तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं दूराल्लक्ष्यं सुरपतिधनुश्चा-

कृता तोरणेन" इत्यादावुत्तरेणेति नैनदन्तं किं तु तृतीयान्तं तोरणेनेत्यस्य विशेषणमित्याहुः । वस्तुतस्तु दक्षिणेन याहीत्यादाविव "प्रकृत्यादि" वार्तिकेनाधेयत्वार्थिका प्रकृतेःप्युत्तरेणेति तृतीयेत्यतो धनपतिगृहादिति पञ्चम्या नानुपपत्तिरिति ।

इति विभक्त्यर्थनिर्णयेऽकारकषष्ठ्यर्थनिर्णयः ।
इति विभक्त्यर्थनिर्णये षष्ठीविवरणं समाप्तम् ।

अथ सप्तमी ।

ङ्योस्सुप इति त्रयः प्रत्ययाः । अत्र ङकारः पकारस्यानुबन्धः क्व चिदप्यश्रूयमाणत्वान्न वाचकताकुक्षिप्रविष्ट इति । सरसि सरसोः सरःसु वा सञ्चरतीत्यादौ श्रूयमाणत्वाद्विकारस्येत्वेन ओसस्त्वेन सोः सुत्वेन वाचकत्वम् । अनुशासनसिद्धश्च सप्तम्या अर्थः । अनुशासनं च "सप्तम्यधिकरणे चे"ति चकारात् दूरान्तिकार्थकशब्देभ्योऽपि सप्तमी भवति यथा दूरे विप्रकृष्टे सविधे अन्तिके इत्यादौ तत्राधिकरणमधिकरणत्वमाधेयत्वं वा सप्तम्या अर्थ इति वक्ष्यते । अधिकरणपदसङ्केतग्राहकं पूर्वसूत्रम् । "आधारोऽधिकरण"मिति सूत्रं कर्तृकर्मद्वारा क्रियाया आधारो अधिकरणसंज्ञः स्यादित्यर्थकम् । अनभिहितेऽधिकरणे सप्तमी भवति पचनी स्थालीत्यादौ न सप्तमी । अधिकरणादेः सप्तम्यर्थस्य कर्तृकर्मान्यतरद्वारकस्यैव क्रियायामन्वयात् कारकत्वं न तु कारकान्तरद्वारकाधिकरणस्य क्रियायामन्वयोऽभ्युपेयते । यदाहुः ।

कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम् ।
उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥

इति उपकुर्वत्क्रियासङ्कारि निरधिकरणयोः कर्तृकर्मणोः क्रियासिद्ध्यनुपार्जकत्वादधिकरणस्य क्रियासिद्धिसङ्कारित्वं न च गगनमस्ति गगनं जानातीत्यादौ निरधिकरणस्य कर्तुः कर्मणश्च क्रियासिद्ध्युपयोगित्वान्नेदं युक्तमिति वाच्यम् । कालाधिकरणस्य गगनादेः सत्तादिक्रियाकर्तृत्वकर्मत्वयोगित्वाद् इदानीं

गगनमस्तीदानीं गगनं जानातीतिप्रत्ययात् । न चैवं काशीस्थो राजा मथुरायां ब्राह्मणेभ्यो ददाति गिरौ वृक्षात्पर्णमधो गच्छतीत्यादौ संप्रदानापादानाधिकरणयोः क्रियाविषयकप्रतीतिविषयत्वात् क्रियायां कुतो नान्वय इति वाच्यम् । निर्वर्त्यविकार्ययोरेव कर्मणोः कर्तृत्वविवक्षायां कर्मवद्भावस्येव कर्तृकर्माधिकरणयोरेव क्रियायामन्वयस्याचार्यैरभ्युपगमात् तस्मात्कर्तृकर्मान्यतरद्वाराधिकरणं क्रियान्वयित्वात् कारकमिति । एवं कटे आस्ते चैत्रः गेहे पचति मैत्र इत्यादौ कर्तृघटितपरम्परासंसर्गावच्छिन्नमाधेयत्वं सप्तम्यर्थस्तच्च प्रकृत्यर्थविशेषितं व्यापारेऽन्वेति स्थाल्यामोदनं पचति चैत्रः तरौ फलं गच्छति शकुनिः इत्यादौ कर्मघटितपरम्परासंसर्गावच्छिन्नाधेयत्वं सप्तम्यर्थस्तच्च प्रकृत्यर्थविशेषितं फलेऽन्वेति । ननु दर्शितत्तत्संसर्गावच्छिन्ननानाविधाधेयत्वस्य सप्तम्यर्थत्वे गौरवाद् अधिकरणमेव सप्तम्यर्थो लाघवात् अधिकरणस्य स्वनिरूपितेन तत्तत्संसर्गावच्छिन्नाधेयत्वेन संबन्धेन फलव्यापारयोरन्वयाभ्युपगमान्नानुपपत्तिरिति शाब्दिकमतमेव सम्यगिति चेन्मैवम् । अधिकरणताविशिष्टस्याधिकरणस्य तथात्वे गौरवादाधेयत्वस्य तथात्वे लाघवादित्यादेर्द्वितीयाविवरणे दर्शितत्वात् न चाधिकरणतात्वस्याखण्डोपाधितया शक्यतावच्छेदकलाघवादधिकरणत्वस्य तथात्वमस्विति वाच्यम् । परम्परान्वयिनोऽधिकरणत्वस्यापेक्षया साक्षादन्वयिन आधेयत्वस्यैव तथात्वौचित्यात् । न च नानासंसर्गावच्छिन्नत्वस्याधेयत्वे प्रवेशाद्गौरवमिति वा-

च्यम् । अधिकरणत्वादावपि तुल्यत्वात् यदि चाधिकरणत्वादेर्नानासंसर्गावच्छिन्नाधेयत्वेन संबन्धेनान्वय इति मन्यते तदाऽऽधेयत्वमेव सप्तम्यर्थस्तस्य कर्तृघटितपरम्परावच्छिन्नाधेयत्वीयस्वरूपेण संबन्धेनान्वय इति नानुपपत्तिः इत्यनियामकसंबन्धस्य प्रतियोगिताऽनवच्छेदकत्वमतेऽधिकरणत्वादेः सप्तम्यर्थत्वं न युज्यते गेहे न पचति पक्ता वेत्यादौ निषेधप्रतीत्यनुपपत्तेरित्यादिकं द्वितीयाविवरणे दर्शितम् । फलव्यापारयोः स्वाश्रयसंबन्धावच्छिन्नाधेयत्वस्य सप्तम्यर्थस्यान्वयोऽभ्युपेयते स्वाश्रयसंबन्धस्तु क्व चित्संयोगः यथा कटे आस्ते चैत्र इत्यादौ कर्तृसंयोगः स्थाल्यामोदनं पचतीत्यादौ कर्मसंयोगः क्व चित्समवायः यथा घटे रूपमस्तीत्यादौ कर्तृसमवायः असुस्मिन् गां विक्रीणीत इत्यादौ कर्मणो गोः स्वामित्वं तथा घटे नीलरूपं करोतीत्यादौ कर्मसमवायः क्व चित्कालिकविशेषणता यथा पौर्णमास्यां चन्द्रं ग्रसते राहुरित्यादौ कर्तृकर्मणोः कालिकविशेषणता यथा क्व चिद् विषयता इच्छा मोक्षेऽस्तीत्यादौ कर्तृविषयता घटे चाक्षुषं जनयति सूते वा चक्षुषानित्यादौ कर्मविषयता क्व चिदन्यादृशोऽपि स्वाश्रयसंबन्धः प्रयोगानुसाराद्बोध्यः । अपादानादेः फलव्यापारयोरनधिकरणत्वात्तदधिकरणनिरूपितस्य दर्शितसंबन्धावच्छिन्नाधेयत्वस्याप्रसिद्धेरपादानाद्यधिकरणस्य न कारकत्वमित्यतः कर्तृकर्मणोरेवाधिकरणयोः कारकत्वमाचार्या मन्यन्ते । गुरुचरणास्तु कटे आस्ते चैत्र इत्यादौ संयोगावच्छिन्नमाधेयत्वं कर्तृनिष्ठं स्थाल्या-

मोदनं पचतीत्यादौ संयोगावच्छिन्नमाधेयत्वं कर्मनिष्ठं सप्तम्यर्थः कर्तृकर्मनिष्ठयोराधेयत्वयोः सामानाधिकरण्येन संबन्धेन व्यापारफलयोरन्वय इत्यपादानादिनिष्ठाधेयत्वस्य सामानाधिकरण्येन धात्वर्थेऽन्वयासम्भवान्नापादानाद्यधिकरणस्य कारकत्वमिति एवमाधेयत्वं क्व चिदाख्यातोपस्थापितकालावच्छिन्नं सप्तम्या प्रत्याय्यते यतो गेहान्निर्गत्य प्राङ्गणे पचमाने चैत्रे गेहे चैत्रः पचतीति न प्रयोगः क्व चिदन्यकालावच्छिन्नमप्याधेयत्वं तथा यथा भाविनीं चैत्राधिकरणतामभिमन्याय चैत्रो ग्रामे गच्छतीति प्रयुज्यते । आतपे तिष्ठतीत्यादौ आतपपदमातपसंयुक्तदेशपरमतो नानुपपत्तिः सविषयकार्थधात्वर्थयोगे विशेष्यतानिरूपितप्रकारत्वस्वरूपं वैशिष्ट्यानिकमाधेयत्वं सप्तम्यर्थः यथा शुक्तौ रजतत्वं जानातीत्यादौ शुक्तिनिष्ठविशेष्यतानिरूपितप्रकारत्वं रजतत्वाद्यात्मककर्मघटितपरम्परया ज्ञानादावन्वेतीति पदवाक्यरत्नाकरे प्राहुः । सप्तमीविधाने "ज्ञास्येञ्विषयस्यकर्मण्युपसंख्यानमि"ति वार्तिकं क्त्वान्तप्रकृतिकेनिप्रत्ययप्रयोगे कर्मणि सप्तमीं विधत्ते । कर्मणि सप्तमीविधानं नित्यमित्येके । वैकल्पिकमित्यन्ये । अधीती वेदेषु वेदान्वेत्यादौ "इष्टादिभ्यश्चे"ति सूत्रेण विहितस्य तद्धितनिप्रत्ययस्य कर्तार्थः सप्तमीद्वितीययोः कर्मत्वमर्थस्तथा च वेदकर्मताकाध्ययनकर्तेत्यन्वयबोधः । एवमिष्टौ सुरेषु सुरान्वेत्यादौ संप्रदानत्वस्वरूपं कर्मत्वं सप्तमीद्वितीययोरर्थस्तथा च सुरसंप्रदानताकयजनकर्तेत्यन्वयबोधः । परिगणितो याज्ञिके याज्ञिकं वे-

त्यादौ याज्ञिककर्मताकपरिगणनकर्ता वाक्यार्थः । आम्नाती छन्दसि छन्दो वेत्यादावप्यनया रीत्याऽन्वयो बोध्यः । आम्नानं कथनम् । इष्टादिगणः काशिकावृत्तौ द्रष्टव्य इति ।

इति विभक्त्यर्थनिर्णये कारकसप्तम्यर्थनिर्णयः ।

नामार्थान्वयिनः दर्शितान्ये क्रियान्वयिनश्च सप्तम्यर्था अकारकतया संज्ञायन्ते तत्र "सप्तम्यधिकरणे चे"ति सूत्रे चकारः दूरान्तिकार्थकशब्देभ्य इव कर्तृकर्मावटितेनापि संबन्धेनाधिकरणेऽवच्छिन्नाधेयत्वे वा सप्तमीं विधत्ते अत एव भूतले घट इत्यादौ न सप्तम्यनुपपत्तिः । यत्तु भूतले घट इत्यादावस्तीतिक्रियाध्याहारेण सप्तम्युपपत्तिरिति शाब्दिकैरुक्तं तदसत् गिरौ वृक्षाङ्गुमिं गच्छति विहग इत्यादावध्याहारस्य कर्तुमशक्यत्वात् पञ्चम्यन्तार्थस्य तिङर्थे कर्तृत्वेऽन्वयस्याव्युत्पन्नत्वात् । अत एव "वैदर्भीकेलिशैले मरकतशिखरादुत्थितैरंशुदैरि"त्यादौ न सप्तम्यनुपपत्तिः न चोत्थानकर्तुरधिकरणं शैल इति शङ्क्यम् । अत उत्थानाधिकरणमूर्ध्वदेश एव न हि शैलः शिखरादूर्ध्वो भवतीति संबन्धमात्रावच्छिन्नमाधेयत्वं सप्तम्यर्थः मूले ऽधिकरणपदोपादानात्तत्र स्वाश्रयसंबन्धावच्छिन्नमाधेयत्वं क्रियान्वयिकारकतयोपेयत इति तु परमार्थः । एवं भूतले घट इत्यादौ संयोगावच्छिन्नमाधेयत्वं सप्तम्यर्थो घटादावेवेति तथा च भूतलवृत्तिर्घट इत्यादिरन्वयबोधः । घटे रूपमित्यादौ समवायावच्छिन्नं स्फटिके जवाकौहित्यमित्यादौ परम्परासंबन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थः ।

धनं दुरधिकारिणि इत्यादौ स्वामित्वावच्छिन्नाधेयत्वं सप्तम्यर्थः । गोषु प्रभुः मगधेषु राजेत्यादौ स्वत्वसंबन्धावच्छिन्नाधेयत्वं सप्तम्यर्थः । स्फटिके लौहित्ये जपाकुसुमसमुपाधिरित्यादौ स्वेतरविशेष्यताकस्वधर्मप्रकारताकज्ञानजनक उपाधिशब्दार्थस्तत्र लौहित्याधेयत्वं प्रकारतायां स्फटिकाधेयत्वं विशेष्यतायामन्वेति स्फटिकलौहित्येऽयमुपाधिरित्यत्र स्वप्रकारताकज्ञानविशेष्यतासंबन्धावच्छिन्नाधेयत्वात्मकस्फटिकपदलक्ष्यस्तादात्म्येन लौहित्येऽन्वेति तादृशलौहित्याधेयत्वस्योपाधिशब्दार्थैकदेशे प्रकारत्वे पूर्ववदन्वयो व्युत्पत्तिवैचित्र्यादिति । धूमे साध्ये वन्हौ हेतावार्द्रेन्धनमुपाधिरित्यत्र साध्यव्यापक उपाधिशब्दार्थस्तादात्म्येनार्द्रेन्धनेऽन्वेति तादृशार्द्रेन्धने व्याप्यत्वसंबन्धावच्छिन्नं धूमाधेयत्वमन्वेति । अत एव व्याप्यत्वव्यभिचारित्वसंबन्धौ वृत्त्यनियामकाविति तान्त्रिकाः । साध्यशब्दार्थस्तु सिसाधयिषोरिष्टसिद्धिविधेयताऽवच्छेदकधर्मवान्बोध्य इति । प्रभाते गोष्ठे मध्याह्ने कक्षे गौरित्यादौ कालिकसंबन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थः । यदि च कालिकाधेयत्वं गोष्ठादिदेशाविशेषणतया भासते तदाऽवच्छेदकतात्वेन व्यपदिश्यते अत एवावच्छेदकत्वार्थिका सप्तमीति मन्यन्ते तान्त्रिकाः । न हि स्वरूपसंबन्धविशेषोऽतिरिक्तं वाऽवच्छेदकत्वं सप्तम्यर्थः सम्भवति अनुशासनविरहात् । एवं गोष्ठादिदेशाधेयत्वं यदि प्रभातादिकालविशेषणतया प्रतीयते तदा तदपि दैशिकावच्छेदकतात्वेन व्यपदिश्यते । न च देशाधेयत्वेन प्रभातादिकालविशेषणं सम्भवति अव्याप्तत्वादिति



वाच्यम् । द्वीपान्तरप्रभातव्यावर्तकैतद्वीपवृत्तित्वस्येव गोष्ठादिवृत्तित्वस्यापि व्यावर्तकत्वसम्भवात् यत्र तु दैशिककालिकाधेयत्वयोः कालदेशयोर्न विशेषणत्वमव्यावर्तकत्वात् तत्र नावच्छेद्यावच्छेदकभाव उपेयते यथा इदानीं गुणे सत्तेत्यादौ अत्र गुणाधेयत्वं न प्रत्यक्षकाले प्रत्यक्षकालवृत्तित्वं वा गुणे विशेषणमव्यावर्त्तकत्वात् किं तु प्रत्यक्षकालाधेयत्वं गुणाधेयत्वं च स्वातन्त्र्येण सत्तायामेव प्रतीयतेऽन्यथानुपपत्तेरिति । एवं वृक्षे शाखायां कपिसंयोग इत्यादौ शाखाधेयत्वं वृक्षविशेषणमिति शाखाऽवच्छेदकत्वेन व्यपदिश्यत इति । "यस्मिन्नग्नौ पचेदन्नं तत्र होमो विधीयते" इत्यादौ प्रयोजनकव्यापारस्वरूपः संबन्धो वृत्तिनियामकस्तत्संबन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थो वह्निविशेषितः पाकेऽन्वेति अत एव व्यापारस्तत्प्रयोज्यत्वं वा सप्तम्यर्थ इति तान्त्रिकवाक्ये दर्शिताधेयत्वमेव व्यापारादिशब्देन व्यपदिश्यत इति । क्व चिद्व्यापकतासंबन्धोऽपि वृत्तिनियामकः यथा कारणतायामनन्यथासिद्धिर्नियतपूर्ववर्तित्वं वेत्यादौ अत्र व्यापकतासंबन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थो अन्यथासिद्धिविरहे नियतपूर्ववर्तित्वे चान्वेति व्यापकत्वार्थिका सप्तमीति तान्त्रिकवाक्ये व्यापकत्वशब्देन व्यापकत्वसंबन्धावच्छिन्नमाधेयत्वं प्रत्याय्यते अतो व्यापकत्वस्य न सप्तम्यर्थत्वमनुशासनविरहादिति प्रत्युक्तम् । साधुशब्दस्य सङ्केतसंबन्धोऽपि वृत्तिनियामकः यथा कर्तरि क्त भू सत्तायामित्यादावनुशासने "विनायके विघ्नराजद्वैमातुरगणाधिपा" इत्यादौ कोशे अत्र सङ्केतसंबन्धा-

वच्छिन्नाधेयत्वं सप्तम्यर्थः क्रक्कब्दार्थे तिङन्यप्रत्यये भू-धातौ विधुराजादिशब्दे चान्वेति । ननु भूसत्तायामित्यत्र भूशब्दे कथं सप्तम्यर्थस्यान्वयबोधः स्वरूपपरशब्दस्य सुप्र-कृतेरेव साधुत्वात् न च स्वरूपपरस्यापि धातुशब्दस्या-धातुरितिपर्युदासात्प्रातिपदिकसंज्ञाविरहात्सुप्रकृतित्व-विरहेऽपि साधुत्वान्नानुपपत्तिरिति शाब्दिकमतं युक्त-मिति वाच्यं तथा सति "भुवो वुग्" "त्यत्र "भाषायां सद-वसश्रुव" इत्यत्र च निर्देशे धातुशब्दस्य सुप्प्रकृतित्वविर-हप्रसङ्गात् । न च श्रोत्रोपस्थिते भूशब्दे सप्तम्यर्थस्यान्व-यबोध इति वाच्यम् । इत्था शब्देनोपस्थापित एवार्थे तथाभूतस्यार्थस्यान्वयबुद्ध्यर्व्युत्पत्तिसिद्धत्वाद् इत्थ्यनुपस्था-पितेऽर्थेऽन्वयबोधस्याप्रामाणिकत्वाद् अन्यथा श्रोत्रोप-स्थिते सदङ्गशब्दे गुणपदोपस्थापितगुणस्य तादात्म्ये-नान्वयबोधसामग्रीसत्त्वात् सदङ्गशब्दो गुण इत्यन्वय-बोधप्रसङ्गादिति चेत् । अत्र गुणचरणाः । यदर्थशक्त्या धातुत्वं निपातत्वं वा शब्दानां तदर्थसंबन्धस्वरूपलक्षणा-यामपि तेषां शब्दानां धातुत्वं निपातत्वं वाऽक्षतमेवेति यथा वाशब्दस्य गत्याद्यर्थकत्वे धातुत्वं विकल्पाद्यर्थकत्वे निपातत्वं तत्तदर्थसंबन्धस्वरूपलक्षणायां धातुत्वं निपा-तत्वं चेति भूशब्दस्य स्ववाच्यवाचकत्वस्वरूपलक्षणायां धातुत्वं निराबाधमिति भूशब्दस्य न सुप्प्रकृतित्वमिति भूधात्वर्थे स्ववाच्यवाचकत्वेन लक्ष्ये भूशब्दे सप्तम्यर्थ-स्यान्वय इति न काऽप्यनुपपत्तिरिति प्राहुः । के चित्तु अनुकरणशब्दाः साधव इति सामान्यत एव भूसत्ता-यामित्यनेन लक्ष्यते अत एव गवित्याह प्रतिजानीते प्र

त्यच्चविधादीत्यादिष्वनुकरणनिरर्थकशब्दान्तर्गतस्यैचो-ऽवादेशः हेलयो हेलय इति वदन्तोऽसुराः पराबभूवुरि-ति श्रुतापभ्रंशानुकरणालयशब्दान्तर्गतस्याकारस्य पूर्व-रूपत्वं सङ्गच्छते अन्यथाऽवादिविधीनां साधुशब्दमात्र-विषयतया गोआलोकेऽलक्ष्मिअईइत्यादौ भाषायामिव प्रसक्तिर्न स्यादिति अनुकरणसाधुभूते भूशब्दे श्रोत्रोप-स्थिते सप्तम्यर्थस्यान्वयः अत एवश्रोत्रोपस्थिते पचती-तिशब्दे पाकं करोतीति विवरणवाक्यार्थस्य पाककर्तृत्व-स्य प्रतिपादकतया संसर्गेणान्वयः विवरणवाक्ये तिङः साधुत्वार्थप्रयोगः । अथ वा विवरणवाक्यं पाककर्मत्वमिव करणाश्रयत्वमधिकं प्रतिपादयदपि पाककर्तृत्वमर्थतः प्रतिपादयतीति पाककर्तृत्वस्य प्रतिपादकतया विवियमाणे पचतीतिवाक्येऽन्वयः न हि विवरणविवियमाणवाक्ययोरन्यूनानतिरिक्तार्थकतानियमः । एवं चान्वाचयसमाहार इतरेतरसमुच्चय इत्यादावप्यन्वयो बोध्य इत्याहुः । तन्न सुन्दरम् । अनुकरणशब्दस्य विभक्तिविनाकृतस्य श्रोत्रोपस्थितस्यान्वयोपगमे शब्दो गोइत्यादावप्यन्वय-बोधप्रसङ्गात् । अनुकरणशब्दस्यान्वयोपगमेऽप्यनुकार्यश-ब्दस्यान्वयानुपपत्तेश्चानुकार्यस्य साधुतायाः केनाप्यज्ञा-पनात् पचतीत्यादौ तु पचेः पचतिपदे तिङः प्रतिपा-द्यत्वे लक्षणा पचतिप्रतिपाद्यत्वविवरणवाक्यार्थे पाक-कर्तृत्वेऽन्वेति तिङर्थस्य प्रथमान्तार्थ इव तिङन्तार्थेऽप्य-न्वयोपगमात् अत एव पचतिभवतीत्यादावन्वयोपप-त्तिरिति चान्वाचय इत्यादौ चशब्दस्य निपाततया त-दर्थवाचकत्वलक्षणायामपि निपाततया भूसत्तायामि-

त्यादाविवान्वयोपपत्तिः सम्भवतीति गुरुचरणादर्शित-रीतिः । वस्तुतस्तु शब्देनार्थ इवार्थेनापि शब्दः स्मार्यते शब्दार्थयोरुभयोः सङ्केतसंबन्धेन संबन्धित्वाद् अत एवार्थं ज्ञात्वा अर्थेन तद्वाचकशब्दं स्मृत्वा वाक्यं प्रयुञ्जते प्रयोक्तारः तथा च यथा किं पचतिभवतीतिप्रश्ने वधूपदर्शितकलायादौ कलायादिदर्शनेन कलायादिवाचकं कलायादिपदं द्वितीयान्तं स्मृतवतः प्रष्टुः कलायं भवतीपचतीत्यन्वयबोधो भवति तथा भूशब्दस्वरूपेणार्थेन स्वरूपपरो भूशब्दः प्रथमातः स्मार्यते तेन तु भूशब्दस्वरूपोऽर्थः स्मार्यते तत्र भूशब्दे सङ्केतसंबन्धावच्छिन्नस्य सत्ताऽऽधेयत्वस्यान्वय इति न काऽप्यनुपपत्तिरिति यदि च वधूपदर्शितकलायादौ कलायं पचतीति मानसोपनीतभानमेव तदा सत्ताऽऽधेयत्वस्य भूशब्दे मानसोपनीतभानमेवेति इयमेव रीतिः चाग्वाचय इत्यादौ पचति पाकं करोतीत्यादिविवरणे च बोध्येति । एवं वाचकत्वार्थो सप्तमीति तान्त्रिकवाक्ये वाचकत्वशब्देन सङ्केतसंबन्धावच्छिन्नाधेयत्वमेव व्यपदिश्यते अतो वाचकत्वस्य सप्तम्यर्थत्वे अनुशासनविरहेऽपि न क्षतिः । दाने बलिः काव्ये कालिदासस्तपसि धूर्जटिरयमित्यादौ बलिप्रभृतिपदानां बल्यादिसदृशे लक्षणा कर्तानिरूपकसंबन्धावच्छिन्नं दानाद्याधेयत्वम् इदंपदार्थे पुंस्यन्वेति विशिष्टान्वयबलाद्दानवैशिष्ट्यमपि पुंसि प्रतीयते तथा च बल्यादिसादृश्यं दानादिकं प्रतीयते अथ वा सप्तम्यन्तदानादिशब्दसमभिव्याहारबलाद्दानादिस्वरूपतादात्म्येन बल्यादिपदार्थानामिदंपदार्थे पुंस्यन्वयः यथा

ला आसते । भोजनकर्तृत्वस्वरूपकारकत्वस्यार्हता ऋद्धानां तरणकर्तृत्वस्यार्हता सद्ब्राह्मणानां च प्रसिद्धैव । सप्तम्याः समानकालिकत्वमर्थं आसने धात्वर्थेऽन्वेति । तत्र भुञ्जान ऋद्धविशिष्टसमानकालिकत्वं विशेषणभोजनसमानकालिकत्वमर्थादाय पर्यवस्यति विशिष्टान्वयबलात् तथा च भुञ्जान ऋद्धसमानकालिकासनकर्तारो दरिद्रा इत्यादिरन्वयबोधः । ब्राह्मणेषु पूज्यमानेषु शूद्रास्तिरश्चियन्ते इत्यादावर्हाणां कर्मत्वे सप्तमी बोध्या अनर्हाणामकारकत्वे यथा दरिद्रेष्वासीनेषु ब्राह्मणास्तरन्ति तरणं तु सङ्गत्यनुकूलं वैदिककर्म तद्विपर्यये यथा ऋद्धेष्वासीनेषु दरिद्रा भुञ्जते ब्राह्मणेष्वासीनेषु वृषलास्तरन्तीत्यादौ दर्शितरीत्याऽऽसनभोजनयोरासनतरणयोः समानकालिकत्वं प्रतीयते । अत्र "यस्य च भावेने"तिसूत्रेणैव क्रिययोः समानकालिकत्वं ज्ञाप्यते अतो व्यर्थमेवेदं वार्तिकमिति । यदि च ऋद्धेषु भुञ्जानेषु दरिद्रा आसत इत्यादौ ऋद्धभुञ्जानसमानदेशत्वं समाने प्रतीयमानं विशिष्टान्वयबलाद् भोजनसमानदेशत्वमपि आसने प्रत्याययति तदा क्रिययोः समानदेशत्वप्रतीतिफलकतया नास्य वार्तिकस्य वैयर्थ्यमिति । "निमित्तात्कर्मयोगे सप्तमी वक्तव्ये"ति वार्तिकं कर्मयोगे सति निमित्तवाचकपदात्सप्तमी भवतीत्यर्थकं निमित्तसप्तमीं विदधाति । कर्म धात्वर्थफलवत् तस्य योगः क्व चित्समवायः क्व चित्संयोगः द्वीपिनः कर्मणः चर्मणि समवायः । कुञ्जरस्य कर्मणः दन्तयोः संयोग इति शाब्दिकाः । यस्य प्राप्तिः क्रियाफलं त-

न्निमित्तं तत्र सप्तमी भवतीति यथा ।

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥

इत्यादौ सप्तम्याः प्राप्तिः स्वस्वामिभावादिसंबन्धोऽर्थः स तु धात्वर्थे हननादावनुकूलतयाऽन्वेति तथा च चर्मप्राप्तिफलकं द्वीपिहननमित्यादिर्वाक्यार्थः । सीमाऽवयवः । पुष्कलको गन्धमृगः ।

सीमाऽघाटस्थितक्षेत्रेष्वगडकोशेषु च स्त्रियाम् ।
अथ पुष्कलको गन्धमृगे क्षपणकीलयोः ॥

इति मेदिनीकारः । सीमाऽघाटस्तज्ज्ञानार्थं पुष्कलकः शङ्कुर्निहतो निखात इत्यर्थं इति हरदत्तः । निमित्तं फलं तत्र हेतुतृतीयावत् तादर्थ्यचतुर्थीवत्सप्तमी भवतीति शाब्दिकाः । तत्तु चिन्त्यम् । न हि चर्मद्वीपिहननफलं हननात्प्रागेव द्वीपिचर्मणः सिद्धत्वात् । अध्ययनेन वसति यूपाय दारु चेत्यादौ वासात्प्रागध्ययनस्य दारुतः प्राक् यूपस्य च सिद्धत्वात् भवति वासस्याध्ययनफलकत्वं दारुणो यूपार्थकत्वं चेति यदि च द्वीपिनं हन्तुर्न चर्मप्राप्तिः किं तु बलादाहर्तुरन्यस्य तत्रापि दर्शितप्रयोगोऽभ्युपेयते तदा सप्तम्याः प्राप्तीच्छैवार्थस्तस्याः प्रयोज्यतया धात्वर्थे हननेऽन्वयः । अत एव ।

हन्तेः कर्मण्युपष्टब्धात् प्राप्तुमर्थे तु सप्तमीं ।
चतुर्थीबाधिकामाहुः शिलिभागुरिवाग्भटाः ॥

इति हरिरप्याह । उपष्टम्भः संयोगविशेषः स च कुञ्जरे हननकर्मणि दन्तयोरतिदृढः द्वीपिनि हननकर्मणयवयवे आरम्भकसंयोगस्वरूपः गोत्वादिवत् द्वीपि-

त्वादिजातेरवयवावयविवृत्तित्वादवयवस्यापि द्वीपित्वं "क्रियार्थोपपदस्ये"ति सूत्रेण प्रसक्ताया: चतुर्थ्या: इन्तिकर्मोपष्टम्भेवाधिका सप्तमी न तु सर्वत्र तथासति "क्रियार्थोपपदस्ये"ति सूत्रवैयर्थ्यापत्ते: । दार्शनिकास्तु कर्मक्रिया तस्या योगे संबन्धे निमित्तवाचकात्सप्तमी भवतीति वार्तिकार्थ: निमित्तं तु यत्प्राप्तीच्छाप्रयोज्या यत्प्रयोजिका क्रिया तदुभयं तत्रादो चर्मणि द्वीपिनमित्यादौ सप्तमी अन्तर्विद्यारजनीच्छये यदुदेतीत्यादौ सप्तमी तथा च चर्मणीत्यत्र सप्तम्या: प्राप्तीच्छैवार्थ: अविद्यारजनीच्छाये इत्यादौ तादर्थ्यमनुकूलत्वं सप्तम्या अर्थ: अनुकूलत्वे चतुर्थी तृतीया सप्तमी भवतीति न परस्परं तासां बाध्यबाधकभाव इति एवं सहकारित्वं जनकत्वं च निमित्तत्वं तच्चादो यथा उपरागे स्नानं विवाहे श्राद्धमित्यादौ अत्र सप्तम्या: स्वजन्येष्टविशेषजनकत्वमर्थ: स्नानादावन्वेति । एवं गृहस्थादावारे भग्ने इन्द्रबाहुर्बहव्य: पायसं ब्राह्मणो भोजयितव्य इत्यादावपि स्वजन्येष्टजनकत्वं सप्तम्यर्थ इन्द्रबाहुबन्धनादावन्वेति । द्वितीयं यथा गोवधे प्रायश्चित्तमित्यादौ अत्र दुरितनाशकत्वं प्रायश्चित्तशब्दार्थ: सप्तम्या जन्यत्वमर्थ: प्रायश्चित्तैकदेशे दुरितेऽन्वेति । एवमन्यत्रापि निमित्तत्वं बोध्यमित्याहु: । क्रियान्तरसमभिव्याहारे सति कालार्थकछदन्तात्सप्तमीं ज्ञापयति । "यस्य च भावेन भावलक्षणमि"ति सूत्रम् । भाव: क्रिया यस्य च भावेन क्रियान्तरं लक्ष्यते ततो भाववत: सप्तमी भवतीत्यर्थकम् । अत्र भाववान् कालार्थकछदन्तार्थो

बोध्यः । कालार्थकेत्युपादानात् पुरुषेषु पाचकेषु व्रजतीति न प्रयोगः । कृदुपादानात् पुरुषेषु दृष्टचरेषु गच्छतीति न प्रयोगः । एवं गोषु दुह्यमानासु गत इत्यादौ सप्तम्याः कालवृत्तित्वमर्थः कालि प्रकृत्यर्थस्य स्वसंबन्धिभावस्याधिकरणतया तत्प्रागभावाधिकरणतया तन्नाशाधिकरणतया वा यथायोग्यमन्वयः विद्यमानदोहनकर्मणां दुह्यमानशब्दार्थानां गोषु तादात्म्येनान्वयः तथाभूतानां गवा सप्तम्यर्थैकदेशे काले स्वकर्मकदोहनाधिकरणतया ऽन्वयः तथाभूतस्य सप्तम्यर्थस्य कालवृत्तित्वस्यागमनादौ क्रियान्तरेऽन्वयः तथा च विद्यमानदोहनकर्माभिन्नानां गवां स्वकर्मकदोहनाधिकरणं यः कालस्तद्वृत्यतीतं यदागमनं तत्कर्तेत्यन्वयबोधः कर्मपारतन्त्र्येण भासमानाया दोहनक्रियाया आगमनेऽपि कालघटितपरम्परयाऽन्वयः विशिष्टान्वयसामग्रीबलात् क्रियायां परम्परया विशेषणत्वमेवोपलक्षकत्वमिति । एवं गोषु धोक्ष्यमाणासु दुग्धासु वागत इत्यादौ सप्तम्यर्थैकदेशे काले गवादेः स्वकर्मकदोहनस्य प्रागभावाधिकरणतया नाशाधिकरणतया वाऽन्वयः पूर्ववदन्वयबोधः । प्रकृते दोहनादीनां विद्यमानत्वभावित्वातीतत्वानि क्रियाऽन्तरकालवर्तमानत्वतथाविधकालवृत्तिप्रागभावप्रतियोगिकालवर्त्तित्वतथाविधकालवृत्तिनाशप्रतियोगिकालवर्त्तित्वानि बोध्यानि न तु प्रयोगाधिकरणकालघटितानि वर्तमानत्वादीनि तथासति आगत इत्यत्र निष्ठार्थातीतत्वादेरनन्वयप्रसङ्गात् । एवं "नष्टेषु धार्तराष्ट्रेषु द्रौणिः सुप्तान् ज-

घाने"त्यादौ सप्तम्यर्थैकदेशे काले स्वकर्तृकनाशाधिकरणतया प्रकृत्यर्थस्य धार्तराष्ट्रादेरन्वयः निष्ठार्थातीतत्वं विद्यमाननाशप्रतियोगिकालवृत्तित्वस्वरूपं नाशेऽन्वेति तथा च विद्यमाननाशप्रतियोगिकालवृत्तिनाशप्रतियोग्यभिन्नानां धार्तराष्ट्राणां स्वकर्तृकनाशाधिकरणं यः कालस्तत्कालवृत्तिसुप्तकर्मकं यदतीतं हननं तत्कर्ता द्रोणिरित्यन्वयबोधः कालार्थककृदन्तार्थविशिष्टप्रकृत्यर्थान्वितः प्रदर्शितसप्तम्यर्थो भावे एवान्वेति न तु नामार्थेऽतो गोषु दुह्यमानासु घट इत्यादौ नान्वयबोधः । यत्तु गोषु दुह्यमानास्वागत इत्यादौ गोपदोत्तरसप्तम्याः कर्मत्वमर्थो दोहनादौ धात्वर्थेऽन्वेति कृदन्तोत्तरसप्तम्याः कालवृत्तित्वमर्थः शानजादिकृतां भावविहितत्वाद्वर्तमानत्वमर्थस्तथा च गोकर्मकवर्तमानदोहनकालवृत्त्यागमनवानित्यन्वयबोध इति तन्न सुन्दरम् । गवादौ दुह्यमानाभेदान्वयबोधस्यापलापप्रसङ्गात् भावशानजादिकृदन्तस्य नपुंसकत्वनियमात् गोषु दुह्यमाने समागत इत्यादिप्रयोगप्रसङ्गात् गोषु दुह्यमानास्वागत इत्यादिप्रयोगस्यासाधुत्वप्रसङ्गात्सप्तम्याः कर्मत्वार्थकत्वमपि न युज्यते ऽनुशासनविरहात् गोषु यान्तीषु गच्छतीत्यादौ कर्तृकृदन्तेऽपि सप्तमीप्रयोगादिति । एवं "भुक्तवत्सु च विप्रेषु पिण्डान्दर्भेषु निर्वपेदि"त्यादौ सप्तम्यर्थैकदेशे कालेऽतीतभोजनकर्तुः स्वकर्तृकभोजननाशाधिकरणतयाऽन्वयः भोजनस्य तु स्वनाशसमानकालिकतया निर्वापेऽन्वयः विशिष्टान्वयबलादिति । क्व चि-

त्समानकालिकतया क्रिययोरन्वये क्व चित्स्वनाशका-
लिकतया क्रिययोरन्वये प्रयोज्यप्रयोजकभावेनाप्यन्वयः
यथा "पठत्सु तेषु प्रतिभूपतीनलं विनिद्ररोमाऽजनि शृ-
ण्वती नलमि"त्यादौ प्रतिभूपतिपाठनलश्रवणयोः समा-
नकालिकतयाऽन्वयेऽपि प्रयोज्यप्रयोजकभावेनाप्यन्वयः
यथा वा "गोविन्दे मथुरां याते व्यथन्ते गोपयोषित" इ-
त्यादौ गोविन्दगमनस्य स्वनाशकालिकतया गोपीव्य-
थायामन्वयेऽपि प्रयोज्यप्रयोजकभावेनाप्यन्वयः। एवं सूत्रे
भावलक्षणमित्यत्र भावः स्वभावः स्वरूपमिति यावत्
तथा च स्वरूपस्य लक्षणं विशिष्टतया ज्ञापनमित्यपि सू-
चार्थः अत एव गुणान्यत्वे सति जातेः सत्त्वाद्येत्यादौ
न सप्तम्यनुपपत्तिः गुणान्यत्वसामानाधिकरण्येन वि-
शेषणेन जातेः सत्ताया वा विशिष्टतया ज्ञापनमिति
सप्तमी साधुरेव। अत्र शतृन्तासधात्वर्थस्य वर्तमानका-
लवृत्तिसत्ताविशिष्टस्य तादात्म्येन गुणान्यत्वादावन्व-
याद् गुणान्यत्वादिशब्दानन्तरसप्तम्या अधिकरण-
वृत्तित्वमेवार्थस्तच्च जातौ सत्तादौ वाऽन्वेति वर्तमानका-
लवृत्तिसत्ताविशिष्टस्य तादात्म्यान्वयबलादेव गुणान्य-
त्वादिकालवर्तित्वस्यार्थत एव लाभात् न कालवृत्तित्वं
सप्तम्यर्थं इत्यधिकरणवृत्तित्वस्वरूपसप्तम्यर्थलाभार्थमेव
सतीतिशतृन्तोपादानं न तु तदर्थस्य हेतुताऽवच्छेदकेऽनु-
प्रवेशः सामानाधिकरण्येन गुणान्यत्वविशिष्टजातित्वा-
देरेव तथात्वादिति दर्शितप्रयोगेऽपि सप्तम्युपपत्तिरिति।
यत्तु शरदि पुष्यन्ति सप्तच्छदा इत्यादावुत्पत्तिरूपस्य
ज्ञापनार्थमथ वा पुष्पोत्पत्तिमत्त्वविशिष्टसप्तच्छदत्वा-

वच्छेदेन शरदादिवृत्तित्वस्यान्वयार्थं कालभावयोरिति कुमारसूत्रेण काले सप्तम्या विध्यन्तरमन्यथा शरदि पुष्यन्ति पलाशा इत्यादिप्रयोगप्रसङ्गः शरद्वृत्तित्वस्य पलाशे पुष्पे वा सत्त्वादिति कालापैरुक्तम् । तदसत् । पुष्यत्यर्थे पुष्पोत्पत्तौ शरद्वृत्तित्वस्यान्वयोपगमादेव दर्शितप्रयोगवारणसम्भवात् कारकान्यसप्तम्यर्थस्य क्रियायां साक्षादन्वयोपगमात् शुक्तौ रजतत्वं जानातीत्यादौ विशेष्यतासंसर्गावच्छिन्नस्य शुक्त्याधेयत्वादेरिव ज्ञानादौ तथा च न काऽप्यनुपपत्तिरिति काले सप्तमीविध्यन्तरं निष्प्रामाणिकमेव शरदि पुष्यन्ति सप्तच्छदा इत्यत्र पुष्यतेः पुष्पोत्पत्तिरर्थस्तिङः पुष्पघटितपरम्परासंसर्गावच्छिन्नाश्रयत्वमर्थः सप्तम्याः कालिकसंबन्धावच्छिन्नाधेयत्वमर्थः तथा च शरद्वृत्तेः पुष्पोत्पत्तेराश्रयाः सप्तच्छदा इत्यन्वयबोधः । एवं शरदि पुष्यन्ति पद्मिन्य इत्यादावप्यनया रीत्याऽन्वयो बोध्य इति न च पुष्यतेः पुष्पमर्थस्तिङ आश्रयत्वमत एव सप्तम्या उत्पत्तिरर्थ इति वाच्यम् । तथा सति माल्यं गुणो वा पुष्यतीतिप्रयोगापत्तेः न च पुष्यतेः पुष्पन्तिङउत्पत्तिरर्थं उत्पत्तेः परम्परता प्रथमान्तार्थं सप्तम्यर्थस्याधेयत्वस्योत्पत्तावन्वय इति वाच्यम् । सुबर्थतिङर्थयोः परस्पराऽन्वयस्य सर्वत्रानभ्युपेतत्वात् तिङर्थस्य प्रथमान्तार्थे साक्षादेवान्वयस्य व्युत्पन्नत्वाद् अन्यथा ज्ञानं सुखं द्वेषो वा पचतीतिप्रयोगप्रङ्गात् तिङर्थकृतेः सामानाधिकरण्येन ज्ञानादेरन्वयसम्भवादिति पूर्वोक्तरीतिः श्रेयसीति । षष्ठ्या सह वैकल्पिकीं सप्तमीं ज्ञापयति । "षष्ठी

चानादरे" इति सूत्रम्। अनादरे अधिके भावलक्षकभाववतः षष्ठी भवति चकारात्सप्तमी भवतीत्यर्थकम्। रुदतो रुदति वा प्राव्राजीदित्यादौ षष्ठीसप्तम्योः पूर्वोक्तं कालवृत्तित्वमनादरोऽधिकस्यार्थः सोऽपि समानकालिकतया क्रियान्तरेऽन्वेति अनादरोऽवहेला सा च समीहितासिद्धिस्वरूपा रुदतः समीहितं तत्पुरुषस्य गार्हस्थ्यं प्रव्रज्याविरहो वा तदसिद्धिः प्रव्रजने सति भवत्येव तथा च रुदत्कालवृत्तिरुदत्समीहितस्य गार्हस्थ्यादेरसिद्धिकालिकी याऽतीतकालवृत्तिप्रव्रज्या तत्कर्तृत्वं वाक्यार्थः। अनादरस्य नोत्तरकालिकतयाऽन्वयः समीहितस्य प्रव्रज्याविरहस्याभावः प्रव्रज्या तत्स्वरूपं क्रियाऽन्तरं न तदुत्तरकालिकं भवतीत्यनुपपत्तिप्रसङ्गात्। यत्तु क्रोशन्तमनादृत्य प्राव्राजीदिति काशिकावृत्तावुक्तं तत्तु मुखं व्यादाय स्वपितीत्यादाविव ल्यपः समानकालिककत्वार्थकत्वाभिप्रायेण। एवं पश्यतो वा सुवर्णं हरतीत्यादौ हरणाभाव एव द्रष्टुः समीहितः। एवं यतमानानां यतमानेषु वा जयद्रथमवधीत्फाल्गुन इत्यादौ यतमानानां जयद्रथस्य रक्षणं वधाभावो वा समीहितः। यदुद्देश्यकेच्छाप्रयोज्या क्रिया क्रियान्तरं लक्षयति तस्येच्छोद्देश्यस्यासिद्धिः समीहितासिद्धिर्बोध्या तेन भुञ्जानस्य भुञ्जाने वा स्वर्णं हरतीति न प्रयोगः यतः स्वर्णहरणाभावोद्देश्यकेच्छाप्रयोज्या न भोजनक्रियेति तथाभूतेच्छाप्रयोज्या दर्शनक्रियेति पश्यति पश्यतो वा हरतीतिप्रयोगे रोदनादिक्रियायाः करुणोत्पादनद्वारा प्रव्रज्याविरहानुगुणत्वावगमात् प्रव्रज्यादिविरहोद्दे-

श्रयकेच्छाप्रयोज्यत्वं रोदनक्रियाया इति । अथ वा तथाभूतेच्छोद्देश्यस्य विरोधिनी क्रियाऽनादरस्तत्र क्रिया धातूपात्तैव तथाभूतेच्छोद्देश्यविरोध एव षष्ठीसप्तम्योरर्थः । विरोधस्तु एककालावच्छेदेनैकत्रावर्तमानत्वं तथा च इच्छोद्देश्यो यः प्रव्रज्याविरहादिः तद्विरुद्धमतीतकालवृत्ति प्रव्रज्यादिकं वाक्यार्थ इति । कतिपयशब्दयोगे षष्ठीसमानार्थिकां सप्तमीं ज्ञापयति । "स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च" इति सूत्रम् । स्वामिन्ईश्वरअधिपतिदायादसाक्षिन्प्रतिभूप्रसूतइत्येतैश्शब्दैर्योगेषु षष्ठीसप्तम्यौ विभक्ती भवत इत्यर्थकम् । गवां गोषु वा स्वामी इत्यादौ षष्ठीसप्तम्योः स्वामित्वान्वयिनिरूपितत्वमर्थः गवां गोषु वा ईश्वर इत्यादावपि तयोरैश्वर्यान्वयितदेवार्थ ऐश्वर्यं स्वामित्वमेव । अथ वा ऐश्वर्यं सामर्थ्यं स्वत्वोत्पादकत्वं तत्र स्वत्वान्वय्याधेयत्वं तयोरर्थः गवां गोषु वाऽधिपतिरित्यादावधिपतिशब्दः स्वामिपर्यायस्तत्र स्वामिशब्दयोगवदेतिः । गवां गोषु वा दायाद इत्यादौ दायादशब्दस्य धनग्राहकोऽर्थस्तत्र धनान्वयितादात्म्यं तयोरर्थ इति । गवां गोषु वा साक्षीत्यादौ दृत्तानिश्चयप्रमावान् साक्षिशब्दार्थस्तत्र दृत्तान्वयिसंबन्धस्तयोरर्थ इति । गवां गोषु वा प्रतिभूरित्यादावन्यकर्तृकावधिकालिकधनदानाभावप्रयोज्यधनदानकर्ता प्रतिभूशब्दार्थस्तत्र द्वितीयधनान्वयितादात्म्यं तयोरर्थ इति । वादिनो वादिनि वा प्रतिभूरित्यादाववधिकालिकदर्शनकर्ता प्रतिभूशब्दार्थः तत्र दर्शनान्वयिविषयत्वं तयोरर्थ इति ।

गवां गोषु वा प्रसूतइत्यादौ प्रसवकर्मप्रसूतशब्दार्थस्तत्र प्रसवान्वयिविज्ञानानुगुणत्वं तयोरर्थ इति अत एव गवां गोषु वा प्रसूतइत्यत्र गा एवानुभवितुं जात इत्यर्थ इति शाब्दिकाः । वस्तुतस्तु प्रसवान्वयिधर्मोपार्जकत्वं तयोरर्थस्तथा च गोधर्मोपार्जकप्रसवकर्मेत्यन्वयबोधः गोधर्मो जाड्यादिः अत एव "तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तर" इत्यादौ तदन्वयधर्मः शुद्धिमत्त्वं प्रसूते दिलीपे युक्तमिति । क्रियाप्रयोजकत्वार्थिका षष्ठी सप्तमीं ज्ञापयति । "आयुक्तकुशलाभ्यां चासेवायामि"ति सूत्रम् आयुक्त इति कुशल इत्येताभ्यां शब्दाभ्यां योगे षष्ठीसप्तम्यौ विभक्ती भवत आसेवायां गम्यमानायामित्यर्थकम् । आसेवा तात्पर्यम् आयुक्तः कृष्णपूजनस्य कृष्णपूजने वा इत्यादौ व्याप्त आयुक्तशब्दार्थस्तत्र व्यापारान्वयिप्रयोजकत्वं षष्ठीसप्तम्योरर्थस्तथा च कृष्णपूजनप्रयोजकव्यापाराश्रय इत्यन्वयबोधः । कुशलः कृष्णपूजनस्य कृष्णपूजने वा इत्यादौ कुशलशब्दार्थो दक्षः स च पुनःपुनः कर्ता अत्रापि पुनः पुनः करणान्वयिप्रयोजकत्वमेव तयोरर्थ इति तथा च कृष्णपूजनप्रयोजकपुनःपुनःकरणाश्रय इत्यन्वयबोधः एवमेव आयुक्तः पटकरणस्य पटकरणे वा कुशलः पटकरणस्य पटकरणे वा इति कायिकोदाहरणेऽप्यन्वयो बोध्यः । यत्र क्रियान्तरतात्पर्यं नास्ति तत्र न षष्ठी यथा आयुक्तो गौः शकटे इत्यादौ अत्र न षष्ठी साधुः आयुक्त इत्यस्य ईषदुक्तोऽर्थस्तथा च यत्र व्यापृतादिरायुक्तादिशब्दार्थस्तत्र क्रियान्तरतात्पर्ये सति षष्ठी साधुरिति । निर्धारणा-

थिकां षष्ठ्या सह सप्तमीं ज्ञापयति। "यतश्च निर्धारणं" इति सूत्रं यतो निर्धारणं ततः षष्ठीसप्तम्यौ विभक्ती भवत इत्यर्थकं निर्धारणं तु एकदेशस्य पृथग्भावः अत एव समुदायादेकदेशस्य पृथक्करणं निर्धारणमिति काशिकायामुक्तं गवां गोषु वा कृष्णा सम्पन्नक्षीरतमा नराणां नरेषु वा क्षत्रियः शूरतम इत्यादौ षष्ठीसप्तम्योर्निर्धारणमर्थ इति। अत्र केचित्। नराणां नरेषु वा क्षत्रियः शूरतम इत्यादौ विशेषान्यत्वं व्यावृत्तत्वं तादात्म्यं चेति त्रयः षष्ठीसप्तम्योरर्थाः। विशेषस्तु समभिव्याहृतक्षत्रियादिर्विशिष्य ग्राह्यः व्यावृत्तत्वं च भेदप्रतियोगित्वं तथा च क्षत्रियस्य नरविशेषतया क्षत्रियान्यत्वस्वरूपं विशेषान्यत्वं नरेऽन्वेति तथान्वितस्य नरस्य क्षत्रियान्यनरत्वावच्छिन्नाधिकरणतानिरूपिताधेयतया भेदे प्रतियोगित्वविशेषणीभूतेऽन्वयस्तथान्वितस्य भेदप्रतियोगित्वस्य शूरतमेऽन्वयः शूरतमस्य तादात्म्येन क्षत्रियेऽन्वयः प्रकृत्यर्थनरविशेषितस्य तादात्म्यस्य क्षत्रियेऽन्वयः तथा च क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्ववत्शूरतमाभिन्नो नराभिन्नः क्षत्रिय इत्यन्वयबोधः। विशेषान्यत्वोपादानात् नराणां नरेषु वा क्षत्रियो द्विजातिरिति न प्रयोगः क्षत्रियान्यवृत्तिभेदप्रतियोगित्वस्य द्विजातौ विरहात् द्विजातिभेदस्य क्षत्रियान्यचाण्डालादिवृत्तित्वेऽपि क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकत्वविरहात् भेदप्रतियोगित्वस्यानुपादाने दर्शितवाक्यस्यायोग्यत्वप्रसङ्गः क्षत्रियान्यनरतादात्म्यस्य शूरतमे क्षत्रिये च बाधात् न च विशेषान्यत्वभेद-

प्रतियोगित्वयोरुभयोरपि नोपादानं व्यर्थत्वात् तादात्म्य-स्येवोपादानमिति वाच्यम् । तथा सति नराणां क्षत्रि-यः प्राणीतिप्रयोगप्रसङ्गान्नरतादात्म्यस्य प्राणिनि क्ष-त्रिये ऽपि सत्त्वात् तादात्म्यस्यानुपादाने घटानां क्ष-त्रियः शूरतम इत्यादिप्रयोगप्रसङ्गः क्षत्रियान्यघटवृ-त्तिभेदस्य क्षत्रिये सत्त्वात् न च संख्यान्यसुबर्थस्य प्रकृ-त्यर्थविशेष्यत्वनियमात् क्षत्रियान्यत्वादिस्वरूपस्य षष्ठ्या-द्यर्थस्य प्रकृत्यर्थप्रकारत्वायोग इति वाच्यम् । संबोध्य-त्वादेः प्रथमार्थस्य प्रकृत्यर्थे प्रकारत्वोपगमेन दर्शितनि-यमे व्यभिचारादर्शितनियमस्य प्रायिकत्वात् । न च नराणां क्षत्रियो द्रव्यमिति प्रयोगः स्यात् क्षत्रियान्यन-रत्वावच्छेदेन द्वित्वाद्यवच्छिन्नप्रतियोगिताकद्रव्यभदस्य सत्त्वादिति वाच्यम् । द्रव्यत्वादिविशिष्टे धर्मिणि द्रव्य-त्वाद्यवच्छिन्नस्यैव भेदप्रतियोगित्वस्य बोधने निर्धार-णविभक्तेः समर्थत्वात् यद्यपि भेदः प्रतियोगित्वं च द्वयमेव निर्धारणविभक्तेरर्थो युज्यते तावतैवाभिम-तनिर्वाहात् प्रतियोगितया क्षत्रियान्वितस्य विशेषण-तया नरेऽन्वयात्तथान्वितस्य नरस्य पुनर्भेदे प्रतियो-गितयाऽन्वयात्तथान्वितस्य भेदस्य निरूपकतया प्रति-योगित्वे तथान्वितस्य प्रतियोगित्वस्य शूरतमेऽन्वय-संभवात् तथापि क्षत्रियादेर्नामार्थस्य स्वार्थकनामोत्तर-विभक्त्यर्थं एव प्रकारतया भेदान्वयस्य व्युत्पन्नत्वात् नरादिनामान्तरोत्तरविभक्त्यर्थे तथा तदन्वयस्याव्यु-त्पन्नत्वात् न च नरस्य क्षत्रियः शूरतम इत्यादिनिर्धा-रणविभक्त्येकवचनप्रयोगः स्यादिति वाच्यम् । प्राणि-

पादस्य पाणिः पवित्र इत्यादौकवचनवदन्यत्रापि निर्धारणविभक्त्येकवचनप्रयोगे स्मृतिविरहात् अत एव "द्वन्द्वः सामासिकस्य चे"ति गौतावाक्यमपि सङ्गच्छते । ननु पाथःपृथिव्योर्जलं स्नेहवदित्यादौ जलभिन्नयोः पाथःपृथिव्योरप्रसिद्धा पाथःपृथिव्युभयवृत्तिभेदप्रतियोगित्वस्य स्नेहवति बाधेन च जलान्यपाथःपृथिव्युभयत्वावच्छिन्नवृत्तिभेदप्रयोगिनः स्नेहवतो बोधासंभवः न च द्विपदद्वन्द्वोत्तरनिर्धारणविभक्तेरन्यतरवृत्तिभेदप्रतियोगित्वमेवार्थस्तन्निविष्टे चान्यतरस्मिन्नेवैकपदोपात्तत्वेन जलान्यत्वादेः षष्ठ्यर्थान्तरस्यान्वयस्तथा च जलान्यो यः पाथःपृथिव्योरन्यतरस्तन्निष्ठभेदप्रतियोगित्वं स्नेहवति वर्तत एवेति वाच्यम । तावताऽपि पाथःपृथिव्युभयतादात्म्यस्य जले बाधेनोक्तवाक्यस्यायोग्यत्वतादवस्थ्यात् पाथःपृथिव्योस्तेज उष्णमित्यादाप्रयोगेण निर्धारणविभक्तेः तादात्म्यवाचितात्पर्यौचित्यात् घटतद्भिन्नयोर्घटः कम्बुग्रीवादिमानित्यादौ घटतद्भिन्नान्यतराप्रसिद्धा तादृशेतरभेदस्य बोधयितुमशक्यत्वादिति चेन्न द्वन्द्वोत्तरनिर्धारणषष्ठ्याः पर्याप्तसंख्याश्रयेऽपि शक्तत्वेन तस्मिन्नेवैकपदोपात्तत्वेन षष्ठ्यर्थस्य जलान्यत्वरूपनिर्धार्यभेदस्यान्वयेन सर्वसामञ्जस्यात्पाथःपृथिव्योर्जलं स्नेहवदित्यादौ जलभिन्नो यः पाथःपृथिवीपर्याप्तसंख्याश्रयस्तत्त्वावच्छिन्नवृत्तिकभेदस्य प्रतियोगिस्नेहाभिन्नं पाथःपृथिवीपर्याप्तसंख्याश्रयो जलमित्यन्वये बाधकाभावात् यच्च तूद्देश्यविधेययोर्न तादात्म्येनान्वयबोधसामग्री किं तु संबन्धान्तरेण तत्र निर्धारण-

विभक्तेरत्यन्ताभावप्रतियोगित्वमर्थः यथा नराणां क्षत्रिये शौर्यमित्यादौ अत्र क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकात्यन्ताभावस्य प्रतियोगित्वं शौर्ये प्रतीयते न तु तादृशभेदस्य तथासति नराणां क्षत्रिये रूपमित्यादिप्रयोगापत्तेः नराणां मध्ये क्षत्रियः शूरतम इत्यादौ निर्धारणवाचिनो मध्य इत्यव्ययस्य निर्धारणविभक्त्या सह समभेदे हे चैत्रेत्यादाविव नान्यतरवैयर्थ्यमिति वदन्ति। तच्चिन्त्यम्। क्षत्रियान्यत्वादेर्निर्धारणेऽनुप्रवेशे निर्धारणविभक्तेर्नानार्थताऽऽपत्तेः यत्र चापूर्वो वाक्यार्थस्तत्र मित्रातनयानां माधवः पण्डित इत्यादौ माधवान्यत्वस्यापूर्वतया तत्र निर्धारणविभक्तिवाच्यत्वस्याग्रहेणान्वयबोधानुपपत्तिप्रसङ्गात् द्रोणैकलव्यकालयवनाद्यवृत्तेः शूरतमभेदस्य क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकत्वबाधादृर्शितवाक्यस्यायोग्यत्वप्रसङ्गाच्च किं च पर्याप्तसंख्याश्रये विभक्तिवाच्यत्वाभ्युपगमेऽपि तत्र विशेषान्यत्वान्वयो न युक्तस्तथासति धवखदिरयोर्धवखदिरौ क्रेद्यावित्यादिप्रयोगापत्तेः पर्याप्तसंख्याश्रये धवान्यत्वखदिरान्यत्वयोरन्वयसम्भवात्। न च द्वन्द्वस्थले निर्धारणविभक्तेरिव निर्धार्यपदोत्तरविभक्तेरपि पर्याप्तसंख्याश्रयोऽर्थस्तत्रैव निर्धारणान्वय इति वाच्यम्। तथासति पाण्डवानां युधिष्ठिरभीमार्जुनाः कौन्तेया इत्यादौ निर्धार्ययुधिष्ठिरादौ निर्धारणानन्वयप्रसङ्गात् भिन्नभिन्नसुबर्थयोः परस्परान्वयस्याव्युत्पन्नत्वाच्च। यत्तु नराणां क्षत्रियः शूरतम इत्यादौ राहोः शिर इत्यत्रेवाभेद एव षष्ठ्यर्थः स च क्षत्रियादावन्वेति तदन्वितेतदन्वयि-

तावच्छेदकक्षत्रियत्वाद्यवच्छेदेन शूरतमस्य तादात्म्येनान्वयस्तथा च नराभिन्नक्षत्रियत्वावच्छेदेन शूरतमस्याभेदो वाक्यार्थस्तेन नराणां क्षत्रियोऽर्जुन इत्यादिको न प्रयोगः । न वा नराणां कीशः पशुरित्यादिकश्च प्रयोगः कीशे मानुषाभेदस्य विरहादिति तत्तुच्छं नराणां क्षत्रियः प्राणी क्षत्रियाणां नरः शूर इत्यादिप्रयोगापत्तेः । यदपि नराणां क्षत्रियः शूर इत्यादौ भेदोऽभेदश्च निर्धारणविभक्तेरर्थः प्रकृत्यर्थे विशेषणीभूय भेदो भेदे विशेषणीभूय प्रतियोगी क्षत्रियादिरन्वेति व्युत्पत्तिवैचित्र्येण भेदे पुनः प्रतियोगितया विशेषणान्तरस्य शूरादेरन्वयः शूराद्यन्वितभेदस्तु क्षत्रियादिभेदान्वितप्रकृत्यर्थतावच्छेदकावच्छेदेन विधेयतयाऽन्वेति प्रकृत्यर्थविशेषितोऽभेदः क्षत्रियादावन्वेति प्रकृत्यर्थाभेदान्विते क्षत्रिये शूरस्य तादात्म्येनान्वयस्तथा च क्षत्रियान्यो नरः शूरभिन्नः नराभिन्नः क्षत्रियः शूर इति मुख्यविशेष्यिताद्वयशाली समूहालम्बनाकारो द्विविधो वाऽन्वयबोध इति। तदसत्। नामार्थमुख्यविशेष्यकान्वयबोधे नामार्थस्य प्रथमान्तार्थतानियमपरित्यागापत्तेः संख्यान्यसुबर्थविशेषणकप्रातिपदिकार्थविशेष्यकान्वयबोधस्या व्युत्पन्नत्वात् एकपदोपस्थाप्यस्य भेदस्योद्देश्यतावच्छेदकविधेयभावेन कथमप्यन्वये व्युत्पत्तिविरहाच्च इत्थं च निर्धारणमन्यादृशं बोध्यं तथा हि भेदप्रतियोगिताऽवच्छेदकधर्मवत्त्वं प्रकृत्यर्थतावच्छेदकत्वोपलक्षितधर्मसामानाधिकरण्यं च ह्यमेव षष्ठीसप्तम्योरर्थः दर्शितसामानाधिकरण्यं तु प्रतियोगितावच्छेदकेऽन्वेति एकपदोपा-

क्तयोरपि तिङर्थकृतिवर्तमानत्वयोरिव लिङर्थे बलवदनिष्टाननुबन्धित्वेष्टसाधनत्वयोरिव परस्परान्वयस्य व्युत्पत्तिसिद्धत्वात् एषं नराणां नरेषु वा क्षत्रियः शूरतम इत्यादौ भेदप्रतियोगितावच्छेदकधर्मः प्रकृत्यर्थतावच्छेदकसामानाधिकरण्यं च षष्ठीसप्तम्योरर्थः तत्र दर्शितसामानाधिकरण्यं भेदप्रतियोगितावच्छेदकधर्मेऽन्वेति तथान्वितः स धर्मः क्षत्रियादावपरपदार्थेऽन्वेति भेदे प्रकृत्यर्थतावच्छेदकनरत्वादौ च विभक्त्यर्थैकदेशे प्रकृत्यर्थस्याधेयतयाऽन्वयः क्षत्रियादौ विशेषणपदार्थस्य शूरतमादेः तादात्म्येनान्वयः शौर्यादिधर्मस्वरूपस्य विशेषणस्य संबन्धान्तरेण तथा च नरवृत्तिनरत्वसमानाधिकरणो नरवृत्तिभेदप्रतियोगितावच्छेदको यस्तद्वान् क्षत्रियः शूरतम इत्यन्वयबोधः। नराणां नरेषु वा क्षत्रिये शौर्यं क्षत्रियस्यायुधजीवनमित्यादौ दर्शितनिर्धारणान्वितस्य क्षत्रियस्याधेयत्वं शौर्ये संबन्ध आयुधजीवने चेति अत्र भेदप्रतियोगितावच्छेदकोऽन्वयितावच्छेदकीभूतयद्धर्मावच्छेदेन भासते भेदप्रतियोगितावच्छेदकत्वेन स एव धर्मो भासते यथा सत्तावन्ति सर्वाणि निखिलजातिव्यापकजातिमन्ति सकलजातिव्यापकजातिमन्ति सत्तावन्ति वेत्यादौ सकलजातिव्यापकजातित्वेन सत्तैव भासते तथा प्रकृते क्षत्रियत्वादिरन्वयितावच्छेदक एव भेदप्रतियोगितावच्छेदकत्वेन भासत इति व्युत्पत्तिरत एव क्षत्रियस्य क्षत्रियनिष्ठभेदप्रतियोगितावच्छेदकीभूतक्षत्रियवैश्योभयत्ववत्त्वेऽपि क्षत्रियाणां क्षत्रियः शूर इत्यादिको न प्रयोगः न वा

द्रव्यस्य तथाभूततादृशोभयत्ववत्त्वेऽपि नराणां द्रव्यं शौर्यवदित्यादिकप्रयोगः प्रतियोगितावच्छेदकत्वं प्रतियोगितावच्छेदकधर्मसमनियतत्वं बोध्यम् अतः पार्थिवपाचाणां कम्बुग्रीवादिमज्जलाहरणमित्यादिप्रयोगस्य नानुपपत्तिः कम्बुग्रीवादिमत्त्वादेरन्वयितावच्छेदकस्य प्रतियोगितावच्छेदकत्वविरहेऽपि प्रतियोगितावच्छेदकीभूतघटत्वादिसमनियतत्वात् तथा चान्वयितावच्छेदकसमनियतो धर्म एव भेदप्रतियोगितावच्छेदकत्वेन प्रकृते भासत इति व्युत्पत्तिरेतदर्थमेव भेदप्रतियोगित्वमपहाय भेदप्रतियोगितावच्छेदको निर्धारणेऽनुप्रवेशितः यदि च प्रतियोगित्वमतिरिक्तपदार्थस्तत्रापि विशेषप्रतियोगितातोऽतिरिक्तं सामान्यधर्मावच्छिन्नप्रतियोगित्वमिति मन्यते तदापि अन्वयितावच्छेदकसमनियतधर्मावच्छिन्नप्रतियोगित्वलाभार्थं प्रतियोगितावच्छेदकस्यानुप्रवेशस्तथा च भेदप्रतियोगित्वमेव निर्धारणविभक्तेरर्थः भेदप्रतियोगितात्वेनान्वयितावच्छेदकसमनियतधर्मावच्छिन्ना प्रतियोगिताव्यक्तिरेव भासत इति व्युत्पत्तिः भेदप्रतियोगित्वे तदवच्छेदके वा प्रकृत्यर्थतावच्छेदकसामानाधिकरण्यस्यान्वयोपगमात् ब्राह्मणानां क्षत्रियः शूर इत्यादिको न प्रयोगः ब्राह्मणत्वसमानाधिकरणस्य ब्राह्मणवृत्तिभेदप्रतियोगित्वस्य क्षत्रिये विरहात् । न च दर्शितप्रयोगवारणार्थं निर्धारणविभक्तेस्तादात्म्यमर्थोऽस्तु तादात्म्यस्य क्षत्रियादावन्वय इति न काऽप्यनुपपत्तिरिति वाच्यम् । तथासति नराभेदविशिष्टे क्षत्रिये शूरस्य तादात्म्येन विधेयत्वोपगमेन

राभेदेस्य क्षत्रियविशेषणत्वे वैयर्थ्यप्रसङ्गात् । एवं निर्धार्यतावच्छेदकधर्मसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकधर्मवान् निर्धार्यतावच्छेदकव्याप्यनानाधर्मसमानाधिकरणश्च यो धर्मस्तद्वान् तादात्म्येन स च धर्मः संबन्धान्तरेण निर्धार्योऽन्वेतीतिव्युत्पत्तिः धर्मवदित्यन्तोपादानात् नराणां क्षत्रियो द्विजातिः प्राणी वेत्यादिको न प्रयोगः द्विजातित्वादेः क्षत्रियत्वत्यन्ताभावप्रतियोगितावच्छेदकत्वविरहात्समानाधिकरण इत्यन्तोपादानात् नराणां नरेषु वा क्षत्रियोऽर्जुन इत्यादिको न प्रयोगः अर्जुनत्वस्य क्षत्रियत्वव्याप्यनानाधर्मसामानाधिकरण्य विरहात् नानाधर्मोऽपि परस्परविरुद्धो ग्राह्यस्तेनार्जुनत्वस्य क्षत्रियत्वव्याप्यगुणकर्मादिनानाधर्मसमानाधिकरणत्वेऽपि न दर्शितप्रयोगः न च निर्धार्यतावच्छेदकावच्छेदेन विधेयान्वयोपगमादेव न दर्शितप्रयोगः अर्जुनत्वादेर्विधेयस्य निर्धर्मितावच्छेदकक्षत्रियत्वावच्छेदेनान्वयासम्भवादिति समानाधिकरणान्तोपादानं व्यर्थमेवेति वाच्यम् । तथासति नराणां नरेषु वा क्षत्रियः शूरतम इत्यादिप्रयोगानुपपत्तिप्रसङ्गात् शूरतमादेर्विधेयस्य क्षत्रियत्वावच्छेदेनान्वयासम्भवात् रणभीतक्षत्रियादौ शूरतमतादात्म्यविरहेणायोग्यत्वात् तादृशधर्मसामानाधिकरण्यं तु विधेये तत्त्वावच्छेदके वा तत्रैव तत्त्वं यच्च परस्परविरुद्धनानाधर्मसमानाधिकरणमुद्देश्यतावच्छेदकं भवति तेन पाण्डवानां धनञ्जयोऽहं गाण्डीवी वेत्यादौ धनञ्जयत्वव्याप्यपरस्परविरुद्धनानाधर्मस्याप्रसिद्ध्या अहंत्वस्य गा-

गडीवित्वस्य तादृशधर्मसामानाधिकरण्याप्रसिद्धाऽपि नान्वयानुपपत्तिः न चैवं क्षत्रियाणां धनञ्जयो गाण्डीवीत्यादिप्रयोगः स्यादिति वाच्यम् इष्टत्वात् यदि च द्रव्याणां क्षत्रियः शूर इत्यादिकः प्रयोगो नेष्यते तदा निर्धार्यतावच्छेदके निर्धारणविभक्तिप्रकृत्यर्थतावच्छेदकस्य साक्षाद्व्याप्यत्वं तत्र तन्त्रमिति मन्तव्यं न हि क्षत्रियत्वादिकं द्रव्यत्वसाक्षाद्व्याप्यं द्रव्यत्वव्याप्यपृथिवीत्वादिव्याप्यत्वात् भवति च नरत्वसाक्षाद्व्याप्यमिति दर्शितप्रयोग इष्यते न च नरत्वव्याप्यत्वात् क्षत्रियत्वस्य न नरत्वसाक्षाद्व्याप्यत्वमिति कथं दर्शितप्रयोग इति वाच्यं क्षत्रियत्वस्य द्विजातित्वाव्याप्यत्वात् संस्कारविशेषरूपस्य द्विजातित्वस्याकृतसंस्कारकमृतक्षत्रिये विरहात् न च द्विजातीनां क्षत्रियः शूर इत्यादिकः प्रयोगो न स्यादिति वाच्यम्। इष्टत्वात् अत एव क्षत्रियादिपदसमभिव्याहारे द्विजातीनामिति निर्धारणविभक्तिर्न किन्तु नराणामित्येव यदि च द्विजातित्वव्याप्यत्वेऽपि नरत्वव्याप्यजात्वव्याप्यत्वात् जातिघटितं नरत्वसाक्षाद्व्याप्यत्वं क्षत्रियत्वे नानुपपन्नमिति नराणामित्यादिदर्शितप्रयोगो नानुपपन्नस्तदा द्विजातीनामित्यादिदर्शितप्रयोगोऽपीष्ट एवात्र व्याप्यता न तन्त्रमिति वक्ष्यते। ननु घटः पृथिव्योः पृथिवी गन्धवतीत्यादावन्वयानुपपत्तिः पृथिवीवृत्तिभेदप्रतियोगित्वस्य पृथिवीत्वसमनियतधर्मावच्छिन्नस्य पृथिव्यामसत्त्वात् जलनिष्ठभेदप्रतियोगित्वस्य तादृशस्य पृथिव्यां सत्त्वेऽपि तादृशप्रतियोगित्वे जलत्व सामानाधिकरण्यविरहात् यद्धर्मावच्छिन्ननिष्ठभेदप्रति-

योगित्वं निर्धारणं तत्र तद्धर्मसामानाधिकरण्यान्वय-स्यैव व्युत्पत्तिसिद्धत्वात् अन्यथा जलानां पृथिवी गन्ध-वतीत्यादिप्रयोगः स्यादिति चेन्न भेदप्रतियोगित्वे प्रकृ-त्यर्थतावच्छेदकसामानाधिकरण्यान्वयस्य विवक्षितत्वात् द्वन्द्वस्थले प्रकृत्यर्थतावच्छेदकस्य नानात्वादन्वयोपपत्तेः तथा हि प्रकृते जलत्वं पृथिवीत्वं च इयं प्रकृत्यर्थतावच्छेदकं तत्र जलत्वावच्छिन्नस्याधेयतया भेदे पृथिवी-त्वसामानाधिकरण्यस्य भेदप्रतियोगित्वेऽन्वयो निरा-बाध इति। जलानां पृथिवीत्यादौ तु जलत्वस्यैकस्य प्रकृत्यर्थतावच्छेदकत्वात् जलनिष्ठभेदस्य प्रतियोगित्वे पृथिवीत्वसमनियतधर्मावच्छिन्ने जलत्वसामानाधिकर-ण्यविरहात् नान्वयोपपत्तिरिति। ननु जलपृथिव्योः पृ-थिवी गन्धवतीत्यत्र पृथिवीत्वे जलत्वव्याप्यत्वविरहात् पृथिवीत्वस्य व्याप्यतायाः सत्त्वेऽपि तत्साक्षाद्व्याप्यत्व-विरहात् तदन्यत्वे सति तद्व्याप्यत्वविशिष्टस्य तद्व्या-प्यत्वस्य तत्साक्षाद्व्याप्यत्वस्य तदन्यत्वविरहेण विशि-ष्टाभावसम्भवादिति कथं पृथिवीत्वस्य जलनिष्ठभेदप्र-तियोगित्वान्वयितावच्छेदकत्वमिति चेन्न यतस्तद-न्वयस्य तद्व्याप्यस्याव्याप्यत्वे सति तदन्यतद्व्याप्यत्वं साक्षाद्व्याप्यत्वं तच्च विशेष्यदले तदन्यत्वं प्रकृते न प्रवेशनीयं तथा च पृथिवीत्वसाक्षाद्व्याप्यत्वं पृथिवीत्वे निरावाधमिति नान्वयितावच्छेदकत्वहानिरिति। न-न्वेवं निर्धारणविभक्तिप्रकृत्यर्थतावच्छेदकसाक्षाद्व्याप्य-त्वस्य निर्धारणान्वयितावच्छेदकत्वे तन्त्रत्वेऽभ्युपगमे तत एव ब्राह्मणानां क्षत्रियः शूरः जलानां पृथिवी गन्धव-

वतीत्यादिप्रयोगवारणं क्षत्रियत्वादावन्वयितावच्छेदके ब्राह्मणत्वादिप्रकृत्यर्थतावच्छेदकव्याप्यत्वविरहाद् इत्थं च निर्धारणे प्रकृत्यर्थतावच्छेदकसामानाधिकरण्यप्रवेशो व्यर्थ इति चेन्न यतो यत्र प्रकृत्यर्थतावच्छेदकान्वयितावच्छेदकयोः साजात्यं तत्रैव साक्षाद्व्याप्यत्वं तन्त्रं न तु तयोर्वैजात्ये साजात्यं तु जातित्वादिना बोध्यमिति द्रव्याणां क्षत्रिय इत्यादिको न प्रयोगः वैजात्ये तु न साक्षाद्व्याप्तता तन्त्रं, यथा गवां गोषु वा कृष्णा संपन्नक्षीरतमेत्यादौ अत्र प्रकृत्यर्थतावच्छेदकस्य गोत्वस्यान्वयितावच्छेदके कृष्णगुणे साजात्यविरहात् न साक्षाद्व्याप्यताविरहेणान्वयविरह इति । एवं च हंसानां कृष्णः सुचेष्टः नराणां चतुष्पादो मदोत्कट इत्यादिप्रयोगवारणार्थं प्रकृत्यर्थतावच्छेदकसामानाधिकरण्यस्य निर्धारणे प्रवेशः अन्यथा हंसादिवृत्तिभेदप्रतियोगित्वस्य कृष्णगुणादिमति सत्त्वाद्दर्शितप्रयोगस्य दुर्वारताऽऽपत्तेः तदिदं निर्धारणं जात्या गुणेन क्रियया-ऽन्येनापि धर्मेण भवति तत्र जात्या नराणां नरेषु वा क्षत्रिय इत्यादिकं गुणेन गवां गोषु कृष्णेत्यादिकं क्रियया गवां गोषु वा वत्सं धावन्ती दुग्धवतीत्यादिकं अत्र वत्सकर्मकधावनक्रियावत्त्वमन्वयितावच्छेदकं गोनिष्ठभेदप्रतियोगितावच्छेदकमिति अन्येन प्राणिनां प्राणिषु वा चतुष्पादः पशुरित्यादिकमुदाहरणं बोध्यं जातिक्रियागुणाभिन्नमत्र चतुःसंख्यकपादसमवेतत्वमन्वयितावच्छेदकं प्राणिनिष्ठभेदस्य प्रतियोगितावच्छेदकमिति । अत एव काशिकायां जातिगुणक्रियाभि-

रिति पृथक्करणस्य करणाभिधानं स्वरूपकथनं न च परिसंख्यानमिति। यत्र प्रकृत्यर्थतावच्छेदकनिर्धार्यतावच्छेदकयोः वैजात्यं तत्र परस्परव्यभिचारितैवान्वयितावच्छेदकत्वे तन्मतो द्रव्याणां कृष्णा सम्पन्नक्षीरतमेत्यादिको न प्रयोगः प्रयोगस्तु कृष्णानां गौः सम्पन्नक्षीरतमा द्विजातीनां क्षत्रियः शूरतम इत्यादिक उपपद्यते। हरीणां हरिषु वा शत्रुः सुरश्रेष्ठ इत्यादौ हरिपदार्थतावच्छेदकं सूर्यत्वविष्णुत्वेन्द्रत्वादिकं नानाविधमेव प्रकृत्यर्थतावच्छेदकं तत्र शक्रान्यप्रकृत्यर्थनिष्ठभेदस्य प्रतियोगित्वेऽन्वयितावच्छेदकीभूतशक्रत्वावच्छिन्ने शक्रत्वसामाधिकरण्यान्वयसम्भवात् द्वन्द्वस्थले इवैकशेषेऽपि नानुपपत्तिरिति। द्वन्द्वः सामासिकस्य चेत्यत्र समासत्वस्यानुगतधर्मतया जातित्वात् जातिगतैकत्वविवक्षायामेकवचनमिति नानुपपत्तिः "जात्याख्यायामि"ति सूत्रे अनुगतधर्मस्यैव जातित्वेनोपादानमत एव "शरीरमाद्यं खलु धर्मसाधनमि"ति सङ्गच्छते यतः शरीरत्वं न वैशेषिकसंमता जातिर्न वैकमात्रशरीरं धर्मसाधनमेत्यनुगतधर्मस्वरूपजातिगतैकत्वविवक्षायामेकवचनोपपत्तिः। "नक्षत्राणां शश्यहमि"त्यादौ नक्षत्रपदस्य शशियुक्तनक्षत्रसमुदाये लक्षणायां निर्धारणे अन्यथा शेषे स्वस्वामिभावे षष्ठी। एवं "वित्तेशो यक्षरक्षसामि"त्यत्र यदि धनेशो यक्षस्तदा जलपृथिवी गन्धवतीत्यादाविव निर्धारणेऽन्यथा शेषे स्वस्वामिभावे षष्ठीति एवमन्यत्रापि बोध्यम्। एवं नराणां मध्येऽत्यव्ययस्य भेदप्रतियोगित्वं समभिव्याहृतशब्दार्थतावच्छेदकसा-

माधिकरण्यं चार्थः षष्ठ्या भेदान्वयी समभिव्याहृतश-
ब्दार्थतावच्छेदकान्वयी च संबन्धोऽर्थः संबन्धस्तु प्रकृते
आधेयत्वमेव भेदप्रतियोगित्वमन्वयितावच्छेदकसम-
नियतधर्मावच्छिन्नं पूर्ववद्बोध्यम् इत्थं मध्येशब्दयोगे षष्ठी
न निर्धारणार्थिका किं तु शेषार्थिका अत एव "लोके-
शलोकेशयलोकमध्ये तिर्यञ्चमप्यञ्च मृषानभिज्ञरसज्ञतो-
पज्ञसमज्ञमज्ञमि"त्यादौ समास उपपद्यते अन्यथा नि-
र्धारणषष्ठ्यन्तेन सह समासस्य निषेधात्तदनुपपत्तिप्रसङ्गः
एवं नरमध्ये क्षत्रियः शूर इत्यादिप्रयोगानुपपत्तिप्रसङ्ग
इति । अर्चार्थिकां सप्तमीं दर्शयति । "साधुनिपुण"
इत्येताभ्यां योगे अर्चायामर्थे सप्तमी विभक्तिर्भवति प्रते-
र्योगे न भवतीत्यर्थकं मातरि साधुर्निपुणो वेत्यादौ
समर्थः साधुशब्दार्थः सामर्थ्यं जनकतावच्छेदकधर्मवत्त्वं
तदेव स्वरूपयोग्यत्वमिति सावहितकृती निपुणशब्दा-
र्थः सावहितकर्तृत्वमप्रमत्तकर्तृत्वं तदपि कर्त्तव्यतागो-
चरपुनःपुनःस्मरणाधीनकृतिमत्त्वं तत्र सप्तम्यर्थोऽर्चा
सामर्थ्यैकदेशे जनकत्वे निरूपकतया निपुणपदार्थैक-
देशे तादृशस्मरणाधीनकृतौ विषयितयाऽन्वेति । अर्चा
तु प्रीत्यनुकूलो व्यापारस्तत्र प्रीतौ प्रकृत्यर्थस्य समवेत-
त्वेनान्वयः प्रीतिः सुखं सुखसाधनं वा तथा च मातृ-
समवेतप्रीत्यनुकूलव्यापारनिरूपितजनकतावच्छेदकध-
र्मवान् मातृसमवेतप्रीत्यनुकूलव्यापारविषयिणी क-
र्तव्यतागोचरपुनःपुनःस्मरणाधीना या कृतिस्तद्वानिति
वा शाब्दबोधः अर्चायां गम्यमानायामिति काशि-
कायामुक्तम् । अत्र सूत्रे अर्चा सप्तम्यर्थत्वेनैव वि-

वक्षिता न तु मानान्तरगम्यत्वेन तथासति "साध्वसाधुप्रयोगे सप्तमी वक्तव्ये"ति वार्तिके साधुशब्दोपादनस्य वैयर्थ्यापत्तेः मातरि साधुरित्यत्र मातृप्रियकारित्वावगमे मात्वर्चाया अवश्यं गम्यमानत्वात्सप्तम्या अर्चार्थकत्वे तु वार्तिके साधुशब्दोपादानस्य न वैयर्थ्यमिति प्रागुक्तम् अर्चाया अविवक्षणे सप्तमी न साधुः यथा साधुः भृत्यो राज्ञ इत्यादौ अत्र तत्त्वकथने सप्तमी न भवति । अत्र भृत्यस्य साधुत्वमात्रप्रार्थकर्तृत्वं अर्चार्थिकाऽपि सप्तमी प्रतियोगे न भवति यथा मातरं प्रति साधुरित्यादौ अत्र कर्मप्रवचनीयद्योत्यं समवेतत्वं द्वितीयार्थः प्रियकारी साधुशब्दार्थः पूर्ववदन्वयः । "अप्रत्यादेरिति वक्तव्यमि"ति वार्तिकं येषां कर्मप्रवचनीयानां योगे सप्तमी विहिता तदन्यकर्मप्रवचनीययोगे सप्तमी न भवतीत्यर्थकं तेन मातरं प्रति परि अनु अभि वा साधुरित्यादौ न सप्तमी भवतीति । पञ्चम्या सह वैकल्पिकीं सप्तमीं दर्शयति । "सप्तमीपञ्चम्यौ कारकमध्ये" इति सूत्रं कारकयोर्मध्ये यौ कालाध्वानौ ताभ्यां सप्तमीपञ्चम्यौ विभक्ती भवत इत्यर्थकम् । अद्य भुक्त्वा द्व्यहे द्व्यहाद्वा भोक्ता इत्यादौ सप्तमीपञ्चम्योः परत्वनिरूपितापरत्वाधिकरणकालवर्तित्वमर्थस्तत्र परत्वे समवेतत्वेन प्रकृत्यर्थस्यान्वयः क्त्वार्थोऽनन्तरत्वं द्व्यहेऽन्वेति तथा चाद्यवृत्तिभोजनानन्तरद्व्यहवृत्तिपरत्वनिरूपितापरत्वाधिकरणकालवृत्तिभोजनकर्तेति शाब्दबोधः । अत्र भोजनकर्तृतान्वयनिरूपकारकशक्त्योर्मध्ये कालः इहस्थोऽयं धानुष्कः क्रोशे क्रोशाद्वा लक्ष्यं विध्यति इत्यादौ दे-

शिकापरत्वनिरूपितपरत्वाधिकरणदेशवर्तित्वं सप्तमी-पञ्चम्योरर्थः तच्च कर्मद्वारा धात्वर्थफलेऽन्वेति विध्य-तेरवयवविभागानुकूलो व्यापारोऽर्थः छिदेस्तु आरम्भक-संयोगानर्ज्जकावयवविभागानुकूलो व्यापारोऽर्थ इति न छिदिपर्यायता तथा च क्रोशदृत्त्यपरत्वनिरूपितपरत्वा-धिकरणदेशवृत्तिर्यो लक्ष्यवृत्तिरवयवविभागस्तदनुकूल-व्यापारकर्त्ता इहस्थधानुष्कोऽयमित्यन्वयबोधः । अत्र कर्तृकर्मशक्त्योर्मध्ये अध्या । वस्तुतस्तु कारकयोर्मध्येऽर्थे सप्तमीपञ्चम्यौ विभक्ती भवत इत्येव सूत्रार्थः । तत्र म-ध्यत्वं कालिकमपरत्वसमानाधिकरणापरत्वं दैशिकम-परत्वमेव तत्रापरत्वे प्रकृत्यर्थयोः कालदेशयोः समवे-तत्वेनान्वयः अवधितया कारकस्य कारकाधिकरणस्य चान्वयः कालिकमध्यत्वघटकपरत्वस्य निरूपकतया दैशिकापरत्वस्य स्वनिरूपितपरत्वसमवायेन कारका-धिकरणे परम्परया वा कारकेऽन्वयः तच्च कारकं यो-ग्यतावशात् कर्तृकर्मादिकं बोध्यम् । अद्य हविष्यं भो-क्ता ह्यहे ह्यहाहा निरामिषं भोक्ता अत्र हविष्यकर्मक-भोजनकर्त्ता तदधिकरणीभूतकालेन वाऽवधिभूत ह्य-हदृत्ति यदपरत्वं तत्समानाधिकरणपरत्वस्य निरूपको निरूपककालवृत्तिर्वा निरामिषकर्मकभोजनकर्तेत्याद्याधि-करणकहविष्यकर्मकभोजनकर्तेत्यन्वयबोधः । इह-स्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्यतीत्यादौ वेधकेन तदधिकरणदेशेन वाऽवधिभूतपरत्वं तन्निरूपकक्रो-शदृत्त्यपरत्वस्य निरूपकं तदधिकरणं तादृशदेशवृत्ति वा यल्लक्ष्यं तत्कर्मकवेधकर्ता इहस्थोऽयमित्यन्वयबोधः।

इहाद्यशब्दार्थयोर्देशकालयोरधिकरणयोरवधित्वार्थं इहाद्यशब्दयोरुपादानम् अवधिमत्त्वस्य अवधिमत्परत्वनिरूपकत्वस्याधिकरणकालवृत्तित्वस्य चोल्लेखः संसर्गमर्यादया बोध्यः । अथ वा मध्यशब्दोऽन्तरालवाची तथा चान्तरालत्वेऽर्थे सप्तमीपञ्चम्यौ भवत इति सूचार्थस्तत्र कालिकमन्तरालत्वं परस्परनिरूपितकालिकपरत्वापरत्वाधिकरणयोरनधिकरणत्वमत्यन्ताभाववत्त्वमिति यावत् । दैशिकं तु दैशिकपरत्वस्यावधिसमवायिनोरनधिकरणत्वमत्यन्ताभाववत्त्वमिति यावत् तथा च कालिकापरत्वापरत्वयोरधिकरणकारकयोरधिकरणकालवृत्तिकारकशक्त्योस्तत्कारकभावस्वरूपयोः । एवं दैशिकपरत्वस्यावधिसमवायिनोः कारकयोरवधिसमवायिदेशवृत्तिकारकशक्त्योर्वा सुप्तिङादितो लाभात् कालाध्ववाचकपञ्चम्युत्तरयोः सप्तमीपञ्चम्योरत्यन्ताभावप्रतियोगित्वमर्थस्तत्र कालनिष्ठात्यन्ताभावप्रतियोगित्वं कारके चेदन्वेति स्वनिरूपितक्रियावत्त्वसंबन्धावच्छिन्नं कारकशक्तौ चेदन्वेति कालिकविशेषणतासंबन्धावच्छिन्नमेव देशनिष्ठात्यन्ताभावप्रतियोगित्वं तु कारकीयदैशिकसंसर्गावच्छिन्नं कारके कारकशक्तौ तु स्वनिरूपककारकघटितपम्परासंबन्धावच्छिन्नमन्वेति इत्थं च संबन्धान्तरावच्छिन्नप्रतियोगित्वमादाय न प्रयोगातिप्रसङ्गः प्रतियोगित्वमन्वयितावच्छेदकधर्मावच्छिन्नमेव भासते व्युत्पत्तिवैचित्र्यात् अतो द्वित्वावच्छिन्नाभावप्रतियोगित्वमादाय न प्रयोगातिप्रसङ्गः । अत्यन्ताभावे प्रकृत्यर्थस्य स्वावच्छेदकधर्मव्यापकाधिकरणतानिरूपिता-

धेयतयाऽन्वयः। एवमद्य भोक्ता ह्यहे ह्यश्चाह्ना भोक्तेत्यादौ ह्यश्चव्यापकत्वत्यन्ताभावप्रतियोगिभोक्तृभिन्नोऽद्य भोक्ता। अथ वा तथाविधात्यन्ताभावप्रतियोगिभोक्तृत्ववद्भिन्नोऽद्य भोक्ता इत्यन्वयबोधः। एवं इहस्थोऽयं क्रोशे क्रोशाह्ना लक्ष्यं विध्यतीत्यादौ क्रोशव्यापकत्वत्यन्ताभावप्रतियोगि यल्लक्ष्याभिन्नमधिकरणं लक्ष्यनिरूपितमाधेयत्वं वा तद्वृत्तिस्तद्वान्वा योऽवयवविभागस्तदनुकूलव्यापारकर्ताऽयमित्यन्वयबोधः। इत्थं च प्रतिदिनं भुञ्जाने ह्यश्चे ह्यश्चाह्ना भोक्तेति न प्रयोगः न वा एकप्रहारेण पादक्रोशार्धे च लक्ष्यं विध्यति पुरुषे क्रोशाह्ना लक्ष्यं विध्यतीति प्रयोगः। अत्यन्ताभावे व्यापकवृत्तित्वे प्रकृत्यर्थस्यान्वयोपगमात् स्नानादिकालावच्छेदेन ह्यश्चनिष्ठात्यन्ताभावप्रतियोगिभोक्तृत्वस्य प्रतिदिनं भुञ्जाने सत्त्वान्न दर्शितप्रयोगः। कर्तृशक्तिमध्य एव कालः। गिरेः क्रोशे क्रोशाह्ना वनं गच्छति विहग इत्यादौ कर्मापादनयोर्मध्ये देशः पाटलिपुत्रेश्वरः विंशतौ योजनेषु विंशतेर्योजनेभ्यो वा काशीस्थाय ददातीत्यादौ कर्तृसंप्रदानयोर्मध्ये देशः। शिखरादुपत्यकायां क्रोशे क्रोशाह्ना पतति शिलेत्यादावपादानाधिकरणयोर्मध्ये देशः करणकारकान्तरयोर्मध्ये देशोऽपि न भवति। एवमन्यत्रापि कारकयोर्मध्ये देशः कालश्च बोध्य इति। शाब्दिकास्तु "तदस्मिन्नधिकमि"ति "यस्मादधिकमि"तिसूत्रनिर्देशादधिकशब्दयोगे सप्तमीपञ्चम्यौ विशिष्येते अतो लोके लोकाद्वाऽधिको हरिरित्यादौ सप्तमी पञ्चमी च साधुरित्याहुः। तच्चिन्त्यं लोकेऽधिको हरिरित्यादौ निर्धारणे सप्तम्युपपत्तेः लोकादधिको हरिरित्यादौ "प-

ञ्चमी विभक्ते" इतिसूत्रेण पञ्चम्युपपत्तेरित्यस्य प्रागुक्तत्वादिति। "अधिरीश्वरे" इति सूत्रम्। ईश्वरेऽर्थे द्योत्येऽधिः कर्मप्रवचनीयसंज्ञः स्यादित्यर्थकम् अधीत्यव्ययशब्दस्य कर्मप्रवचनीयसंज्ञां विधत्ते। कर्मप्रवचनीययुक्ते पञ्चमीं ज्ञापयति "यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी" इति सूत्रं यदवधिकस्याधिकस्वरूपार्थस्य द्योतकः यन्निरूपितस्येश्वरार्थस्य द्योतकः कर्मप्रवचनीयस्तच कर्मप्रवचनीययुक्ते सप्तमी भवतीत्यर्थकम्। उपशब्दस्याधिकार्थद्योतकत्वेऽपि कर्मप्रवचनीयसंज्ञाविधायकं "उपोऽधिके चे" ति सूत्रं द्वितीयाविवरणे प्रदर्शितम्। उपसुरेषु हरिरित्यादावुपशब्दद्योत्यं सप्तम्या आधिक्यमर्थस्तत्र प्रकृत्यर्थस्यावधिमत्त्वसंबन्धेनान्वयस्तथाविधस्याधिकारस्य हरावन्वयस्तथा च सुरावधिकाधिक्यवान् हरिरित्यन्वयबोधः। आधिक्यं तु प्रकृते निरवधिदयावत्त्वमथ वा बहुत्वव्याप्यसंख्याविशेषवद्गुणवत्त्वं बोध्यम्। उपाचार्येषु द्रोण इत्यादावपि काशिकोदाहरणोऽनया रीत्यान्वयो बोध्यः उपनिष्के कार्षापणमित्यादावपि मूल्यगतावयवगता वा बहुत्वव्याप्यसंख्येवाधिक्यमिति पञ्चमीविवरणे प्रोक्तमिति। यस्य चेश्वर इत्येतावन्मात्रेण स्वामिद्योतकाधियोगे सप्तमीसिद्धौ यस्य चेश्वरवचनमित्यभिधानं स्वस्वामिनोरुभयोर्द्योतकस्याधिशब्दस्ययोगे सप्तमीं ज्ञापयति अत एव यस्य चेश्वरवचनमिति स्वस्वामिनोरुभयोरपि पर्यायेण सप्तमी भवतीति काशिका। अधिभुवि राम इत्यादावधिशब्दद्योत्यं सप्तम्याः स्वामित्वमर्थस्तत्र भुवो निरूपकतयाऽन्वयः तथाविधस्वामित्वस्य रामेऽन्वयः तथा च भूनिरूपि-

धेयतयाऽन्वयः। एवमद्य भोक्ता ह्यहे ह्यहाहा भोक्तेत्यादौ ह्यहव्यापकवृत्त्यत्यन्ताभावप्रतियोगिभोक्तृभिन्नोऽद्य भोक्ता। अथ वा तथाविधात्यन्ताभावप्रतियोगिभोक्तृत्ववद्भिन्नोऽद्य भोक्ता इत्यन्वयबोधः। एवं दूरस्थोऽयं क्रोशे क्रोशाहा लक्ष्यं विध्यतीत्यादौ क्रोशव्यापकवृत्त्यत्यन्ताभावप्रतियोगि यल्लक्ष्याभिन्नमधिकरणं लक्ष्यनिरूपितमाधेयत्वं वा तद्वृत्तिस्तद्धान्वा योऽवयवविभागस्तदनुकूलव्यापारकर्ताऽयमित्यन्वयबोधः। इत्थं च प्रतिदिनं भुञ्जाने ह्यहे ह्यहाहा भोक्तेति न प्रयोगः न वा एकप्रहारेण पादक्रोशार्धे च लक्ष्यं विध्यति पुरुषे क्रोशाहा लक्ष्यं विध्यतीति प्रयोगः। अत्यन्ताभावे व्यापकवृत्तित्वे प्रकृत्यर्थस्यान्वयोपगमात् स्नानादिकालावच्छेदेन ह्यहनिष्ठात्यन्ताभावप्रतियोगिभोक्तृत्वस्य प्रतिदिनं भुञ्जाने सत्त्वान्न दर्शितप्रयोगः। कर्तृशक्तिमध्य एव कालः। गिरेः क्रोशे क्रोशाहा वनं गच्छति विहग इत्यादौ कर्मोपादनयोर्मध्ये देशः पाटलिपुत्रेश्वरः विंशतौ योजनेषु विंशतेर्योजनेभ्यो वा काशीस्थाय ददातीत्यादौ कर्तृसंप्रदानयोर्मध्ये देशः। शिखरादुपत्यकायां क्रोशे क्रोशाहा पतति शिलेत्यादावपादानाधिकरणयोर्मध्ये देशः करणकारकान्तरयोर्मध्ये देशोऽपि न भवति। एवमन्यत्रापि कारकयोर्मध्ये देशः कालश्च बोध्य इति। शाब्दिकास्तु "तदस्मिन्नधिकमि"ति "यस्मादधिकमि"तिसूत्रनिर्देशादधिकशब्दयोगे सप्तमीपञ्चम्यौ विशिष्येते अतो लोके लोकाद्वाऽधिको हरिरित्यादौ सप्तमी पञ्चमी च साधुरित्याहुः। तच्चिन्त्यं लोकेऽधिको हरिरित्यादौ निर्धारणे सप्तम्युपपत्तेः लोकादधिको हरिरित्यादौ "प-

ञ्चमी विभक्ते" इतिसूत्रेण पञ्चम्युपपत्तेरित्यस्य प्रागुक्तत्वादिति। "अधिरीश्वरे" इति सूत्रम्। ईश्वरेऽर्थे द्योत्येऽधिः कर्मप्रवचनीयसंज्ञः स्यादित्यर्थकम् अधीत्यव्ययशब्दस्य कर्मप्रवचनीयसंज्ञां विधत्ते। कर्मप्रवचनीययुक्ते पञ्चमीं ज्ञापयति "यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी" इति सूत्रं यदवधिकस्याधिकरूढपार्थस्य द्योतकः यन्निरूपितस्येश्वरार्थस्य द्योतकः कर्मप्रवचनीयस्तच्च कर्मप्रवचनीययुक्ते सप्तमी भवतीत्यर्थकम्। उपशब्दस्याधिकार्थद्योतकत्वेऽपि कर्मप्रवचनीयसंज्ञाविधायकं "उपोऽधिके चे" ति सूत्रं द्वितीयाविवरणे प्रदर्शितम्। उपसुरेषु हरिरित्यादावुपशब्दद्योत्यं सप्तम्या आधिक्यमर्थस्तत्र प्रकृत्यर्थस्यावधिमत्त्वसंबन्धेनान्वयस्तथाविधस्याधिकारस्य हरावन्वयस्तथा च सुरावधिकाधिक्यवान् हरिरित्यन्वयबोधः। आधिक्यं तु प्रकृते निरवधिदयावत्त्वमथ वा बहुत्वव्याप्यसंख्याविशेषवद्गुणवत्त्वं बोध्यम्। उपाचार्येषु द्रोण इत्यादावपि काशिकोदाहरणोऽनया रीत्यान्वयो बोध्यः उपनिष्के कार्षापणमित्यादावपि मूल्यगतावयवगता वा बहुत्वव्याप्यसंख्यैवाधिक्यमिति पञ्चमीविवरणे प्रोक्तमिति। यस्य चेश्वर इत्येतावन्मात्रेण स्वामिद्योतकाधियोगे सप्तमीसिद्धौ यस्य चेश्वरवचनमित्यभिधानं स्वस्वामिनोरुभयोर्द्योतकस्याधिशब्दस्ययोगे सप्तमीं ज्ञापयति अत एव यस्य चेश्वरवचनमिति स्वस्वामिनोर्द्वयोरपि पर्यायेण सप्तमी भवतीति काशिका। अधिभुवि राम इत्यादावधिशब्दद्योत्यं सप्तम्याः स्वामित्वमर्थस्तत्र भुवो निरूपकतयाऽन्वयः तथाविधस्वामित्वस्य रामेऽन्वयः तथा च भूनिरूपि-

तस्वामित्ववान् राम इत्यन्वयबोधः । अधिरामे भूरित्यादावधिशब्दद्योत्यं सप्तम्याः स्वत्वमर्थस्तत्र निरूपकतया प्रकृत्यर्थस्यान्वयस्तथा च रामनिरूपितस्वत्ववती भूरित्यन्वयबोधः । अधिब्रह्मदत्ते पञ्चालाः अधिपञ्चालेषु ब्रह्मदत्त इत्यादौ काशिकोदाहरणेऽप्यनया रीत्याऽन्वयो बोध्यः । ब्रह्मदत्तः पञ्चालराजः । "विभाषा कृञि" इति सूत्रम् अधिः करोतौ कर्मप्रवचनीयसंज्ञो वा स्यादित्यर्थकम् । अत्रेश्वराद्योतकस्याधेर्योगे सप्तमी न भवति यथा यदत्र मामधिकरिष्यतीत्यादौ अत्र धातोर्विनियोगोऽर्थः सप्तम्या आदेशत्वलः कर्मघटितसंबन्धावच्छिन्नमाधेयत्वमर्थः इदंपदार्थः कर्मविशेषस्तथा चेदंकर्मविशेषवृत्तिमत्कर्मकयदभिन्नभाविनियोगकर्तृत्वं वाक्यार्थः करोतियोगेऽधेः कर्मप्रवनीयसंज्ञाविधानं दर्शितकरोतिप्रयोगे गतिसंज्ञाप्रयुक्तस्य "तिङि चोदात्तवती"तिसूत्रेण प्रसक्तस्य निघातस्य निषेधार्थमिति । कर्मप्रवचनीययोगे द्वितीयापञ्चमीसप्तमीविधानं शेषषष्ठीबाधकं सर्वा हि उपपदविभक्तयः शेषषष्ठ्यपवादिका इत्युक्तरिति शाब्दिकाः । तच्चिन्त्यम् अपवादे प्रमाणाभावात्सूत्रभाष्यवार्तिकवृत्तिग्रन्थादावपवादकत्वस्यानभिधानात् मम प्रतिभातीत्यादौ शेषे षष्ठ्यादर्शनाच्च कर्मप्रवचनीयस्य स्वरूपसतो वा प्रतेर्योगे द्वितीयाविधानाद् अत एव बुभुक्षितं न प्रतिभाति किञ्चिदित्यादौ द्वितीयोपपद्यते । एवं च तस्य ते परिपन्थिन इत्यादावपि शेषे षष्ठ्युपपद्यते अन्यथा परिपन्थिघटकपरिशब्दयोगेऽपि कर्मप्रवचनीययोगे द्वितीयादर्शनात् "परिपन्थं च तिष्ठती"तिनिर्देशादुपपदविभक्तेः शेषषष्ठ्यप-

पं.श्री चंद्रसागरजी गणिवर ।

वादकत्वे दर्शितषष्ठ्या असाधुत्वप्रसङ्गात्।ननूपपदविभक्तेः शेषषष्ठ्यपवादकत्वविरहे पूर्वं प्रदर्शितं सर्पिषो बिन्दुना योगो न त्वपिनेत्यभियुक्तवाक्यमनर्थकं स्यात् अपिना योगेऽपि शेषे षष्ठ्याः साधुत्वादुपपदविभक्तेरपवादकत्वविरहादिति चेन्न । सर्पिरपि स्यादित्यादिप्रयोगे द्वितीयाया असाधुत्वज्ञापनेन दर्शितस्याभियुक्तवाक्यस्य सार्थकत्वात् येषां कर्मप्रवचनीयस्य द्योत्यानां वाच्यानां वा हीनत्वाधिक्यवर्जनमर्यादादीनां न शेषत्वं तत्रायोग्यत्वादेव कर्मप्रवचनीययोगे न षष्ठी यथाऽनुहरिं सुरा उपसुरेषु हरिरपचिगतेभ्यो हृष्टो देव आकडारादेका संज्ञेत्यादौ यत्र तु योग्यता तत्र षष्ठी भवत्येव अत एवोपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धय इत्यादौ शेषे षष्ठी सङ्गच्छत इति ।

इति विभक्त्यर्थनिर्णयेऽकारकसप्तम्यर्थनिर्णयः ।

इति सप्तमीविवरणं समाप्तम ।

समाप्तश्चायं विभक्त्यर्थनिर्णयः ।

अन्वीक्षानलिनीप्रमोदनरविस्वय्यादिविद्याऽऽपगा-
पाथोधिः प्रथितोऽर्थिकल्पविटपी वागीशनामा सुधीः।
गौरीतुल्यगुणा विदेहविषये देवी जयन्ती च यं
प्रासूत प्रहतैनसं गिरिधरं तस्येयमासीत्कृतिः ॥१॥
तर्केऽथ जैमिनिगिरि स्फुटशब्दविद्याऽ-
भ्यासे विसृत्वरधियः शुचिशान्तहृषाः ।
धीरा इमां मम कृतिं करुणारसेन
पूर्णे मनस्यविरतं परिचिन्तयन्तु ॥ २ ॥

इति ।

शुभम्